श्रीवनमालिमिश्रविरचिता

गीतागूढार्थचन्द्रिका



सत्यतीर्थप्रतिष्ठानम्

Satyatīrtha Foundation is a non-profit organization with a motto:
Truth-seeking, Capable and Caring People Striving for Social Good.

The Foundation is inspired by the Indian thought which advocates integrated human development founded on the principles of truth, dutifulness and service with devotion to almighty. We believe that a collective effort to promote these principles built on philosophical research, integrated learning and social service can catalyze the efforts of an individual towards realizing his/her true potential.

Presently, the Foundation is working on three initiatives:

Sākṣii - An Institute for Integrative Research, is initiated with a vision to critically explore the classical and contemporary systems for evolving integrative research and applications in multi-disciplines such as philosophy, science & technology, arts, public policy and humanities.

Likucha-shankara - A House for Integrated Information and Publication, is another ambitious initiative of the Foundation. The house will be one-stop library for printed and electronic resources. It is also a house for publication in bringing the valuable unpublished, unavailable treasure, besides the much needed new-age works.

Pūrṇapramati - A Center for Integrated Learning, is a social initiative in the field of education, with a vision to groom philosophers, scientists, social leaders, entrepreneurs, artists and professionals with strong foundation in both classical and modern systems to build a holistic society. For more details, please contact:

Pūrṇapramati
989, 1st E Main Road, Girinagar, Bangalore – 560085, Karnataka, India.
Phone : + 91 80 2672 0077 Email : info@purnapramati.in Web : www.purnapramati.in

श्रीवनमालिमिश्रकृता

गीतागूढार्थचन्द्रिका

(मधुसूदनसरस्वतीकृतगीतागूढार्थदीपिकाया विमर्शात्मिका)

Śrīmadbhagavadgītāgūḍhārthaćandrikā, a hitherto unpublished Sanskrit commentary on Bhagavadgītā by Śrī Vanamāli Miśra.

Release Version 1.0
Akṣaya Tṛtīya, 16th May 2010

©Copyleft
No rights reserved. We encourage to copy, enhance or redistribute any part of this book or the entire book for non-commercial purposes.

Cost of the project: Rs. 250 per book

Typesetting
This book is generated using XƎLaTeX on Ubuntu 8.04.
Font: Unicode enabled Sanskrit 2003 and Nakula for Devanagari and Kedage for Kannada.

Publisher
"Likuchashankara"
(A House for Integrated Information and Publication)
Satyatīrtha Foundation
C/o: R P Raghuram, No. 60/14, Shamyaprasa,
4th cross, Javarayi Gardens, Thayagarajanagar, Bangalore - 560028.
Website: www.satyatirtha.org
Email: info@satyatirtha.org
Phone: +91 9900 180 550

Cover Page Design
By K. M. Sheshagiri

Print
Printed at Raṣṭrotthāna Mudraṇālaya, Chamarajpet.
No. of copies: 1000;

Mission Man-e-Script

The Mahābhārata, one of the biggest literary wonders of the world says:

यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित्

Even on the face of it, one gets curious to know how there can be a work which claims to have everything in it! Likewise, Vedic literature is said to have profound ideas that one wants to know. But, much of our ancient literature is still in rapidly decaying manuscripts form and hence unavailable for seekers. Many organizations have been working towards preserving these manuscripts using modern technologies. Certainly this preservation is a vital task and should cover all manuscripts present in every nook and corner of our planet.

But that is not enough. Knowledge is best preserved by people who understand and transmit it in the form suitable to that generation. A living tradition, which can adopt the knowledge in daily life is the best way. In view of this, as a first step, we believe that it is necessary to continue the tradition of 'man-script', in which scribe (लिपिकार) makes copies from available manuscripts, but using the contemporary technology. So our mission is to create e-texts of manuscripts and enhance their usability. ***Man-e-Script***, is today's manuscript.

Our current focus is on the unpublished manuscripts of Dvaita Vedānta. We have travelled across the country over last 3-4 years and visited many manuscript libraries while collecting information and making copies of certain unpublished manuscripts. Our objective is to create an e-Repository of unpublished manuscripts using appropriate technology and holistic principles. We are also

working on an integrated e-Catalogue of manuscripts in Dvaita Vedānta, which we have seen over many parts of the country.

Our efforts tantamount to a small drop in the ocean of Sanskrit literature. As humble servants in this field, we seek feedback and encouragement, so that we can continue and improve in our endeavour. We hope to apply traditional knowledge available in these works to fields such as education, public health, environmental sciences and humanities.

If you have an unpublished manuscript and wish to preserve it in Man-e-Script form, please contact us. Let us join hands to preserve our valuable heritage.

Srinidhi
Sreenivasa

श्रीमन्मध्वमहाचार्यपदपद्मैकसद्मनाम् ।
अणूनां महतां चापि भवतात् करुणा मयि ।।

Dedicated to the downtrodden classes of mankind. Let Bhagavadgita invoke the spirit of devotion and dutifulness against the oppressions of evil forces.

क्लैब्यं मा स्म गमः पार्थ नैतत् त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ।।

Contents

हृदयवाणी	इx
प्राक्कथनम्	xइ
Foreword	**xv**
Director's Note	**xvii**
भूमिका	xइx
Preface	**xxii**
Acknowledgements	**xxv**
Introduction	**xxvii**
1 अर्जुनविषादयोगः	६

2	साङ्ख्ययोगः	१७
3	कर्मयोगः	७०
4	ज्ञानयोगः	93
5	सन्न्यासयोगः	१२०
6	ध्यानयोगः	१३९
7	ज्ञानविज्ञानयोगः	167
8	अक्षरब्रह्मयोगः	१८८
9	राजविद्याराजगुह्ययोगः	२११
10	विभूतियोगः	२३१
11	विश्वरूपयोगः	२४८
12	भक्तियोगः	२७२
13	क्षेत्रक्षेत्रज्ञयोगः	287
14	गुणत्रयविभागयोगः	३०९
15	पुरुषोत्तमयोगः	३२३

16 देवासुरसम्पद्विभागयोगः	३३६
17 श्रद्धात्रयविभागयोगः	३५०
18 मोक्षसन्न्यासयोगः	३६५
A उदाहृतग्रन्थसूची	४०८
B Works of Vanamāli Miśra - Extracts	410
ತೆರೆಯ ಹಿಂದೆ	**436**
ಹಿನ್ನುಡಿ	**441**

हृदयवाणी

महदिदं प्रमोदस्थानं यत् सत्यतीर्थप्रतिष्ठानेन श्रीवनमालिमिश्रप्रणीताऽप्रकटितपूर्वा श्रीगीतागूढार्थचन्द्रिका प्रकाशं नीयते विदुषां च पुरस्तात् उपस्थाप्यते चेति।

वैद्यविद्यानिष्णातेन अस्मदन्तेवासिना श्रीश्रीनिधिवासिष्ठेन श्रीगीतागूढार्थचन्द्रिकाव्याख्यामधिकृत्य हस्तलिखितपत्रात्मकं त्रिविधं पुस्तकं अन्यान्यस्थलतः सम्पाद्य अधोनिर्दिष्टटिप्पण्यादिना परिष्कृता सा व्याख्या इदम्प्रथमतया प्रकाश्यते। अत एव स युवा श्लाघनार्हः। तस्य कर्मणाऽनेन ग्रन्थस्य सम्पादने संशोधने प्रकाशने च महानभिनिवेशो वर्तत इत्यनुमीयते। अतः स ज्ञानवृद्धैर्महात्मभिः आशीर्भिः संयोजनीयः।

वनमालिमिश्राः मध्वमतानुयायीति व्याख्यानसन्दर्भे मध्वभाष्यादिसमाश्रयणादेव निश्चीयते। तथा न्यायामृतटिप्पण्यादिरचनया च। परन्तु पूर्वं स अद्वैतमतावलम्बीति सम्भाव्यते। यतः तत्रतत्र व्याख्यानसन्दर्भे मध्वमताविरोधे सति श्रीमधुसूदनसरस्वत्युक्तार्थोऽपि स्वीक्रियते। मध्वमतविरुद्धार्थः खण्ड्यते च। स एवाहमिति प्रतिपत्तिः शरणागतिरित्युक्तार्थः खण्ड्यते च। भृत्यो यदि राजाऽहमिति मन्यते तर्हि स दण्ड्यते, स कथं रक्षणीय स्यात् ? इति वनमालिमिश्रेणाक्षिप्तम्।

क्वचित् मध्वमतविरुद्धच्छायाऽपि तस्य व्याख्याने दृश्यते। 'सर्वधर्मान् परित्यज्य' इत्यस्य अर्जुनेन वर्णाश्रमधर्माः सामान्यधर्माश्च परित्यक्तव्या इत्येवार्थः स्वीकृतः। वर्णाश्रमधर्माचरणं हि भगवदनुरागसम्पादनार्थमावश्यकम्।

16 देवासुरसम्पद्विभागयोगः ३३६

17 श्रद्धात्रयविभागयोगः ३५०

18 मोक्षसन्न्यासयोगः ३६५

A उदाहृतग्रन्थसूची ४०८

B Works of Vanamāli Miśra - Extracts 410

ತೆರೆಯ ಹಿಂದೆ **436**

ಹಿನ್ನುಡಿ **441**

हृदयवाणी

महदिदं प्रमोदस्थानं यत् सत्यतीर्थप्रतिष्ठानेन श्रीवनमालिमिश्रप्रणीताऽप्रकटितपूर्वा श्रीगीतागूढार्थचन्द्रिका प्रकाशं नीयते विदुषां च पुरस्तात् उपस्थाप्यते चेति।

वैद्यविद्यानिष्णातेन अस्मदन्तेवासिना श्रीश्रीनिधिवासिष्ठेन श्रीगीतागूढार्थचन्द्रिकाव्याख्यामधिकृत्य हस्तलिखितपत्रात्मकं त्रिविधं पुस्तकं अन्यान्यस्थलतः सम्पाद्य अधोनिर्दिष्टटिप्पण्यादिना परिष्कृता सा व्याख्या इदम्प्रथमतया प्रकाश्यते। अत एव स युवा श्लाघनार्हः। तस्य कर्मणाऽनेन ग्रन्थस्य सम्पादने संशोधने प्रकाशने च महानभिनिवेशो वर्तत इत्यनुमीयते। अतः स ज्ञानवृद्धैर्महात्मभिः आशीर्भिः संयोजनीयः।

वनमालिमिश्राः मध्वमतानुयायीति व्याख्यानसन्दर्भे मध्वभाष्यादिसमाश्रयणादेव निश्चीयते। तथा न्यायामृतटिप्पण्यादिरचनया च। परन्तु पूर्वं स अद्वैतमतावलम्बीति सम्भाव्यते। यतः तत्रतत्र व्याख्यानसन्दर्भे मध्वमताविरोधे सति श्रीमधुसूदनसरस्वत्युक्तार्थोऽपि स्वीक्रियते। मध्वमतविरुद्धार्थः खण्ड्यते च। स एवाहमिति प्रतिपत्तिः शरणागतिरित्युक्तार्थः खण्ड्यते च। भृत्यो यदि राजाऽहमिति मन्यते तर्हि स दण्ड्यते, स कथं रक्षणीय स्यात् ? इति वनमालिमिश्रेणाक्षिप्तम्।

क्वचित् मध्वमतविरुद्धच्छायाऽपि तस्य व्याख्याने दृश्यते। 'सर्वधर्मान् परित्यज्य' इत्यस्य अर्जुनेन वर्णाश्रमधर्माः सामान्यधर्माश्च परित्यक्तव्या इत्येवार्थः स्वीकृतः। वर्णाश्रमधर्माचरणं हि भगवदनुरागसम्पादनार्थमावश्यकम्।

अर्जुन-अर्जुनसदृशानामुत्पन्नभगवदनुरागत्वात् तस्याचरणं नावश्यकम्। सर्वं परित्यज्य भगवन्तं शरणं गत्वा भगवति अविच्छिन्ना मनोवृत्तिरेव सम्पादनीयेति अभिप्रैति। परन्तु शरणागतौ वर्णाश्रमधर्माचरणस्य प्रविष्टत्वात् तद्विहाय शरणागतिरेव न युज्यते। अनेन विवरणेन श्रीरामानुजमतवासनावासितान्तःकरणः श्रीवनमालिमिश्र इति तर्क्यते।

लिङाद्यर्थ इष्टसाधनत्वरूपकार्यत्वमेवेति सिद्धान्तः। परन्तु वनमालिमिश्रः लिङाद्यर्थः विधिवाक्ये प्रवर्तनाप्रेरणाविध्यपरपर्यायार्थ इति वदति। विधेः प्रेरकत्वं नास्तीति आचार्यसिद्धान्तः। एवं च तत्रतत्र मध्वमतविरुद्धच्छायाऽपि दृश्यते।

काम्यकर्मणाऽपि शुद्धिः सम्पाद्यते। परन्तु सा शुद्धिः स्वर्गादिभोगायैवोपयुज्यते। न तत्त्वज्ञानद्वारा मुक्तय इति विवरणं कुर्वतः मिश्रस्य हृदये मधुसूदनसरस्वतीव्याख्यासंस्कारो दृढ एव वर्तत इति ज्ञायते।

श्रीनिधिवासिष्ठस्यामुद्रितग्रन्थस्यास्य सम्पादनसंशोधनपरिष्करणप्रकाशनकर्मभिः भगवान् मध्वान्तर्गतः द्विरूपः श्रीकृष्णः अलम्प्रीतिमुपैतु। तमनुगृह्णातु। एतत्कर्मणि साचिव्यं स्वीकृतवन्तं श्रीश्रीनिवासवेदगर्भमपि मध्वान्तर्गतो वसुदेवसूनुः वसुदेवदौहित्रश्च अनुग्रहामृतवृष्ट्या पुष्णतां नितरामित्याशास्महे।

इत्यनेकनारायणसंस्मृतयः
श्रीविद्येशतीर्थाः
श्रीभण्डारकेरि मठः

प्राक्कथनम्

श्रीकृष्णार्जुनसंवादरूपा गीता मुमुक्षूणामवश्यमवगन्तव्या प्रत्यहं पाठ्या च। कर्तव्यपराङ्मुखस्य विषण्णस्य पार्थस्य प्रतिबोधनाय प्रवृत्ताऽप्येषा कृष्णवाणी भवरणाङ्गणे किङ्कर्तव्यतामूढान् विषण्णान् सर्वान् प्रतिबोधयितुमलम्। सुधियोऽत्र सर्वोपनिषदां सारं पश्यन्ति। 'दशार्थाः सर्वभारते' इति वचनमपि भारतान्तर्गतगीताया गूढार्थसद्भावमावेदयति। श्रीमध्वाचार्यैरपि भाष्यतात्पर्यादिषु लेशत एव गीतार्थः प्रत्यपादि। न्यगादि च भाष्यादौ 'गीतार्थं वक्ष्यामि लेशतः' इति। अत इदानीमपि गीतायां पूर्वाचार्यैः कण्ठतोऽनुक्ताः अभिप्रायतश्चोक्ताः अनेके गूढार्था आविष्कर्तुं शक्याः। विद्वत्तल्लजाः वनमालिमिश्राः गीतागूढार्थानां प्रकाशने प्रयतमानाः गीतागूढार्थचन्द्रिकानाम्नीं व्याख्यां वितेनुः।

सुखबोधनेन शिष्यसन्तापहारित्वात् गूढार्थप्रकाशकत्वाच्च चन्द्रिकामनुकरोत्येषा व्याख्येत्यावेदयत्यन्वर्था शीर्षिका।

साम्प्रतिकः कालः संस्कृतसाहित्यस्य भाग्योदयकालः। तत्त्वजिज्ञासूनां सञ्जीवनकालः। भारतभूमेः सुवर्णयुगः। यतोऽद्य प्राचीनाचार्यैर्विरचिताः दिव्यार्थज्ञानसन्दायिनो ग्रन्थाः महता कालेन तमसि रजसाऽवप्लुताः संशोध्यन्ते मुद्राप्यन्ते च। अदृष्टचरा शताधिका ग्रन्था वर्षाभ्यन्तर एव प्राकाश्यं नीयन्ते। तत्र विद्वांसो यतन्ते। युवानः प्रयतन्ते। गणकयन्त्रादीन्याधुनिकयन्त्राण्युपकुर्वन्ति। राष्ट्रप्रशासनमपि सहकरोति।

तत्रेदानीं वसिष्ठगोत्रजस्य श्रीनिधिनामकस्यास्य यूनः वर्षद्वयाभ्यन्तरे विहितस्य महतो यत्नस्य फलपाकोऽयमस्मत्करे विराजमानो वनमालिमिश्रकृतो

गीताव्याख्यात्मको ग्रन्थः। अभिनन्दनीयाः प्रोत्साहदानेन संवर्धनीयाश्च भवन्ति एतादृशाः परापरविद्यासु विधीयमानपरिश्रमाः सद्विद्यापरिपोषणे बद्धादरा युवानः।

सर्वेऽर्थाः सर्वान् प्रति न गूढाः। केचन कांश्चन प्रत्येव गूढाः। अत एव भाष्यटीकादिषु गीताया अनेके शब्दा न व्याख्याताः। अव्याख्यातेषु शब्देषु सुरसा सुन्दरा अर्थाः मधुसूदनसरस्वतीप्रभृतिभिर्व्याख्यातृभिः प्रकटिताः। सर्वादरणीयार्थान् निरूपयद्भिः मधुसूदनसरस्वत्यादिभिः मध्ये मध्येऽद्वैतादिस्वस्वसिद्धान्तमात्रदृष्टा विषया अपि योज्यन्ते। अतस्तद्विमर्शनेन साकं गीतागूढार्थप्रकाशनाय वनमालिमिश्रकृतः प्रयत्नः स्तुत्यर्ह एव।

सन्त्यनेके विशेषा अत्र। पश्यत। 'आश्चर्यवत् पश्यति कश्चिदेनम्' इति श्लोके वतिप्रत्ययः क्लेशमावहति। न खलु सादृश्यार्थोऽत्र सम्यक् संश्लिष्यते। 'एनं कश्चित् आश्चर्यं पश्यति। आश्चर्यमेव वदति। पश्यतीत्येवाश्चर्यम्। वदतीत्येतदेव वाऽऽश्चर्यम्' इति खल्वत्रार्थोऽभिप्रेतः। ननु आश्चर्यमिव पश्यतीति। अत आह वनमालिमिश्राः "आश्चर्यवत् = आश्चर्यं पश्यति। 'विधिवत् कृतम्' इतिवत् स्वार्थे वतिः" (गीगू.चं. २.२९)। आश्चर्यवद्वदतीत्यत्रापि कश्चिदन्यस्मै वदति सोऽपि आश्चर्यः दुर्लभ इत्यर्थः। इत्थञ्च 'आश्चर्योऽस्य वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः' (कठोपनिषत्) इत्येतदप्यत्र संवदति।

'सुखदुःखे समे कृत्वा' (गी. ३८) इत्यत्रापि समे इत्यस्य नारायणे इत्यर्थान्तरकथनमपि मनः प्रसादयति। तथाहि तत्र वनमालिमिश्रवचनम्- 'स्वसम्बन्धिनी सुखदुःखे लाभालाभौ जयाजये समे = मया लक्ष्म्या सहिते हरौ कृत्वा तदधीने कृत्वा न मदधीनमिदमित्यस्वातन्त्र्यं विज्ञाय युद्धाय युज्यस्व।'

गीतायां प्रत्यध्यायं नाम पठ्यते अर्जुनविषादयोगः साङ्ख्ययोग इत्यादि। यद्यप्येतानि भाष्यकारादिभिर्नोदलेखिषत। अत एव कैश्चिदप्रामाणिकानीमान्यसाम्प्रदायिकानि चेति नाद्रियन्ते। परमत्र वनमालिमिश्रैरिमानि नामानि समादृतानि। व्याख्याकारोऽयमष्टादशस्वप्यध्यायेष्वादौ श्लोकेनैकेनाध्यायप्रतिपाद्यार्थं सञ्जग्राह। आनुष्टुभेऽस्मिन् पद्ये तत्तध्यायनाम समसूचि। अध्यायान्ते च

कण्ठरवेणैवाध्यायनामोदघोषि।

व्याख्यायां तत्रतत्रापव्याख्यानान्यनूद्य विस्तरश अपाचकार। प्रमाणवचनत्वेन परेणोपन्यस्तं वचनमप्यप्रामाणिकमित्यप्युदाजहार। पश्यत मधुसूदनसरस्वत्युल्लिखितसप्तभूमिकानिराकरणावसरे वनमालिमिश्रवचनम् (पृ. सं. ७९) - 'वसिष्ठनामकग्रन्थस्य पौरुषेयस्य त्वद्वाक्यतुल्यत्वेनाप्रामाणिकत्वात्' इति।

अत्रायं भावः। तदुक्तं वसिष्ठेनेति त्वयोदाहृतवचनं नारुन्धतीपतेः। नहि सः एतदप्रामाणिकं सर्वशास्त्रविरुद्धं वदेत्। किन्तु वसिष्ठनामकस्यान्यस्यैवाविदुष इति।

समाधिसुषुप्त्योर्वैषम्यप्रतिपादनम्, चतुर्विधमुक्तिस्वरूपनिरूपणम् इत्यादयोऽनेके अपूर्वा विषया अत्र व्याख्यायां प्राकाशिषत। व्याख्यामध्ये प्रसङ्गसङ्गत्या प्रवृत्तानीमानि चिन्तनानि स्वतन्त्रप्रबन्धा इव भासमाना जिज्ञासुजनसुबोधकाः सुज्ञमनश्चमत्कारकाश्च विराजन्ते।

परन्त्वेषा सहृदयमनोहारिणी जिज्ञासुजनतोषिणी च व्याख्यैतावत्पर्यन्तं ग्रन्थालयेषु मञ्जूषान्तः गाढगूढा एवासीत्। इदानीं भगवत्कृपया श्रीनिधिमहाभागेन महता यत्नेन प्राकाश्यमानीयमाना फुल्लं विकासयति सहृदयचेतःकुमुदानि।

ग्रन्थसंशोधनकर्मैतत् असिधारागमनम्। नेदं सुलभसाध्यम्। एकयैव मातृकया संशोधनं न शक्यकार्यम्। प्रप्रथमं मातृकाः मृग्याः। ताश्च सङ्ग्राह्याः। मातृकाशोधनं विधेयम्। विशोधनं च कार्यम्। संशोधनमपि कर्तव्यम्। समानविषयकग्रन्थैः तुलनपूर्वकं विमर्शः खलु संशोधनमुच्यते। ग्रन्थकर्तुश्च शैल्यादिविज्ञानाय तत्प्रणीतग्रन्थान्तरपरिवीक्षणादि विधेयम्। चिरञ्जीविना श्रीनिधिना संशोधनसम्बन्धिनि सर्वस्मिन्नप्यस्मिन् विषये महान् विक्रमः प्रादर्शि।

क्वचिदेव स्थले पाठनिर्णयो न जातः। अस्फुटवचनमेव मुद्रापितम्। निर्णायकमातृकाया अनुपलब्धिरत्र निदानम्। तत्तत्स्थलशोधनार्थमितोऽपि मातृकादिप्राप्त्यै प्रयत्नो विधेयः।

आधुनिकवैद्यकविज्ञाने विहितभूरिश्रमः सम्प्रति IIMB विद्यालये विश्वख्याते शोधच्छात्रत्वेन सञ्चितोऽयं प्रकृतग्रन्थशोधकः आङ्ग्लभाषादिष्विव संस्कृतवाङ्मयेऽपि बद्धादरः विहितप्रयत्नश्च। विशिष्य माध्ववेदान्तप्रमेयेषु निष्कृष्टं ज्ञानम्, ग्रहणधारणपाटवम्, सूक्ष्मविषयविवेचनसामर्थ्यादिभगवद्दत्तप्रभावबलेनायं व्याख्याग्रन्थः सुष्ठु समपादि।

मनुष्यकृतं सर्वं कर्मासम्पूर्णम्। परिष्कारमपेक्षत एव। अत्रापि कर्मणि तथा। इतोऽपि परिष्कृतस्य ग्रन्थस्य संशोधने प्रणयने चास्य सामर्थ्यं विवर्धताम्। एतादृशान्तरितकालगर्भनिगूढज्ञानसन्ततेः प्रसरणविस्तरणदक्षतामस्मै हरिवायू अनुगृह्णीतामित्याशासे।

डा. हेच्. सत्यनारायणाचार्यः
उपप्राध्यापकः, नवीनन्यायशास्त्रम्
पूर्णप्रज्ञविद्यापीठम्
बेङ्गलूरु

Foreword

Vanamāli Miśra's significant contribution to Dvaita-Advaita polemics has made him immortal. He has rightly criticized Brahmānanda and others in his magnum opus Nyāyāmṛtasaurabha in defense of Dvaita. Thus he is one of the major writers of Dvaita Vedanta in eighteenth century. It is a great pleasure to see Vanamāli Miśra's another work "Gītāgūḍhārthaćandrikā" being edited by Dr. Srinidhi.

Though basically a qualified medical doctor, he has made great progress into the study of Tattvavāda under the able guidance of Śrī Vidyeśa Tīrtha Swāmīji. I congratulate Dr. Srinidhi for his laborious effort in collection and collation of the manuscripts and edition of the work that was awaited for long.

Dr. Srinidhi is one of the new breed of young scholars that is proficient in both ancient and modern sciences. We need thousands of such individulas to put Tattvavāda in forefront in this era of global village where everybody is running westwards. Fortunately, the blood of ancient saints is still flowing in our bodies and many minds are still running eastwards. I hope such young scholars will hold the flag of Tattvavāda aloft.

Dr. Srinidhi along with Sreenivasa Guttal had earlier edited Nyāyaratnāvali of Padmanābhatīrtha. That splendid edition, apart from being praiseworthy for many other reasons, is the first LaTeX publication of Dvaita manuscripts using all the benefits of technology. That showed a new avenue for others in using the technology.

Coming to the present edition which is based on a very few not-so-good manuscripts, it is natural that in many places we face difficulties in understanding. But in every page I find editor's labor in fixing the readings, locating the sources, finding the parallels in other similar works. Most of the earlier writers quoted by Vanamāli are traced for the parallels and thus we are able to understand the broader arena of Gīta. The appendix containing the extracts of all the available works of Vanamāli is also very helpful. In the introduction, the editor has discussed the style and some important points discussed in this work. I hope the learned readers will encourage this young scholar in his coming ventures which are in pipeline.

I conclude with a hope that, apart from this kind of academic works, Dr. Srinidhi will work on many other areas which have the high potential of influencing present kind of generation by validating the ancient's way of life.

Dr Veeranarayana Pandurangi,
Head, Dept of Darshana,
J.R.R.S. University, Jaipur

Director's Note

Satyatīrtha Foundation is happy to present the new work – the critical edition of a commentary on Bhagavad-gita by Sri Vanamali Mishra – one of the celebrated Dvaita philosophers of North India, in the hands of scholarly readers.

The foundation aims at introducing an integrative approach in our studies, research and social service. In all these arena it aspires to bring in the best of our Indian value systems using the best technologies. This is a long and never-ending journey on the tracks of Tatvavada Darshana (Realistic Philosophy) of Acharya Madhva. As part of this journey, we have floated three initiaves: "Purnapramati" - a learning center for kids, Sākṣii - a research institute, and Likucha-shankara - an information and publication house. Presently "Man-e-Script" is the major mission undertaken by Sākṣii. Introducing Vanamali Mishra's contribution to the southern scholarship through a series of publications would be taken up as a long term project. The present publication is the first among the series of unpublished works of Vanamali Mishra, planned under this project. This is initiated in a befitting manner by painstaking efforts of Dr. Srinidhi, young and talented Research Fellow of our Research Team. He is

a blend of both modern and traditional learning. I look forward for a number of quality works from him.

I personally feel very proud to be the part of Satyatirtha, which is unique of its kind for its members are committed to the 'Indianness' in a broader sense and they are affiliated to different disciplines like Medicine, Public Policy, Engineering and Technology, Science, Finance etc.

We deem these academic enterprises to be a success, only when scholarly community is satisfied. We eagerly wait for feedback.

Ananta-Ćaturdaśi
2010

Shrinivasa Varakhedi
Bengaluru

भूमिका

कृष्णं मध्वपतिं नत्वा कृष्णगीतं गुणाम्बुधिम् ।
गुरून् श्रीसत्यवंशस्थान् भूमिकेयं वितन्यते ।।

जयति भगवतो कृष्णस्य मुखकमलाद्विनिःसृता भगवद्गीता निरतिशयसौन्दर्यपारोऽपारो भक्तवत्सलो भगवान् कृष्ण इव साक्षात् । तस्याश्च निशानिगूढमिव गूढमर्थं स्वीयया चन्द्रिकया भासयन्ती वनमालिमिश्रकृता व्याख्या गूढार्थचन्द्रिका च । तामिमामपूर्वामप्रकटितपूर्वां व्याख्यां तत्रभवतां सम्मुखे सामोदं सविनयं यथामति संस्कृत्य समर्पयामि ।

वनमालिमिश्राः वैष्णवसम्प्रदायानुसारिणः नूनम्, किन्तु निम्बादित्यमतावलम्बिन इति केचित् । तन्न साधु । सिद्धान्तवैषम्यात्, मध्वमुखालङ्कारकर्तृत्वात्, नियमेन सर्वेषु ग्रन्थेषु मध्ववन्दनस्य निबद्धत्वात्, अन्येषां तददर्शनात्, माध्वग्रन्थोपजीवनस्य स्फुटत्वाच्चेत्यादि निपुणतरं प्रतिपादितं कृष्णमूर्तिशर्मा-निपाणीकर-प्रभृतिभिः । अपि चास्यां गीताव्याख्यायां "महान्तस्त्वेवं व्याचक्षते " इति मध्वाचार्याणामेव व्याख्याऽनूदिता वनमालिना । तथाऽपि न साम्प्रदायिकासु माध्वगीताव्याख्यास्विवेयं भाष्यकारोक्तार्थसङ्ग्रहणात्मिका केवलम् । किन्त्वस्ति महान् विशेषः ।

इयं चन्द्रिका शब्दतोऽनुसरति मधुसूदनसरस्वतीकृतां गीतागूढार्थदीपिकां प्रायः, अभिप्रायतस्तु श्रीमदानन्दतीर्थान् । गूढार्थदीपिकामेव सूक्ष्मपरिष्कारैः मध्वमतानुसारिणीं विदधता वनमालिना गूढार्थचन्द्रिकाकृता न केवलं वैषम्यम्,

अपि तु साम्यं च प्राकाशि माध्वशाङ्करवेदान्तयोः गूढाभिसन्ध्या । अयं च परिष्कारपन्थाः अनितरसाधारणपाण्डित्यसाध्याऽश्रुतपूर्वा च।

सत्त्वशुद्धिज्ञानद्वारा मोक्ष इतीयं पङ्क्तिः मधुसूदनीये, सा तु परिष्कृता सत्त्वशुद्धिज्ञानहरिप्रसादद्वारा मोक्ष इति वनमालिना । भगवदाराधनस्य भगवद्रूपत्वमनन्तं फलमाह इति तु भगवदाराधनस्य भगवत्साधर्म्यरूपमनन्तं फलमाह इति। तथा मत्त एव हिरण्यगर्भात्मन इत्यस्य स्थले हिरण्यगर्भान्तस्थात् मत्त इति निरटङ्कि । उच्छिष्टं भुक्तावशिष्टं इतीयं मधुसूदनव्याख्या, वनमालीये तु उच्छिष्टम् अविहितभुक्तावशिष्टमिति। अन्यानि च बहूनि दृश्यन्ते तत्रतत्र। तानि यथामति टिप्पण्यां सङ्गृहीतानि। यदा तु मधुसूदनीयव्याख्या सर्वतः स्वमत्यनुकूला स्वमतानुकूला च वर्तते तदा त्वपरिष्कृतैव गूढार्थदीपिका पठ्यते गूढार्थचन्द्रिकायामपि। इयं पद्धतिः प्रायः चतुःशताधिकश्लोकव्याख्यासु दृश्यते। इयं प्रथमा पद्धतिरस्यां व्याख्यायां मधुसूदनीयव्याख्यानुवादात्मिका। अस्यामेव पद्धत्यामन्याऽपि रीतिः यच्छब्दतो मधुसूदनीयव्याख्यामनूद्य तद्विमर्शनम् । सेयं प्रथमा रीतिः मधुसूदनीयव्याख्याधरिता।

यत्र नेयं पद्धतिरनुसृता तत्र त्वधोनिर्दिष्टास्वन्यतमा एका। विमर्शाभावस्तु सर्वस्वासु साधारणः। तत्राद्या साक्षात् माध्वव्याख्योपजीविका। द्वितीया रामानुजादिभाष्योक्तार्थोपजीविका। तृतीया त्वनेकभाष्येभ्यः स्वमताविरोधिनामर्थानां सङ्ग्रहणात्मिका। तद्यथा अष्टमेऽध्याये तृतीयश्लोके मध्वभाष्यादेकः, मधुसूदनव्याख्याया एकः, रामानुजभाष्यादेक इति त्रयोऽप्यर्थाः सम्मतत्वेन स्वीकृताः। चतुर्थी च पद्धतिरपूर्वार्थप्रकाशिका प्रायः पूर्वाचार्यैरनुक्ता अन्वर्थं गूढार्थचन्द्रिका। यथा द्वादशेऽध्यायेऽव्यक्तपदवाच्यत्वं योगिज्ञेयस्य, पञ्चदशे अक्षरशब्दवाच्यत्वं रमादिमुक्तानामित्याद्यर्थनिरूपणमित्यादि। तत्राद्याः पद्धत्यः टिप्पण्याद्यवलोकनेन स्फुटं प्रतिभासन्ते।

अत्र दीर्घप्रबन्धैर्निरूपितेषु विचारेषु जीवाणुत्वसमर्थनम्, भगवतो सच्चिदानन्दविग्रहत्वसमर्थनम्, समाधि-सुषुप्त्योर्भेदः, सप्तभूमिकानिरूपणम्, क्षेत्रज्ञविचारः, तत्त्वमसिश्रुत्यर्थः, भगवतो वैषम्यनिराकरणम्, यागीयहिंसाया पापासाधकत्वसमर्थनम्, चतुर्विधमुक्तिनिरूपणम्, अन्नमयादीनां कोशत्वविचारः,

समयानामासुरत्वविवेचनम्, जीवकर्तृत्वविचारः, निर्विकल्पकज्ञानस्य मोक्षहेतुत्वनिराकरणम् इत्याद्याः प्रमुखाः। विस्तरस्तु प्राकृतभाषस्थायां भूमिकायाम् । वनमालिमिश्राणां ग्रन्थानधिकृत्य विमर्शात्मकं लेखनं त्वाङ्ग्लभाषस्थायां भूमिकायाम् ।

एवं नैकविशेषैर्विशिष्टामिमां व्याख्यां यथामति मातृकाशोधनेन परिष्कृतां विद्वज्ञनपरिषदे समर्पयामि। नाहं संस्कृतज्ञः। वेदान्तमीमांसा तु दूरतः। तथाऽपि प्राचीनग्रन्थरक्षणोत्साहायत्ता साहसिकीयं प्रवृत्तिः। ततश्चास्त्येव शोधकार्ये न्यूनता। तां वात्सल्येन तितिक्षन्तु सन्तः। प्रमादान् क्षाम्यन्तु महान्तः। भक्तवत्सलः प्रीयताम् ।

इति,
श्रीविद्येशतीर्थश्रीचरणानामन्तेवासी
वसिष्ठकुलजः श्रीनिधिः

Preface

In the year 2007 we were doing a preliminary survey of manuscripts in Dvaita Vedanta from catalogues and research papers. The website of IGNCA and the work of Dr BNK Sharma were of great help. We made a list of manuscripts available in different libraries including Bhandarkar Oriental Reserach Institute (BORI) at Pune. During my trip to Pune in 2007 to attend a conference of Association of Rural Surgeons of India, I had an opportunity to visit BORI. With the kind help of an ecologist, Dr. Narayan R Desai, I got copies of a few manuscripts from the Institute. The commentary of Vanamāli on Bhagavadgīta was one among them. But the manuscript was incomplete.

With our continued search in the web, we found that a couple of manuscripts of the same work were preserved in a library in Jammu, 2643 km away from our home town. With the help of our friend Sridhar, and grammar teacher Dr. Lalit Kumar Tripathi of Allahabad we were able to get copies of these.

Out of the three manuscripts we could trace in Indian institutes, I had to rely mostly on a single manuscript as others were incomplete. The complete one is written in Devanagari script

admixed probably with Śārada script for some letters. As the commentary closely follows that of Madhusūdana Saraswati, the published work of Madhusūdana has also been used.

The information on the works of Vanamāli Miśra obtained by a detailed study of many catalogues, and personal visits to many manuscript collections[1] is included in the introduction. The salient features of Vanāmali's commentary are also discussed in the introduction. Extracts from the beginning and end of all his available works are given in the appendix. A bibliography is included at the end. To facilitate electronic use, an e-copy of the book is also being released.

Sincere attemps is made under the able guidance and support of many scholars and students to fix the correct reading and to give some necessary footnotes. However, errors still exist. This exercise is done more with passion than ability. Critical feedback from scholars and readers to improve the quality in future release versions is welcome. I request elders to forgive the errors and bless for our future endeavours.

प्रमाणसिद्धान्तविरुद्धमत्र यत्किञ्चिदुक्तं मतिमान्द्यदोषात् ।
मात्सर्यमुत्सार्य तदार्यचित्ताः प्रसादमाधाय विशोधयन्तु ।।

May the noble-minded scholars instead of cherishing ill feeling kindly correct whatever errors have been here committed through the dullness of my intellect in the way of wrong interpretations and misstatements.[2]

---

[1] North Indian tour done twice in last two years has given immense information on the works of Vanamāli spread across different libraries. [2] Translation is by Surendranath Dasgupta in his preface to A History of Indian Philosophy

I offer my humble praṇāms to my revered teacher H. H. Śrī Vidyeśa Tīrtha Swāmīji of Satya Tīrtha Pīṭha, Bhandārakēri, Udupi, for blessing through his words in हृदयवाणी , Dr. H. Satyanārāyaṇāćārya and Dr. Veeranārayaṇa Pāṇḍurangi for their critical reviews.

Śrīnidhi Vāsiṣṭha

Acknowledgements

- Scribes(लिपिकार s) of the manuscripts.

- Srinand Bapat, Assistant Curator, The Bhandarkar Oriental Reasearch Institute, Pune for providing the photocopies of an incomplete manuscript of gītāgūḍhārthacandrikā, and Nyāyāmṛtasaugandhya.

- Pandit Sri Hanumeśācārya Gangūra for sharing the data of a pre-publication version of Viṣṇutattvaprakāśa.

- Dr Shrinivasa Varakhedi and Dr VNK Pandurangi for enabling the research activities in manuscriptology.

- Sri Sridhar Subbanna and Sri Vijayananda for going through the proof.

- Sri K M Sheshagiri for neatly designing the cover page.

- Rasthrotthana Mudraṇālaya for a neat printing work in time.

- Teachers, parents and well wishers.

Special Thanks To

Dr. Lalitkumar Tripathi . Well known grammarian in Ganganath Jha Institute, Allahabad for his active pursual in procuring the photocopy of two manuscripts of Miśra's gītānigūḍhārtha-candrikā from Sri Ranbir Singh Library, Jammu. Sri Tripathiji had taught us the structure and purport of Aṣṭādhyāyi in a nutshell during our one month stay in Allahabad 2 years ago. I am deeply indebted to him.

Dr. Narayan R Desai . An ecologist, a great devotee and a dedicated social worker. His initiatives in the tribal areas of the western ghats near Pune, are an inspiration. He has played a vital role in our 'mission man-e-script' through encouraging support.

Introduction

Vanamāli Miśra

Life

Vanamāli Miśra was a great scholar of Indian Philosophy particularly in Dvaita-Advaita Polemics. Born in a Bhāradwaja family, he lived in a village *Triyugapura* near Vṛndāvan of today's Uttar Pradesh in the 17th century. His teacher's name is Viṣṇu. Though he was a follower of Dvaita School of Vedanta, he does not seem to hail from a traditional Mādhva family. Nothing more is known on his life or date[2]. He has been wrongly placed in the Nimbarka tradition by Dr Dasgupta[1] and others[7]. This claim is rejected with definite evidences by Dr Sharma[2] and Prof. Nipanikar[4]

Works

There are many scholars with the name Vanamāli Miśra in medieval Indian History. Thus it becomes difficult to differentiate the works of other Vanamāli Miśras from that of Vanamāli

Miśra, the Dvaitin. Bhaktiratnākara (Deccan College No. 710 of XV of 1882-3, now preserved in BORI, another copy in Vadodara 9960), Kṛṣṇa- karṇāmṛta vyākhyā (Vadodara 11339) Gitagovindavyākhyā - vanamāli sanjīvinī (Vadodara 1553) are works of Vanamāli, son of Shivadasa Bhatta, not the Vanamāli Miśra. Similarly Vaiyyākaraṇakasūti (edited by Sri Lalitkumar Tripati, Allahabad), Sandhyamantravyakhya (Ranbir Singh Library, Jammu 672, 5210) and Sarvatīrthaprakāśa (Anup Library, Bikaner General number 1837, Serial number 61) are works of Vanamali Mishra, son of Mahesha Mishra and pupil of Bhattoji Dikshita, but not the Dvaitin Vanamali.

There have been many attempts earlier to list the works of Vanamāli Miśra. The first such attempt can be seen in the report of Prof. Bhandarakar, 1882[1]. The next attempt was by Gopinath Kaviraj, in his foreword to Madhvamukhālankaāra, in 1936[6]. These attempts are reviewed by Sharma[2]. The list that can be inferred from these papers is as follows:

1. न्यायामृतसौगन्ध्यम्
2. तरङ्गिणीसौरभः
3. न्यायरत्नाकरः
4. भक्तिरत्नाकरः
5. मारुतमण्डनम् (मध्वमुखालङ्कारः)
6. जीवेशाभेदधिक्कारः
7. प्रमाणसङ्ग्रहः

[1] Quoted by Dr. A.V. Nagasampige[3]

8. ब्रह्मसूत्रसिद्धान्तमुक्तावलिः
9. विष्णुतत्त्वप्रकाशः
10. वेदान्तदीपिका
11. वेदान्तसिद्धान्तसङ्ग्रहः (श्रुतिसिद्धान्तसङ्ग्रहः)
12. न्यायामृततरङ्गिणीकण्टकोद्धारः
13. अभिनवपरिमळम्
14. अद्वैतसिद्धिखण्डनम्
15. गीताव्याख्यानम्
16. श्रुतिसिद्धान्तप्रकाशः

Among these भक्तिरत्नाकरः mentioned by Dr. Sharma is the work of a different Vanamāli Miśra. न्यायरत्नाकरः[1] is not a work of Vanamāli. It is an abridged version of सौरभम् by Kumbhakoṇa Anandatīrthāćārya and edited by Madhava Pandurangi and Dr. Veeranarayana K Pandurangi[2]. Also, Dr. Sharma presumes that अद्वैतसिद्धिखण्डनम् is another name for one of his works on Nyāyāmṛta and that जीवेशाभेदधिक्कारः is a reply to भेदधिक्कारः. , both of which could not be validated.

Among the remaining works, it is quite possible that the manuscript of न्यायामृततरङ्गिणीकण्टकोद्धारः listed in Bhandarkar's report may actually be the popular work of Śrī Ānandabhaṭṭāraka bearing the same name. A manuscript is preserved at Adhyatmika Kendra, Mantralaya bearing the name अभिनवपरिमळम् .

---

[1] The work, also called Brahmanandiya Khandana is preserved in Sampurṇānanda Library, Varanasi (92871). [2] My sincere thanks to Dr VNK Pandurangi for providing me with this information.

This work is the same as न्यायामृतसौगन्ध्यम् . Hence it is prudent to reject Gopinath's position of listing the two works separately. The first two papers do not give much details on the availability of the manuscripts. Though Dr. Sharma refers to the manuscript number for those he has seen personally, other works were not traced.

Therefore, the list of works of Vanamāli, needs to be updated with the information presently available. The following is one such attempt to update the same:

श्रुतिसिद्धान्तदीपिका Published[4]. The manuscript of this work is preserved in Vishweshwarananda Vedic Research Institute, Hoshiarpur(213, 2181), Sampurnanada Library, Varanasi (A1353, 91650 [6.186]). The work वेदान्तदीपिका preserved in Sampurnanada Library, Varanasi (27246), Nagari Pracarani Sabha, Varanasi (436, 3346) seem to be the same work as the colophons in both the manuscripts used in the editing of श्रुतिसिद्धान्तदीपिका read as वेदान्तदीपिका .

श्रुतिसिद्धान्तप्रकाशः Published[4]. The manuscripts used for this publication do not have the first folio, and a few unresolved doubts are seen here and there. This work is preserved in Rajasthan Oriental Research Institute, Jodhpur(28660). The manuscript C 947 (sl no 44290) in ORI Mysore is also the same work but wrongly attribubted to Ramacarya in the colophon. Another incomplete work is preserved in ORI Mysore (C 346, sl no 44289). As the RORI manuscript, and C 947 are complete, a revised edition will be brought out shortly.

ब्रह्मसूत्रसिद्धान्तमुक्तावलिः Published[5]. This work is named Brahmasūtra vṛtti in the catalogue of ORI Mysore (A 447, sl no 43825).

मध्वमुखालङ्कारः(मारुतमण्डनम्) Published[6] The manuscript is available at BORI(descriptive catalougue serial no. 761 called marutamandana.) This work is named Brahmasūtra vṛtti in the catalogue of ORI Mysore (B 947 sl no 43826)

श्रुतिसिद्धान्तसङ्ग्रहः(वेदान्तसिद्धान्तसङ्ग्रहः) Vedanta Siddhanta Sangraha preserved in RORI Jodhpur(177, 6157) and(?) Sampurṇānanda Library, Varanasi (27249) is the same work. वेदान्तसिद्धान्तसङ्ग्रहः Published in 1913 from Benares[7]. A revised edition with the name श्रुतिसिद्धान्तसङ्ग्रहः is published recently from Bengaluru[3].

न्यायामृतसौगन्ध्यम् Partially published from Calcutta under the editorship of Sri Ananta Krishna Shastri. The manuscripts are available at BORI(descriptive catalougue serial no. 29 called advaitasiddhikhandana), ORI Mysore(C 2219, sl no 43413) and Adyar (686, 71382 and 687, TR 277)

चण्डमारुतः The work is preserved in Sampurnanada Library, Varanasi (27397) and in Adhyatmika Kendra, Mantralaya (776)

युक्तितरङ्गिणीसौरभम् The manuscript is preserved in ORI, Baroda (2655) and ORI Mysore(A 320 and P 2247).[1]

प्रमाणसङ्ग्रहः The manuscript is preserved in RORI, Jodhpur (29483), Sampurnanada Library, Varanasi (27221), Nagari Pracarani

[1] Dr VNK Pandurangi told me that the work preserved in Mysore is more elaborate than the one at Baroda.

Sabha, Varanasi (327,1133)

वेदान्तरत्नावलिः This work is preserved in Rajasthan Oriental Research Institute, Jodhpur(33957). The Manuscript in incomplete.

वेदान्तसिद्धान्तरत्नावलिः This work is preserved in Rajasthan Oriental Research Institute, Alwar. (3012/1082). The Adi and anta are taken from the catalogue of Sanskrit and Prakrit Manuscripts part XXI RORI page no. 739-740.

गीतानिगूढार्थचन्द्रिका The present work, hitherto unpublished. The manuscripts are preserved in BORI, Pune(292/1895-98) and Shri Ranbir Singh Library, Jammu (2344-complete, and 2714-incomplete)

विष्णुतत्त्वप्रकाशः The manuscripts are preserved in Nagari Pracarani Sabha, Varanasi (477,862), and Sampurnanda Library, varanasi (3205, 51430 [11.274]) and a private collection in Hopset.

Dr. BNK Sharma has wrongly indentified a manuscript in Mysore (C 350) as विष्णुतत्त्वप्रकाशः . This manuscript is in fact विष्णुतत्त्वप्रसिद्धिः .

विष्णुतत्त्वप्रसिद्धिः The manuscript wrongly identified by the scibe of the manuscript itself, and hence naturally so in the catalougue and by Dr. BNK Sharma as विष्णुतत्त्वप्रकाश is preserved in Mysore C 350 A and C 350 B(Sl no. 44245, 44246). This work is definitely not विष्णुतत्त्वप्रकाश , and I assume its name to be विष्णुतत्त्वप्रसिद्धि for following reasons:

- This manuscript is completely different from the manuscript

of विष्णुतत्त्वप्रकाशः available in a private collection at Hospet.

- One of the benedictory verses reads:

  नत्वा श्रीगुरुपादाब्जं श्राव्यते वनमालिना।
  प्रसिद्धिर्विष्णुतत्त्वस्य प्रीतये कमलापतेः ।।

- There is a reference in this work इत्यादिस्मृत्या विष्णोर्मण्डलस्थत्वं प्रतिपादितं विस्तृतमस्माभिः विष्णुतत्त्वप्रकाशे while commenting on the 32nd verse छन्दोगै रवि....

भागवतचन्द्रिका A manuscript of this work is preserved in BHU, Varanasi (7169). Two incomplete manuscripts are preserved in ORI, Mysore (C 374/B and C 2378/2)

वेदान्तसिद्धान्तमुक्तावलिः The work is preserved in Sampurnanada Library, Varanasi (27498 and 27248). I have not seen this manuscript. It may be the same as 3, 11 or 12.

जीवेशाभेदधिक्कारः The manuscript could not be traced.

The work एकादशीमाहात्म्य by Vanamali Bhaṭṭa preserved in Sampurṇānanda Library, Varanasi (50348 [incomplete 50 pages]) needs to be checked for the authorship.

Here is the final list with additions and deletions to the earlier lists:

1. श्रुतिसिद्धान्तदीपिका
2. श्रुतिसिद्धान्तप्रकाशः
3. ब्रह्मसूत्रसिद्धान्तमुक्तावलिः

4. मध्वमुखालङ्कारः(मारुतमण्डनम्)

5. श्रुतिसिद्धान्तसङ्ग्रहः (वेदान्तसिद्धान्तसङ्ग्रहः)

6. न्यायामृतसौगन्ध्यम्

7. चण्डमारुतः

8. युक्तितरङ्गिणीसौरभम्

9. प्रमाणसङ्ग्रहः

10. वेदान्तरत्नावलिः

11. वेदान्तसिद्धान्तरत्नावलिः

12. गीतानिगूढार्थचन्द्रिका

13. विष्णुतत्वप्रकाशः

14. विष्णुतत्वप्रसिद्धिः

15. भागवतचन्द्रिका

16. जीवेशाभेदधिक्कारः

17. वेदान्तसिद्धान्तमुक्तावलिः

The Present Work

The Salient Features

The observations of Prof. Nipanikar[4] about the author on the mastery over prose but faulty versification hold valid to this work also. As Prof. Nipanikar has discussed the language and style

of the author in detail, I will try to discuss briefly on the salient features only from a technical point.

Vanamāli Miśra's commentary on Bhagavadgītā unlike most[1] of the other Dvaita commentaries on Bhagavadgītā, does not intend just to summarise the points made in गीताभाष्य and गीतातात्पर्य, but gives many novel interpretations. He seems to be influenced by commentaries other than that of Madhva also like गीताभाष्य of शङ्कराचार्य, गीताभाष्य of रामानुजाचार्य, and गूढार्थदीपिका of मधुसूदन सरस्वति etc.

Author seems to deal the subject independent of the tradition, besides following Dvaita tenets. Nevertheless, his faith to this school can be proved beyond doubt:

1. महान्तस्तु शरीरं यदवाप्नोति इत्यारभ्य यतन्तोऽप्यकृतात्मनः इत्यन्तमीश्वरपरतया व्याचक्षते।

2. महान्तस्तु, "यो मामव्यभिचारेण भक्तियोगेन सेवते स ब्रह्मभूयाय कल्पते। 'तासां ब्रह्म महद्योनिः' इत्यादिना प्रागुक्ता चित्प्रकृतिर्लक्ष्मीपदेनोच्यते। ब्रह्मवद्भूयं ब्रह्मभूयं तस्मै ब्रह्मभूयाय लक्ष्मीवत् मम प्रियो भवतीत्यर्थः। ननु त्वद्भक्तानां लक्ष्मीतुल्यता कथम्? लक्ष्म्युपासकानामेव लक्ष्मीतुल्यता युज्यते। त्वद्भक्तानां त्वत्तुल्यता। तत्राह - ब्रह्मणः लक्ष्म्याः अहं प्रतिष्ठा आश्रयः। सा मदाश्रिता मदविनाभूता। तां प्राप्तो मामेव प्राप्तः। तत्तुल्यतां प्राप्तेन मत्तुल्यता प्राप्तेवेति भावः। शेषं प्रागिव" इति व्याचक्षते।

3. महान्तस्तु "एवं दृष्टश्रुतस्वरूपं त्वां 'मत्कर्मकृत्' इत्याद्युक्तप्रकारेणोपासते, ये चाप्यक्षरमव्यक्तं लक्ष्मीतत्त्वमुपासते तेषाम् उभयेषां मध्ये

[1] Sri Vadiraja T. in his Lakṣālankāra also gives many new interpretations to Bhagavadgītā.

के योगवित्तमाः अतिशयेनोपायविदः? । 'अक्षरात् परतः परः' इ-त्यादौ चित्प्रकृतिरेवाक्षरपदवाच्या । अक्षरादुत्तमस्य हरेरभिधानात्" इति व्याचक्षते ।

This work closely follows the गूढार्थदीपिका of मधुसूदन सरस्वति. He has probably taken Madhusūdana's commentary as a template[1]. He agrees with Madhusūdana's commentary in more than 500 verses[2] with finer corrections to suit his school.

He identifies critical philosophical questions and summarises the intricate details comprehensively. Without compromising the accuracy he takes care to keep the language simple. Some of such topics that he has dealt in detail in this work are:

- ऐश्वर्यात् भगवति विरोधाभावः(११.२०)
- भगवतो सच्चिदानन्दविग्रहवत्त्वसमर्थनम्(४.६)
- चतुर्विधमुक्तिनिरूपणम्(८.११)
- भगवतो वैषम्यनैर्घृण्यनिराकरणम्(९.९)
- जीवकर्तृत्वविचारः(२.१९, १८.१६, १३.२९, १४.१९)
- जीवस्य दुःखसम्बन्धः कथम्?(२.१५, १३.२०)
- भेदसत्यत्वसमर्थनम्, तत्त्वमसिश्रुत्यर्थश्च(२.१३)

[1] He seems to be indicating that even in the name गीतागूढार्थचन्द्रिका for गीतागूढार्थदीपिका [2] Except for following verses Vanamāli's commentary seems to be influenced by Madhusūdana Sarswati: 2/12-18, 21, 25, 28-29, ,38-40, 51-52, 66, 69; 3/15, 17-18, 25, 26-30, 38; 4/4-9, 12, 14, 16, 18-20, 24-27, 30, 32, 35; 5/8, 13-17, 19, 21; 5/8, 13-17, 19, 21; 6/19, 29-32, 47; 7/4-6, 12, 8/1, 3-5, 13, 20-21, 23, 27-28; 9/29; 10/11; 11/15, 19, 31, 37-39, 46-47, 50; 12/1-14, 20; almost all verses in 13th chapter except 4-12; 14/19, 26-27; 15/1-3, 7, 16-20; 16/7-9, 20; 18/11, 14, 16-17, 20-21, 46, 55

- भगवत्परतया शब्दनिर्वचनम्(१०.१२)
- अन्नमयादीनां कोशत्वविचारः(२.१८)
- यागीयहिंसाया पापासाधकत्वसमर्थनम्(१८.७)
- मतानामासुरत्वविवेचनम्(१६.२०)
- समाधिसुषुप्त्योर्भेदः(६.२१)
- सप्तभूमिकानिरूपणम्(३.१८)
- जीवाणुत्वसमर्थनम्(५.१७)
- निर्विकल्पकज्ञानस्य मोक्षासाधकत्वसमर्थनम्(५.२९)

In addition to closely following and fine tuning the commentary of मधुसूदन सरस्वति, Vanamali also rejects the latter with great detail at some instances:

- विश्वमिथ्यात्वनिराकरणम्(२.१६)
- पञ्चकोशविचारः(२.१८)
- सप्तभूमिकाविचारः(३.१८)
- चित्तवृत्तिविचारः(६.२०)
- तत्त्वज्ञानिनः दुर्लभत्वम्(७.३)
- क्षेत्रज्ञविचारः(१३.२)
- तटस्थलक्षणविचारः(१३.४)
- वासुदेवस्स्य निर्विकल्पकत्वनिराकरणम्(१४.२७)

He seems to be influenced by Rāmānuja Bhāṣya in 2.14, 2.16, 8.3, 10.13, 15.1, 15.16 etc. Similarly a shadow of Vallabha's commentary and Keśava's commentary can be seen at 8.21 and 18.10 respectively.

He summarises the purport of respective chapter at the beginning of each chapter in one or two verses (the collection of those verses is given in the appendix).

This work significantly differs from traditional Mādhva works in another way. He almost never uses the unknown sources of Madhva. He intelligently comes to the same conclusion as that of Āćārya Madhva, either directly from the known popular texts including Bhagavadgītā itself, or through an unequivocal inference. He uses the Vedās, Brahmasūtras, Mahābhārata, Bhāgavata and Vishnupurāṇa abundantly to prove his interpretation

He derives the pertinent points of Dvaita doctrine from the words of भगवद्गीता itself:

- गच्छन्तीति बहुवचनेन मुक्तै भेदः, गच्छतिना लोकविशेषं प्रति गमनं चेति सिद्धम्। (२.५१)
- तेषामित्यनेन जीवानां मोक्षे बहुत्वं सिद्धम्।(५.१६
- गच्छन्तीत्यनेन जीवानां मुक्तावणुत्वं सिद्धम्।(५.१७)
- लभन्त इत्यनेन मुक्तानां बहुत्वं स्पष्टमुक्तम्।(५.२५)
- महेश्वरमित्यनेन ...... (५.२९)
- वदन्तीत्यनेन ब्रह्मणः सर्वशब्दावाच्यत्वं वदन्तो निरस्ताः।(८.११)

Rarely, some of his comments seem to go against the commentary of Madhva. eg: 8.18, 9.32-33, 3.37, 10.6, 18.3-5 and 18.14.

The first verse of 13th chapter found in many Dvaita commentaries is perhaps not found in any other tradition. Even Vanamāli has not commented upon this verse. In fact, his further comments go on to say that there is no verse prior to what he is commenting on.

Present Edition

This work is now being brought out with the help of three manuscripts:

The Manuscripts

- Manuscript A from Jammu
  - Photocopy of a complete manuscript in Devanagari script.
  - The letters are not very legible.
  - It has innumerable scribal errors.
  - It has the respective verses of Bhagavadgītā in the middle of each page(सनाभि), unless the commentary for a single verse is more than a page. It has the प्रतीक also, unlike the Manuscript A.
- Manuscript B from BORI

- Photocopy of an incomplete brittle manuscript in Devanagari script.
- The following folios were missing: 4, 9, 10, 12, 14-17, 22-26, 29-36, 41-42, 46-54, 59-60, 65, 69, 72, 75-82, 94 (backside), 102, 107-129, 135, 139-143, 151, 162-164, 168-170, 179, 200-208, 210-214?, 216?-217, 230-233, 241-244, 246-251
- It is written neatly and has minimal scribal errors.
- It has the full original text of Bhagavadgītā at प्रतीकग्रहण.

• Manuscript C from Jammu

- Photocopy of an incomplete manuscript in legible Devanagari script.
- It has only the 4th chapter, though complete.
- It has the following commentaries for each verse:
  1. Bhāṣya of Śankara (Pub.)[1]
  2. Ṭīkā of Ānandagiri (Pub.)
  3. Ṭīkā(Subodhini) of Śrīdhara Swāmi (Pub.)
  4. Piśāca Bhāṣya of Hanumān (Pub.)
  5. Bhāṣya of Rāmānuja (Pub.)
  6. Gitārthasangraha of Abhinava Gupta (Pub.)
  7. Ṭīkā(Paramārthaprabhā) of Daivajna Paṇḍita (Pub.)
  8. Nigūḍhārthacandrikā of Vanamāli (Present Work)
  9. Kusumavaijayanti of Giridhari Dāsa, Desciple of Kṛṣṇadāsa
  10. Gūḍhārthadīpikā of Madhusūdana Saraswati (Pub.)

[1] Pub. = Published. Details of others not known to me.

Figure 1: Kaṣmīri script

11. Bhāvaprakāśa of Sadānanda (Pub.)
12. Bhāvārthaprakāśa of Nīlakaṇṭha (Pub.)
13. Sarvatobhadra (Vakyārthāmvaya) of Rāmakaṇṭha
14. Lāsikī Ṭīkā
15. Pancolī Ṭīkā
16. Raṇavīrasamidbodhinī
17. Bhāṣya of Ānandatīrtha (Pub.)
18. Ṭīkā of Rāmacandra Saraswati
19. Hindi Translation
20. Doha

In this edition, apt footnotes are given where-ever found necessary. Madhusūdana's commentary is given in footnotes where some interesting corrections are done to it by Vanamāli. A number of previously published works on भगवद्गीता are consulted and suitable extracts are provided in the footnotes. Most of the textual references are identified.[1] At instances where he quotes 'यत्तु' 'महान्तस्तु' 'केचित्' etc. the source is mostly provided in the footnote. I have tried to correct the obvious scribal errors and to suggest the possible correct readings in ambiguous places to the best of my ability. Nevertheless, I must confess that many scribal errors are still uncorrected, and many more have crept in due to my dull intellect. I request scholars and students to

[1] As the adhyaya and shloka number vary from edition to edition in most of the original works either because of different categorisation or variant readings the references given here may not tally with a specific version. In addition, I have referred to many versions while identifying to find some verses which may not be found in a single edition. Hence I request to overlook a possible mismatch. A master source repository would have been helpful to solve such problems.

give critical feedback to improve the quality in coming release versions.

Before concluding I should share that it was a great feeling to be working on a commentary on Bhagavadgītā. Being the most popular spiritual work in India, it enjoys the highest respect of psychologists, ethicists and experts in other fields of humanities. Vanamāli gives due recognition to all these facets of the teachings of Lord Kṛṣṇa. He goes into subtle details of defining and explaining all mental faculties referred to in the text. He shows the finer differences among them also quite clearly.

I am confident and hopeful that this work will be well received by the academic fraternity.

guravaḥ priyantāṃ jagataḥ pitarau ca

Śrīnidhi Vāsiṣṭha

गीतागूढार्थचन्द्रिका

॥ श्रीगुरुभ्यो नमः हरिः ॐ॥

॥ श्रीकृष्णाय पुरुषोत्तमाय नमः॥

सृजति विधिसहस्रं ह्यण्डकोशानजस्रं
परिभवति खगेशं यत्प्रसादाच्च पङ्गुः।
अभिभवति च मूको भारतीशानयत्नात्
सकलनिगमवाच्यः श्रीहयास्यः स नोऽव्यात्॥ १॥

स्वजनवधशुगब्धेः पार्थमुद्धर्तुकामो
भवजलनिधिमग्नांश्चान्यजीवान् मुकुन्दः।
समततसुवहित्रं यो हि गीताभिधानं
सकलनिगमसारं सोऽवतान्नोऽसुरारिः॥ २॥

व्यधाद्वेदविभागं यो भारतं च मुनीश्वरः।
कृष्णः सत्यवतीसूनुः सोऽव्यान्नः श्रुतिसागरः॥ ३॥

आचार्यान् श्रीमरुन्मुख्यान् वन्दे ब्रह्मविदां वरान्।
तदुच्छिष्टं च सङ्गृह्णन् यास्यामि पूज्यतां सताम्॥ ४॥

श्रीगुरुपादरेणूंश्च शिरसि वनमालिना।
निधाय क्रियते गीतानिगूढार्थस्य चन्द्रिका॥ ५॥

शमदमादिसम्पन्नो माधवे भक्तिमान् नरः।
इहामुत्र विरक्तश्चेहाधिकारी गुरुप्रियः॥ ६॥

सदनन्तगुणैः पूर्णो विषयः स्यात् प्रयोजनम्।
मोक्षो वाचकवाच्यत्वं सम्बन्धः कल्प्यते बुधैः॥ ७॥

जीवो निरूप्यते चाद्ये साधनानि च विस्तरात्।
द्वितीये कथ्यते चेशः तद्भक्तिरपि विस्तरात्॥ ८॥

उक्तार्थ एव सङ्क्षेपात् तृतीये हरिणोच्यते।
प्रायः कथेयमिति हि षट्कत्रये प्रवर्तते॥ ९॥

इह हि परापरतत्त्वज्ञानाभावात्, मोक्षौपयिकयोगकर्मादिज्ञानाभावाच्च, संसारे क्लिश्यमानान् जीवानुद्दिधीर्षुः ब्रह्मादिभिः परमकृपालुभिः प्रार्थितो भगवान्नारायणो व्यासरूपेणावतीर्य वेदाधिकारिणां त्रैवर्णिकानां सर्ववेदोपसंहारेऽसमर्थानां वेदानधिकारिणां स्त्रीशूद्रादीनां च मोक्षोपायप्राप्तये द्वापरादौ वेदान् विभज्य पञ्चमवेदं महाभारतं नामेतिहासरूपं च चकार। तत्र सर्वोपनिषत्सारसङ्ग्रहरूपां श्रीवासुदेवार्जुनसंवादरूपां महाभारतसुरतरोः पक्वफलरूपां श्रवणपथप्राप्तिमात्रेणाशेषकलिमलघ्नीं मुमुक्षुचेतोगतपापशमनीं श्रीहरिपुरजिगमिषूणां दृढसोपानरूपां श्रीगीतां निबबन्ध।[1]

अयमत्र सङ्क्षेपः। केनचिद्भाग्योदयेन जातमुक्तीच्छस्य सच्चिदानन्दघनं देहादिविलक्षणं परेशाधीनोपेतकर्तृत्वमिति स्वस्वरूपचिन्तनपूर्वकं स्ववर्णाश्रमोचितभगवदर्पणबुद्धिपूर्वकफलेच्छारहितकर्मानुष्टानम्, अथ चित्तशुद्ध्या विविदिषा, अथ सद्गुरुं प्राप्य तन्मुखाद्वेदान्तार्थग्रहणम्, श्रुतार्थस्य सद्युक्तिभिश्चिन्तनं मननम्, विजातीयप्रत्ययरहितसजातीयप्रत्ययप्रवाहो ध्यानापरपर्यायनि-

[1] नष्टधर्मज्ञानलोककृपाळुभिः ब्रह्मरुद्रेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान् व्यासोऽवततार। ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनात् वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञानद्वारा मोक्षो भवेद्' इति कृपाळुः सर्ववेदाद्यर्थोपबृंहितां, तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च, सर्वप्राणिनां अवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरां परोक्षार्थां महाभारतसंहितामचीक्लृपत्। तच्चोक्तम् - "लोकेशा ब्रह्मरुद्राद्याः संसारक्लेशिनं जनम्। वेदार्थाज्ञमधीकारवर्जितं च स्त्रियादिकम्॥ अवेक्ष्य प्रार्थयामासुर्देवेशं पुरुषोत्तमम्। ततः प्रसन्नो भगवान् व्यासो भूत्वा च तेन च॥ अन्यावताररूपैश्च वेदानुक्तार्थभूषितम्। केवलेनात्मबोधेन दृष्टं वेदार्थसंयुतम्॥ वेदादपि परं चक्रे पञ्चमं वेदमुत्तमम्। भारतं पञ्चरात्रं च मूलरामायणं तथा। पुराणं भागवतं चेति सम्भिन्नश्शास्त्रपुङ्गवः॥" इति नारायणाष्टाक्षरकल्पे। **इति मध्वभाष्यम्**

दिध्यासनम्, विप्रस्य सर्वसन्न्यासपूर्वकं क्षत्रियादेः सन्न्यासानधिकारिणः स्वोचितकर्मपूर्वकं भगवद्विषयकनिदिध्यासनस्य स्थैर्ये च सति सर्वान् वर्णधर्मान् सन्न्यासाद्याश्रमधर्मांश्चानादृत्य सदानन्दघनमूर्तौ भगवति तैलधारावदविच्छिन्नप्रेमप्रवाहं कुर्वन् भगवानेव मम सर्वस्वं स एव मम सर्वं करिष्यतीति बुद्ध्या भगवदेकशरणो भवेत्।

अथ सर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपया परया भक्त्या भगवतः सदनन्तगुणस्य स्वयोग्ययावद्गुणविशिष्टस्यापरोक्ष्यम्, ततो नेत्रावष्टधाङ्गुल्या सूर्यस्येव जीवं प्रतीश्वरस्याच्छादिकाविद्याया निवृत्तिः, ततो हरेः महाप्रसादः, अथ जीवस्वरूपानन्दावरकाविद्याया निवृत्तिः।'विमुक्तश्च विमुच्यते'[1,2] इति श्रुतिर्हि बन्धनद्वयनिवृत्तौ मानम्। यद्वा, एकैवाविद्योभयाच्छादिका। परमेश्वरप्रसादात्तन्निवृत्तिः। मुक्तानां स्वेच्छया भगवदिच्छया वा चिदानन्दघनद्विभुजचतुर्भुजादिविग्रहावाप्तिः। 'सङ्कल्पादेव तच्छ्रुतेः'[3] इति सूत्रात्। 'सङ्कल्पादेवास्य पितरः समुत्तिष्टन्ति'[4] इति श्रुतेः।

तत्र जीवस्य प्रत्यक्षत्वेऽपीश्वरस्य 'तं त्वौपनिषदं पुरुषं पृच्छामि'[5] इति श्रुत्योपनिषदेकगम्यत्वोक्तेः स विचार्यः। अतिभावनया विधुरादेर्मृतदाराद्यपरोक्षवत्, परोक्षस्यापि हरेरतिभावनयापरोक्ष्यं भवति। नच तद्वदेव भगवदपरोक्षस्य भ्रमत्वापत्तिरिति वाच्यम्। तद्विषयस्य बाधाद्भ्रमत्वेऽपि, प्रकृते विषयबाधाभावेन भ्रमत्वासम्भवात्।

ननु जीवस्य स्वरूपयाथात्म्याज्ञानात्, देहगेहादौ 'अहम्' 'मम' इत्यभिमानात्, संसृतिः। तन्निवृत्तये स्वस्वरूपचिन्तनाभ्यासेन स्वस्वरूपमेव निर्णेयम्। आरोपितरजतादिनिवृत्त्यर्थिना शुक्तिर्यथा निर्णीयते तद्वदिति चेत्। न। स्यादेवं यदि बन्धस्यारोपितत्वं स्यात्। तस्यारोपितत्वे यथाकथञ्चित् सकृदधिष्टानापरोक्षेण निवृत्त्यापत्त्या नियमपूर्वकश्रवणमननिदिध्यासनाभ्यासस्य नियमादृष्टस्य च वैय्यर्थ्यापत्तेः। नहि रूप्यादिनिवृत्तौ शुक्तिज्ञानातिरिक्तं नियमादिकमपेक्षते। निर्विशेषवादिना त्वज्ञानाद्यधिष्टानतया चिन्मात्रस्य सदाभानात् तदधिकस्य विशेषस्याज्ञातस्याभावात् तत्रेतरारोपासम्भवात्। सामन्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्वं ह्यधिष्टानत्वे तन्त्रम्। नहि ज्ञाताज्ञात-

---

[1] विमुक्तश्च मुच्यत इति कोशयोः [2] **कठोपनिषत्** ५.१ [3] **ब्रह्मसूत्रम्** ४.४.८ [4] **छान्दोग्योपनिषत्** ८.२.१ [5] **बृहदारण्यकोपनिषत्** ३.९.२६

विभागहीने निर्विशेषे तदस्ति। अतः सेतुदर्शनेन सत्याया ब्रह्महत्याया इव सत्यस्यैवंविधस्येश्वरापरोक्षेण निवृत्तिः।

'सेतुं दृष्ट्वा ब्रह्महत्यां व्यपोहति' इति ब्रह्महत्यायाः सेतुदर्शननिवर्त्यत्व-बोधकश्रुतेरिव 'तमेव विदित्वाऽतिमृत्युमेति'[1] इति श्रुतेर्बन्धस्य ब्रह्मज्ञाननि-वर्त्यत्वबोधिकायाः सत्वात्। पूर्वोपक्रान्तसहस्रशीर्षत्वादिविशिष्टः परमेश्वरः तच्छब्देन परामृश्यते। 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्'[2] इत्य-त्रापि वक्ष्यति।

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमैवेष वृणुते तेन लभ्यः'[3]
'यस्य प्रसदात् परमार्तिरूपादस्मात् संसारात् मुच्यते नापरेण'[4] इति श्रुत्या,
'तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते।
समाश्रितात् कल्पतरोरनन्तान्निःश्रेयसं पक्वफलं प्रयाथ[5] ॥'[6]
'एवं ज्ञातो भगवाननादिः पुरुषोत्तमः।
प्रसीदत्यच्युतस्तमिन् प्रसन्ने क्लेशसंक्षयः॥'
इत्यादिस्मृत्या च हरिप्रसादस्यैव मोचकत्वमुक्तम्।

महाप्रसादस्तु भगवदपरोक्षरूपज्ञानादेव।[7] 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः'[8] इति वक्ष्यमाणत्वात्। भगवदपरोक्षज्ञानं श्रवणमनननिदि-ध्यासनादिभिरिति कर्तव्योऽवश्यं शास्त्रविचारः।

केवलश्रोत्रेणानपरोक्षस्य षड्जत्वादेः गान्धर्वशास्त्रवासितेनापरोक्षवत्, के-वलमनसानपरोक्षस्यापि परमेश्वरस्य वेदान्तवासितेनापरोक्षत्वसम्भवात् 'य-

[1] **श्वेताश्वतरोपनिषत्** ३.८ [2] **भगवद्गीता** १८.५५ [3] **कठोपनिषत्** २.२३ [4] विष्णुतत्त्वनिर्णयो-दाहृता नारायणश्रुतिः [5] 'समाश्रिताद् ब्रह्मतरोरनन्तान्निःसंशयं प्राप्स्यथ वै महत्फलम्' इति प्रचलितपाठः। [6] **विष्णुपुराणम्** १.१७.९१ [7] 'कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः। मध्यमो ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः॥ प्रसादात् त्वधमाद्विष्णोः स्वर्गलोकः प्रकीर्तितः। मध्यमाज्ञ्नलोकादिरुत्तमस्त्वेव मुक्तिदः॥ श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च।
साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते॥
न चैतानि विना कश्चिज्ज्ञानमाप कुतश्चन।' इति नारदीये। **ब्रह्मसूत्रभाष्यमानन्दतीर्थीयम्** [8] **भ-गवद्गीता** ७.१७

न्मनसा न मनुते'[1] 'मनसैवानुद्रष्टव्यम्'[2] इति श्रुतिद्वयस्य वेदान्तावासितत-द्वासितमनोभिप्रायेणोपपत्तेः।

नच 'दृष्ट्वैव तं मुच्यते' इति ज्ञानस्यैव मोक्षहेतुत्वमुक्तम्, क्व प्रसाद-स्योपयोगः? इति वाच्यम्। 'शङ्खः पाण्डुर एव' 'दण्डेनैव घटः' इत्यादिव-देवकारेण ज्ञानस्य मोक्षं प्रत्ययोगव्यवच्छेदबोधनात्, ज्ञानहेतुकादेव प्रसादा-न्मोक्षो नान्यहेतुकादित्यर्थः । कर्मादिहेतुकप्रसादात् फलान्तरमेवेति भावः। 'व्रीहीभिर्यजेत' इत्यादौ पुरोडाशद्वारा व्रीहीणामिव प्रसादद्वारा ज्ञानस्य मोक्ष-हेतुत्वोपपत्तेः।

नचेश्वरेच्छाविशेषस्य प्रसादस्य नित्यत्वेन कथं ज्ञानजन्यत्वम्? इति वाच्यम्। यथा हि मायिनां नित्याया अपि चितो वृत्त्यवच्छेदेन घटादिषु सम्बन्धः, यथाऽन्येषां नित्यस्याप्यश्वत्वादेः सर्वगतस्य केशराद्यवच्छेदेनैव सम्बन्धो जायते, तथा नित्यस्यापि प्रसादस्य वेदान्तादिजन्यभगवदपरोक्ष-ज्ञानप्रागभावध्वंसवत्त्वावच्छेदेन सम्बन्धो जायते। सम्बन्धस्य ध्वंसरूपस्य जन्यत्वाङ्गीकारेऽपि न क्षतिः। अतः श्रवणमनननिदिध्यासाद्यर्थं कर्तव्यः शा-स्त्रारम्भ इति।

---

[1] केनोपनिषत् १.६.१ [2] बृहदारण्यकोपनिषत् ४.४.१९

अध्यायः 1

अर्जुनविषादयोगः

तत्र प्रस्तोष्यमाणायां ब्रह्मविद्यायामुपोद्धातत्वेनार्जुनस्य शोकमोहादिकं निरूपणीयम्। तन्निरूपणाय सञ्जयधृतराष्ट्रसंवादनिरूपणम्। युधिष्ठिरस्य विजयहेतुं श्रीकृष्णस्य दयादिकम्, स्वपुत्रस्य पराजयहेतुं श्रीकृष्णप्रातिकूल्यमधर्मादिकं च जानन्नपि पुत्रस्नेहादाहार्यसंशयवान् धृतराष्ट्रः पृच्छति-

धृतराष्ट्र उवाच
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥ १॥

हे **सञ्जय मामकाः** मम पुत्रा दुर्योधनादयः, **पाण्डवाः** युधिष्ठिरादयः **कुरुक्षेत्रे समवेताः** मिलिताः सन्तः **किमकुर्वत** किं कृतवन्तः? कीदृशाः? **युयुत्सवः** योद्धुमिच्छन्तः। कीदृशे कुरुक्षेत्रे? **धर्मक्षेत्रे** विद्यमानधर्मस्य वर्धके, अपूर्वधर्मोत्पादके च[1] एतादृशं प्राप्य धर्मार्द्रचित्ताः सन्तो युद्धान्निवृत्ताः, युद्धं कृतवन्तो वा? यदि

[1] धर्मस्य पूर्वमविद्यमानस्योत्पत्तेर्विद्यमानस्य च वृद्धेर्निमित्तं सस्यस्येव क्षेत्रं यत् कुरुक्षेत्रं सर्वश्रुतिस्मृतिप्रसिद्धम्। 'बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्' इति जाबालश्रुतेः, 'कुरुक्षेत्रं वै देवयजनम्' इति शतपथश्रुतेश्च। **इति मधुसूदनसरस्वतीये** ।

कृतवन्तस्तर्हि कथं कृतवन्तः? इति प्रश्नार्थः।[1]

एवं कृपालोकव्यवहारनेत्राभ्यामपि हीनस्य जात्यन्धस्य[2] पुत्रस्नेहाभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने विदिताभिप्रायस्य सञ्जयस्यातिधार्मिकस्य प्रतिवचनमवतारयति वैशम्पायनः[3] -

सञ्जय उवाच
दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्॥ २॥

तदा राजा दुर्योधनः पाण्डवानामनीकं सैन्यं **व्यूढं** श्येनमकरादिव्यूहरचनया स्थितं[4] **दृष्ट्वा, आचार्यं** द्रोणाचार्यम् **उपसङ्गम्य** समीपं गत्वा, इदं **वचनमब्रवीत्।**

किमब्रवीत्? तदाह - **पश्येति नवभिः॥**

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता॥ ३॥

हे **आचार्य पाण्डुपुत्राणां महतीं चमूं पश्य।** कीदृशीम्? **द्रुपदपुत्रेण** धृष्टद्युम्नेन **व्यूढां** श्येनादिव्यूहरचनया रचितम्। कीदृशेन? **धीमता तव शिष्येण।**

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।

---

[1] अत्र केचिद्व्याख्याविकल्पमाहुः। कुरूणां करणानां यत् क्षेत्रानुग्राहकम्, अत एव सांसारिकत्वधर्माणां सर्वेषां क्षेत्रमुत्पत्तिनिमित्तत्वात्। 'अयं स परमो धर्मो यद्योगेनात्मरक्षणम्' इत्यस्य च धर्मस्य क्षेत्रं समस्ताधर्माणां क्षयादपवर्गप्राप्त्या त्राणभूतं तदधिकारिशरीरं सर्वक्षेत्राणामक्षादेर्हिंसार्थत्वात् परस्परबाध्यबाधकभावेन वर्तमानानां रागवैराग्यक्रोधक्षमाप्रभृतीनां समागमा यत्र तस्मिन् स्थिता ये मामकाः अविद्यापुरुषोचिता अविद्यामयाः सङ्कल्पाः पाण्डवाः शुद्धविद्यापुरुषोचिता विद्यात्मानास्ते किमकुर्वत? कैः खलु के जिताः? इति यावत्। ममेति कायन्तीति मामका अविद्यापुरुषाः। पाण्डुः शुद्धः। **इति अभिनवगुप्तः** [2] हीनस्यात्यन्धस्य - पा. [3] एवं कृपालोकव्यहारनेत्राभ्यामपि हीनस्य महतोऽन्धस्य पुत्रस्नेहमात्राभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने विदिताभिप्रायस्य सञ्जयस्यातिधार्मिकस्य प्रतिवचनमवतारयति वैशम्पायनः। **इति मधुसूदनसरस्वतीये** [4] **व्यूढं** सूचीव्यूहरचनया सम्पन्नम्।**इति पैशाचभाष्ये**

इषवो बाणा अस्यन्ते यैस्ते इष्वासाः[1] महान्त इष्वासा धनूंषि येषां ते तथा। भीमार्जुनौ प्रसिद्धौ योद्धारौ युद्धे तत्समाः तत्तुल्याः **शूरा अत्र** अस्यां सेनायां सन्ति। तानाह - **युयुधान इति सार्धद्वाभ्याम्॥**

युयुधानो विराटश्च द्रुपदश्च महारथः॥ ४॥

युयुधानः सात्यकिः।

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित् कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः॥ ५॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः॥ ६॥

सर्वे महारथा एव। नैको रथोऽर्धरथो वा। **महारथाः** इत्यतिरथस्याप्युपलक्षणम्।[2] तल्लक्षणं च -

'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्।
शस्त्रशास्त्रप्रवीणश्च स हि महारथः स्मृतः॥[3]

अमितान् योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः।
रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृतः[4] ॥' इति।

'ननु परसैन्यं दृष्ट्वा भीतश्चेत् सन्धिं कुरु' इत्याचार्याशयं बुद्ध्वाऽह - **अस्माकमिति॥**

[1] इषुरस्यतेऽस्मिन्निति व्युत्पत्त्या धनुस्तदुच्यते। **इति आनन्दगिरिः** इषवोऽस्यन्त एभिरितीष्वासाः।**इति पुरुषोत्तमः** । [2] **सर्व एव महारथाः** सर्वेऽपि महारथा एव। नैकोऽपि रथोऽर्धरथो वा। महारथा इत्यतिरथस्याप्युपलक्षणम्।**इति मधुसूदनसरस्वतीये** [3] 'अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः' **इति पैशाचभाष्ये** । 'शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः' **इति मधुसूदनसरस्वतीये** । [4] 'तन्न्यूनोऽर्धरथो मतः' इति ब्रह्मानन्दगिरिः, पैशाचभाष्ये च।

अस्माकं तु विशिष्टा ये तान् निबोध द्विजोत्तम।
नायका मम सैन्यस्य सञ्ज्ञार्थं तान् ब्रवीमि ते॥ ७॥

मम सैन्यस्य नायकाः नेतारः। हे **द्विजोत्तम** तव **सञ्ज्ञार्थम्** सम्यज्ज्ञानार्थं **ब्रवीमि**। त्वं **निबोध** जानीहि।

तानाह द्वाभ्याम्-

भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च[1] **॥ ८॥**

समितिञ्जयः इति कृपविशेषणम्, अव्यवहितत्वात्। समितौ युद्धे जयशीलः। **सौमदत्तिः** सोमदत्तस्य पुत्रो भूरिश्रवाः।

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः॥ ९॥

अन्ये शल्यकृतवर्मादयः[2] मदर्थे त्यक्तं जीवितं यैस्ते भवदादयः। नानाविधानि शस्त्राणि **प्रहरणानि** युद्धसाधनानि येषां ते। **युद्धविशारदाः** कुशलाः।

ततः किम्? इत्यत आह-

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्॥ १०॥

---

[1] 'सिन्धुराजस्तथैव च' इति क्वचित्पाठः। **इति मधुसूदनसरस्वतीये** 'सौमदत्तिर्जयद्रथः' इति नीलकण्ठपाठः। [2] **अन्ये च** शल्यकृतवर्मप्रभृतयः।**इति मधुसूदनसरस्वतीये** ।

तदस्माकमपर्याप्तम् पाण्डवानां विजयेऽसमर्थं भाति। यतोऽतिवृद्धेन भीष्मेणाभिरक्षितम्। **एतेषाम्** पाण्डवानां **तु बलम्** अस्मद्विजये **पर्याप्तं** समर्थं भाति। यतो यूनाभिनिविष्टेन भीमेनाभिरक्षितम्।[1]

अयनेषु च सर्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि॥ ११॥

अतो **भवन्तः सर्व एव** व्यूहप्रवेशमार्गेषु **यथाभागम्** अपरित्यज्य स्थिताः सन्तः यथाऽन्यैः पुरो युद्ध्यमानः पृष्टतः कैश्चिन्न हन्येत तथा **भीष्ममेवाभिरक्षन्तु।** भीष्मबलेनैव वयं जीवाम इति भावः।

तस्य सञ्जनयन् हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्॥ १२॥

स्वस्मिन् दत्तभारस्य राज्ञो **हर्षं सञ्जनयन् कुरुवृद्धः** भीष्मः **सिंहनादं** कृत्वा **शङ्खं दध्मौ।**

सेनापतेर्युद्धोत्सवं दृष्ट्वा सर्वत्र युद्धोत्सवो जात इत्याह - **तत इति॥**

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्[2]**॥ १३॥**

---

1 अपर्याप्तमनन्तमेकादशाक्षौहिणीपरिमितं भीष्मेण च प्रथितमहिम्ना सूक्ष्मबुद्धिनाभितः सर्वतो रक्षितं तत् तादृशगुणवत् पुरुषाधिष्ठितमस्माकं बलम्। एतेषां पाण्डवानां बलं तु पर्याप्तं परिमितं सप्ताक्षौहिणीमात्रात्मकत्वान् न्यूनं। भीमेन चातिचपलबुद्धिना रक्षितम्, तस्मादस्माकमेव विजयो भविष्यतीत्यभिप्रायः। अथवा तत् पाण्डवानां बलम् अपर्याप्तं नालमस्माकमस्मभ्यम्। कीदृशं तत् ? भीष्मोऽभिरक्षितोऽस्माभिर् यस्मै यन्निवृत्त्यर्थम् इत्यर्थः। तत् पाण्डवबलं भीष्माभिरक्षितं, इदं पुनरस्मदीयं बलमेतेषां पाण्डवानां पर्याप्तं परिभवे समर्थं भीमोऽतिदुर्बलहृदयोऽभिरक्षितो यस्मै तदस्माकं बलं भीमाभिरक्षितं यस्माद् भीमोऽत्ययोग्य एवैतन्निवृत्त्यर्थं तै रक्षितः, तस्मादस्माकं न किंचिदपि भयकारणम् अस्तीत्यभिप्रायः। एवं चेन्निर्भयोऽसि तर्हि किम् इति बहु जल्पसीत्यत आह। कर्तव्यविशेषद्योती तुशब्दः।**इति मधुसूदनसरस्वतीये**

2 'शब्दस्तुमुलो महान्' इति पाठः भाष्योत्कर्षदीपिकायां सुमतीन्द्रतीर्थीये च।

सहसा तत्क्षणमेव।

ततः पाण्डवसैन्ययुद्धोत्सवमाह- **तत इति पञ्चभिः॥**

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः॥ १४॥

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः॥ १५॥

भीमं भयङ्करं कर्म यस्य। वृकनामाग्निविशेष उदरे यस्य।

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ॥ १६॥

काश्यश्च परमेष्वासः शिखण्डी च महारथः।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः॥ १७॥

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते।
सौभद्रश्च महाबाहुः शङ्खान् दध्मुः[1] पृथक् पृथक्॥ १८॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥ १९॥

नभः पृथिवीं व्यनुनादयन् प्रतिध्वनिभिरापूरयन्। **सः** शब्दः **धार्तराष्ट्राणां** त्वत्पुत्राणां **हृदयानि** विदारितवान्।

अथार्जुनो हरिं विज्ञापयामासेत्याह- **अथेति चतुर्भिः॥**

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः॥ २०॥

---

[1] 'शङ्खं दध्मुः' पा.।

व्यवस्थितान् निश्चितान्। युद्धार्थं प्रवर्तयितव्ये **शस्त्रसम्पाते धनुरुद्यम्य।**

हृषीकेशं तदा वाक्यमिदमाह महीपते।

अर्जुन उवाच
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत॥ २१॥

हे **अच्युत** देशकालगुणेभ्यः च्युतिरहित।

किमर्थं रथस्थापनम् ? अत आह- **यावदिति॥**

यावदेतान् निरीक्षेऽहं योद्धुकामानवस्थितान्।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे॥ २२॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः॥ २३॥

सञ्जय उवाच
एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्॥ २४॥

हृषीकाणाम् इन्द्रियाणाम् ईशोऽन्तर्यामितयेन्द्रियप्रेरकः। गुडाकाया निद्राया ईशेन जितनिद्रेण निरालस्येन **एवमुक्तः।**

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति॥ २५॥

तत्रापश्यत् स्थितान् पार्थः पितृनथ पितामहान्।
आचार्यान् मातुलान् भ्रातृन् पुत्रान् पौत्रान् सखींस्तथा॥ २६॥

श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि।
तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान्॥ २७॥

कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत्।

आविष्टः व्याप्तः।

अर्जुन उवाच
दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्॥ २८॥

'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥' इति।[1]

सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥ २९॥

मम गात्राणि सीदन्ति शीर्यन्ते।

गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते।
नच शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥ ३०॥
निमित्तानि च पश्यामि विपरीतानि केशव।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे॥ ३१॥

केशौ ब्रह्मरुद्रौ यापयति प्रवर्तयतीति केशवः। कं ब्रह्माणम्, ईं श्रियम्, इं कामम्, ईशं शङ्करं च प्रवर्तयतीति वा। हे **केशव**।

उक्तं प्रपञ्चयति द्वाभ्याम्-

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा॥ ३२॥
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥ ३३॥

[1] महाभारतम् ५.६८.५

गां गन्धर्वविद्याधेनुभूमिस्वर्गान् ज्ञानरश्मीन् वा विन्दते लभते लम्भयतीति वा गोविन्दः। गोभिः वेदैः वेद्यत इति वा। हे **गोविन्द** यदर्थमस्माकं राज्यादिकं **ते** एते आचार्यादयः प्राणधनादिकं **त्यक्त्वा** युद्धार्थं स्थिताः। अतः किमस्माकं राज्यादिना? न किमपीत्यर्थः।

आचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुलाः श्वशुराः पौत्राः श्यालाः[1] सम्बन्धिनस्तथा॥ ३४॥

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ ३५॥

त्रैलोक्यराज्यस्यापि हेतोः तत्प्राप्त्यर्थमपि **हन्तुं नेच्छामि**। किम्पुनः महीमात्रप्राप्तये? इत्यर्थः। मधुं सूदयतीति मधुसूदनः।

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन।

जनानर्दयति गमयति जीवान् सदसद्गतीरिति जनार्दनः। **का प्रीतिः** किं सुखम्?।

ननु 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते ह्याततायिनः।
नाततायिवधे दोषो हन्तुर्भवति कश्चन।'[2]

इत्युक्ताततायिलक्षणयुक्तान् जहीत्यत आह- **पापमिति**॥

पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः॥ ३६॥
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्[3]

[1] स्यालाः इति नीलकण्ठपाठः। [2] **मनुस्मृतिः** ८.३५०-३५१ [3] सबान्धवान् - पा.॥

आततायिवधबोधकशास्त्रस्यार्थशास्त्रत्वेन 'अहिंसा परमो धर्मः' इत्यादि-धर्मशास्त्रतो दुर्बलत्वेन बाधितत्वात्,[1] आततायिनां कुरूणां तत्सम्बन्धिनाम् आचार्याणां वधान्नास्माकमिष्टम्, किन्तु **पापमेव** भवेत्।

का प्रीतिः इत्युक्तं स्पष्टयति-

स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥ ३७॥

मायाया लक्ष्म्याः धवः पतिः **माधवः**। 'अमानोनाः प्रतिषेधे' इति वचनात् मा न विद्यते धवः पतिर्यस्य[2], माधौ ज्ञानधर्मौ वहति वर्तयतीति वा।

ननु यथैतेषां बन्धुवधदोषे समाने सति ते तमङ्गीकृत्य युद्धे यदि प्रवर्तेरन् तर्हि त्वमपि तथैव प्रवर्तस्व। किमनेन विषादेन? इत्यत आह - **यद्यपीति॥**

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्॥ ३८॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन॥ ३९॥

यद्यप्येते दुर्योधनादयो राज्यलोभेन नष्टविवेकाः कुलवधात् प्राप्तं दोषं न पश्यन्ति।

तथा[3] **दोषं प्रपश्यद्भिरस्मात् पापान्निवर्तितुं कथम् न ज्ञेयम्** ?

तमेव दोषं दर्शयति- **कुलेति॥**

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत॥ ४०॥

[1] 'न हिंस्यात्' इति धर्मशास्त्रात् 'आततायिनं हन्यात्' इत्यर्थशास्त्रस्य दुर्बलत्वात्। तदुक्तं याज्ञवल्क्येन -
'स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः॥' इति। **इति मधुसूदनसरस्वतीये**

[2] अधवः समो वा यस्य माधवः इत्यधिकं कोशे।

[3] तथाऽपीति स्यात्।

परम्पराप्राप्ताः प्रवर्तकाभावात् ततोऽवशिष्टं **कृत्स्नम्** अपि **कुलमधर्मो** व्याप्नोति।

अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः॥ ४१॥

सङ्करो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥ ४२॥

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥ ४३॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।
नरके नियतं वासो भवतीत्यनुशुश्रुम॥ ४४॥

अहो बत महत् पापं कर्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः॥ ४५॥

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥ ४६॥

ततः किम् ? इत्यत आह- **एवमिति**॥

सञ्जय उवाच
एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः॥ ४७॥

सङ्ख्ये युद्धे। **रथोपस्थे** रथोपरि।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोऽध्यायः॥ १॥

अध्यायः 2

साङ्ख्ययोगः

आत्मयाथात्म्यरूपं हि साधनानि च तद्धियः।
स्थितधीलक्षणं ब्रूते द्वितीयाध्याय ईश्वरः॥

ततः किं वृत्तम्? इत्यपेक्षायां सञ्जय आह - **तमिति**॥

सञ्जय उवाच
तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥ १॥

अश्रुभिराकुले पूर्णे ईक्षणे यस्य तम्॥ १॥

श्रीभगवानुवाच
कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥ २॥

हे **अर्जुन कुतः** हेतोः **त्वा** त्वाम् **इदं कश्मलं विषमे** युद्धसमये **समुपस्थितं** प्राप्तम्। यतः **अनार्यैः** अवृद्धैः सेवितम्। अतो **अस्वर्ग्यम्**। अत एव **अकीर्तिकरम्** ॥ २॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप॥ ३॥

हे **पार्थ। क्लैब्यं** कातर्यं **मा स्म गमः** न प्राप्नुहि। यतः **त्वय्येतन्नोपपद्यते** स सम्भाव्यते। **क्षुद्रं** तुच्छं **हृदयदौर्बल्यं त्यक्त्वा** युद्धाय **उत्तिष्ठ। परन्तप** शत्रुतापनसमर्थ॥ ३॥

ननु नाहं कातर्येण युद्धान्निवृत्तः। किन्तु युद्धस्यासाध्यत्वादित्याशयेन भगवदुक्तं हितमजानन्नर्जुन आह -**कथं भीष्ममित्यादिपञ्चभिः॥** [1]

अर्जुन उवाच
कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन॥ ४॥

भीष्मद्रोणौ **पूजार्हौ**। तौ **प्रति कथं योत्स्यामि**। तत्रापि **इषुभिः**। यत्र वाचाऽपि योत्स्यामीति वक्तुमनुचितम्, तत्र बाणैः कथं योत्स्यामि? इत्यर्थः। अरिं शत्रुम् अरिणा चक्रेण सूदयतीति **अरिसूदन** ॥ ४॥

ननु तेषां वधं विना तव देहयात्राऽपि कथं स्यात्? अत आह -**गुरूनिति॥**

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह[2] लोके।
हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्॥ ५॥

---

[1] एवमुक्तभगवद्वाक्यं श्रुत्वा 'अहं कातर्येण युद्धान्नापक्रान्तः किन्तु धर्मबुद्ध्या' इत्यर्जुनो भगवन्तं विज्ञापयामास - **कथमित्यादिषड्भिः॥ इति पुरुषोत्तमः**

[2] भैक्षमपीह - पा.

गुरूनहत्वा गुरुवधमकृत्वा **इह लोके** भिक्षान्नमपि **भोक्तुं श्रेयः** उचितम्। हननपक्षे न केवलं परत्र दुःखम्, किन्त्विहापि दुःखमनुभवेयमित्याह -**हत्वेति**॥ **गुरून् हत्वा तु, इहैव** तेषां रुधिरेण प्रदिग्धान् = प्रलिप्तान् तैर्भुज्यमानत्वात्, अर्थकामात्मकान् **भोगान् भुञ्जीय।** [1] **अर्थकामान् गुरून्** इति वा॥ ५॥

यद्यपि धर्मं करिष्यामः। तथाऽपि जयः पराजयो वेति न जानीम इत्याह-**नचैतदिति**॥

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः॥ ६॥

द्वयोर्मध्ये **नः** अस्माकं **कतरत् गरीयः** अधिकतरं भविष्यतीति **न विद्मः। यद्वा** यदि वा वयमेव तान् **जयेमः** त एव **यदि वा नः** अस्मान् **जयेयुः** जेष्यन्तीति च **न विद्मः।** किञ्चास्माकं जयोऽपि पराजय एवेत्याह - **याननिति॥ यान् हत्वा** जीवितुं नेच्छामः **ते** एते सम्मुखे स्थिताः। वीरस्याबलबन्धुवधो लोके निन्द्यत्वादन्याय्य इति भावः॥ ६॥

ततः किम् ? इत्यत आह - **कार्पण्येति**॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वा धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन् मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥ ७॥

'एतान् हत्वा कथं जीविष्यामः?' इति कार्पण्यम्, दोषश्च कुलक्षयकृत इति ताभ्यामुपहतः = अभिभूतः, स्वभावः = पौरुषलक्षणो यस्य सोऽहं त्वां **पृच्छामि।** तथा धर्मे सम्मूढं चेतो यस्य सः। युद्धं त्यक्त्वा भिक्षाटनं क्षत्रियधर्मः, उत युद्धं कृत्वा राज्यपालनं धर्म इति सन्दिग्धचित्तः सन्नित्यर्थः। अतो मम **यन्निश्चितं श्रेयः** युक्तं **स्यात् तद् ब्रूहि।** किञ्च, **तेऽहं शिष्यः** शासनार्हः। अतः **त्वां प्रपन्नं** शरणागतं **मां** शिक्षय॥ ७॥

[1] अथवा गुरून् हत्वा, अर्थकामात्मकान् भोगानेव भुञ्जीय, नतु धर्ममोक्षावित्यर्थकामपदस्य भोगविशेषणतया व्याख्यानान्तरं द्रष्टव्यम्। **इति मधुसूदनसरस्वतीये**

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्॥ ८॥

इन्द्रियाणामुच्छोषणं यत् मम **शोकमपनुद्यात्** नाशयेत् तत् **नहि प्रपश्यामि**। यद्यपि भूमौ निष्कण्टकं राज्यं प्राप्स्यामि, तथा सुरपतित्वमपि प्राप्स्यामि, एवं यदिष्टं तत् सर्वं प्रापयिष्यामि शोकापनोदनाय[1] न प्रपश्यामीत्यर्थः॥ ८॥

सञ्जय उवाच
एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥ ९॥

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं[2] वचः॥ १०॥

हृषीकेशः इन्द्रियप्रेरकोऽन्तर्यामी 'ज्ञानिनस्तव मम सख्युः कथमीदृशी बुद्धिः?' इति परिहासं कुर्वन् **इव** इत्यर्थः॥ १०॥

सर्वत्रोदासीनतयाऽऽकाशवदसङ्गोऽपि सुरतरुस्वभावः स्वशरणागतपक्षपाती परमकारुणिको भक्तवत्सलोऽनादिसंसारप्रवाहपतितान् सुखमिच्छतो दुःखं जिहासतस्तदुपायमजानतो जीवान् विलोक्य संसारसिन्धुतरणाय स्वविषयकसर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपं स्वभक्त्याख्यं वहित्रमारोपयितुं प्रथमसोपानं स्वस्वरूपानुसन्धानपूर्वकं स्वधर्मानुष्ठानं वक्तुं स्वसखं नरावतारं संविदितात्मतत्त्वमर्जुनमुपलक्षणीकृत्य भगवानात्मानात्मविवेकमाह - **अशोच्यानिति॥**

श्रीभगवानुवाच
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥ ११॥

हे अर्जुन **त्वं** यान् प्रति **अशोचः** 'दृष्ट्वेमम्'[3] इत्यादिना शोचितवानसि त

[1] शोकापनोदनोपायम् इति स्यात्। [2] 'सीदमानमिदम्' इति रामानुजीयपाठः। [3] **भगवद्गीता** १.२८

अशोच्याः = शोकार्हा न भवन्ति। यांश्च **भाषसे** 'पापमेवाश्रयेदस्मान्'[1] इत्यादिना ते प्रज्ञावादाः = स्वप्रज्ञयैव वादाः स्वमनीषोत्था ननु शास्त्रोपदेशादिप्राप्ता इत्यर्थः।[2] यद्वा, प्रकर्षेण जानन्तीति प्रज्ञाः, तेषामवादाः, तद्विरुद्धवादा इत्यर्थः[3][4] सिद्धे शोकं भाषणं चानूद्य, असिद्धयोरशोच्यत्वप्राज्ञमतविरोधयोर्विधानार्थं विभक्तिविपरिणामेनान्वयः।[5]

कथमासन्नविनाशा न शोच्याः? इत्यत आह - **गतासूनिति॥ पण्डिताः** आत्मानात्मतत्त्वविदः गता असवः = प्राणा येभ्यस्ते गतासवो देहाः, तद्विरुद्धत्वाज्जीवा अगतासवः।[6]

'पुरुषस्य मृतौ ब्रह्मन् प्राणा भागत एव तु।
अधिदैवं प्राप्नुवन्ति भागतोऽनुव्रजन्ति तम्॥[7]' इति स्मृतेः।[8]

यद्यपि मुक्तौ जीवस्यापि प्राणवियोगो भवति 'न तस्य प्राणा उत्क्रामन्ति इहैव लीयन्ते'[9] इति श्रुत्या मुक्तप्राणानामशेषतो जीवहानस्य स्वकारणयोर्लयस्य चोक्तत्वात्। तथाऽपि देहात्मनोर्वियोगमरणरूपबद्धावस्थायां प्राणानां भागेन जीवेन सह गमनमस्ति। देहे तु भागिनामपि सम्बन्धो नास्ति। तथा च संसारावस्थायां गतप्राणागतप्राणत्वेन देहात्मानौ विवक्षितौ। देहः परिणामी नश्वरस्वभावश्च न शोकस्थानम्। आत्माऽप्युत्पत्तिविनाशादिविकारशून्य इति न शोकस्थानमित्यर्थः।

यद्वा, गता निर्गता असवः प्राणा येभ्यः तान् देहान् तद्विरुद्धान् अगतासून् असुसंयोगवियोगरहितान् नित्यानन्दस्वरूपान् चेतनांश्च न शोचन्ति।

यद्यपि प्राणसम्बन्धो बद्धावस्थायां चेतनेऽप्यस्ति। तथाऽपि प्राणाधीनचेष्टावत्त्वमेव प्राणित्वम्। तच्च देह एवास्ति, न चेतने। मुक्तौ प्राणाभावेऽपि

---

[1] **भगवद्गीता** १.३६ [2] **प्रज्ञावादान्** स्वमनीषोत्थवचनानि। **इति मध्वभाष्यम्** [3] प्रकर्षेण जानन्तीति प्रज्ञाः। तदवादः प्रज्ञावादः। प्राज्ञमतविरुद्धवादं वदसि। **इति गीतातात्पर्ये** । [4] यत्तु प्रज्ञानां पण्डितानाम् अवादान् वक्तुमयोग्यान् भाषसे इति तार्किकव्याख्यानम्, तदर्हार्थे घञो दुर्लभत्वात्, विशेषाध्याहारसापेक्षत्वाच्चोपेक्ष्यम्। **-इति नीलकण्ठः।** [5] नहि यथाश्रुतैव वाक्यवृत्तिः। असिद्धस्यानुवादः, सिद्धस्य बोधनमित्यापत्तेः। **इति प्रमेयदीपिका** [6] गतासून् गतप्राणान् मृतान् अगतासून् अगतप्राणान् जीवतः। **इति शङ्करभाष्ये** गतासून् देहान् अगतासून् आत्मनः। **इति रामानुजभाष्ये** [7] ब्रह्मसूत्रभाष्ये(?) [8] नरहरितीर्थीये, विद्याधिराजतीर्थीये। [9] **बृहदारण्यकोपनिषत्** ४.४.६

'स तत्र पर्यैति जक्षन् क्रीडन् रममाणः'[1] इति श्रुतौ चेष्टाया उक्तत्वात्। नहि स्वामित्वमात्रेणैव प्राणित्वम्। ईशस्यापि प्राणित्वापत्तेः। नच जीवस्य प्राणजन्यभोगाश्रयत्वेन प्राणित्वम्, ईशस्य भोगाभावान्न प्राणित्वमिति वाच्यम्। प्राणादिप्रयुक्तस्वाभाविकभोगस्य जीवेऽप्यभावात्। अनाद्यविद्यावशाद्देहादौ 'अहम्' 'मम' इत्यभिमानात् पुत्रे नष्टे अहं नष्ट इतिवत्, जीवेऽपि भोगस्याभिमानिकत्वात्। आत्मनो देहाधीनजन्ममरणादिकं नास्त्येवेति स न शोकस्थानम्। देहस्तु परिणामस्वभावः, तस्योत्पत्तिविनाशयोः प्रतिक्षणं स्वाभाविकत्वात् सोऽपि न शोकस्थानम्। अतः देहात्मनोः स्वरूपम्, तज्ज्ञानोपायभूतं फलाभिसन्धिरहितं युद्धाख्यं स्वधर्मं च जानत्यपि मत्सखे तत्त्वविदि त्वयि शोचनं प्राज्ञमतविरुद्धभाषणं च विप्रतिषिद्धं मयोपलभ्यत इति भावः॥ ११॥

नन्वस्तु देहभिन्नात्मानः प्राणसंयोगवियोगादिरूपजन्ममरणाभावः। दण्डेन घटध्वंसवत् जीवनाशसम्भवात् कथं न शोकः कार्यः? इत्यत आह - **न त्वेवेति॥**

नत्वेवाहं जातु नाऽसं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥ १२॥

सखे आत्मनां स्वभावं श्रुणु। **अहम्** सर्वेश्वरो वर्तमानात् पूर्वस्मिन् काले **नासम्** इति **न**। अपि त्वासम् **एव**। **जातु** कदाचित् **त्वमिमे जनाधिपाः च** सर्वे जीवाः सच्चिदानन्दरूपा मन्नियम्या नासन्निति **न**। अपि त्वासन्नेव। एवमहं यूयं च **सर्वे वयमतः परं** प्रलये मुक्तौ च **न भविष्यामः** इति **न**। अपि तु भविष्यामः[2][3] नञ्द्वयस्यातिशयेन प्रकृतार्थस्य बोधकत्वात्, आसन्नेव भविष्याम एवेत्यर्थः। 'इदानीं स्मः' इति नोक्तम्, सिद्धत्वात्।

[1] **छान्दोग्योपनिषत्** ८.१२.३ [2] प्रथमं तावदात्मनां स्वभावं श्रुणु। अहं सर्वेश्वरस्तावत्, अतो वर्तमानात् पूर्वस्मिन्ननादौ काले, न नासम्, अपि त्वासम्। त्वन्मुखाश्चैते ईशितव्याः क्षेत्रज्ञाः न नासन्, अपि त्वासन्। अहं च यूयं च सर्वे वयम्, अतः परस्मिन् अनन्ते काले, न चैव न भविष्यामः, अपि तु भविष्याम एव। यथाहं सर्वेश्वरः परमात्मा नित्य इति नात्र संशयः, तथैव भवन्तः क्षेत्रज्ञा आत्मानोऽपि नित्या एवेति मन्तव्याः। **इति रामानुजभाष्ये** । [3] यथाऽहं नित्यः सर्ववेदान्तेषु प्रसिद्धः, एवं त्वमेते जनाधिपाश्च नित्याः। **इति मध्वभाष्यम्**

येऽर्जुनादयो दृष्टश्रीकृष्णसामर्थ्या ज्ञाततन्नित्यत्वाश्च तान् प्रति यथाऽहं सर्वेश्वरो नित्यः कालत्रयसम्बन्धी, तथा त्वमेते जनाधिपाश्च नित्या कालत्रयसम्बन्धिन इत्युपदेशः।

ननु वेदान्तैरीश्वरनित्यत्वं जानतां तत एव जीवनित्यत्वस्यापि ज्ञानं भविष्यतीति किमत्र जीवनित्यत्वोपदेशेन? इति चेन्न। 'नित्यो नित्यानां चेतनश्चेतनानाम्'[1] इति श्रुतौ हि 'नित्यानाम्' इति निर्धारणासामर्थ्याज्जीवानां नित्यत्वमौपचारिकं परमनित्यत्वं त्वीशस्यैवेति शङ्कानिरासाय स्वनित्यत्वसाम्यतया जीवनित्यत्वं भगवतोक्तम्।[2] श्रुतिस्थषष्ठी तु सम्बन्धमात्रे नतु निर्धारणे।

'भेदव्यपदेशाच्चान्यः'[3] 'शारीरश्चोभयेऽपि हि भेदेनैमधीयते'[4] 'अधिकं तु भेदव्यपदेशात्'[5] इत्यादिसूत्रैः 'ज्ञाज्ञौ द्वावजावीशानीशौ'[6] 'य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति'[7] 'यो विज्ञाने तिष्ठन् विज्ञानमन्तरो यमयति' 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति'[8] इति श्रुतिभिः 'अन्यश्च परमो राजंस्तथाऽन्यः पञ्चविंशकः'[9] इत्यादिस्मृतिभिश्च प्रतिपादितस्य भेदस्य त्रिकालाबाध्यत्वरूपं सत्यत्वं कालत्रयसम्बन्धित्वरूपं नित्यत्वं च भगवता प्रतिपादितम्।

नच 'नाहमीश्वरः' इति प्रत्यक्षेणैव भेदसिद्धोपदेशवैय्यर्थ्यमिति वाच्यम्। प्रत्यक्षस्य वर्तमानमात्रग्राहित्वेन वर्तमानभेदसिद्धावपि, अतीतानागतभेदस्य प्रत्यक्षासिद्धस्य बोधकत्वेनोपदेशस्य सार्थक्यात्। यद्यपि भेदवाचकं श्रुतौ पदं नास्ति। तथाऽप्युक्तसूत्रैः श्रुतीनां भेदपरत्वेन व्याख्यातत्वात्। भगवद्वाक्ये यद्यपि भेदबोधकं पदं नास्ति। तथाऽपि 'आमनमस्यामनमसि देवास्तिस्र आहुतीः' इत्यादौ यथा बहुत्वसङ्ख्यया भिन्नास्तिस्र आहुतयः सिद्ध्यन्ति, तथा वयमित्युक्तबहुत्वसङ्ख्यया भेदः सिद्ध्यति। यथा च 'तप्ते पयसि दध्यानयति

[1] **कठोपनिषत्** ५.१३, **श्वेताश्वतरोपनिषत्** ६.१३ [2] ननु वेदान्तैरीश्वरनित्यत्वं जानन्तः तत्रैवोक्तं जीवनित्यत्वं कथं न जानन्ति? उच्यते 'नित्यो नित्यानाम्' इत्यादौ निर्धारणसामर्थ्याद् जीवानां नित्यत्वम्, ईश्वरस्य च परमनित्यत्वमवगम्य मन्दाः प्रतिपद्यन्ते 'नित्यत्वं हि विनाशाभावाः। नचाभावः तारतम्यवान्। अत ईश्वर एव नित्यो जीवेषु तूपचारः' इति। **इति प्रमेयदीपिका** [3] **ब्रह्मसूत्रम्** १.१.२१ [4] **ब्रह्मसूत्रम्** १.२.२० [5] **ब्रह्मसूत्रम्** २.१.२३ [6] **श्वेताश्वतरोपनिषत्** १.९ [7] शतपथब्राह्मणम् ५४.५.३० [8] **श्वेताश्वतरोपनिषत्** १.६ [9] 'अन्यश्च शश्वदव्यक्तस्तथान्यः पञ्चविंशकः' **महाभारतम्** १२.३०६.५४।
अन्यश्च राजन्नवरस्तथान्यः पञ्चविंशकः **महाभारतम्** १२.३०६.७५।

सा वैश्वदेवी आमिक्षा' इत्यत्रामिक्षाद्रव्यकं योगं विधाय 'वाजिभ्यो वाजिनम्' इति वाजिनाख्यगुणो विहितः, तस्यामिक्षारूपद्रव्यावरुद्धे यागे निवेशासम्भवेन पूर्वयागाद्भिन्नयागबोधकत्वं तथा भगवदुक्तयुष्मदर्थस्य भगवत्परत्वासम्भवेन ततश्चेतनान्तरत्वस्य बोधकत्वं सिद्ध्यति। नहि स्वस्यैव स्वं प्रति युष्मदर्थ-त्वम्।

नच स भेदो मिथ्या। 'जक्षन् क्रीडन् रममाणः'[1] 'निरञ्जनः परमं साम्य-मुपैति'[2] इति श्रुतिषु मोक्षेऽपि भेदप्रतिपादनात्। नच सोऽवान्तरमोक्षः। 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'[3] इति स्वस्वरूपाविर्भावलक्षणस्य परममुक्तित्वात्। मृषाभेदस्य मायिकस्य मायामोहं विना दर्शनासम्भवेनो-पदेशाद्यसम्भवाच्च। नहि सप्रज्ञो वचनरूपमुपदेशं स्वं प्रत्येव करोति। नच स्वाप्निकगुरुशिष्यवदुपदेशाद्युपपत्तिः। स्वाप्निकोपदेशाद्युपलब्धज्ञानमोक्षादेः मृ-षात्ववत् मोक्षस्य मिथ्यात्वापत्तेः। इष्टापत्तौ तद्बोधकवेदस्य तदुपायबोधक-वेदस्य तद्दृष्टान्तेन वेदमात्रस्य चाप्रामाण्यापत्तेः। कल्पितत्वमजानतः स्वप्ने उपदेशकत्वसम्भवेऽपि तज्ज्ञानवतो भगवत उपदेशकत्वासम्भावात्। कल्पि-तभेदं कल्पितत्वेनाजानतो भ्रान्तत्वापत्त्येश्वरत्वहानेः। तद्धानिस्वीकारे तु कृ-तार्थाः कृता वयं त्वयैव निरीश्वरवादिना।

किञ्च भेदः शुद्धेन कल्पितः? विशिष्टेन वा? नाद्यः। सदोषस्यैव क-ल्पकत्वेन शुद्धस्य कल्पकत्वासम्भवात्। न द्वितीयः। कल्पकस्याधिकसत्ता-कत्वनियमेन कल्प्यस्य मृषाभूतस्य विशिष्टस्य कल्पकत्वासम्भवात्।

किञ्च जीवः प्रतिबिम्बः? अवच्छिन्नो वा? नाद्यः। उपाध्यन्तर्गतस्योपाधौ प्रतिबिम्बासम्भवात्। नहि जलस्थस्य घटादेः जले प्रतिबिम्बः। उपाधेरेक-देशस्थायित्वाङ्गीकारे ब्रह्मणः सदेशत्वापत्तेः। नचाकाशस्य जले प्रतिबिम्बः। तस्य सदेशत्वेनोपाधिबहिःस्थस्य तत्सम्भवात्। वस्तुतस्तु नास्त्येवाकाशप्र-तिबिम्बो जलादौ। चाक्षुषत्वानापत्तेः। नह्यचाक्षुषस्य प्रतिबिम्बः चाक्षुषो भवति। धर्माधर्मवायुपिशाचादेरपि प्रतिबिम्बस्यापि चाक्षुषत्वापत्तेः। किन्तु प्रभामण्ड-लस्यैव प्रतिबिम्बः। पारमार्थिकब्रह्मणः स्वन्यूनसत्ताकव्यावहारिकोपाधौ प्रति-बिम्बासम्भवात्। नहि मरीचिजले सूर्यप्रतिबिम्बः सम्भवति।

---

[1] **छान्दोग्योपनिषत्** ८.१२.३ [2] **मुण्डकोपनिषत्** ३.१.३ [3] **छान्दोग्योपनिषत्** ८.३.४

न द्वितीयः। उपाधिना ह्येकदेशोऽवच्छिद्यते? कृत्स्नं वा? आद्ये सदेशत्वापत्तिः। द्वितीये तूपाधेर्भेदकत्वासम्भवेन कृत्स्नस्य जीवत्वमीशत्वं वा स्यात्। अन्तर्यामिब्राह्मणस्योभयथा विरोधाच्च। नहि घटावच्छिन्नस्य मठावच्छिन्नाकाशत्वं मठावच्छिन्नस्य घटावच्छिन्नाकाशत्वमस्ति।

नच जीवोपाध्यन्तर्गतस्येशत्वम्। तत्राप्राप्तस्यान्तःप्रविश्य नियामकत्वरूपमन्तर्यामित्वम्। नचास्तु कौन्तेयस्य राधेयत्ववत् परब्रह्मण एव जीवत्वम्। तथा सत्युपदेशस्य दत्तजलाञ्जलित्वापत्तेः। नहि राधेय एव 'त्वं राधेयो न भवति, किन्तु कौन्तेयः' इति राधेयस्योपदेष्टा। नित्यमुक्तत्वबोधकश्रुतीनां निर्विषयत्वापत्तेश्च।

ननु तत्त्वमस्यादिवाक्यसिद्धो जीवेश्वराभेदः कथमपलाप्यते? इति चेत्, न। वाक्येन हि स्वरूपातिरिक्ताभेदादिबोधने, अखण्डार्थकत्वहानिः। तदबोधने भेदस्य बाधकाभावेन पारमार्थिकत्वसिद्धिः। स्वरूपस्याज्ञानाद्यधिष्ठानतया सदा सिद्धत्वेन वाक्यवैय्यर्थ्यम्। 'स आत्मा(ऽ)तत्त्वमसि' इत्यत्र 'अतत्वमसि' इति पदच्छेदेन, ईश्वरसादृश्यमेव जीवे नञा बोध्यते। भेदबोधकनवदृष्टान्तानुरोधात्।

तथा हि। परिभ्रमणेन श्रान्तः सूत्रबद्धः पक्षी शङ्कुमेवाश्रयति। तथा जागरादौ श्रान्तो जीवः सुषुप्तौ परेशं संश्रयतीत्याह - 'यथा शकुनिः सूत्रेण प्रबद्धः'[1] इत्यादिना।

यथा मधुकरैः गृहीता रसा अयमाम्रस्याहं पनसस्येति भेदं न विन्दन्ति तथा जीवे विद्यमानोऽप्यविद्याबुद्धिभिर्न स्वभिन्नतया ज्ञायत परेश इत्याह - 'यथा सोम्य मधुकृतः'[2] इत्यादिना।

यथा चेतनाभिः समुद्रे मिलिताभिः नदीभिः 'इयं गङ्गा' 'अहं यमुना' इति न ज्ञायते, तथा त्वयि स्थित ईश्वरस्त्वया न ज्ञायत इत्याह - 'यथा सोम्य'[3] इत्यादिना।

यथा वृक्षस्य विघातिनि विद्यमानेऽपि, ईश्वरानुग्रहात् सुखमवस्थानम्,

[1] **छान्दोग्योपनिषत्** ६.८.२ [2] **छान्दोग्योपनिषत्** ६.९.१ [3] **छान्दोग्योपनिषत्** ६.१०.१

तदभावे विघातकाभावेऽपि शुष्कता, तथा जीवस्य मानुषादिदेहेऽपीश्वराधीनत्वमित्याह - 'यथा सोम्य महतो वृक्षस्य'[1] इत्यादिना।

यथा वटबीजे महावटो यच्छक्त्या सन्नपि नोपलभ्यते तथा जीवान्तर्गतो हरिर्न दृश्यत इत्याह - 'स न्यग्रोधफलम्'[2] इत्यादिना।

यथा जले प्रक्षिप्तलवणधर्मे क्षारत्वे गृह्यमाणेऽपि लवणं न गृह्यते, तथा वटावस्थानहेतुसामर्थ्ये गृह्यमाणेऽपि स न गृह्यते इत्याह - 'लवणमुदकेऽवधाय'[3] इत्यादिना।

यथाऽऽदौ कश्चित् पुरुषो बद्धाक्षो देशान्तरे नीत्वा मुक्तः, पृष्ट्वा पृष्ट्वा स्वदेशमायाति तथा दुर्ज्ञेयोऽपीशो गुरूपदेशादिना ज्ञेय इत्याह - 'यथा सौम्य पुरुषम्'[4] इत्यादिना।[5]

यथा रोगी ग्रस्तव्यापारः पार्श्वस्थान्न वेद, तथा सुषुप्तौ परेण सम्पन्नो जीवस्तन्न वेदेत्याह - 'पुरुषं सोम्योपतापिनम्'[6] इत्यादिना।

यथा कश्चित् पुरुषो राजभटैरानीतः 'चोरोऽयम्' इति, यदा स चौरस्तदा दण्ड्यो यदा न चौरस्तदा न, तथा यः 'अहं ब्रह्म' इति ज्ञानी परकीयब्रह्मत्वापहारकत्वाद्दण्ड्यः, मद्भिन्नं ब्रह्मेति जानन्न दण्ड्य इत्याह - 'पुरुषम्'[7] इत्यादिना।[8]

---

[1] **छान्दोग्योपनिषत्** ६.११.१ [2] **छान्दोग्योपनिषत्** ६.१२.१ [3] **छान्दोग्योपनिषत्** ६.१३.१ [4] **छान्दोग्योपनिषत्** ६.१४.१ [5] आनन्दतीर्थकृतछान्दोग्योपनिषद्भाष्योदाहृतं सामसंहितावचनम्- 'यदि स्वतोऽन्यः परमो देहेऽस्मिन् संव्यवस्थितः। न दृश्यते कुत इति भूयः पप्रच्छ पुत्रकः॥ अज्ञैरदृश्यमानोऽपि न भेदो नास्ति पुत्रक। यथा पुष्परसा युक्ता अजानन्तोऽपि भेदिनः॥ अजानन्तोऽपि पुरुषास्तथा विष्णोर्हि भेदिनः॥ इति पित्रोपदिष्टः सन् पुत्रः पप्रच्छ तं पुनः। चेतनानामविज्ञानं कथमित्येव चिन्तयन्॥ तं प्रत्याह यथा नद्यश्चेतनाश्च समुद्रगाः। स्ववारि नैव जानन्ति प्रजास्तद्वत् प्रजालये॥ स्वतोऽन्योऽस्ति परो देह इति ज्ञायेत मे कथम्। इति पृष्टः पुनः प्राह वृक्षदृष्टान्ततः पिता॥ अभिमानिनोऽस्वतन्त्रत्वाद् भेदेन ज्ञायते तरौ। हरिः किमु मनुष्येषु शोषो ह्यस्यास्वतन्त्रतः॥ ज्ञायते न कथं स्वामिन् सूक्ष्मे ज्ञाते परो हरिः। तत्रस्थ इति पृष्टः संस्तमाहोद्दालकः सुतम्॥ वटबीजे यथा सूक्ष्मे महान्यग्रोधभावयुक्। न दृश्यतेऽभिमानी स एवं जीवगतो हरिः॥ कथं दृश्येत तच्छक्तिः पृथक् तस्य ह्यदर्शने। इति भावयुतं प्राह पुत्रमुद्दालकः पुनः॥ यथाऽप्सु लवणं व्याप्तं रसदृष्ट्यैव दृश्यते। एवं चेतनगो विष्णुस्तद्भिन्नोऽपि न दृश्यते॥ कथं स ज्ञायते विष्णुर्भिन्न इत्यत्र चाब्रवीत्। यथैवान्योपदेशेन बद्धाक्षः स्वं गृहं व्रजेत्। तथाऽऽचार्योपदेशेन भिन्नमीशं व्रजेत् पुमान्॥ नयथा पुंसोऽस्वतन्त्रत्वं तज्ज्ञापयतु मा भवान्। इत्युक्त आह ज्ञाने हि दृष्टैवास्यास्वतन्त्रता॥' [6] **छान्दोग्योपनिषत्** ६.१५.१ [7] **छान्दोग्योपनिषत्** ६.१६.१ [8] अयं समग्रः तत्त्वमसीवाक्यार्थः श्रुतिसिद्धान्तप्रकाशे वनमालिकृतेऽपीत्थमेव पठ्यते।

स्वस्य संसारित्वादिकं मत्वा तस्य सच्चिदानन्दाकारत्वनिर्मुक्तत्वादिनेश्वरसादृश्यं बोध्यते वाक्येन। तच्च सादृश्यं न प्रत्यक्षसिद्धम्। जीवपूर्णानन्दताया अविद्यावृतत्वात्। अत एव जहदजहल्लक्षणाऽपि परस्य निरस्ता। तदादिपदद्वयवाच्यात् सर्वज्ञत्वादिविशिष्टादहन्धीगृहीतादज्ञानाद्यधिष्ठानतया भातात् 'सन् घटः' इत्यादिप्रत्यक्षसिद्धाच्च चैतन्यमात्राधिकार्थस्य लक्षणाजन्यबोधे अभाने लक्षणावैय्यर्थ्यात्। भाने च वाक्यस्य सखण्डार्थकत्वापत्तेः। अद्वैतहानेश्च।

नच प्रत्यक्षे विशिष्टस्य भानेऽपि शुद्धं न भासते, अतस्तद्बोधाय वाक्यं सार्थकमिति वाच्यम्। विशिष्टभाने विशेष्यभानावश्यकत्वात्। नहि दण्डिनि भाते पुरुषव्यक्तिर्न भासते। शुद्धभानं विना जगदान्ध्यापत्तेः। नह्यधिष्ठानभानं विनाऽध्यस्तस्य भानं भवति। स्वीक्रियते च शुद्धमधिष्ठानं प्रपञ्चस्तत्राध्यस्त इति त्वया। नच 'द्वितीयाद्वै भयं भवति'[1] इति विरोधः। द्वितीयाद् विरुद्धात् समाधिकाच्च लोके प्राप्तं भयमनुवदति श्रुतिर्यतः। अन्यथा 'आचार्यवान् पुरुषो वेद'[2] इत्यादिश्रुतिविरोधः स्यात्। 'एकाकी न रमते एकाकी बिभेति सहायमीक्षाञ्चक्रे' इति पूर्वोत्तरवाक्येन भेदस्यैव बोधनाच्च।

'यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'[3] इति मोक्षे भेदो बोध्यते। यत्तु " 'पुत्रेण सहागतः पिता' इत्यत्रेव प्रधानक्रियानुकूलसजातीयक्रियाकर्तृत्वेन? किं वा पत्न्या इवानुज्ञामात्रेण? नाद्यः। ब्रह्मणोऽपि भोगप्रसङ्गात्। नान्त्यः। ईश्वरस्य प्राणिमात्रभोगेऽनुज्ञादातृत्वादप्राधान्यापत्तेश्च" इति, तन्न। ब्रह्मणा हेतुना सर्वान् कामान् सह युगपदश्नुत इति योजनेऽपि मोक्षे भेदसिद्धेः। 'यमेवैष वृणुते तेन लभ्यः'[4] इति श्रुतेः। ब्रह्मणा चतुर्मुखेन सहेति वाऽर्थः। 'सह शाखया प्रस्तरं प्रहरति' इत्यत्र प्रस्तरेण सह प्रस्तरप्रहरणकालेऽप्रसिद्धकालां शाखां प्रहरतीति विभक्तिव्यत्ययेन सहशब्दस्य कालपरत्वं वार्तिकादावुक्तमित्यत्रापि चतुर्मुखस्य मुक्तिकाले द्विपरार्धान्ते सर्वान् कामानश्नुते आविर्भूतनिरतिशयानन्दराशिर्भवतीत्यर्थः।

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।

---

[1] **बृहदारण्यकोपनिषत्** १.४.२ [2] **छान्दोग्योपनिषत्** ६.१४.२ [3] **तैत्तिरीयोपनिषत्** २.१.१ [4] **कठोपनिषत्** २.२३

परस्यान्ते[1] कृतात्मानः प्रविशन्ति परमं पदम्॥' इति स्मृतेः।

परस्य कर्तृकर्मक्रियादिपदानां वैय्यर्थ्यमेव। नहि तन्मते स्वरूपभिन्नं मोक्षे किमप्यस्ति। नच 'यदुदरमन्तरं कुरुते' इति श्रुतिविरोधः। अन्तर्यामित्वादिना प्रसक्तेश्वरभेदस्यानया निषेधात्। नच 'नेह नानाऽस्ति किञ्चन'[2] इत्यादि-श्रुतिविरोधः। अवतारान्तर्यामित्वादिना प्रसक्तेश्वरभेदनिषेधात्। भावप्रधाननिर्देशेन नानाशब्दस्य नानात्वार्थकत्वात्। अन्यथा नानानिषेधस्यैव ब्रह्मभिन्नत्वाद् भिन्नमात्रनिषेधो व्याहतः। नच भिन्नाभावो ब्रह्मस्वरूपः। ब्रह्मस्वरूपस्य सदासिद्धत्वेनोपदेशवैय्यर्थ्यात्। सप्रतियोगिकस्य भ्रमकालाज्ञातस्य नानानिषेधस्य निष्प्रतियोगिकभ्रमकालज्ञातब्रह्मस्वरूपत्वासम्भवात्। अभावस्यातिरिक्तस्य सत्यत्वस्वीकारे अभावत्वाधेयत्वाधिकरणत्वादीनां भावानामपि सत्यत्वावश्यकत्वात्।

नच 'एकमेवाद्वितीयम्'[3] इति सजातीयविजातीयस्वगतभेदनिषेधकश्रुतिविरोधः। एकपदेन मुख्यत्वस्य बोधनात्। 'एके मुख्यान्यकेवलाः'[4] इति कोशात्। अद्वितीयपदेन समाधिकराहित्यबोधनात्। एवकारेण विशेषणसङ्गतेन 'शङ्खः पाण्डुर एव' इत्यादाविव मुख्यत्वादेर्हि ब्रह्मण्ययोगो व्यवच्छिद्यते। नह्यत्र विशेष्यसङ्गत एवकारः। येन 'पार्थ एव धनुर्धरः' इत्यादाविवान्ययोगव्यवच्छेदो बोध्यते। किञ्च, अद्वितीयपदेनैव द्वितीयमात्रनिषेधसिद्धौ पदान्तरवैय्यर्थ्यात्। विशेषणतयोपलक्षणतया वा श्रुत्या द्वितीयाभावबोधने तेनैवाद्वैतहानेः। श्रुतिविहितस्य द्वितीयाभावस्य व्याघातापत्त्या पुनः श्रुत्या निषेधासम्भवात्। चिन्मात्रस्यैव बोधने चितो नित्यसिद्धत्वेनोपदेशवैय्यर्थ्यात्। चिन्मात्रज्ञानस्य द्वैताविरोधित्वेन द्वैतस्य सत्यत्वोपपत्तेः। नहि भूतलमात्रज्ञानं घटस्य तदभावस्य वा धियो विरोधि।

सन्ति च भेदश्रुतेः षड्विधतात्पर्यलिङ्गानि[5] ।[6] आथर्वणे 'द्वा सुपर्णा'[7] इत्युपक्रमः। 'परमं साम्यमुपैति'[8] इत्युपसंहारः। 'तयोरन्यः'[9] 'अनश्नन्नन्यः'[10]

---

[1] तस्यान्ते इति कोशे। [2] **बृहदारण्यकोपनिषत्** ४.४.१९, **कठोपनिषत्** ४.११ [3] **छान्दोग्योपनिषत्** ६.२.१ [4] अमरकोशे [5] आनन्दतीर्थकृतब्रह्मसूत्रभाष्योदाहृतबृहत्संहितावचनम् -
'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥' [6] विवृतमिदं भेदश्रुतेः षड्विधतात्पर्यलिङ्गोपेतत्वं श्रुतिसिद्धान्तप्रकाशे। [7] **मुण्डकोपनिषत्** ३.१.१ [8] **मुण्डकोपनिषत्** ३.१.३ [9] **मुण्डकोपनिषत्** ३.१.१ [10] **मुण्डकोपनिषत्** ३.१.१

'अन्यमीशम्'[1] इत्यभ्यासः। शास्त्रैकगम्येश्वरप्रतियोगिकस्य तदनुयोगिकस्य त्रैकालिकभेदस्य शास्त्रं विनाऽप्राप्तेरपूर्वता। 'पुण्यपापे विधूय'[2] इति फलम्। 'अस्य महिमानमेति'[3] इति स्तुतिरूपोऽर्थवादः। 'अनश्नन्'[4] इत्युपपत्तिः।

अन्तर्यामिब्राह्मणेऽपि षड्विधलिङ्गोपेतवाक्यम्। तथाहि। 'वेत्थ नु त्वं काप्य तमन्तर्यामिणम्'[5] इत्युपक्रमः। 'एष त आत्माऽन्तर्यामी'[6] इत्युपसंहारः। 'एष आत्मा'[7] इत्येकविंशतिकृत्वोऽभ्यासः। अन्तर्यामित्वस्याप्राप्ततयाऽपूर्वता। 'स वै ब्रह्मवित्'[8] इत्यादिनिन्दारूपोऽर्थवादः। 'यस्य पृथिवी शरीरं पृथिवी यं न वेद'[9] 'यस्यात्मा शरीरं आत्मा यं न वेद' इत्याद्युपपत्तिरिति।

नच 'नाहमीश्वरः' इति प्रत्यक्षेणैव भेदसिद्धा श्रुतिरनुवादिकेति वाच्यम्। प्रत्यक्षस्य प्रामाण्ये हि तेनैव भेदसिद्धा, अस्तु भेदश्रुतिर्नित्यानुवादः। प्रत्यक्षस्याप्रामाण्ये श्रुतेरनुवादकत्वासम्भवात्। अप्रमाणगृहीतमात्रग्राहित्वेनानुवादकत्वस्वीकारे, अप्रमाणगृहीतमात्रग्राहित्वेन श्रुतेरप्रामाण्यापत्तेः। नच भेदस्य प्रत्यक्षसिद्धत्वेन शास्त्रारम्भो व्यर्थः। ईश्वरप्रतियोगिकभेदस्य प्रत्यक्षसिद्धत्वेऽपि, अनन्तगुणपूर्णस्य श्रीहरेरप्रत्यक्षत्वात् श्रवणमनननिदिध्यासनादिना तमपरोक्षीकर्तुं शास्त्रारम्भस्य सार्थकत्वात्॥ १२॥

ननु स्वीयदेहनाशरूपं मरणं तु जीवस्य स्यादेव। तत्राह - **देहिन इति**॥

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ १३॥

यथा एकस्मिन् **देहे** वर्तमानस्य **देहिनः** कौमारावस्थां विहाय यौवनाद्यवस्थां प्राप्तस्य स्थिरत्वबुद्ध्या न शोको भवति, **तथा** एकं देहं विहाय **देहान्तरप्राप्तिः। तत्र** प्राप्तौ **धीरः** 'आत्मा स्थिरः' इति धीमान् **न मुह्यति** 'आत्मा मृतः' इति न मुह्यति।

[1] **मुण्डकोपनिषत्** ३.१.२ [2] **मुण्डकोपनिषत्** ३.१.३ [3] **मुण्डकोपनिषत्** ३.१.२ [4] **मुण्डकोपनिषत्** ३.१.१ [5] **बृहदारण्यकोपनिषत्** ५.७.१ [6] **बृहदारण्यकोपनिषत्** ५.७.२३ [7] **बृहदारण्यकोपनिषत्** ५.७.३-२३ [8] **बृहदारण्यकोपनिषत्** ५.७.१ [9] **बृहदारण्यकोपनिषत्** ५.७.३

ननु देह एवात्मा। 'स्थूलोऽहं गौरोऽहं गच्छामि' इति प्रतीतेः। 'जातो देवदत्तः' 'मृतो मैत्रः' इति प्रतीतेर्देहजन्मनाशाभ्यामात्मनोऽपि जन्मनाशोपपत्तेः। अनुमानागमादेः प्रामाण्यानङ्गीकारेण देहभिन्नात्मनः प्रत्यक्षासिद्धत्वादिति लोकायतिकाः। तान् प्रति वाऽऽह - **देहिन इति**॥

'योऽहं बाल्ये पितॄनन्वभूवम् सोऽहं वृद्धो प्रणप्तॄननुभवामि' इत्यवस्थाभेदाद् देहभेदेऽप्यात्मनः स्थिरत्वप्रत्यभिज्ञानान्न यथा भेदः, तथा योऽहं स्वप्ने पूर्वं व्याघ्रदेहोऽनन्तरं पशुदेहः स एवाहं मनुष्यदेह इत्यनुगतदेहेष्वनुगतात्मज्ञानात्, **तत्र** देहान्तरप्राप्तौ देहभिन्नात्मनि **न मुह्यति**। उक्तदेहात्मनोरभेदप्रत्ययस्तु कर्दमलिप्ते वस्त्रे कृष्णं वस्त्रं पुत्रे नष्टेऽहं नष्ट इतिवदौपचारिकः। 'मम देहः स्थूलः' इत्यादिप्रत्ययस्य बाधकत्वेनारोपासम्भवात्। देहातिरिक्तात्माभावे स्तनपानादौ बालस्य प्रवृत्तिर्न स्यात्। इष्टसाधनताज्ञानाभावात्। अनुभावकस्य तदानीमसत्वात्। प्राचीनस्तनपानानुभवितुरिदानीमसत्वेन स्मरणासम्भवाच्च।

यथैकस्मिन् देहे परिणामिनि नानावस्था जायन्ते तत्त्यागप्राप्तिभयात् स्वधर्मानुष्ठानं न त्याज्यं तदुत्पत्त्यादेरवर्जनीयत्वात्, तथा विद्यमानदेहनाशे देहान्तरोत्पत्तेरावश्यकत्वात् तद्भयात् स्वधर्मानुष्ठानं न त्याज्यमिति भावः।

देहिनः इत्येकवचनं तु जीवस्यानेकावस्थादिगतस्याप्येकत्वलाभाय। एकवचनानुरोधेन जीवैकत्वे[1] शुकादिमोक्षप्रतिपादकशास्त्रस्याप्रामाण्यं स्यात्। तदङ्गीकारे विनियामकाभावेन जीवैक्यपरत्वाभिमतस्याप्रामाण्यापत्तेः। 'स जीवोऽहमेव' इति निश्चयाभावेन मुमुक्षूणां श्रवणादौ बह्वायाससाध्यनिष्कम्पप्रवृत्तिर्न स्यात्। 'यः सर्वज्ञः सर्ववित्'[2] इत्यादिनित्यसार्वज्ञबोधकश्रुतिविरोधापाताच्च। बद्धमुक्तगुरुशिष्यादिव्यवहारस्यानुपपत्तेश्च। नच स्वप्नवदुपपत्तिः। मोक्षस्य ब्रह्मस्वरूपस्य च त्वदभिमतस्य स्वाप्निकगुर्वादिवन्मिथ्यात्वापत्त्या स्पष्टा शून्यवादापत्तिः॥ १३॥

नन्वात्मनो नित्यत्वाद् देहस्य नश्वरत्वान्नोभयं शोकस्थानं यद्यपि, तथाऽपि प्रेमास्पदानां स्वजनानां दर्शनस्पर्शालापादिकं सुखहेतुः। तेषु मृतेषु

[1] एकस्यैव विभुत्वेन सर्वदेहयोगित्वात् सर्वस्य चेष्टापत्तेर्न प्रतिदेहमात्मभेदे प्रमाणमस्तीति सूचयितुमेकवचनम्। सर्वे वयमिति बहुवचनं तु पूर्वदेहभेदानुवृत्त्या न त्वात्मभेदाभिप्रायेणेति न दोषः। **इति मधुसूदनसरस्वतीये**

[2] **मुण्डकोपनिषत्** १.१.९

मम सुखहानिः। तेषां स्वस्यातितीव्रशस्त्रभेदादिदर्शनादत्यन्तदुःखं स्यात्। अतः कथं न शोच्यम् ? अत आह - **मात्रेति**॥

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥ १४॥

मीयन्ते ज्ञायन्ते इति **मात्राः** शब्दस्पर्शाद्या विषयाः। तेषां **स्पर्शाः** श्रोत्रादिभिः सह सम्बन्धाः। **शीतोष्ण** शब्दौ सर्वविषयोपलक्षकौ। ततोऽपि विषयसाक्षात्कारोपलक्षकौ। विषयाः स्वानुभवद्वारा सुखदुःखदा इत्यर्थः। शब्दादीनां श्रोत्रादिभिः सह सन्निकर्षाः। ततस्तद्विषयसाक्षात्कारः। ततश्चेष्टविषयज्ञानात् सुखम्, अनिष्टविषयज्ञानादसुखं भवति[1] **तान्** धैर्येण यावच्छास्त्रीययुद्धादिकर्मसमाप्तिः, तावत् **तितिक्षस्व**। ते चागमापायित्वादनित्यत्वात् धैर्यवतां क्षन्तुं योग्याः[2]

बन्धहेत्वविद्यानिवृत्तौ देहादौ 'अहम्' 'मम' इत्यभिमाननिवृत्तौ च, अन्तःकरणं सुखदुःखाद्युत्पत्तावपि जीवन्मुक्तानामागमापायिनामपि दुःखादीनां प्रागिवानुभवाभावात् तेषामनित्यत्वं जीवे स्वाभाविकसम्बन्धशून्यत्वं देहादावहमित्यभिमानं विहाय दुःखाद्यधिकरणं मन एवेति विभावयन् ज्ञानानन्दस्वरूपं चात्मानं सञ्चिन्तयन् यावत्स्वधर्मानुष्टानं शीतादिप्रयुक्तं दुःखादिकमवश्यं सोढव्यमिति भावः॥ १४॥

ननु दुःखाभावरूपपुरुषार्थस्य युद्धादिस्वधर्माननुष्टानेनापि सम्भवात्, किं तत्कृत्वा प्रसक्तदुःखस्याभावायाभिमानत्यागेन? इति हृदयस्थामाशङ्कामपाकर्तुम्, अभिमानत्यागाद्भवन् दुःखाभावः स्वयं पुरुषार्थोऽपि परमानन्दस्वरूपाविर्भावरूपमोक्षहेतुश्च भवतीत्याह - **यं हीति**॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।

[1] मीयन्त इति मात्रा विषयाः। तेषां स्पर्शाः सम्बन्धाः। त एव शीतोष्णसुखदुःखदाः। देहे शीतोष्णादिसम्बन्धाद्धि शीतोष्णाद्यनुभव आत्मनः। ततश्च सुखदुःखे। **इति मध्वभाष्यम्** ।

[2] शब्दस्पर्शरूपरसगन्धाः साश्रयास्तन्मात्राकार्यत्वान्मात्रा इत्युच्यन्ते। श्रोत्रादिभिस्तेषां स्पर्शाः शीतोष्णमृदुपरुषादिरूपसुखदुःखदा भवन्ति। शीतोष्णशब्दः प्रदर्शनार्थः। तान् धैर्येण यावद्युद्धादिशास्त्रीयकर्मसमाप्ति तितिक्षस्व। ते चागमापायित्वाद्धैर्यवतां क्षन्तुं योग्याः। **इति रामानुजभाष्ये** ।

समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥ १५॥

यं देहादौ 'अहम्' इत्याद्यभिमानशून्यम् **एते** मात्रास्पर्शाः **न व्यथयन्ति** सुखदुःखवैषम्ययुक्तं न कुर्वन्ति, **सोऽमृतत्वाय** मोक्षाय **कल्पते** योग्यो भवति। ननु सुषुप्त्यादौ पामराणामपि 'अहम्' इत्याद्यभिमानाभावादमृतत्वं स्यादत आह - **पुरुषमिति॥** पुरुषमेव सन्तं देहाद्यनुसन्धानवन्तम्, जाग्रतमित्यर्थः[1]

यद्वा, अभिमानत्यागजन्यदुःखाभावमात्रात् कथं मोक्षः? 'तमेव विद्वानमृत इह भवति' इति श्रुतिविरोधादत आह - **पुरुषमिति॥** पुरु ब्रह्म सरति जानातीति **पुरुषः** ब्रह्मज्ञानी, तम्[2] कीदृशम्? **समदुःखसुखम्** अनात्मधर्मत्वात्, अपुरुषार्थत्वाच्च दुःखं यथा हेयम्, वैषयिकं सुखमप्यनात्मधर्मत्वात् मोक्षविरुद्धत्वाच्च तथा हेयत्वेन समे सुखदुःखे यस्य। तादृशसमत्वमेव कथं स्यात्? अत उक्तम् - **धीरमिति॥** सुखदुःखकार्यहर्षविषादयोः स्तम्भकप्रयत्नवन्तमित्यर्थः।

अयं भावः। यथा क्षेत्रोत्पन्नधनेन वृक्षोत्पन्नदण्डेन च सम्बन्धविशेषेण पुरुषस्य धनित्वं दण्डित्वम्, तथा मनस्युत्पन्नेन दुःखादिना अविद्यासहकृतस्वामित्वेन दुःखादिजनकादृष्टप्रयोजकाविद्यावत्वेन वा सम्बन्धेन जीवस्य दुःखादिमत्त्वम्। जीवन्मुक्तानामनुवृत्तस्याविद्यालेशस्य दग्धपटन्यायेन देहाद्यभिमानाप्रयोजकत्वेन तन्निमित्तादृष्टाप्रयोजकत्वं प्रारब्धकर्मजन्यादृष्टफलदुःखादिभोगसम्पादकत्वं च परमस्तीत्यविद्यैव दुःखाद्यनुभवरूपसंसारहेतुरिति संसारहानाय देहादौ 'अहम्' 'मम' इत्यभिमानं विहाय कर्मणि 'मदीयमिदं कर्म, अनेनेदं फलं प्राप्तव्यम्' इति चाभिमानं विहाय, शास्त्रोक्तस्वस्वरूपानुसन्धानपूर्वकस्वोचितकर्मानुष्टानम्, ततः सर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपा परा भक्तिः, ततो भगवन्महाप्रसादः, ततो मोक्ष इति।

पुरुषम् इत्येकवचनम् 'राजा धार्मिको भवेत्' 'ब्राह्मणः शान्तो दान्तो भवेत्' इत्यादिवज्ञात्यभिप्रायेणोपपन्नम्।

---

[1] शरीरसम्बन्धाभावे सर्वेषामपि व्यथाभावात् पुरुषमिति विशेषणम्।**इति मध्वभाष्यम्** ।

[2] 'पुरु ब्रह्म गुणाधिक्यात् तज्ज्ञानात् पुरुषः स्मृतः' इति प्रवृत्ते। **इति गीतातात्पर्ये** ।

यत्तु "एकवचनानुसारादेक एव सर्वेषु देहेषु जीवः 'एको देवः सर्वभूतेषु गूढः'[1] इति श्रुतेः"[2] इति, तन्न। 'अविद्यायामन्तरे वर्तमानाः'[3] 'तद्य इह रमणीयचरणाः'[4] इत्यादौ कर्मबन्धस्य 'सति सम्पद्य न विदुः'[5] इत्यादौ सुषुप्तेः 'वेदान्तविज्ञानसुनिश्चितार्थाः'[6] इत्यादौ तत्त्वज्ञानस्य 'परिमुच्यन्ति सर्वे' इत्यादौ[7] मोक्षस्य च चेतनधर्मस्यानेकेषूक्तेरसाङ्गत्यापत्तेः। 'तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः'[8] इति, 'अनयोस्तत्त्वदर्शिभिः'[9] 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः'[10] इत्यात्मतत्त्ववित्सु बहुत्वश्रवणाच्च। 'तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्, तथर्षीणाम्, तथा मनुष्याणाम्' 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः'[11] 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'[12] इति श्रुतेः।

'बहवो ज्ञानतपसा पूता मद्भावमागताः'[13]
'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः'[14]
'ये च मुक्ता भवन्तीह नरा भरतसत्तम।
तेषां लक्षणमेतद्यच्छ्वेतद्वीपनिवासिनाम्॥'[15]

इति स्मृतेश्च बहूनां मुक्तिप्रतिपादिकायाः विरोधापत्तेः। नहि मुक्तौ ब-

---

[1] **श्वेताश्वतरोपनिषत्** ६.१० [2] अत्र पुरुषमित्येकवचनेन साङ्ख्यपक्षो निराकृतः। तैः पुरुषबहुत्वाभ्युपगमात्।**इति मधुसूदनसरस्वतीये** 'देहिनः' इति श्लोकव्याख्यानावसरे चाहुः मधुसूदनसरस्वत्यः - "एकस्यैव विभुत्वेन सर्वदेहयोगित्वात् सर्वत्र चेष्टोपपत्तेर्न प्रतिदेहमात्मभेदे प्रमाणमस्तीति सूचयितुमेकवचनम्। 'सर्वे वयम्' इति बहुवचनं तु पूर्वदेहभेदानुवृत्त्या न त्वात्मभेदाप्रियाणेति न दोषः। ... अथवा देहिन एकस्यैव तव यथा क्रमेण देहावस्थोत्पत्तिविनाशयोर्न भेदः नित्यत्वात्, तथा युगपत् सर्वदेहान्तरप्राप्तिरपि तवैकस्यैव विभुत्वात्, मध्यमपरिमाणत्वे सावयवत्वेन नित्यत्वायोगात्, अणुत्वे सकलदेहव्यापिसुखाद्यनुपलब्धिप्रसङ्गात्, विभुत्वे निश्चिते सर्वत्र दृष्टकार्यत्वात्, सर्वशरीरेष्वेक एवात्मा त्वमिति निश्चितोऽर्थः। तत्रैवं सति वध्यघातकभेदकल्पनया त्वमधीरत्वान्मुह्यसि धीरस्तु विद्वान्न मुह्यति। अहमेषां हन्ता एते मम वध्या इति भेददर्शनाभावात्। तथा च विवादगोचरापन्नाः सर्वे देहा एकभोक्तृकाः देहत्वात् त्वद्देहवदिति। श्रुतिरपि 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' इत्यादि। एतेन यदाहुः 'देहमात्रमात्मा' इति चार्वाकाः, 'इन्द्रियाणि मनः प्राणश्च' इति तदेकदेशिनः, 'क्षणिकं विज्ञानम्' इति सौगताः, 'देहातिरिक्तः स्थिरो देहपरिमाणः' इति दिगम्बराः, 'मध्यमपरिमाणस्य नित्यत्वानुपपत्तेर्नित्योऽणुः' इत्येकदेशिनः, तत् सर्वमपाकृतं भवति नित्यत्वविभुत्वस्थापनात्॥' इति। [3] **कठोपनिषत्** २.५ [4] **छान्दोग्योपनिषत्** ५.१०.७ [5] **छान्दोग्योपनिषत्** ६.९.२ [6] **मुण्डकोपनिषत्** ३.२.६ [7] 'कर्मबन्धस्य' इत्यारभ्य 'सर्वे इत्यादौ' इत्यन्तं अ कोशे लुप्तम्। [8] **भगवद्गीता** ८.२४ [9] **भगवद्गीता** २.१६ [10] **भगवद्गीता** ४.३४ [11] **श्वेताश्वतरोपनिषत्** ४.५ [12] **कठोपनिषत्** ५.१३ [13] **भगवद्गीता** ४.१० [14] **भगवद्गीता** १४.२ [15] **महाभारतम्**

हुत्वं प्रत्यक्षादिप्राप्तम्, यदनूद्येत। नचैकजीववादे मुक्तामुक्तव्यवस्थाऽस्ति। श्रुतिसिद्धानां शुकादीनां त्वदभिमतानां गौडपादादीनां ब्रह्मविदां मुक्तिर्नासीत्, तदुपदेशात् तव भविष्यतीति चित्रम्।

किञ्च जीवैकत्वे सुखदुःखभोगसाङ्कर्यं स्यात्। नचोपाधिभेदादसाङ्कर्यम्। देहोपाधिभेदेऽपि योगिनां भोगसाङ्कर्यदर्शनात्। अन्तःकरणस्योपाधित्वे सुषुप्तौ तन्नाशात् बहुसुप्ताल्पसुप्तयोरनुभवस्य साङ्कर्यापत्तेः। प्रतिदिनं सुषुप्तौ नष्टस्य संस्कारस्मरणाद्यनियामकत्वाच्च। नच कारणात्मना सुषुप्तौ अन्तःकरणमस्ति। कारणस्याविद्यारूपस्यैकत्वेन स्मृत्याद्यनियामकत्वादित्यलम्॥ १५॥

यदुक्तं आत्मनां नित्यत्वं देहानामनित्यत्वं च 'अशोच्यान्' इत्यादिना, तदुपपादयति -

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥ १६॥

असतः परिणामिनो देहस्य **भावः** अपरिणामित्वं **न विद्यते**। **सतः** अपरिणामिन आत्मनः **अभावः** परिणामित्वं च **न विद्यते**। **अनयोरुभयोः** देहात्मनोः **अन्तः तत्त्वदर्शिभिः दृष्टः**। निरूपणस्य निर्णयान्तत्वात्, निर्णय एवान्तशब्देनोक्तः[1] । असतो देहस्यासत्वमेव, सत आत्मन सत्वमेव स्वरूपमिति निर्णयो दृष्ट इत्यर्थः।[2]

'अनाशी परमार्थोऽसौ प्राज्ञैरभ्युपगम्यते'[3]
'यत्तु कालान्तरेणापि नान्यसञ्ज्ञामुपैति वै।
परिणामादिसम्भूतं तदस्तु नृप तच्च किम्॥'[4] इति वैष्णवोक्तेः[5]

---

[1] असतो नित्यविनाशिनः शरीरस्य न भावः। अनवरतमवस्थाभिः परिणामित्वात्। नित्यसतश्च परमात्मनो नास्ति कदाचिद्विनाशः। अपरिणामधर्मत्वात्। तथाच 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा' इत्यनयोः सदसतोः अन्तः प्रतिष्ठापदं यत्रानयोर्विश्रान्तिः। **-इति अभिनवगुप्तः।** [2] असतो देहस्य सद्भावो न विद्यते। सतश्चात्मनो नासद्भावः। उभयोर्देहात्मनोरुपलभ्यमानयोर्यथोपलब्धितत्त्वदर्शिभिरन्तो दृष्टः। निर्णयान्तत्वान्निरूपणस्य निर्णय इहान्तशब्देनोच्यते। देहस्याचिद्वस्तुनोऽसत्त्वमेव स्वरूपम्, आत्मनश्चेतनस्य सत्त्वमेव स्वरूपमिति निर्णयो दृष्ट इत्यर्थः। **इति रामानुजभाष्ये** [3] **विष्णुपुराणम्** २.१४.२४ [4] **विष्णुपुराणम्** २.१३.१०० [5] इमानि च वचनानि रामानुजभाष्येऽप्युदाहृतानि॥

यद्वा, सदसच्छब्दौ सत्कर्मासत्कर्मपरौ।

'प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते'[1]
'अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ'[2] इत्यादि वक्ष्यमाणत्वात्।

तथा **असतः** दुष्टकर्मणः सकाशात् **भावः** सुखं **न विद्यते।** तथा **सतः** सुकर्मणो युद्धादितः **अभावः** दुःखं **न विद्यते। अनयोरुभयोः** सदसत्कर्मणोः सुखदुःखकारणत्वरूपः **अन्तः** निर्णयः **तत्त्वदर्शिभिः दृष्टः।** इदं युद्धं तु क्षत्रियस्य प्रशस्ततरम्। अतः 'पापमेवाश्रयेदस्मान्'[3] इति शोकं जहीति भावः। भवत्यस्मिन्ननन्यप्रयोजनिकेच्छेति **भावः** सुखम्। न भवति तादृगिच्छा यस्मिन् सः **अभावः** दुःखम्[4]

यत्तु[5] "**असतः** विश्वस्य **भावः** सत्वं नास्ति, मृषात्वात्। **सतः** ब्रह्मणः नाशत्वम्[6] सजातीयविजातीयस्वगतभेदशून्यं ब्रह्मैव स्वप्रकाशरूपं सत् 'घटः सन्' इत्यादौ च घटादितादात्म्यापन्नं तदेव भाति सजातीयाच्चितो भेदः विजातीयाज्जडाद्भेदः स्वगताद्गुणाद्भेदो नास्ति, प्रतियोगिनोऽभावात्। तथा च श्रुतिः 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म'[7] इत्युपक्रम्य, 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्युपसंहरन्ती उक्तभेदशून्यमेकं सत्यमाह। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादिश्रुतिर्विकारस्यानृतत्वमाह। 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति श्रुतिर्विकारस्य सति[8] कल्पितत्वमाह" इति, तन्न।

विश्वस्य मिथ्यात्वे 'जन्माद्यस्य यतः'[9] इति सूत्रे 'यतो वा इमानि

---

[1] **भगवद्गीता** १७.२६ [2] **भगवद्गीता** १७.२८ [3] **भगवद्गीता** १.३६ [4] नच युद्धात्परलोकदुःखमिति शोकः। असत्कर्मणः सकाशात् भावो नास्ति सत्कर्मणः सकाशात् अभावो नास्तीति नियतत्वात्। 'सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचकाः। अभाववाचिनः शब्दाः सर्वे ते दुःखवाचकाः॥'- इति शब्दनिर्णये॥ 'सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥' - इति वक्ष्यमाणत्वात्। 'असन्नेव स भवति, असद्ब्रह्मेति वेद चेत्' इत्यादेश्च। अन्तो निर्णयः।**इति गीतातात्पर्ये** । [5] मधुसूदनसरस्वतीये। [6] सतः ब्रह्मणः अभावः नाशत्वं न विद्यत इत्यर्थः॥ [7] **तैत्तिरीयोपनिषत्** ६.२.१ [8] 'चिति' इति कोशे। [9] **ब्रह्मसूत्रम्** १.१.२

भूतानि जायन्ते'[1] इत्यादिश्रुतौ जन्माद्युक्तेः, 'ईक्षतेर्नाशब्दम्'[2] इति सूत्रे, 'स ऐक्षत' इति श्रुतौ चेश्वरस्येच्छापूर्वककर्तृत्वस्य, 'लोकवत्तु लीलाकैवल्यम्'[3] इति सूत्रे, 'आप्तकामस्य का स्पृहा'[4] इति श्रुतौ प्रयोजनाभावेऽपि सृष्टेः, 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्'[5] इति सूत्रे, 'पुण्येन पुण्यं लोकं नयति' इत्यादिश्रुतौ च कर्मसापेक्षत्वेनावैषम्यस्य, 'तेजोऽतस्तथा ह्याह'[6] इति सूत्रे, 'वायोः' इत्यादिश्रुतौ तेजआदेर्वाय्वादिजन्यत्वस्य, 'विपर्ययेण तु क्रमोऽत उपपद्यते च'[7] इति सूत्रे, 'पृथिव्यप्सु प्रलीयते' इत्यादिश्रुतौ पृथिव्यादेरबादौ लयस्य चोक्तेरयुक्तत्वापत्तेः। नहि कल्पिते विरोधपरिहारौ युक्तौ। किञ्च विश्वस्य मृषात्वे सर्वज्ञेन तत्पालनाद्यनुपपत्तिः। नहि शुक्तिरूप्यं मृषेति जानन् पालयति।

नचैन्द्रजालिकवत् तदुत्पत्तिः। प्रतारकस्येन्द्रजालिकस्योत्पादकत्वपालकत्वाद्यभावात्। 'एतन्मन्त्रादिप्रयोगादित्थं लोकाः भ्राम्यन्ति' इति गुरूपदेशादिना ज्ञातमन्त्रादिप्रभाव आम्राद्यापरोक्ष्याभावेऽपि 'इममाम्रं पश्यन्तु' इति हि वदति। स्वमायामोहं विना मायिकानामपरोक्षासम्भवात्। निःसामान्यनिर्विशेषस्य ब्रह्मणः सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्त्वरूपाधिष्टानत्वासम्भवेन विश्वस्यारोपितत्वासम्भवात्। नहि निरधिष्टानको भ्रमः। सजातीयादिभेदाभावस्यैव भिन्नत्वेन भेदमात्रनिषेधासम्भवात्। 'अद्वितीय'पदेनैव द्वितीयमात्रनिषेधसम्भवे शेषवैय्यर्थ्याच्च।

विशेषणतयोपलक्षणतया वा द्वितीयाभावबोधे तेनैवाद्वैतहानिः। अबोधने तु, सुतरां द्वैतस्य सत्यत्वम्। भेदघटितनवदृष्टान्तानुसारात् 'स आत्माऽतत्त्वमसि' इत्यत्र 'अतत्त्वमसि' इति पदच्छेदेन जीवस्येश्वरभिन्नत्वं तत्सादृश्यं चात्र बोध्यते।

किञ्च स्वभिन्नमभेदादिकं 'तत्त्वम्' इत्यनेन बोध्यते? न वा? आद्ये तेनैवाद्वैतहानेः। द्वितीये स्वरूपस्याज्ञानाद्यधिष्टानतया, अवान्तरवाक्येन च सिद्धा त्वदभिमतमहावाक्यस्य वैय्यर्थ्यापत्तेः। 'एके मुख्यान्यकेवलाः'[8] इत्यनुशासनात् 'एक'पदेन ब्रह्मणो मुख्यत्वम्, 'अद्वितीय'व्यपदेशेन समाभ्य-

[1] **तैत्तिरीयोपनिषत्** ३.१ [2] **ब्रह्मसूत्रम्** १.१.५ [3] **ब्रह्मसूत्रम्** २.१.३३ [4] **माण्डूक्योपनिषत्** १.१५ [5] **ब्रह्मसूत्रम्** २.१.३४ [6] **ब्रह्मसूत्रम्** २.३.१० [7] **ब्रह्मसूत्रम्** २.३.१४ [8] नानार्थकोशः

धिकशून्यत्वम्, एवकारेण 'शङ्खः पाण्डुर एव' इत्यादिवत् मुख्यादेर्ब्रह्मण्ययोगव्यवच्छेदो बोध्यते।

'वाचारम्भण'शब्दस्य मृषात्वे योगरूढ्योरभावाच्च। वाचारम्भणं व्याकरणनिरपेक्षवागिन्द्रियारब्धभाषाशब्दो विकारो देशादिभेदेन विकृतः। मृत्तिकेति संस्कृतं सत्यमेकरूपम्। यथा भाषाशब्दाद्यावान् व्यवहारः, तत् तदधिकं च संस्कृताद्भवति, तथा देवतान्तरज्ञानाद्यत् फलं तत् तदधिकं च ब्रह्मज्ञानाद्भवतीत्यत्र 'वाचारम्भणम्' इत्यादिदृष्टान्तः। सत्स्वरूपब्रह्मकर्तृकत्वेन तदाधारकत्वेन च सन्मूलकत्वादिकं प्रजानाम्।

नच लाघवादेकमेव सत्वं स्वीकार्यम्। तदेवाधिष्ठानगतं 'सन् घटः' इत्यादौ घटादिनिष्ठतया भाति। अनिदमि रूप्ये 'इदं रूप्यम्' इत्यत्र शुक्तिनिष्ठेदन्तावदिति वाच्यम्। 'सद्ब्रह्म' इत्यत्राप्यधिष्ठानसत्त्वस्यैव भानापत्त्या ब्रह्मणोऽप्यसत्त्वापत्तेः। सत्त्वत्रैविध्यस्य त्वयाऽप्यङ्गीकाराच्च। लाघवेन सत्वापलापेऽतिलाघवेन ब्रह्मसत्त्वमपि न स्वीकार्यम्। प्रतीतिस्तु वास्तवसत्त्वं विनाऽपि शुक्तिरूप्यवत् प्रातीतिकसत्वेनाप्युपपद्यते। अतो 'नित्यो घटः' इति नित्यत्वादिवत् 'सन् घटः' इति सत्त्वमपि तन्निष्ठमेव। तच्च त्रिकालाबाध्यत्वरूपं कालसम्बन्धित्वम्। नच रूप्यमस्तीति प्रातीतिकत्रिकालसम्बन्धोऽस्तीति वाच्यम्। कालसम्बन्धित्वेन प्रतीतिरेव हि न कालसम्बन्धः, अर्थक्रियाद्यापत्तेः। 'प्रमेयत्वे प्रमेयत्वम्' इतिवत् तस्य स्वस्थितत्वसत्वाच्च॥ १६॥

नन्वीश्वरनित्यत्वे मानाभावात् तद्दृष्टान्तेन कथं जीवानां 'न त्वेवाहम्'[1] इत्युक्तं नित्यत्वं सिद्ध्यति? नच 'अविनाशी वाऽरेऽयमात्मा'[2] इत्यादिना परमेश्वरनित्यत्वं सिद्धमिति वाच्यम्। तद्वाक्यानामुपासनापरत्वेनोपपन्नत्वात्। उपासनायाश्च 'योषितमग्निं ध्यायीत' इत्यादिवदसद्विषयकत्वात्। अत आह - **अविनाशीति॥**

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति॥ १७॥

[1] भगवद्गीता २.१२ [2] बृहदारण्यकोपनिषत् ४.५.१४

येन परब्रह्मणा **सर्वमिदं जगत् ततं** व्याप्तं तत् **अविनाशि विद्धि। अस्य** सर्वव्यापकस्य **विनाशं** कर्तुं **कश्चिन्नार्हति।** नहि व्याप्येन नियम्येन व्यापकस्य नियामकस्य विनाशः सम्भवति। सर्वस्य तदधीनसत्ताकत्वात्, विनाशकाभावादव्ययस्य। तथा च सर्वस्य मदधीनत्वाद् देशकालवस्त्वादिना सर्वेश्वरस्य मम नाशो यथा नास्ति, तथा त्वदादीनां चेतनानां मत्सदृशानां नाशो नास्ति, अनादिचेतनत्वादिति[1] भावः॥ १७॥

नन्वनादित्वाच्चेतनत्वात् स्वतन्त्रत्वाच्चेश्वरस्यास्तु नित्यत्वम्। तत्प्रतिबिम्बस्य जीवस्य तत्सदृशत्वेऽपि कथं नित्यत्वम् ? प्रतिबिम्बस्यानित्यत्वनियमात्। प्रतिबिम्बत्वं जीवस्य 'रूपं रूपं प्रतिरूपं बभूव'[2] 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्'[3] इतिश्रुतिसिद्धम्, अत आह - **अन्तवन्त इति॥**

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥ १८॥

नित्यस्य शरीरिणः जीवस्य **इमे** बाल्ययौवनाद्यवस्थाभेदेन भिन्नाः परिणामित्वेन प्रत्यक्षसिद्धाः **देहा अन्तवन्तः** नाशवन्तः। परिणामित्वाद्दीपकलिकावच्छ्रुतिभिरुक्ता अस्य जीवसमूहस्य **इमे** प्रत्यक्षसिद्धाः **देहा अन्तवन्तः** इति वाऽर्थः।

'नित्यस्य देहा अन्तवन्तः' इत्युक्ते परमेश्वरदेहस्याप्यनित्यत्वं प्रसज्येत। अतः **शरीरिणः** शीर्यत इति शरीरम्, तदस्यास्तीति शरीरी। तस्येश्वरदेहस्य शीर्यमाणत्वाभावात्। नित्यत्वे हेतुः - **अनाशिनः** नाशशून्यस्य। तत्र हेतुः - **अप्रमेयस्य।** नह्यात्मा प्रमेयतयोपलभ्यते। अपि तु, 'इदमहं जानामि' इति प्रमातृतयैवानुभूयते। नवा देहदेहिप्रदेशभेदे प्रमातुराकारभेद उपलभ्यते। अत एकरूपत्वेनानुपचयात्मकत्वात् प्रमातृत्वादात्मा नित्यः। देहस्तूपचयात्मकत्वाच्छरीरेणोपभोगायतनत्वादनेकरूपत्वाच्चानित्यः। रूपं रूपं प्रति जीवं जीवं प्रत्यन्तर्यामितया मत्स्यादिवन्नित्यैर्नियामकतावद्रूपैर्हरिरभिव्यक्तो बभूव। स एकधा मूलरूपेण बहुधा नियामकरूपैर्दृश्यते। यथा पात्रादिस्थजलभेदेनैकश्चन्द्रो नाना दृश्यते तथैकोऽप्यनेकनियामकरूपैर्नित्यैश्चाभिव्यक्तो भवतीत्यर्थः।

[1] अनादित्वात् चेतनत्वाच्चेति वा स्यात्। [2] **कठोपनिषत्** २.२.९,१० [3] ब्रह्मबिन्दूपनिषत् १२

एकस्य नित्यवास्तवानेकरूपत्वं त्वचिन्त्यशक्त्योपपन्नम्। प्रसिद्धं हि षोडशसहस्रसङ्ख्याकानां विवाहे रासमण्डले चैकस्यानेकरूपत्वम्। अतो नित्यस्वभावयोश्चिद्देहयोर्न शोकविषयत्वमिति शस्त्रपातादिपुरुषस्पर्शानवर्जनीयान् धैर्येण सोढ्वाऽमृतत्वप्राप्तये फलेच्छारहितयुद्धाख्यं स्वोचितं कर्मारभस्व।

यत्तु[1] "पञ्चकोशा एव देहपदेनोक्ताः। तथा हि। पञ्चीकृतमहाभूततत्कार्यात्मको विराण्मूर्तिराशिरन्नमयकोशः स्थूलसमष्टिः, तत्कारणीभूतोऽपञ्चीकृतपञ्चमहाभूततत्कार्यात्मको हिरण्यगर्भः सूत्रममूर्तराशिः सूक्ष्मसमष्टिः, 'त्रयं वा य इदं नाम रूपं कर्म' इति बृहदारण्यकोक्तः त्र्यन्नात्मकः स कर्मात्मकत्वेन क्रियाशक्तिमात्रमादाय प्राणमयकोशः, नामात्मकत्वेन ज्ञानशक्तिमात्रमादाय मनोमयकोशः, रूपात्मकत्वेन तदुभयाश्रयतया कर्तृत्वमादाय विज्ञानमयकोशः, ततः प्राणमयमनोमयविज्ञानमयात्मक एक एव हिरण्यगर्भाख्यो लिङ्गशरीरकोशः तद्धेतुभूतस्तु मायोपहितचैतन्यात्मा सर्वसंस्कारशेषोऽव्याकृताख्य आनन्दमयकोशः" इति तन्न।

अन्नमयादेरब्रह्मत्वे तस्याब्रह्मत्वोक्तिं विनाऽग्रिमस्य ब्रह्मत्वेनोपदेशासम्भवात्। एकभ्रान्तिनिरासाय भ्रान्त्यन्तरोत्पादनस्यायुक्तत्वात्। 'तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः'[2] इत्यानन्दमयान्तमुक्त्वा 'तस्माद्वा एतस्मादानन्दमयादन्योऽन्तर[3] आत्मा' इत्युपदेशाभावाच्च। अतोऽन्नमयादीनि पञ्च भगवद्रूपाण्येव। 'येऽन्नं ब्रह्मोपासते' 'ये प्राणं ब्रह्मोपासते' 'आनन्दं ब्रह्मणो विद्वान्' 'विज्ञानं ब्रह्म चेद्वेद' इत्यन्नादीनां ब्रह्मशब्दाभ्यासात्।

नचान्नादिना ब्रह्मशब्दाभ्यासादन्नमयादेः कथं ब्रह्मत्वसिद्धिः? इति वाच्यम्। यथा हि ज्योतिष्टोमाधिकारं 'वसन्ते वसन्ते ज्योतिषा यजेत' इति ज्योतिःपदमेव ज्योतिष्टोमाभ्यासकालविशेषविधानपरम्, तथाऽऽनन्दमयाधिकारे पठितानन्दादिपदैः सहाभ्यस्यमानं ब्रह्मपदमानन्दमयादेर्ब्रह्मत्वविधानपरम्। नच 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मपदसमभिव्याहारात् पुच्छमेव ब्रह्मेति वाच्यम्। 'तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा' इत्यानन्दस्यात्मपदोक्तस्य पुच्छत्वेनावयवत्वेन पाठादानन्दस्यैव मुख्यत्वात्। अवयवापेक्षयाऽवयविनः पूर्णत्वात्। वस्तुतस्त्वनुबुभुत्सो-

---

[1] मधुसूदनसरस्वतीय इत्यर्थः। [2] 'तस्माद्वा एतस्मादन्य अन्तर आत्माऽन्नमयः' इति तु कोशे। [3] एतस्मादन्नमयादन्योऽन्तर इति कोशे।

र्बुद्ध्यवतरणाय पक्षित्वेनानन्दरूपस्य ब्रह्मणो हि रूपकमात्रं कृतम्। सर्वत्रात्र प्राचुर्ये मयट्, नतु विकारे। 'मयड् वैतयोर्भाषायाम्'[1] इति सूत्रेण विहितस्य विकारार्थस्य मयटो दह्नक्राद्वदे(?)सम्भवात्। नच 'ब्रह्म पुच्छं प्रतिष्ठा' इति प्रतिष्ठाशब्दसमभिव्याहारात् पुच्छं ब्रह्मेति वाच्यम्। 'आनन्द आत्मा' इत्यात्मपदोक्तानन्दस्याधारापेक्षाभावात्। अन्यावयवसाधारणपुच्छस्य कृत्स्नानन्दाधारत्वासम्भवाच्च। नहि कृत्स्नस्य पक्षिणः पुच्छमेवाधारः। पक्षिणः सर्वावयवेषु पुच्छस्य प्राधान्याभिप्रायेण प्रतिष्ठापदम्। 'तस्मात् सर्ववयांसि पुच्छेन प्रतितिष्ठन्ति पुच्छेनैव प्रतिष्ठायोग्यतेति 'प्रतिष्ठा हि पुच्छम्' इत्यैतरेयोक्तेः।

'स य एवंविदस्माल्लोकात् प्रेत्य एतमन्नमयमात्मानमुपसङ्क्रम्य एतं मनोमयमात्मानमुपसङ्क्रम्य एतं प्राणमयमात्मानमुपसङ्क्रम्य एतं विज्ञानमयमात्मानमुपसङ्क्रम्य एतमानन्दमयमात्मानमुपसङ्क्रम्य इमांल्लोकान् कामान्नी कामरूप्यनुसञ्चरन् एतत् साम गायन्नास्ते' इति श्रुतौ ब्रह्मविदोऽन्नमयादिप्राप्तिरुक्ता। नहि ब्रह्मविदोऽब्रह्मप्राप्तिर्युक्ता।

'तस्मादपि विनिर्मुक्ता अनिरुद्धतनौ स्थिताः।
ततो मुक्ता मुनिर्भूत्वा प्रद्युम्नस्य तनौ स्थिताः॥[2]
'प्रद्युम्नाच्च विनिर्मुक्ता जीवा सङ्कर्षणं ततः।'
'ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा'[3]
'एकान्तभावोपगता वासुदेवं विशन्ति वा'[4]

इति मोक्षधर्मोक्तरीत्यैकस्यापि रूपभेदेन क्रमेण प्राप्तिर्युक्ता। तत्तन्मूर्त्यधिष्ठेयस्थानापेक्षया 'अन्योऽन्तर आत्मा' इत्येकस्यैवान्यत्वान्तरत्वादिकमुपपद्यते। 'तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्म' इति पुनःपुनरुपसत्तिस्त्वेकगुणविशिष्टं श्रुत्वा निदिध्यासनेन साक्षात्कृत्य गुणान्तरविशिष्टं विज्ञातुम्। 'प्रकृतवचने मयट्'[5] इत्यनेन सूत्रेण प्राचुर्ये मयड्विधीयते। 'अद्यतेऽत्ति च भूतानि तस्मादन्नम्' इति श्रुतेः। तच्चाद्यत्वमुपजीव्यत्वम्। तत्प्राचुर्यं

[1] इति अष्टाध्यायी ४.३.१४३ [2] अयं सम्भावितः पाठः। कोशे तु 'मुनिर्भूत्वा प्रद्युम्न इति श्रुतौ ब्रह्मविदोऽन्नमयादिश्रुतनौ स्थिताः' इति पठ्यते। [3] शां.३४४.१७ [4] शां.३४४.१९ [5] इति अष्टाध्यायी ५.४.२१

ब्रह्मण्येव। प्राणयति चेष्टयतीति प्राणः। प्राणनप्राचुर्यं च तत्रैव। मनु ज्ञाने। मनः सामान्यज्ञानम्। विज्ञानं विशेषज्ञानम्। तत्प्राचुर्यमपि तत्रैव।

नच 'ब्राह्मणमयो ग्रामः' इत्यादावल्पाब्राह्मणवदल्पानानन्दस्यापत्तिरिति वाच्यम्। 'प्रकाशमयः सविता' इत्यादौ व्यधिकरणजीवगतानन्दापेक्षयैव भूयस्त्वोपपत्तेः। नहि 'सुखमयः पुरुषः' इत्यत्र तन्निष्ठं दुःखमपि भासते[1]

यत्तु "तस्यैव 'य एष शारीर आत्मा यः पूर्वस्य' इति तस्य प्राणमयस्यैष एव शरीरे भवः शारीर आत्मा यः 'सत्यं ज्ञानम्'[2] इत्यादिना गुहानिहितत्वेनोक्तपूर्वस्यान्नमयस्यैवं प्राणमयमनोमयविज्ञानमयानन्दमयेषु योज्यम्। तथा चान्नमयादीनामात्मान्तरोक्त्याऽनात्मत्वं सिद्धम्" इति तन्न। 'चैतन्यमस्य स्वरूपम्' 'सच्चिदस्याकारः' इत्यादिवद्यः पूर्वस्यान्नमयादेरात्मा स्वरूपं स एव प्राणमयादेरित्यर्थात्। शरीरे भवत्वमुत्पत्तिर्हि न जीवस्य। विद्यमानत्वं च ब्रह्मणोऽप्यस्ति। जीवस्य 'अहम्' इति प्रत्यक्षसिद्धत्वेनोपदेशवैय्यर्थ्यात्। 'सत्यं ज्ञानम्' इत्यादिना शुद्धं ब्रह्मोक्त्वा पुनरन्नमयाद्यब्रह्मविषयकभ्रान्त्युत्पादनायोगाच्च।

किञ्च, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रकृतं शुद्धं ब्रह्म 'तस्माद्वा एतस्मादात्मनः आकाश सम्भूतः' इत्यात्मपदेन निर्दिश्य, आकाशादिकारणत्वं च प्रतिपाद्य, अनन्तरं निरतिशयानन्दत्वेन तस्यात्मत्वविवरणार्थं प्रवृत्तस्य सन्दर्भस्य तत्रैव समायते तदनन्तरं 'तस्मादानन्दमयादन्योऽन्तर आत्मा ब्रह्म' इत्युपदेशाभावेन चानन्दमय एव ब्रह्म। 'सोऽकामयत' इत्यनन्तरवाक्यस्थेन तच्छब्देन पुल्लिङ्गान्तेन परब्रह्मपरतया तदभिमतेनाव्यवहितोपस्थितानन्दमयस्यैव हि परामर्शः, नतु नपुंसकलिङ्गब्रह्मपदार्थस्य।

किञ्च सत्यज्ञानादिशब्दैः स्वरूपमात्रं बोध्यते? सत्यत्वादयो धर्मा वा? आद्ये पर्यायत्वापत्तिः। तथा च पदान्तरवैय्यर्थ्यम्। द्वितीयेऽद्वैतहानिः। नच मृषासत्यत्वादिकं बोध्यते। श्रुतिबोध्यस्य मिथ्यात्वासम्भवात्। नच श्रुतेस्तत्र तात्पर्याभावः। अलौकिकब्रह्मनिष्ठसत्यत्वादौ तात्पर्याभावे तदसिद्धा-

---

[1] उपजीव्यत्वमेवाद्यत्वम्। 'स वा एषः' इत्यन्यप्रारम्भात्। 'येऽन्नं ब्रह्मोपासते' इत्यादिब्रह्मशब्दात् बहुरूपत्वाच्च न विकारित्वम्, अविरोधश्च। नच पृथक्कल्पना युक्ता। स्वरूपे च युज्यते 'प्रचुरप्रकाशो रविः' इतिवत्। - इत्यानन्दतीर्थाः ब्रह्मसूत्रभाष्ये॥ [2] **तैत्तिरीयोपनिषत्** २.२.१

पत्त्या पर्यायत्वानिस्तारात्। नच लक्षणयाऽखण्डब्रह्मपरं वाक्यम्। क्वचिदशक्तस्य पदस्य लक्षणासम्भवात्। नच विशिष्टे शक्तस्य शक्तिजन्यबोधाविषयस्य स्वरूपभिन्नस्य लाक्षणिकबोधविषयत्वेऽद्वैतहानेः। अविषयत्वे लक्षणावैय्यर्थ्यात्। गङ्गापदलक्ष्यस्य तीरस्यागङ्गात्ववत् सत्यादिपदलक्ष्यस्यासत्यत्वाद्यापत्तेः॥ १८॥

ननु बन्धुविच्छेदनिमित्तकशोकेऽपनीतेऽपि तद्वधकर्तृकत्वनिमित्तकं पापं स्यादेव। शोकाभावात् पापाभावे, द्वेष्यब्राह्मणवधाच्छोकाविषयात् पापानापत्तेः, अतोऽहं वधकर्ताऽहं प्रेरक इति द्वयोरपि हिंसानिमित्तकपापापत्तेरित्याशङ्क्य काठकवाक्येन[1] परिहरति - **य इति**॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥ १९॥

यः मीमांसकादिः[2] **एनं** जीवं **हन्तारं** स्वतन्त्रहननक्रियाकर्तारं **यश्च** लोकायतिकादिः **हतं** हननकर्म **मन्यते** , **तावुभौ** तत्स्वरूपं **न जानीतः**। **अयं न** कञ्चित् स्वतन्त्रं **हन्ति** परेशाधीनत्वात्।

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥'[3] इति वक्ष्यमाणत्वात्।

उक्तरीत्या नित्यत्वेन हननकर्मासम्भवात्।

अयं भावः। उक्तरीत्या नित्यत्वान्न तस्य हननकर्मत्वम्। पराधीनमपि कर्तृत्वं स्वाभाविकं नास्ति। किन्त्वनाद्यविद्यावशाद्देहान्तःकरणादावहंममेत्यभिमानाद् बुद्धिस्थकृत्यादिना 'अहं करोमि' इति कर्ता भवति। तत्र तत्फलभोगाय सदसद्योनिषु संसरति। नचैवं कर्तृत्वं जीवे मृषा स्यात्, तथा च 'कर्ता शास्त्रार्थवत्त्वात्'[4] इति जीवस्य कर्तृत्वबोधकं सूत्रं विरुद्ध्येत, अपसिद्धान्तश्च

[1] 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥' - **कठोपनिषत्** २.५ [2] मीमांसकादिः **इति मधुसूदनसरस्वतीये** [3] **भगवद्गीता** १८.६१ [4] **ब्रह्मसूत्रम्** २.३.३३

स्यादिति वाच्यम्। बुद्ध्या उत्पन्नस्यापि कर्तृत्वादेरविद्यासहकृतस्वामित्वसम्बन्धेन वास्तवस्यैव जीवे सत्वात्। वृक्षोत्पन्नदण्डेन केनचित् सम्बन्धेन यथा हि पुरुषस्य दण्डित्वं न वृक्षस्य, तथाऽविद्यासहकृतस्वामित्वादिसम्बन्धेन जीवस्य कर्तृत्वं दुःखित्वादिकं तेन सम्बन्धेन यत्र कर्तृत्वं तस्यैव संसारमोक्षादिकम्। तत्राऽदृष्टादौ जीवस्य सम्बन्धिनियामकोऽनाद्यविद्याप्रयुक्तो देहादावुक्तोऽभिमान एव। अनाद्यविद्यया अभिमानः, ततोऽदृष्टादिसम्बन्धः, ततो बुद्धिसम्बन्धः, ततो सत्यमेव कर्तृत्वम्, ततः सत्यमेव दुःखाद्यनुभवरूपः संसारः साभिमानस्य। क्षत्रियस्य स्वोचितयुद्धाख्यकर्मानुष्ठानान्न पापम्। किन्तु स्वर्गादिकं भवति। त्वं तु मुमुक्षुः। अतोऽभिमानं विहाय फलेच्छारहितं स्वधर्मं युद्धमाचरेति॥ १९॥

नचात्मा हननक्रियायाः कर्म कर्ता च। कुतो न भवति? अविक्रियत्वादित्याह **न जायते** इति द्वितीयमन्त्रेण[1]

न जायते म्रियते वा कदाचिन्ना(ऽ)यं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ २०॥

'जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति' इति षड्विधविकाराः। तत्राद्यद्वयौ निषिध्येते - **न जायते म्रियते वेति॥** वाः समुच्चयार्थः। न जायते म्रियते चेत्यर्थः। कुतो नोत्पद्यते? यतोऽयमात्मा कदाऽपि काले **न भूत्वा** अभूत्वा प्राक् **भूयः** पुनरपि **भविता न**। यो ह्यभूत्वा भवति, उत्पत्तिरूपां विक्रियामाप्नोति। अयं तु प्रागपि सत्वात्, यतो नोत्पद्यते, अतः **अजः**। तथाऽयमात्मा **भूत्वा** प्राक् **कदाचित् भूयः** पुनः **न भविता**।

'नवा'शब्दाद्वाक्यविपरीतवृत्तिः। यो हि प्राक् भूत्वा, उत्तरकाले च न भविष्यति, स मृतिरूपां विक्रियामनुभवति। अयं तूत्तरकालेऽपि सत्वात्, यतो न म्रियते **नित्यः** विनाशायोग्यः। **शाश्वतः** सदैकरूपः। अपचयाद्यभावान्न वृद्धिरित्याह - **पुराण इति॥** पुरापि नव एकरूपः, नत्वधुना नूतनां काञ्चिदवस्थां

[1] 'न जायते म्रियते वा विपश्चिन्ना(ऽ)यं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमानेऽपि देहे॥' - **कठोपनिषत्** २.४

प्राप्नोति। यो हि नूतनामवस्थां प्राप्नोति स वर्धत इत्युच्यते। अस्तित्वविपरिणामौ तु जन्मविनाशान्तर्भूतत्वान्न पृथक् निषिद्धौ। यस्मादेवं सर्वविकारशून्य आत्मा, तस्मात् **शरीरे हन्यमाने** तत्सम्बद्धोऽपि केनाऽप्युपायेन **न हन्यते** न हन्तुं शक्यत इत्यर्थः॥ २०॥

जीवस्यानित्यत्वं मन्यमानो मिथ्याज्ञानीत्युक्तम्। ज्ञानी तु नैवं मन्यत इत्याह - **वेदेति॥**

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २१॥

य एनमविनाशिनं षड्विकाररहितं विकृतजडदेहादिविलक्षणं सच्चिदानन्दस्वरूपं **वेद** , **स पुरुषः** देवमनुष्यपश्वादिदेहेष्वनाद्यविद्याहेतुकाहंममेत्यभिमाननिबन्धनं कर्मफलभोगार्थं वर्तमानेष्वात्मसु **कम्** अप्यात्मानं **कथं घातयति कथं वा हन्ति** कथं नाशयति कथं वा तत्प्रयोजको भवतीत्यर्थः। **अविनाशिनं** नैमित्तिकनाशशून्यम्। **अजम्** उत्पत्तिशून्यम्। यद्वा, **अविनाशिनं** शरीरापायादिशून्यम्, **नित्यं** स्वरूपतः[1], **अजं** षड्विकारशून्यम्, **अव्ययं** नित्यगुणकम्, स्वतन्त्रं च **एनं** श्रीहरिं **यो वेद** साक्षात्करोति, **सः** तत्प्रसादान्निवृत्ताविद्यो निवृत्ततद्धेतुकाभिमानः, अतो निवृत्तसर्वकर्माधिकारः, आविर्भूतचिदानन्दसन्दोहस्वरूपः **कं घातयति कं वा हन्ति** कथं वेत्यर्थः॥ २१॥

ननु जीवो नित्यः, तस्य देहयोगवियोगौ देहे कौमारादिवदित्युक्तम्। तत्र कौमारादेः देहाद्यनतिभिन्नत्वान्न तेन देहात्मनोर्विवेकः स्फुटतरं भवतीत्यतो देहात्मनोर्विवेकं वस्त्रदृष्टान्तेनोपपादयति[2] - **वासांसीति॥**

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥ २२॥

---

[1] अविनाशिनं नैमित्तिकनाशरहितम्। नित्यं स्वाभाविकनाशरहितम्। अथवा, अविनाशिनं दोषयोगरहितम्। नित्यं सदाभाविनमिति सर्वत्र विवेकः। **इति मध्वभाष्यम्** [2] देहात्मविवेकानुभवार्थं दृष्टान्तमाह - **वासांसीति॥ इति मध्वभाष्यम्**

यथा नरोऽनायासेन विक्रियारहित एव **जीर्णानि वासांसि विहाय, अपराणि नवानि गृ-ह्णाति। जीर्णानि** इत्युपलक्षणम्। निकृष्टं नूतनमपि विहाय, उत्कृष्टं गृह्णाति। **तथा जीर्णानि** वयसा तपसा च[1] कृशानि उत्कृष्टभोगाक्षमानि भीष्मादिशरीरानि **विहाय** , **अन्यानि** देवादिशरीराणि सर्वोत्कृष्टाणि चिरोपार्जितधर्मफलभोगाय **संयाति** सम्यक् गर्भवासक्लेशं विनैव प्राप्नोति। **देही** प्रकृष्टधर्मानुष्टाता भीष्मादिरित्यर्थः। 'अन्यन्नवतरं कल्याणतरं रूपं कुरुते, पित्र्यं च गान्धर्वं वा ब्राह्मम्' इत्यादिश्रुतेः॥ २२॥

ननु शरीरनाशे स कुतो न नश्यति? इत्याशङ्कामपाकर्तुं नाशसामग्र्यभावमाह - **नैनमिति॥ २३॥**

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ २३॥

शस्त्राद्यनाश्यत्वमुपपादयति - **अच्छेद्य इति॥**

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ २४॥

निरवयवत्वात् **अच्छेद्यः**। अत एव **अदाह्यः**। अमृदुत्वात्, निरवयवत्वाच्च **अक्लेद्यः**। अद्रवत्वात् **अशोष्यः**। **नित्यं** नितरां सर्वेषु देशेषु कालेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु गच्छतीति **नित्यः सर्वगतः** [2] नित्यत्वसर्वगतत्वयोः पृथग्विशेषणत्वे तयोः पूर्वमुक्तत्वात् पुनरुक्तिः स्यात्[3][4] **स्थाणुः** कूटस्थः, निर्विकारः। **अचलः** बाल्याद्यवस्थाशून्यः। **सनातनः** सर्वविकारात् प्रागेवैकाकारेण विद्यमानः॥ २४॥

---

[1] तपसेति लुप्तं कोशे। [2] नित्यं सर्वेषु शस्त्रपावकाम्बुवाय्वादिषु स्थितः। - इति श्रीनरहरितीर्थाः॥ [3] नित्यत्वं सर्वगतत्वविशेषणम्। अन्यथा पौनरुक्तेः। **इति मध्वभाष्यम्** अजो नित्य इति नित्यत्वमीश्वरस्य प्रागुक्तम्। अप्रमेयस्येति सर्वगतत्वं च। अतस्ताभ्यां पुनरुक्तेरित्यर्थः। - इति श्रीनरहरितीर्थाः गीताभाष्यभावप्रकाशिकायाम्॥ [4] नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयम्। यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तं 'न जायते म्रियते वा' इत्यादिना। तत्र यदेवात्मविषयं किञ्चिदुच्यते तदेतस्माच्छ्लोकार्थान्नातिरिच्यते किञ्चिच्छब्दतः पुनरुक्तं किञ्चिदर्थत इति। दुर्बोधत्वादात्मवस्तुनः पुनःपुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान् वासुदेवः। कथं नु नाम संसारिणमव्यक्तं तत्त्वं बुद्धिगोचरतामापन्नं सत् संसारनिवृत्तये स्यादिति। **इति शङ्करभाष्ये**

अच्छेद्यत्वादौ हेतुमाह - **अव्यक्तोऽयमिति॥**

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥ २५॥

छेद्यानि वस्तूनि यैः प्रमाणैः व्यज्यन्ते, तैरात्मा न व्यज्यत इति **अव्यक्तः**। अतः छेद्यादिविलक्षणः। **अचिन्त्यः** एवं वस्तुविलक्षणस्वभावत्वेन, इतरस्वभावयुक्ततया चिन्तयितुमपि नार्हः। अत एव **अविकार्यः** विकारानर्हः। **तस्मात्** उक्तलक्षणम् **एनम्** आत्मानं **विदित्वा शोचितुं नार्हसि** ॥ २५॥

आत्मनो नित्यत्वेनाशोच्यत्वमुक्त्वा, इदानीं विकारित्वमुपेत्यापि श्लोकद्वयेनाशोच्यत्वं प्रतिपादयति - **अथेति॥**

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि॥ २६॥

तत्र, आत्मा ज्ञानस्वरूपः प्रतिक्षणं विनाशीति सौगताः, देह एवात्मा स एव स्थिरोऽप्यनुक्षणं परिणामी जायते नश्यति चेति लोकायतिका इति पक्षान्तरेऽथशब्दः। **महाबाहो** पुरुषधौरेयेति सोपहासं एतादृशी बुद्धिस्तव न युक्ता। तथाहि। क्षणिकत्वपक्षे देहात्मपक्षे च 'अहो बत महत्पापं कर्तुं व्यवसिता वयम्' इत्येवं शोचितुं नार्हसि। एतन्मते जन्मान्तरासम्भवेन पापासम्भवात्। पापभयेनैव हि त्वं शोचसि, तच्चैतादृशदर्शने न सम्भवतीत्यर्थः। क्षणिकत्वपक्षे च दृष्टमपि दुःखादिकं न सम्भवति बन्धुविनाशदर्शित्वाभावादित्यर्थः॥ २६॥

नन्वात्मनः स्थायित्वपक्षेऽपि दृष्टादृष्टदुःखसम्भवात् कथं न शोचामि? इत्यत आह - **जातस्येति॥**

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ २७॥

हि यतः **जातस्य** स्वकृतकर्मवशाल्लब्धदेहेन्द्रियादिसम्बन्धस्य स्थिरस्यात्मनो **ध्रुवः** आवश्यकः **मृत्युः** तच्छरीरादिविच्छेदः। तथा **मृतस्य** विगतदेहेन्द्रियसम्बन्धकस्य **ध्रुवं जन्म** प्राग्देहकृतकर्मफलभोगार्थम्। सानुशयस्यैव संसारिणः प्रस्तुतत्वान्न मुक्तेषु व्यभिचारः। **तस्मात्** एवम् **अपरिहार्येऽर्थे** परिहर्तुमशक्ये जन्ममरणादिरूपेऽर्थे **त्वं** विद्वान् **शोचितुं नार्हसि** ॥ २७॥

नन्वात्मानमुद्दिश्याशोच्यत्वेऽपि भूतसङ्घातशरीराण्युद्देश्य शोचामीत्यत आह - **अव्यक्तादीनीति**॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना॥ २८॥

अव्यक्तं = प्रधानम् आदिः = उत्पत्तेः पूर्वरूपं येषां तानि तथा। व्यक्तम् = अभिव्यक्तं मध्यं = जन्ममरणान्तरं स्थितिरूपं येषां तानि **व्यक्तमध्यानि**। अव्यक्ते निधनं = लयो येषां तानि। तानीदृशानि तेषु **का परिदेवना** कः शोकनिमित्तकः प्रलापः? शरीराणि प्रकृतेरवस्थानरूपाणि कारणवशात् तत्रैवाभिव्यज्यन्ते कदाचिन्न व्यक्तीभवन्ति। यथा दण्डादिना मृत्पिण्डाख्यावस्थाऽभिभूयते, घटत्वाद्यवस्थाऽभिव्यज्यते, सत्कार्यवादे द्रव्यनाशाभावात्, तथेमे देहाः। अतः परमानन्दस्वरूपाविर्भावलक्षणमोक्षहेतुभगवदापरोक्ष्यसाधनस्वधर्मात् प्रच्यावकं शोकं कर्तुं त्वं नार्हसीति भावः॥ २८॥

ननु विद्वांसोऽपि बहव[1] एवं शोचन्ति। तत् कुतो वक्तुर्जाड्यात् श्रोतुर्मान्द्याद्विषयस्यात्मनो दुर्ज्ञेयत्वाद्वा? इत्याशङ्कायामात्मनो दुर्ज्ञेयत्वमाह - **आश्चर्यवदिति**॥

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः श्रृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित्॥ २९॥

एनं देहिनं देहेन्द्रियादावनाद्यविद्यावशात् 'देहो मम' इत्यभिमानिनं **कश्चित्** आचार्योपदेशलब्धविवेकः **आश्चर्यवत्** आश्चर्यं पश्यति। 'विधिवत् कृतम्'

[1] बहुत इति कोशे।

इतिवत् स्वार्थे वतिः। तादृश एव **कश्चित्** अन्यस्मै **वदति**। सोऽपि **आश्चर्यवत्** आश्चर्यः, दुर्लभ इत्यर्थः। **अन्यः कश्चित्** यदा **एनं श्रुणोति** सोऽपि **आश्चर्यवत्** आश्चर्यः, दुर्लभः। **श्रुत्वाऽपि** शमदमादिसम्पत्तिहीनः **श्रुत्वाऽप्येनं न वेद**। अत्र वक्तुर्द्रष्टुरपेक्षया नान्यत्वम्, अपि तु पृथग्जनापेक्षया। यद्वा, **आश्चर्यवत्** सर्वत्र दर्शनादिक्रियाविशेषणं कर्तृकर्मणोश्च विशेषणम्। आत्मा तज्ज्ञानं तज्ज्ञानी चेत्येतत् त्रितयमाश्चर्यम्। अनाद्यविद्यावशात् 'अहं ब्राह्मणः' 'अहं क्षत्रियः' इति देहादिसंवलिततया गृह्यमाणः मत्प्रसादलब्धविवेकं विना कथं त्वं सम्यक् जानीथा इति भावः॥ २९॥

उपसंहरति - **देहीति**॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥ ३०॥

सर्वस्य प्राणिजातस्य **देहे** वध्यमानेऽपि **अयं देही** जीवो वध्यो न भवतीति **नित्यं** नियतं यस्मात् **तस्मात् सर्वाणि भूतानि** स्थूलानि सूक्ष्माणि च भीष्मादिभावापन्नानि **शोचितुं नार्हसि**। स्थूलदेहस्याशोच्यत्वमपरिहार्यत्वात् लिङ्गदेहस्याशोच्यत्वम् आत्मवदेवावध्यत्वादिति न स्थूलदेहस्य लिङ्गदेहस्य वा शोच्यत्वं युक्तमिति भावः॥ ३०॥

पापमेवाश्रयेत् इत्युक्तवतोऽर्जुनस्य युद्धे स्वधर्मेऽधर्मभ्रान्तिं निवारयति - **स्वधर्ममपीति**॥

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते॥ ३१॥

इदं युद्धं प्राणिहिंसारूपम् **अपि** अग्नीषोमीयपशुहिंसावद्विहितत्वेन स्वधर्मत्वादवश्यमनुष्ठेयमिति **अवेक्ष्य विकम्पितुं** चलितुं युद्धं त्यक्तुं **नार्हसि**[1] यदुक्तं

[1] अपि चेदं प्रारब्धं युद्धं प्राणिमारणमपि अग्नीषोमीयादिवत् स्वधर्ममवेक्ष्य न विकम्पितुमर्हसि। **इति रामानुजभाष्ये** ।

'नच श्रेयोऽनुपश्यामि'[1] इति तत्राह - **धर्म्यादिति॥** धर्मादनपेतं धर्म्यं तस्मात् श्रेयस्साधनं **क्षत्रियस्य न विद्यते** ॥ ३१॥

किञ्च महति श्रेयसि स्वयमेव लब्धे विलम्बो न कार्य इत्याह - **यदृ-च्छयेति॥**

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्॥ ३२॥

यदृच्छया केनापि भाग्येनाप्रार्थितप्राप्तं सकामानाम् **अपावृतं** निरावरणं स्वर्गद्वारं निष्कामस्य मोक्षोपयुक्तम्। **सुखिनः** भाग्यवन्तः **क्षत्रिया ईदृशं युद्धं लभन्ते** ॥ ३२॥

युद्धाकरणे दोषमाह - **अथेति॥**

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥ ३३॥

प्रारब्धस्य नित्यत्वात्, तत्त्यागे **पापमवाप्स्यसि** इत्यर्थः॥ ३३॥

एवं कीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्य च प्राप्तिः, युद्धपरित्यागे दर्शिता। तत्र पापाख्यमनिष्टं व्यवधानेन फलदम्, आमुष्मिकत्वात्। शिष्टनिन्दारूपमनिष्टं त्वासन्नफलदमत्यसह्यमित्याह - **अकीर्तिमिति॥**

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते॥ ३४॥

भूतानि देवर्षिमनुष्यादीनि। ते च **अव्ययां** दीर्घकालां 'न धर्मात्माऽयं न शूरोऽयम्' इत्येवंरूपां **कथयिष्यन्ति** अन्योन्यकथाप्रसङ्गे।

ननु युद्धे स्वमरणसन्देहात् तत्परिहारार्थमकीर्तिः सोढव्या। आत्मरक्षणस्यापेक्षितत्वात्। उक्तं च शान्तिपर्वणि -

[1] भगवद्गीता १.३१

'साम्ना दानेन भेदेन समस्तैरुत वा पृथक्।
विजेतुं प्रयतेतारीन् न युद्धेत कदाचन॥

अनित्यो विजयो यस्माद्दृश्यते युद्ध्यमानयोः।
पराजयश्च सङ्ग्रामे तस्माद्युद्धं विवर्जयेत्॥

त्रयाणामप्युपायानां पूर्वोक्तानामसम्भवे।
तथा युद्धेत सम्पत्तौ विजयेत रिपून्यथा॥' इति।

तत्राह - **सम्भावितस्येति॥** अनन्यलभ्यगुणस्य पुरुषस्य **अकीर्तिर्मरणात्** अधिका भवति॥ ३४॥

ननु मत्प्रभावमजानन्तो मां निन्दन्तु। भीष्मादयो ज्ञातमत्प्रभावाः करुणया निवृत्तो युद्धाद्धन्योऽयमिति स्तोष्यन्तीत्यत आह - **भयादिति॥**

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्॥ ३५॥

'कर्णादिभ्यो **भयात्** निवृत्तः, नतु कृपया' इति **त्वां मंस्यन्ते** भीष्मदुर्योधनादयः **महारथाः**। कथम्? अत आह - **येषाम्** एव भीष्मादीनां **त्वं बहुमतः** 'बहुभिर्गुणैर्युक्तोऽयम्' इत्येवं मतः, त एव त्वां भयाद्रणादुपरतं मंस्यन्ते, अतो **भूत्वा** 'युद्धादुपरतः' इति शेषः। **लाघवम्** अनादरविषयत्वं **यास्यसि**। 'सर्वेषाम्' इति शेषः। येषामेव त्वं प्राग् बहुमतोऽभूः, तेषामेव तादृशो भूत्वा लाघवं यास्यसीति वा॥ ३५॥

ननु दुर्योधनादयो मां स्तोष्यन्ते। युद्धान्निवृत्तेस्तदिष्टत्वादत आह - **अवाच्येति॥**

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्॥ ३६॥

अहिताः शत्रवो दुर्योधनादयः **तव सामर्थ्यं निन्दन्तः बहूनवाच्यान्** त्वयि वक्तुमयोग्यान् शब्दान् **वदिष्यन्ति। ततः** शत्रुनिन्दाजन्यदुःखादधिकं **दुःखं किं**? न किमपीत्यर्थः॥ ३६॥

यदुक्तं 'न चैतद्विद्मः'[1] इत्यादि, तत्र पक्षद्वयेऽपि महालाभ इत्याह - **हत इति॥**

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः॥ ३७॥

'शत्रून् जेष्यामि मरिष्यामि वा' इति **कृतनिश्चयः युद्धायोत्तिष्ठ** ॥ ३७॥

मुमुक्षोः क्षत्रियस्य युद्धानुष्ठानप्रकारमाह - **सुखेति॥** [2]

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥ ३८॥

स्वसम्बन्धिनी **सुखदुःखे लाभालाभौ जयाजयौ समे** मया = लक्ष्म्या सहिते हरौ **कृत्वा** तदधीने ज्ञात्वा। यद्वा, वैषयिकं सुखं दुःखं च समे अस्वाभाविकत्वात् मोक्षोपायविरुद्धत्वाच्च हेयत्वेन **समे** तुल्ये **कृत्वा** ज्ञात्वा तत्साधने जयादौ हर्षविषादादिरहितः सन् **युद्धाय युज्यस्व** सन्नद्धो भव। 'देहादिव्यतिरिक्तो ज्ञानानन्दस्वरूपः श्रीहरिप्रेरितोऽहं तत्प्रीत्यर्थं स्वविहितं कर्म करिष्ये' इति सञ्चिन्तयन्, अविद्यासहकृतस्वामित्वसम्बन्धेन युद्धानुकूलकृतिमानपि **पापं** तत्कर्मफलार्थं देहादिसंसारं **नावाप्स्यसि** किन्तु मुक्त एव भविष्यतीत्यर्थः॥ ३८॥

उपदिष्टज्ञानोपसंहारपूर्वकं ज्ञानोपायं विहितसत्कर्मसमाधिरूपं वक्तुं प्रतिजानीते - **एषेति॥**

[1] **भगवद्गीता** २.६ [2] मुमुक्षोर्युद्धानुष्ठानप्रकारमाह - **सुखेति॥ इति रामानुजभाष्ये**

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि॥ ३९॥

सम्यक् ख्यायते = ज्ञायते यया सा सङ्ख्या बुद्धिः। तयाऽवधारणीयमात्मतत्त्वं साङ्ख्यम्, तस्मिन् **साङ्ख्ये**। तज्ज्ञानाय याऽभिधेया सा 'नत्वेवाहम्'[1] इत्यारभ्य 'तस्मात् सर्वाणि भूतानि'[2] इत्यन्तेन **अभिहिता**। आत्मयाथात्म्यानुसन्धानपूर्वकनिष्कामकर्मात्र चित्तैकाग्र्यत्वहेतुत्वात् युज्यते चित्तमेकाग्रं क्रियतेऽनेनेति व्युत्पत्त्या योगपदेनोच्यते। अत्र **योगे** या वक्तव्या बुद्धिः, ताम् **इमाम्** अभिधीयमानां **श्रुणु। यया बुद्ध्या युक्तः कर्मबन्धं** कर्मरूपां प्रवाहतोऽनादिमविद्यां **प्रहास्यसि** 'मदीयमिदं कर्म, अहं कर्ता' इत्याद्यभिमानशून्यतया[3] स्वोचितसत्कर्मानुष्ठानम्, ततो मय्यचला भक्तिः, ततो मदापरोक्ष्यम्, ततो मन्महाप्रसादः, ततोऽविद्यानिवृत्तिपूर्वकानन्दाविर्भावरूपो मोक्ष इति भावः॥ ३९॥

ननु कर्मकरणे विघ्नबाहुल्येन फलाभावप्रत्यवाययोः प्रसङ्गः। तत्राह - **नेहेति**॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥ ४०॥

इह निष्कामकर्मणि, अभिक्रमस्य = उपक्रमस्य, नाशः = निष्फलत्वरूपः **नास्ति** प्रारब्धस्याङ्गवैकल्यादिना विच्छेदः **प्रत्यवायश्च न विद्यते। स्वल्पमप्यस्य धर्मस्य** अनुष्ठानं **महतो भयात्** संसारात् **त्रायते**।

अयं भावः। ब्रह्मार्पणपूर्वकनिष्कामस्य कर्मण अभिक्रम्यते कर्मणाऽऽरभ्यते यत् फलम्, तस्य नाशः 'तद्यथेह कर्मचितो लोकः एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इत्युक्तो न भवति। निष्कामकर्मफलस्यान्तःकरणशुद्धेः पापक्षयस्य नाशासम्भवात्। अङ्गवैगुण्यहेतुकं वैगुण्यं तद्धेतुकः प्रत्यवायश्च न विद्यते। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन'[4] इति श्रुत्या नित्यानामेव विविदिषां ज्ञानं चोद्दिश्य दुरितक्षयद्वारा

---

[1] भगवद्गीता २.१२ [2] भगवद्गीता २.३० [3] इत्याद्यभिमानश्वूयः कामस्वोचित.. इति कोशे।
[4] बृहदारण्यकोपनिषत् ६.४.२२

विहितत्वेन तत्र च सर्वाङ्गोपसंहारनियमाभावात्। काम्यानामपि संयोगपृथक्त्व-न्यायेन विनियोग इति पक्षेऽपि फलाभिसन्धिरहितत्वेन तेषां नित्यतुल्यत्वात्। 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्य' इत्यादौ संयोगस्य दध्नो नित्यत्वकाम्यत्व-योर्विधायकस्य शास्त्रस्य पृथक्त्वेन भिन्नत्वेन दध्नो नित्यत्वं काम्यत्वं च यथा तद्वदिति ह न्यायार्थः। नहि काम्यनित्याग्निहोत्रयोश्च कश्चिद्विशेषोऽस्ति। फ-लाभिसन्धितदभावाभ्यामेव तु काम्यत्वनित्यत्वव्यपदेश इति॥ ४०॥

'तमेतम्' इति वाक्यविहितानां साधनानामेकार्थकत्वमाह - **व्यवसायेति**॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥ ४१॥

हे **कुरुनन्दन इह** श्रेयोमार्गे **व्यवसायात्मिका** आत्मतत्त्वनिश्चयात्मिका साङ्ख्य-विषया योगविषया च **बुद्धिरेका** एव। फलस्य मोक्षरूपस्यैकत्वात्। **अव्यव-सायिनां** सकामानां तु **बुद्धयोऽनन्ताः** तत्रापि **बहुशाखाः** पशुपुत्रस्वर्गादिफलानां भेदात्[1]॥ ४१॥

अव्यवसायिनामपि व्यवसायात्मिका बुद्धिः कुतो न भवति? प्रमाणस्य स-र्वासाधारणत्वादित्याशङ्क्य प्रतिबन्धकसद्भावान्न भवतीत्याह - **यामिति त्रिभिः**॥

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२॥

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥ ४३॥

भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ ४४॥

[1] अव्यवसायिनां तु स्वर्गपुत्रपश्वन्नादिफलसाधनकर्माधिकृतानां बुद्धयः फलानन्त्यादनन्ताः। **इति रामानुजभाष्ये**

यामिमां वाचं प्रवदन्ति, 'तयाऽपहृतचेतसाम् व्यवसायात्मिका बुद्धिर्न भवति' इत्युत्तरेणान्वयः। **इमाम्** अध्ययनविध्युपात्तत्वेन प्रसिद्धां **पुष्पितां** पलाशवदापातरमणीयां निरतिशयफलाभावात्। कुतः? यतो **जन्मकर्मफलप्रदां** जन्मपूर्वशरीरसम्बन्धः तदधीनं च कर्म तत्तद्वर्णाश्रमाभिमाननिमित्तं तद्धेतुकफलं पुत्रपशुस्वर्गादिकं नश्वरं तान्युच्चनीचानि कूपाज्जलाहरकघटीयन्त्रवदविच्छेदेन ददातीति तथा ताम्। कुतः? इत्यत आह - **भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां** अमृतपानोर्वशीविहारपारिजातपरिमलादिनिबन्धनो यो भोगः, तत्कारणं च यदैश्वर्यं देवादिस्वामित्वं तयोर्गतिं = प्राप्तिं प्रति साधनभूता ये क्रियाविशेषा दर्शपूर्णमासादयः, तैर्बहुलाम् अतिबाहुल्येन भोगादिफलाय क्रियाकलापप्रतिपादिकां वाचं वदन्ति। **अविपश्चितः** विचारजन्यतात्पर्यधीशून्याः 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इत्यादिवेदे ये वादास्तेषु रताः, अयमेव वेदार्थ इति मिथ्याविश्वासेन सन्तुष्टाः, स्वर्गादेः **अन्यत्** मोक्षादिकं फलं **नास्तीति वादिनः। कामात्मानः** कामाकुलितचित्ताः। **स्वर्गपराः** स्वर्ग एव परः पुरुषार्थ इति ज्ञानं येषां ते। **तया** वेदवाचा **अपहृतचेतसाम्** आकृष्टमनसां भोगैश्वर्ययोः प्रसक्तानां तेषां **बुद्धिः व्यवसायात्मिका** सती **समाधौ** एकाग्रतायां **न विधीयते** ॥ ४४॥

प्रतिज्ञातां योगे बुद्धिमाह आषष्टसमाप्तेः।

ननु परमाप्तोऽतिकारुणिको वेदः स्वभावादेव विषयभोगलम्पटं जीवं सकामेऽत्यन्तदुःखप्रचुरसंसृतिदे कर्मणि कथं प्रवर्तयति? कथं वा वैदिको वेदोक्तं कर्म परित्यजेत्? इत्यत आह - **त्रैगुण्येति॥**

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥ ४५॥

त्रयो गुणाः सत्वादयः तेषां सम्बन्धि स्वर्गादि, तदेव विषय आपाततः प्रतिपाद्यं फलं येषां ते **त्रैगुण्यविषयाः, वेदाः** सत्त्वादिकार्यस्वर्गादिप्रतिपादकाः त्वं तु **निस्त्रैगुण्यः** त्रैगुण्यात् विषयात् स्वर्गादेर्निर्गतो **भव।** मुख्यतात्पर्येण स्वर्गादिपरत्वं वेदस्य मा विद्धीत्यर्थः। 'सर्वे वेदा यत्पदमामनन्ति'[1]ति श्रुतेः। 'वेदैश्च

[1] i

सर्वैरहमेव वेद्यः'[1] इतीहापि वक्ष्यमाणत्वेन मुख्यवेदार्थस्त्रिगुणरहितोऽहमेव। तत्परो भव।

वेदाद्बहिर्मुखानां फलश्रुत्या कर्मणि रुचिमुत्पाद्य, पश्चादनित्यत्वादिबोधनेन त्याजयित्वा पूर्णसच्चिदानन्दघनश्रीहरिप्रीतिसाधननिष्कामकर्मप्रतिपादनद्वारा मोक्षं प्रापयति यतः, अतस्त्वमप्यापातार्थं त्यक्त्वा मुख्यार्थपरो भव। यथा बालानार्तिहार्यौषधं पाययितुं गुडादिकं प्रदर्शयति विश्वासाय ददाति च, नतु गुडभक्षणे तात्पर्यम्, तथा बहिर्मुखान् प्रथमं निष्कामकर्मणि प्रवर्तयितुमयोग्यांस्तु मोक्षमार्गान्निवर्तयितुम्[2] कर्माण्याह वेदः। तात्पर्यं मोक्षे तत्र[3]

नित्यसत्त्वस्थः नित्ये विशुद्धसत्वे श्रीहरौ स्थितो भव मनसा तन्निष्ठो भवेत्यर्थः[4]अप्राप्तलाभो योगः। प्राप्तपरिरक्षणं क्षेमः। ताभ्यां रहित इति निर्वाहातिरिक्तप्रयत्नं मा कार्षीरित्यर्थः। **आत्मवान्** स्वामी परमात्मा, स मेऽस्तीति ज्ञानवान्[5]॥ ४५॥

ननु श्रुत्युक्तानेकस्वर्गादिफलं विहाय कथं कर्म कार्यम्? नहि प्रयोजनं विना मन्दोऽपि प्रवर्तते। नच मदाराधनादेव तत् सर्वं फलं स्यादिति वाच्यम्। त्वदाराधनान्मुक्तिरेव स्यात्, नतु पुत्रादिप्राप्तिरित्याशङ्क्य सर्वफलानां मदाराधनलब्धफलान्तर्भूतत्वादित्याह - **यावानिति**॥

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ ४६॥

यथा **उदपाने** कूपादौ **यावानर्थः** प्रयोजनं जलपानादिकं तावान् विषयकश्च **सर्वतः** सर्वस्मिन् पूर्णे **सम्प्लुतोदके** ह्रदादौ भवति, तथा **सर्वेषु वेदेषु** काम्यकर्मणो

---

[1] **भगवद्गीता** १५.१५ [2] मोक्षमार्गे प्रवर्तयितुमिति कोशे। [3] एवमत्यन्ताल्पफलानि पुनर्जन्मप्रसवानि कर्माणि मातापितृसहस्रेभ्योऽपि वत्सलतरतया आत्मोज्जीवने प्रवृत्ता वेदाः किमर्थं वदन्ति? कथं वा वेदोदितं त्याज्यतयोच्यते? इत्यत आह - **त्रैगुण्येति**॥ त्रयो गुणास्त्रैगुण्यं सत्त्वरजस्तमांसि। सत्त्वरजस्तमःप्रचुराः पुरुषास्त्रैगुण्यशब्देनोच्यन्ते। तद्विषया वेदाः। तमःप्रचुराणां रजःप्रचुराणां सत्त्वप्रचुराणां च वत्सलतरतयैव हितमवबोधयन्ति वेदाः। यद्येषां स्वगुणानुगुण्येन स्वर्गादिसाधनमेव हितं नावबोधयन्ति, तदैव ते रजस्तमःप्रचुरतया सात्त्विकफलमोक्षविमुखाः स्वापेक्षितफलसाधनमजानन्तः कामप्रावण्यविवशा अनुपादेयेषूपादेयभ्रान्त्या प्रविष्टाः प्रणष्टा भवेयुः। **इति रामानुजभाष्ये** । [4] सन्ततविष्णुस्मरणं नित्यसत्त्वस्थत्वम्। **इति गीतातात्पर्ये** । [5] परमात्मा मम स्वामीति ज्ञानमात्मवत्त्वम्। **इति गीतातात्पर्ये**

यत् फलमुक्तं तावत् फलं **विजानतः** परोक्षज्ञानिनः **ब्राह्मणस्य** परोक्षज्ञानद्वारा ब्रह्मापरोक्षज्ञानिनो भवति[1]

'तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते।
समाश्रितात् ब्रह्मतरोरनन्तान्निश्रेयसं पक्वफलं प्रयात॥'

इति वैष्णवोक्तेः ।

अयं भावः। पुत्रादीनां न स्वतः पुरुषार्थत्वम्। किन्तु तज्जन्यसुखमेव पुरुषार्थम्। तच्च वैषयिकं सातिशयं नश्वरं दुःखसम्भिन्नं च। भगवदाराधनेनाविर्भूतं स्वरूपानन्दनिरतिशयनित्यदुःखासम्भिन्नं सुखं यावद्भोगवैषयिकानन्देभ्यः समूहीकृतेभ्योऽपि कोटिगुणितम्, अतस्तच्छ्रुत्वा क्षुद्रकामान् विहायानन्दार्थी कथं न प्रवर्तेत? इति॥ ४६॥

ननु निष्कामकर्मणाऽऽत्मज्ञानं सम्पाद्य परमानन्दप्राप्त्यै क्रियते चेत्, प्रथमत आत्मज्ञानमेव सम्पाद्यताम्। किं बह्वायासैः कर्मभिर्बहिरङ्गसाधनैः प्रत्युत चित्तविक्षेपकैः? इत्यत आह - **कर्मणीति॥**

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥ ४७॥

ते इति ज्ञानिमात्रोपलक्षणम्। ज्ञानिनोऽपि तव **कर्मण्येवाधिकारः** न **फलेषु** फलकामेषु। मोक्षप्रतिबन्धकत्वात्। अज्ञानिनः कामेष्वधिकारो नास्तीति किमु वाच्यम् ?[2] ब्रह्मापरोक्षज्ञाने कामानां प्रतिबन्धकत्वात्।

ननु मयेदं भोक्तव्यमिति बुद्ध्यभावेऽपि कर्म स्वसामर्थ्यादेव फलं जनयिष्यतीति चेत्, नेत्याह - **कर्मफलहेतुर्भूः** फलकामनया हि कर्म कुर्वन् फलस्य हेतुः = उत्पादको भवति। त्वं तु निष्कामः सन् कर्मफलहेतुर्मा भूः। नहि

[1] विजानतोऽपि ज्ञानिनो ब्राह्मणस्य फलेऽन्तर्भवति। ब्रह्माणतीति ब्राह्मणोऽपरोक्षज्ञानी। स हि ब्रह्म गच्छति। विजानत इति ज्ञानफलत्वं तस्य दर्शयति। **इति मध्वभाष्यम्** । [2] त इत्युपलक्षणार्थम्। तव ज्ञानिनोऽपि न फलकामकर्तव्यता। किम्वन्येषाम् ? **इति मध्वभाष्यम्**

निष्कामेण भगवदर्पणबुद्ध्या कृतं मदाराधनरूपं कर्म मत्प्रीत्यतिरिक्तफलाय कल्पते। ननु यदि फलं नेष्यते, तर्हि किं कर्मणा दुःखरूपेण? इति। तत्राह - **मा ते सङ्गोऽस्त्वकर्मणि** कर्मणो मत्प्रसादरूपमहाफलहेतुत्वेन निष्फलत्वाभावात्॥ ४७॥

पूर्वोक्तमेव विवृणोति - **योगस्थ इति॥**

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ ४८॥

हे **धनञ्जय योगस्थः** सन् **सङ्गं** फलाभिलाषं कर्तृत्वाभिमानं च त्यक्त्वा **कर्माणि कुरु।** सङ्गत्यागोपायमाह - **सिद्ध्यसिद्ध्योः समो भूत्वा** फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्यक्त्वा केवलमदाराधनबुद्ध्या कर्माणि कुर्वित्यर्थः।

ननु योगशब्देन प्राक् कर्मोक्तम्। अत्र तु **योगस्थः कर्माणि कुरु** इत्युच्यते। तत् कथमेतत् बोद्धुं शक्यम्? अत आह - **समत्वं योग उच्यते** यदेतत् सिद्ध्यसिद्ध्योः समत्वम्, इदमेव **योगस्थः** इत्यत्र योगशब्देनोच्यते, नतु कर्मेति न कोऽपि विरोध इत्यर्थः। **सुखदुःखे समे कृत्वा** इत्यत्र जयाजयसाम्येन युद्धमात्रकर्तव्यता प्रकृतत्वादुक्ता। इह तु दृष्टादृष्टसर्वफलपरित्यागेन सर्वकर्मकर्तव्यतेति विशेषः॥ ४८॥

यावानर्थः इत्यत्र कर्मफलस्य ज्ञानापेक्षयाऽल्पत्वाद्योगं कुर्वित्युक्तम्। तत्र हेत्वन्तरमाह - **दूरेणेति॥**

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥ ४९॥

परमात्मविषयबुद्धियोगात् **कर्मावरम्** अधमं **हि** यतः, ततो **बुद्धौ** परमात्मबुद्धौ **शरणं** पापक्षयद्वारा तदुत्पादकमुत्पन्नाया रक्षकं मदाराधनरूपनिष्कामकर्मयोगम् **अन्विच्छ** कर्तुमिच्छ। ये तु **फलहेतवः** फलकामा अवरं कर्म कुर्वन्ति

ते **कृपणाः** अत्यन्तदीनाः। सर्वदा जन्ममरणादिघटीयन्त्रभ्रमणेन परवशाः 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः' इति श्रुतेः। यथा हि कृपणा अतिदुःखेन धनमर्जयन्तो यत्किञ्चित् दृष्टसुखमात्रलोभेन दानादिजनितमहत्सुखमनुभवितुं न शक्नुवन्तीत्यात्मानमेव वञ्चयन्ति, तथा महता दुःखेन कर्माणि कुर्वाणाः क्षुद्रफलमात्रलोभेन परमानन्दानुभवेन वञ्चिता इत्यहो मौढ्यं तेषामिति कृपणपदेन ध्वनितम्॥ ४९॥

एवं बुद्धियोगाभावे दोषमुक्त्वा तत्सत्त्वे गुणमाह - **बुद्धीति**॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥ ५०॥

इह कर्मसु **बुद्धियुक्तः** समत्वबुद्ध्या युक्तो **जहाति** त्यजति **उभे सुकृतदुष्कृते** पुण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण। यस्मादेवं **तस्मात्** त्वं बुद्धियोगाय **युज्यस्व** उद्युक्तो भव। यस्मादीदृशः समत्वयोगो भगवदर्पितचेतसस्तदाराधकस्य निष्कामकर्मसु प्रवर्तमानस्य **कौशलं** यद्बन्धहेतूनामपि कर्मणां बन्धनिवृत्तिपूर्वकपरमानन्दाविर्भावरूपमोक्षपर्यवसायित्वं तन्महत् कौशलम्।

अयं भावः। 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्'[1] इति सूत्रेण 'तद्यथा पुष्करपलाशे आपो न श्लिष्यन्ते' 'तद्यथैषीका तूलमग्नौ प्रोतं प्रदूयेत' 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति श्रुत्या च कर्मरूपाविद्याया भगवज्ज्ञानेन नाशो बोध्यते। तत्र पुण्यं स्वर्गादिफलदं नश्यति। नतु भगवदाराधनरूपं निष्कामकर्मजन्यं ज्ञानादिफलम्[2] दुष्कृतस्य सर्वस्यैव नाशोऽनिष्टत्वात्[3] तत्र देहान्तरारम्भकयोरेव नाशः। आरब्धयोस्तु भोगादेव नाशः। 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति श्रुतेः प्रारब्धाभिप्रायत्वादिति॥ ५०॥

दुष्कृतमात्रस्याल्पफलकसुकृतस्य च त्यागात् महाफलप्राप्तिर्भवतीत्याह - **कर्मजमिति**॥

[1] **ब्रह्मसूत्रम्** ४.१.१३ [2] सुकृतमप्यप्रियं मानुष्यादि जहाति, न बृहत्फलमप्युपासनादिनिमित्तम्।**इति मध्वभाष्यम्** । [3] अनिष्टस्यैव वियोगः। सोऽस्त्येव सर्वात्मना।**इति मध्वभाष्यम्** ।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥ ५१॥

समत्वबुद्धियुक्ता **कर्मजं फलं** स्वर्गादिकं **त्यक्त्वा** स्वर्गादिकामनां च विहाय विहितं कर्म कृत्वा परमेश्वराय समर्प्य **बुद्धियुक्ताः** शास्त्रजन्यपरेशपरोक्षज्ञानिनो भूत्वा तद्द्वारा **मनीषिणः** अपरोक्षज्ञानिनो भूत्वा, जन्मादिरूपसम्बन्धात् संसारादतितरां निर्मुक्ताः सन्तः **अनामयं पदं** श्रीवैकुण्ठाख्यं श्रीकृष्णपुरुषोत्तमकेलिनित्यस्थानं सच्चिद्रूपमभिव्यक्तपूर्णानन्दस्वरूपं वा श्रीहरिं लोकविशेषे विग्रहविशेषेण स्थितं तत्रस्थमप्यनामयमनश्वरम्। **गच्छन्ति** इति बहुवचनेन मुक्तौ भेदः, गच्छतिना लोकविशेषं प्रति गमनं चेति सिद्धम्॥ ५१॥

ननूक्तयोगो न साक्षाज्ज्ञानहेतुः। किन्तु श्रवणादिकमेव। 'आत्मा वाऽरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेः। अथाऽप्यदृष्टद्वारा सत्वशुद्धिमुत्पाद्य श्रवणादीन्युपकरोति, तदा कियत्कालमनुष्टेयम्? अत आह - **यदेति**॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥ ५२॥

यदा ते बुद्धिः अन्तकरणं **मोहकलिलम्** देहगेहादौ 'अहम्' 'मम' इत्यन्यथाज्ञानरूपं दोषं मत्प्रसादात् **व्यतितरिष्यति** त्यक्ष्यति, **तदा** महद्भ्यः **श्रोतव्यस्य श्रुतस्य च** वेदादेः **निर्वेदम्** नितरां लाभं[1] **गन्तासि** प्राप्स्यसीत्यर्थः॥ ५२॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥ ५३॥

तदैव **ते** तव बुद्धिः **श्रुतिभिः** नानाफलश्रवणैरविचारिततात्पर्यैः **विप्रतिपन्ना** अनेकविपर्ययवत्वेन विक्षिप्ता प्राक्स्थिता, **यदा** मदाराधनरूपकर्मयोगेन शुद्धा

[1] निर्वेदं नितरां लाभम् **इति मध्वभाष्यम्**

सती, विक्षेपं परित्यज्य, **समाधौ** सदनन्तगुणालये मयि[1] **निश्चला** जाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिता **अचला** सुषुप्तिमूर्छास्तब्धीभावादिरूपचलनरहिता सती **स्थास्यति** लयविक्षेपदोषौ विहाय समाहिता भविष्यतीति यावत्।

यद्वा, **निश्चला** सम्भावनाविपरीतभावनारहिता **अचला** दीर्घकालादरनैरन्तर्यसत्कारसेवनैः विजातीयप्रत्ययादूषिता सती, निर्वातप्रदीपवदनन्तगुणालये मयि **स्थास्यति** इति योजना[2] **तदा योगं** पूर्णानन्दत्वनिर्मुक्तत्वादिना मत्साम्यरूपम्[3]

'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं (पुरुषं ब्रह्मयोनिम्)।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥'

इति श्रुत्युक्तम् **अवाप्स्यसि** इत्यर्थः॥ ५३॥

[4]यान्येव जीवन्मुक्तानां लक्षणानि तान्येव मुमुक्षूणां मोक्षोपायभूतानीति मन्वानोऽर्जुनः स्थितप्रज्ञस्य लक्षणं पृच्छति -

अर्जुन उवाच
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्॥ ५४॥

ज्ञाततत्वस्याप्यर्जुनस्य नरावतारस्यापि लोकोपकाराय प्रश्नः[5] स्थिता = निश्चलाऽनन्तसद्गुणालये भगवति प्रज्ञा यस्य[6] सः **स्थितप्रज्ञः**, अवस्थाद्वयवान् समाधिस्थः व्युत्थितचित्तश्चेति। तस्य **का भाषा।** कर्मणि षष्टी। भाष्यतेऽनयेति **भाषा** लक्षणम्। समाधिस्थः स्थितप्रज्ञः कैर्लक्षणैर्व्यवह्रियत इत्यर्थः। स च व्युत्थितचित्तः स्थितधीः स्वयं **किं प्रभाषेत** स्तुतिनिन्दादावभिवन्दनद्वेषादिलक्षणं **किं**

[1] समाधौ परमात्मनि **इति मधुसूदनसरस्वतीये** [2] निर्वातप्रदीपवदात्मनि स्थास्यतीति योजना **इति मधुसूदनसरस्वतीये** । [3] योगं जीवपरमात्मैक्यलक्षणं तत्त्वमस्यादिवाक्यजन्यमखण्डसाक्षात्कारं सर्वयोगफलम् **इति मधुसूदनसरस्वतीये** । [4] अत्र कोशे श्रीकृष्णाय नमः इति पठ्यते। [5] नचार्जुनो न जानाति तल्लक्षणादिकम्। 'जानन्ति पूर्वराजानो देवर्षयस्तथैव हि। तथाऽपि धर्मान् पृच्छन्ति वार्तायै गुह्यवित्तये। न ते गुह्याः प्रतीयन्ते पुराणेष्वल्पबुद्धिनाम्॥' इति वचनात्। **इति मध्वभाष्यम्** । [6] स्थिता निश्चला अहं ब्रह्मास्मीति प्रज्ञा यस्य। **इति मधुसूदनसरस्वतीये**

कथं **प्रभाषेत**। सर्वत्र सम्भावनायां लिङ्। तथा **किमासीत** व्युत्थितचित्तनिग्रहाय कथं बहिरिन्द्रियाणां निग्रहं करोतीति। तन्निग्रहाभावकाले च **किं व्रजेत** कथं विषयान् प्राप्नोति। तत्कर्तृकभाषणासनव्रजनानि मूढजनविलक्षणानि कीदृशानीत्यर्थः। समाधिस्थे एकः, व्युत्थिते त्रयः, इति चत्वारः प्रश्नाः। **केशव** इति सम्बोधयन् सर्वान्तर्यामितया सर्वदाऽप्रच्युतसर्वज्ञानवत्त्वादिना त्वमेवैतादृशं वक्तुं समर्थोऽसीति सूचयति॥ ५४॥

श्रीभगवानुवाच
प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥ ५५॥

कामान् कामादीन् **मनोगतान्** अविद्यासहकृतस्वामित्वादिसम्बन्धेन जीवे वर्तमानान् प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेन तन्त्रान्तरे पञ्चधोक्तान् प्रकर्षेण निःशेषतया **जहाति**। हाने हेतुः **मनोगतान्**। यत्रैव मनसि कामादय उत्पद्यन्ते, तत्रैव ब्रह्माकारा कामादिविरोधिनी वृत्तिरुत्पन्नेति भवति तेषां नाशः। ज्ञानस्य कामादिनाशकत्वं तु 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते'[1] इति सम्प्रति वक्ष्यति[2] ननु स्थितप्रज्ञस्य मुखप्रसादलिङ्गगम्यः सन्तोषविशेषः प्रतीयते। स सर्वकर्मत्यागे कथं स्यात् ? इति, तत्राह - **आत्मन्येव** परमानन्दस्वरूपेऽनन्तगुणनिलये मयि मत्प्रसादाविर्भूतपरमानन्दस्वरूपे वा **आत्मना** मनसा सन्तुष्टः 'इतोऽन्यो लाभो नास्ति' इति मत्वाऽत्रैवातितृप्तः[3]

'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥' इति श्रुतेः।

तथा च स एवंविधलक्षणवाचिशब्दैः भाष्यत इति प्रथमपश्नोत्तरम्॥ ५५॥

किं प्रभाषेत इत्यस्योत्तरमाह - **दुःखेष्विति द्वाभ्याम्**॥

[1] **भगवद्गीता** २.५९ [2] मनोगता हि कामाः। अतस्तत्रैव तद्विरुद्धज्ञानोत्पत्तौ युक्तं हानं तेषामिति दर्शयति मनोगतानिति। विरोधश्चोच्यते 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति।**इति मध्वभाष्यम्** । [3] आत्मन्येव परमानन्दरूपे न त्वनात्मनि तुच्छे आत्मना स्वप्रकाशचिद्रूपेण भासमाने नतु वृत्त्या तुष्टः परितृप्तः परमपुरुषार्थलाभात्। **इति मधुसूदनसरस्वतीये** ।

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥ ५६॥

दुःखेषु ज्वररोगादिष्वाध्यात्मिकेषु, व्याघ्रादिहेतुकाधिभौतिकेषु, अतिवृष्ट्यादिहेतुकाधिदैवेषु प्रारब्धकर्मप्रापितेषु **नोद्विग्नं** तत्परिहाराक्षमतया न व्याकुलं मनो यस्य सः। अविवेकिनो हि दुःखप्राप्तौ 'धिङ्मां को मे दुःखमीदृशं निराकुर्यात्' इत्यनुतापात्मकः तामसश्चित्तवृत्तिविशेष उद्वेगो जायते। तथा **सुखेषु** सत्वगुणहेतुकचित्तवृत्तिविशेषेषु त्रिविधेषु प्रारब्धपुण्यप्रापितेषु **विगतस्पृहः** आगामितज्जातीयसुखस्पृहारहितः। सुखानुभवकाले तज्जातीयसुखस्य[1] धर्ममननुष्टाय वृथैव तदाकाङ्क्षारूपा तामसी चित्तवृत्तिः भ्रान्तिरूपा स्पृहा। नहि कारणं विना कार्योत्पत्तिः। सा चाविवेकिन एव। **रागः** विषयेषु रञ्जनात्मकश्चित्तवृत्तिविशेषः सुखोत्पत्तावभिनिवेशरूपः। आगाम्यनिष्टज्ञानजन्यं दुःखं **भयम्**। एवं रागविषयविनाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो मन्यमानस्याभिज्वलनात्मकश्चित्तवृत्तिविशेषः **क्रोधः**। ते सर्वे विगता यस्मात् सः। एतादृशो **मुनिः स्थितधीरुच्यते**।

तस्य जीवन्मुक्तस्य क्षेत्रे चित्ते प्रारब्धकर्मवशात् कदाचिद्रागादिकमुत्पन्नमपि अविद्यासहकृतस्वामित्वादिसम्बन्धेन जीवे प्रागिव न प्रवर्तन्ते। तत्सम्बन्धघटिकाया देहादौ 'अहम्' 'मम' इत्यभिमानहेतोरविद्याया मत्प्रसादान्नाशात् परगृहं प्राप्तः तत्क्षितिमिवोदासीनः परं पश्यन् स्वानुभवप्रकटनेन शिष्यशिक्षार्थमनुद्वेगनिस्पृहत्वादिवाचः प्रभाषते। एवं चान्योऽपि मुमुक्षुः दुःखे नोद्विजेत् सुखे न प्रहृष्येत् रागभयक्रोधरहितश्च भवेदिति भावः॥ ५६॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥ ५७॥

सर्वेषु देहजीवनादिष्वपि **योऽनभिस्नेहः**। यस्मिन् सत्यन्यदीये हानिवृद्धी स्वस्मिन्नारोप्येते स तादृश्योऽन्यविषयकः प्रेमापरपर्यायस्तामसो वृत्तिविशेषः स्नेहः तद्रहितोऽनभिस्नेहः परमानन्दरूपे सर्वान्तर्यामिणि शरणगतार्तिहरणदक्षे

[1] तज्जातीयसुखस्य कारणमिति स्यात्। तथैव मधुसूदनीये।

चिन्तनमात्रेण स्वसारूप्यदायिनि मयि सर्वथाऽभिस्नेहवान् भवेत्[1] प्रारब्ध-कर्मप्रापितं **शुभं** सुखहेतुं विषयं **प्राप्य नाभिनन्दति। अशुभं** दुःखहेतुं **प्राप्य न द्वेष्टि।** अन्तरसूयापूर्वं न निन्दति। एवं विचालकाभावात् **तस्य** अनभिस्नेहस्य हर्षवि-षादशून्यस्य मुनेः **प्रज्ञा** परमात्मतत्त्वविषयका **प्रतिष्ठिता** फलपर्यवसायिनी। एवं मुमुक्षुरप्येतादृशस्नेहादिरहितो भवेदिति भावः। अत्र प्रशंसारूपा वाचो न भाषत इति व्यतिरेक उक्तः। पूर्वापेक्षया पद्यद्वयेनार्वाचीना व्युत्थानावस्थोक्ता॥ ५७॥

किमासीत इत्यस्योत्तरं षड्भिर्वक्तुं तत्र प्रारब्धकर्मवशाद्व्युत्थानेन विक्षि-प्तानीन्द्रियाणि पुनरनायासेनोपसंहृत्य समाध्यर्थमेव स्थितप्रज्ञस्योपवेशनमिति दर्शयितुमाह -

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ५८॥

अयम् व्युत्थितः सर्वशः सर्वाणि **इन्द्रियाणीन्द्रियार्थेभ्यः** शब्दादिभ्यः। चः पुनरर्थे। **यदा संहरते** पुनरुपसंहरति। तत्र दृष्टान्तः **कूर्मोऽङ्गानीव**। तदा **तस्य प्रज्ञा प्रतिष्ठिता** इति॥ ५८॥

ननु मूढस्यापि रोगादिना विषयेभ्य इन्द्रियोपसंहरणं सम्भवतीत्यत आह - **विषया इति॥**

विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥ ५९॥

निराहारस्य देहाभिमानवतो मूढस्यापि रोगिणः शब्दादयो **निवर्तन्ते**। किन्तु **रसवर्जं** रसो रागो न निवर्तते। **अस्य** तु स्थितप्रज्ञस्य **परं** परमात्मानं साक्षा-त्कृत्य रसोऽपि क्षुद्रसुखरागोऽपि निवर्तते। यस्मान्निरतिशयसौन्दर्याब्धेरपरो-क्षदर्शनं विना न सरागविषयोच्छेदः तस्मात् सरागविषयोच्छेदकस्योक्तदर्श-नस्थितप्रज्ञारूपस्य स्थैर्यं महता यत्नेन सम्पादयेदिति भावः॥ ५९॥

---
[1] भगवति परमात्मनि तु सर्वथाऽभिस्नेहवान् भवेदेव। अनात्मस्नेहाभावस्य तदर्थत्वादिति द्रष्टव्यम्।**इति मधुसूदनसरस्वतीये** ।

तत्र प्रज्ञास्थैर्ये बाह्यान्तरिन्द्रियनिग्रहोऽसाधारणं हेतुः। तदुभयाभावे प्रज्ञादर्शनादिति तन्निग्रह आवश्यकः। तत्र सदनन्तगुणालयमन्तर्यामिणं परमकारुणिकमनाश्रित्य स्वयत्नेनैवेन्द्रियजये वर्तमानस्यानर्थो भवतीत्याह - **यतत इति**॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥ ६०॥

हे **कौन्तेय। यततः** भूयोभूयो विषयदोषदर्शनात्मकं यत्नं कुर्वतो **विपश्चितः** विवेकिनोऽपि **पुरुषस्य मनः** क्षणमात्रं निर्विकारं कृतमपि **इन्द्रियाणि हरन्ति** विकारं प्रापयन्ति। ननु विरोधिनि विवेके सति कथं तत्प्राप्तिः? तत्राह - **प्रमाथीनि** प्रमथनशीलानि, अतिबलीयस्त्वाद्विवेकोपमर्दनक्षमाणि। अतः **प्रसभं** बलात्कारेण पश्यत्येव विपश्चिति स्वामिनि विवेके च रक्षके सति विवेकप्रज्ञाप्रविष्टमपि मनः ततः प्रच्याव्य स्वविषयाविष्टत्वेन हरन्तीत्यर्थः। **हि** प्रसिद्धोऽयमर्थः। लोके यथा प्रमाथिनो दस्यवः प्रसभं धनिकं रक्षकं चाभिभूय तयोः पश्यतोरेव धनं हरन्ति, तथेन्द्रियाण्यपि विषयसन्निधानेन मनो हरन्ति॥ ६०॥

मामाश्रित्य ये हीन्द्रियजयाय यतन्तेऽनायासेनेन्द्रियाणि वशीकुर्वन्तीत्याह - **तानीति**॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥ ६१॥

तानि सर्वाणि इन्द्रियाणि ज्ञानकर्मसाधनानि **संयम्य** सम्यग्वशीकृत्य **युक्तः** समाहितमनाः सन् **आसीत**। प्रमाथिनां कथं वशीकरणम्? तत्राह - **मत्परः** अहम् = सर्वेश्वरोऽनन्तगुणालयः, परः = उत्कृष्टः सर्वस्वतयोपादेयो यस्य सः **मत्परः**[1] एकान्तमद्भक्त इत्यर्थः। तथा चोक्तम् - 'न वासुदेवभक्तानामशुभं विद्यते क्वचित्'[2] इति। यथा हि लोके बलवन्तं राजानमाश्रित्य

[1] अहं सर्वात्मा वासुदेव एव पर उत्कृष्ट उपादेयो यस्य स मत्परः एकान्तमद्भक्त इत्यर्थः। **इति मधुसूदनसरस्वतीये** । [2] **महाभारतम्**

दस्यवो निगृह्यन्ते 'राजाश्रितोऽयम्' इति ज्ञात्वा च ते स्वयमेव तद्वश्या भवन्ति, तथैव भगवन्तं सर्वान्तर्यामिणमाश्रित्य तत्प्रभावेनैव दुष्टानीन्द्रियाणि निगृहीतानि भवन्ति।

इन्द्रियवशीकारे फलमाह - **वशे हीति॥ किमासीत** इत्यस्योत्तरमुक्तम्॥ ६१॥

ननु मनसो बाह्येन्द्रियप्रवृत्तिद्वाराऽनर्थहेतुत्वं निगृहीतबाह्येन्द्रियस्य तूत्खातदंष्ट्रोरगवन्मनस्यनिगृहीतेऽपि न काऽपि क्षतिः। बाह्योद्योगाभावेनैव कृतकृत्यत्वात्, अतो **युक्त आसीत** इति व्यर्थमित्याशङ्क्य, निगृहीतबाह्येन्द्रियस्यापि युक्तत्वाभाःत्रे सर्वानर्थप्राप्तिमाह - **ध्यायत इति द्वाभ्याम्॥**

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते॥ ६२॥

निगृहीतबाह्येन्द्रियस्यापि शब्दादीन् **विषयान् ध्यायतः** मनसा पुनःपुनश्चिन्तयतः **पुंसः**, तेषु विषयेषु **सङ्गः** आसक्तिः **जायते। सङ्गात्** 'ममेदं भवतु' इतीच्छा जायते। **कामात्** कुतश्चित् प्रतिहन्यमानात् तत्प्रतिघातकविषयकक्रोधो जायते॥ ६२॥

क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥ ६३॥

क्रोधाद्भवति सम्मोहः कार्याकार्यविवेकाभावरूपः। **सम्मोहात् स्मृतिविभ्रमः** शास्त्राचार्योपदिष्टभगवदनुसन्धानस्य विभ्रंशो नाशः। **बुद्धिनाशात् प्रणश्यति** श्रीहरिप्राप्तेः प्रच्युतः सन् संसारे पततीत्यर्थः।

यस्मादेवं मनसो निग्रहाभावे निगृहीतबाह्येन्द्रियस्यापि परमानर्थप्राप्तिः, तस्मान्महता प्रयत्नेन मनो निगृह्णीयादित्यभिप्रायः॥ ६३॥

मनसि निगृहीते तु बाह्येन्द्रियनिग्रहाभावेऽपि न दोषः। राज्ञि निगृहीते हि प्रजाः स्वयमेव वशीभवन्ति यथा, तथा मनसि निगृहीते इन्द्रियाणि स्वयमेव वशीभवन्तीति वदन् **किं व्रजेत** इत्यस्योत्तरमाह - **रागेत्यष्टभिः॥**

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥ ६४॥

स्वस्य विधेयं = वशीभूतम् आत्मा = मनो यस्य सः। **आत्मवश्यैः** स्वाधीनैः। रागद्वेषाभ्यां वियुक्तैः = रहितैः **इन्द्रियैः** श्रोत्रादिभिः **विषयान्** शब्दादीन् अनिषिद्धान् **चरन्** उपलभमानः **प्रसादं** चित्तस्य स्वच्छतां परमात्मसाक्षात्कारयोग्यताम् **अधिगच्छति**। रागद्वेषप्रयुक्तानि हीन्द्रियाणि दोषहेतुतां प्रपद्यन्ते। मनसि स्ववशे तु न रागद्वेषौ। तयोरभावे तु न तदधीनेन्द्रियप्रवृत्तिः। प्रारब्धवशाद्देहनिर्वाहाय विषयोपलम्भो न दोषाय भवेत्। निषिद्धाचारस्य रागाद्यधीनस्य प्राक् त्यक्ततया तत्र स्वभावत एव तन्मनो न चलतीति भावः। अतो **किं व्रजेत** इत्यस्योत्तरमुक्तम्॥ ६४॥

प्रसादे सति किम् ? इत्यत आह - **प्रसाद इति॥**

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठति॥ ६५॥

चित्तस्य **प्रसादे** स्वच्छरूपे सति **सर्वदुःखानाम्** आध्यात्मिकादीनां **हानिः** नाशः **अस्योपजायते हि** यतः **प्रसन्नचेतसः** यतेः **आशु** शीघ्रमेव **बुद्धिः** अनन्तसद्गुणालये मयि[1] **पर्यवतिष्ठते** स्थिरा भवति।

प्रसादे सति मयि बुद्धिपर्यवसानम्, ततो मदापरोक्ष्यम्, ततो मन्महाप्रसादः, ततोऽविद्यानिवृत्तिः, ततः सर्वदुःखनाशपूर्वकपरमानन्दावाप्तिरूपो मोक्ष इति भावः॥ ६५॥

उक्तमेवार्थं व्यतिरेकमुखेन दृढयति - **नास्तीति॥**

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥ ६६॥

---

[1] बुद्धिः ब्रह्मात्मैक्याकारा **इति मधुसूदनसरस्वतीये**

अयुक्तस्य अजितचित्तस्य **बुद्धिः** ब्रह्मापरोक्षज्ञानं **न** भवति। ननु ध्यानादेव ब्रह्मापरोक्ष्यं स्यात्, तत्राह - **न चायुक्तस्येति॥** चित्तैकाग्र्यतारहितस्य **भावना** ध्यानमपि **न** स्यादेव[1] **न चाभावयतः** भावनारहितस्य **शान्तिः** मन्निष्ठा। **अशान्तस्य** मदनिष्ठस्य **सुखं** दुःखासम्भिन्नं मोक्षरूपं **कुतः**? ॥ ६६॥

नन्वयुक्तस्य कुतो न श्रवणादितस्तादृग्बुद्धिः? इत्यत आह - **इन्द्रियाणामिति॥**

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥ ६७॥

चरतां विषयेषु वर्तमानानामवशीकृतानां **इन्द्रियाणां** मध्ये **यत्** एकमिन्द्रियम् **अनु** लक्षीकृत्य **मनो विधीयते** प्रवर्तते। कर्मकर्तरि लकारः। **तत्** इन्द्रियमपि मनसाऽनुसृतम् **अस्य** मुमुक्षोः **प्रज्ञा** ब्रह्मविषयकपरोक्षं **हरति** अपनयति। यदैकमपीन्द्रियं प्रज्ञा हरति, तदा सर्वाणि हरन्तीति किमुत वक्तव्यमस्ति? विपरीतो **वायुर्नावमिव** ॥ ६७॥

तस्मान्निगृहीतेन्द्रिय एव ज्ञानी भवतीति निगमयति - **तस्मादिति॥**

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ६८॥

यत एवं निगृहीतेन्द्रियस्यैव प्रसादः, प्रसन्नचेतस एव युक्तिः, युक्तिमत एव तत्त्वज्ञानम्, तत्त्वज्ञानवत एवापरोक्षज्ञानसाधनं ध्यानम्, **तस्माद्यस्य** पुंसः इन्द्रियनिग्रहः, तस्योक्तरीत्या परम्परया मोक्षहेतुभगवत्प्रसादकारणापरोक्षज्ञानं भवतीत्यर्थः॥ ६८॥

एवं मुमुक्षुणा प्रयत्नेनेन्द्रियनिग्रहः कर्तव्यः, ज्ञानिनस्तु स्वाभाविक इत्याह - **येति॥**

[1] नहि प्रसादाभावे युक्तिश्चित्तनिरोधः। अयुक्तस्य च बुद्धिः सम्यज्ज्ञानं नास्ति। तदेवोपपादयति - **नचायुक्तस्येति॥ इति मध्वभाष्यम्** ।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ ६९॥

अज्ञानां सर्वभूतानां **या** भगवद्विषयकस्थिरप्रज्ञा निशेव निशा, **यस्यां** अज्ञानि **भूतानि** गाढनिद्रायामिव शेते **संयमी** यतचित्तेन्द्रियः **जागर्ति** सम्यगापरोक्ष्येण पश्यतीत्यर्थः। **यस्यां** विषयभोगरूपायां ज्ञान्यपेक्षया निशायां **भूतानि** परमेश्वरविमुखानि **जाग्रति मुनेः** परमेश्वरमननशीलस्य **सा निशा**। तस्यां स निद्रातीत्यर्थः। यथा काकस्य रात्र्यन्धस्य दिनम् उलूकस्य दिवान्धस्य निशा, रात्रौ पश्यतश्चोलूकस्य यद्दिनं रात्रिरेव सा काकस्य, तथा ज्ञाज्ञयोः॥ ६८॥

ननु बाह्यार्थानुसन्धानं विना ज्ञानिनो युज्येतापि कथञ्चिद्गमनादिकम्। विषयानुभवस्तु दृश्यमानः कथं स्यात्? तस्य नियतसाधनसाध्यानुसन्धानं विनाऽनुदयादित्याशङ्क्य तस्य विषयानुभवप्रकारमाह -

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी॥ ७०॥

नदीभिः **आपूर्यमाणं** सन्तं वृष्ट्यादिप्रभवा अप्यापः सर्वाः **प्रविशन्ति**। कीदृशम्? **अचलप्रतिष्ठम्** अनतिक्रान्तमर्यादम्। अचलानां मैनाकादीनां प्रतिष्ठा यस्मिन्निति वाऽतिगम्भीरम्। **यद्वत्** येन प्रकारेण निर्विकारत्वेन **तद्वत्** तेनैव निर्विकारत्वप्रकारेण **यं** स्थितप्रज्ञं सन्तं **कामाः** अज्ञैः काम्यमानाः शब्दाद्या अवर्जनीयतया प्रारब्धकर्मवशात् **प्रविशन्ति**। नतु विकर्तुं शक्नुवन्ति। **स शान्तिं** सर्वलौकिकालौकिककर्मविक्षेपं निर्वृत्तिं मोक्षाख्यं प्राप्नोति। **न कामकामी** कामान् विषयान् कामयितुं शीलं यस्य सः कामकामः अज्ञः शान्तिं नाप्नोति॥ ७०॥

एतदेव प्रपञ्चयति - **विहायेति॥**

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥ ७१॥

सर्वान् बाह्यान् गृहक्षेत्रादीन् आन्तरान् मनोराज्यरूपान् वासनामात्ररूपांश्च पथि गच्छतः तृणस्पर्शतुल्यान् कामान् त्रिविधान् **विहाय** उपेक्ष्य, शरीरजीवनमात्रे **निःस्पृहः** सन्, यतो **निरहङ्कारः** देहेन्द्रियादौ 'अहं मम' इति धीशून्यः, **निर्ममः** देहयात्रामात्रार्थोऽपि प्रारब्धकर्माक्षिप्तकौपीनाच्छादानादौ 'ममेदम्' इति धीशून्यः सन्, **यः पुमान् चरति** प्रारब्धकर्मवशाद्भोगान् भुङ्क्ते, **सः** एवंभूतः स्थितप्रज्ञः सर्वसंसारदुःखोपरमरूपं मुक्तिं प्राप्नोतीत्यर्थः। तदीदृशं व्रजनं स्थितप्रज्ञस्येति चतुर्थप्रश्नस्योत्तरं परिसमाप्तम्॥ ७१॥

उक्तमुपसंहरति - **एषेति**॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥ ७२॥

एषा स्थितप्रज्ञलक्षणव्याजेन कथिता, 'एषा तेऽभिहिता साङ्ख्ये बुद्धिः'[1] इति च प्रागुक्ता, **स्थितिः** निष्ठा सर्वकर्मन्यासपूर्वकपरमात्मज्ञानरूपा **ब्राह्मी** परब्रह्मविषया। हे **पार्थ एनां स्थितिं प्राप्य** यः कश्चिदपि पुनः **न विमुह्यति**। मोहहेतुभूतानाद्यविद्याया भगवदपरोक्षहेतुकतन्महाप्रसादेन निवर्त्यत्वात्[2] **अस्यां स्थितावन्तकालेऽपि** अन्ते च वयसि **स्थित्वा ब्रह्मनिर्वाणम्** तत्साम्यरूपं मोक्षं[3] प्राप्नोतीत्यर्थः॥ ७२॥

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः॥

॥ श्रीकृष्णः शरणं मम॥

---

[1] **भगवद्गीता** २.३९ [2] नहि ज्ञानबाधितस्याज्ञानस्य पुनः सम्भवोऽस्ति। अनादित्वेनोत्पत्त्यसम्भवात्। **इति मधुसूदनसरस्वतीये** । [3] ब्रह्मनिर्वाणं ब्रह्मणि निर्वाणं निर्वृतिं ब्रह्मरूपं निर्वाणमिति वा ऋच्छति गच्छत्यभेदेन **इति मधुसूदनसरस्वतीये**

अध्यायः 3

कर्मयोगः

जीवेशतत्त्वधीहेतुः यत् कर्मोक्तं समासतः।
तदेव विस्तरादीशो ब्रूतेऽध्याये तृतीयके॥ १॥

ज्ञानकर्माधिकारं चैकस्यैव भूमिभेदेन[1]
कामदुर्जयतां जित्यै तस्योपायांश्च माधवः॥ २॥

'न त्वेवाहम्'[2] इत्यारभ्य 'एषा तेऽभिहिता साङ्ख्ये'[3] इत्यन्तेन ज्ञानयोग उक्तः। तथा 'योगे त्विमां श्रुणु'[4] इत्यारभ्य 'कर्मण्येवाधिकारस्ते'[5] इत्यन्तेन कर्मयोगः। अनयोरधिकारिभेदः स्पष्टं नोक्तः भगवता। नचैकाधिकारिकत्वमेव समुच्चयस्य विवक्षितत्वादिति वाच्यम्। 'दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय'[6] इति कर्मनिष्ठाया बुद्धिनिष्ठापेक्षया निकृष्टत्वाभिधानात्। 'तमेवं विदित्वाऽति-मृत्युमेति' इति श्रुत्या ज्ञानस्यैव मोक्षहेतुत्वोक्तेः। ननु विरुद्धयोः समुच्चया-सम्भवाद्भिन्नाधिकारित्वमेवास्त्विति चेत्, सत्यमेकमर्जुनं प्रति तूभयोपदेशो न युक्तः। नहि कर्माधिकारिणं प्रति ज्ञानिनिष्ठोपदेष्टुं योग्या। न वा ज्ञानाधि-कारिणं प्रति कर्मनिष्ठा। नचैकं प्रत्येव विकल्पेनोभयोक्तिः। उत्कृष्टनिकृष्टयोः

---

[1] भूमिभेदतः - पा.। [2] **भगवद्गीता** २.१२ [3] **भगवद्गीता** २.३९ [4] **भगवद्गीता** २.३९ [5] **भगवद्गीता** २.४७ [6] २.४९

विकल्पासम्भवादिति समुच्चयस्याधिकारिभेदव्यवस्थितिरेकं प्रति विकल्पस्य चासम्भवादित्यतिव्याकुलबुद्धिरर्जुनः पृच्छति - **ज्यायसीति॥**

अर्जुन उवाच
ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन।
तत् किं कर्मणि घोरे मां नियोजयसि केशव॥ १॥

हे **जनार्दन** सर्वैर्जनैरर्द्यते याच्यते स्वाभिलषितसिद्धय इत्येवम्भूतस्त्वं मयाऽपि श्रेयोनिश्चयार्थं याच्यसे इति सम्बोधनाभिप्रायः। यदि **कर्मणो बुद्धिः ते** तव **ज्यायसी मता** , **तत्** तदा **कर्मणि घोरे** हिंसाद्यनेकायासबहुले **माम्** अतिभक्तं **किं नियोजयसि** 'कर्मण्येवाधिकारस्ते'[1] इत्यादिना प्रेरयसि? हे **केशव** सर्वेश्वर परमकृपालो 'तव शिष्योऽहं शाधि माम्'[2] इत्यादिना त्वदेकचरणशरणं मां प्रति प्रतारणा नोचितेति भावः॥ १॥

परमाप्तसर्वभूतसुहृदाप्तकामः शरणागतवत्सलोऽहं न कर्मणि प्रतारयामि। त्वया किं प्रतारणाचिह्नं मयि दृष्टम्? अत आह -

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥ २॥

तव वचनं व्यामिश्रं न भवत्येव। मम त्वेकाधिकारकत्वभिन्नाधिकारिकत्वसन्देहाद्व्यामिश्रं सङ्कीर्णार्थमिव ते यद्वाक्यं मां प्रति ज्ञानकर्मनिष्ठाद्वयप्रतिपादकं तेन वाक्येन **मे** ममाल्पबुद्धेर्वाक्यतात्पर्यापरिज्ञानात् **बुद्धिं मोहयसीव**। परमकारुणिकस्त्वं न मोहयस्येव। मम तु स्वाश्रयदोषान्मोहो भवतीति इवशब्दार्थः। मां प्रति विरुद्धयोर्निष्ठयोरुपदेशायोगात् **एकं** ज्ञानं कर्म वा, **निश्चित्य वद**। **येन** अधिकारनिश्चयपुरःसरमुक्तेन मयाऽनुष्ठितेन ज्ञानेन कर्मणा वैकेन **श्रेयः** मोक्षम् **अहमाप्नुयाम्**। एवं निष्ठाद्वयस्यैकाधिकारिकत्वे विकल्पासम्भवादधिकारिभेदज्ञानायार्जुनस्य प्रश्न इति स्थितम्॥ २॥

अधिकारिभेदं वदन्नुत्तरयति - **लोक इति॥**

[1] भगवद्गीता २.४७ [2] भगवद्गीता २.७

श्रीभगवानुवाच
लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥ ३॥

अस्मिन् अधिकारित्वाभिमते **लोके** विषयैराकुलचित्तानाकुलचित्तभेदेन द्विविधे जने **द्विविधा** द्विप्रकारा **निष्ठा** स्थितिः, ज्ञानपरता कर्मपरता च पूर्वाध्यायेऽत्यान्तेन मयोक्ता साध्यसाधनावस्थाभेदेन द्विप्रकारा, नतु द्वे स्वतन्त्रे निष्ठे इति बोधयितुं **निष्ठा** इत्येकवचनम्। सङ्ख्या आत्मविषयकस्थिरा बुद्धिः, तां प्राप्नुवतां **साङ्ख्यानां** ज्ञानमापरोक्ष्यं युज्यते ब्रह्मणाऽनेन स ज्ञानयोगः, ब्रह्मापरोक्षोत्पादकध्यानमिति यावत्, तेन निष्ठोक्ता 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः'[1] इत्यादिना। **योगिनां** कर्माधिकारयोगिनां **कर्मयोगेन** कर्मैव युज्यतेऽन्तःकरणशुद्ध्याऽनेन कर्मयोगः तेन निष्ठोक्ता 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते'[2] इत्यादिना। अतः चित्तस्थैर्यावस्थाभेदेनैकं प्रत्युभयोपयोगान्नाधिकारिभेदेऽप्युपदेशवैय्यर्थ्यमिति भावः। त्वं त्वात्मविदामग्रेसरोऽपि गृहस्थाश्रमित्वात् स्वरूपेणैव कर्म त्यक्तुं नार्हसि। किन्तु जनकादीनामिव लोकसङ्ग्रहार्थं स्वोचितं कर्म कर्तुमेवार्हसीति **अनघ** इति सम्बोधनेन सूचितम्॥ ३॥

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति॥ ४॥

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन'[3] इति श्रुत्या **कर्मणाम्** आत्मज्ञाने विनियुक्तानाम् **अनारम्भात्** अननुष्ठानात् चित्तशुद्ध्यभावेन ज्ञानायोग्यो बहिर्मुखो **नैष्कर्म्यं** ज्ञाननिष्ठो **नाश्नुते** न प्राप्नोति। ननु 'तमेवैकं[4] जानथ आत्मानमन्या वाचो विमुञ्चथ'[5] इति श्रुत्या व्यापारान्तरनिवारणात् कर्मत्यागादेव सिद्धिः स्यात्। अत आह - **नच सन्न्यसनादेव** चित्तशुद्धिं विना कृतात् **सिद्धिं** फलपर्यवसायिनीं ज्ञाननिष्ठः **समधिगच्छति** प्राप्नोति॥ ४॥

कर्मणो दुस्त्यजत्वमाह - **नहीति**॥

[1] **भगवद्गीता** २.६१ [2] **भगवद्गीता** २.३१ [3] **बृहदारण्यकोपनिषत्** ६.४.२२ [4] तमेव इति कोशे
[5] **मुण्डकोपनिषत्** २.२.५

नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ ५॥

हि यस्मात् **क्षणमपि** कालं **जातु** कदाचित् **कश्चित्** अजितेन्द्रियः **अकर्मकृत्** सन् **न तिष्ठति**। कुतः? **हि** यतः **सर्वः** अप्यशुद्धचित्तजीवसमूहः **अवशः** अस्वतन्त्र एव सन् **प्रकृतिजैः** सत्वरजस्तमोभिः स्वप्रभवैर्वा रागद्वेषादिभिः **गुणैः कर्म** लौकिकं वैदिकं वा **कार्यते** ॥ ५॥

विनाऽधिकारं कर्मत्यागी मिथ्याचारो भवतीत्याह - **कर्मेन्द्रियेति॥**

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥ ६॥

यो विमूढात्मा रागद्वेषादिना दूषितचित्तः बहिरिन्द्रियाणि वाक्पाण्यादीनि **संयम्य मनसा** रागादिप्रेरितेन **इन्द्रियार्थान्** शब्दादीन् **स्मरन्नास्ते**, नतु मत्पादार-विन्दं स्मरन्। कृतसन्न्यासोऽहमित्यभिमानेन मदाराधानरूपकर्मशून्यस्तिष्ठति, **स मिथ्याचारः** पापाचार एव। स तु संसारावर्ते पततीति भावः॥ ६॥

निष्कामं कर्म कुर्वाणं प्रशंसति - **य इति॥**

यस्त्विन्द्रियाणि मनसा नियम्याऽरभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते॥ ७॥

यः ज्ञानेन्द्रियाणि = श्रोत्रादीनि **मनसा** सह विवेकयुक्तेन मनसा **नियम्य** शब्दादिविषयेभ्यो निवर्त्य **कर्मेन्द्रियैः** वागादिभिः **कर्मयोगं** मदाराधनरूपं नि-ष्कामतया कर्मयोगम् **आरभते** करोति **असक्तः** सन् फलेच्छाशून्यः, मुमुक्षूणां **स विशिष्यते**। इन्द्रियव्यापारे तुल्येऽप्ययं महाफलभाग्भवति, इतरः सकामस्तु तुच्छफलभागिति विशेष इत्यर्थः॥ ७॥

अतस्त्वमपि कर्मैव कुर्वित्याह -

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः॥ ८॥

हि यतः **अकर्मणः** कर्माकरणात्[1] मुमुक्षोः **कर्म** कर्मानुष्ठानं **ज्यायः** सुकरत्वा-दप्रमादत्वाच्च। अतो ज्ञातात्मतत्त्वोऽपि **त्वं** गृहस्थाश्रमित्वात् शिष्टाग्रेसरत्वाच्च **नियतं** स्ववर्णाश्रमोचितं **कर्म** यावद्ब्राह्मानुसन्धानं **कुरु। अकर्मणस्ते** तव **शरीरयात्रा** शरीरनिर्वाहः प्रकर्षेण क्षात्रवृत्त्या **न** सिद्ध्येत्। अन्या वृत्तिस्तु शिष्टाग्रेसरस्य तवानुचितेति भावः॥ ८॥

ननु 'कर्मणा बध्यते जन्तुः'[2] इति स्मृतेर्न मुमुक्षूणां कर्म कार्यमिति। तत्राह - **यज्ञार्थादिति॥**

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥ ९॥

यज्ञः = परमेश्वरः। 'यज्ञो वै विष्णुः' इति श्रुतेः। तदाराधनार्थं क्रियमाणं कर्म यज्ञार्थम्, तस्मात्। **कर्मणोऽन्यत्र** कर्मणि प्रवृत्तो जन्तुः कर्माधिकारी ब-ध्यते। नत्वीश्वराराधनार्थे। ततः **तदर्थं कर्म** हे **कौन्तेय** त्वमपि 'परमेश्वर एवा-न्तःस्थः कर्म कारयति, नाहं कर्मकर्ता न मदीयमिदं कर्म, अनेन स एव प्रीयताम्' इति कर्मतत्फलयोः 'मदीयेनानेन कर्मणा ममेदं फलं भवति' इ-त्यभिमानाभिलाषादिरूपयोः मुक्तः सङ्गः येन स तादृशः सन् स्वोचितं **कर्म समाचर** ॥ ९॥

स्वोचितकर्मकर्तव्यत्वे प्रजापतिवचनं प्रमाणयति - **सहेति॥**

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥ १०॥

[1] तानतिकृतो इत्यधिकं कोशे। [2] सन्न्यासोपनिषत् २.२१

यज्ञेन वर्तमानाः **सहयज्ञाः** 'वोपसर्जनस्य' इति पक्षे सहादेशाभावः[1] **प्रजाः** चतुर्वर्णान् **पुरा** कल्पादौ **सृष्ट्वोवाच** प्रजानां पतिः। किमुवाच? तत्राह - **अनेन** यज्ञेन स्ववर्णाश्रमोचितधर्मेण **प्रसविष्यध्वम्**। तदेवाह - **एषः** स्वधर्माख्यो यज्ञः **वः** युष्माकम् **इष्टकामधुक्** इष्टानभिलषितान् दोग्धि प्रापयतीति तथा॥ १०॥

तदेवाह - **देवानिति॥**

देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥ ११॥

अनेन यूयं यजमानाः **देवान्** इन्द्रादीन् भावयन्तः तर्पयन्तः। **ते देवाः** युष्माभिर्भाविताः सन्तो युष्मान् **भावयन्तु** वृष्ट्यादिनोत्पत्तिद्वारेण वर्धयन्तु। एवमन्योन्यं संवर्धयन्तो देवा यूयं च **परस्परं श्रेयः** अभिमतमर्थं देवास्तृप्तिं यूयं च स्वर्गादिकं प्राप्स्यथेत्यर्थः॥ ११॥

तदेवाह - **इष्टानिति॥**

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥ १२॥

इष्टान् भोगान् पश्वन्नहिरण्यादीन् **वो** युष्मभ्यं **देवा दास्यन्ते, हि** यतो यज्ञैर्भाविताः = तोषितास्ते यतस्तैर्ऋणवद्भवद्भ्यो दत्ता भोगाः, तस्मात् तेभ्यो देवेभ्यो प्रदाय यज्ञादौ देवोद्देशेनाहुत्यादिकमदत्वा **यो भुङ्क्ते** देहेन्द्रियाण्येव तर्पयति **स्तेन एव सः** देवस्वापहारी देवर्णानपाकरणात्॥ १२॥

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥ १३॥

[1] सादेशाभावः। **इति मधुसूदनसरस्वतीये** ।

श्रीविष्णुनैवेद्यशेषेण यज्ञे वैश्वदेवादौ च विष्णूद्देशेन तद्धक्रीडन्(?) देवपित्रादीन् विप्रादींश्चेष्ट्वा तदुच्छिष्टाशिनः संसारबीजैः **सर्वकिल्बिषैः** पञ्चसूनादिपापैश्च **मुच्यन्ते**।

'कण्डणी पेषणी चुल्ली उदकुम्भी च मार्जनी।
पञ्चसूना गृहस्थस्य तेभ्यः स्वर्गं न विन्दति॥' इति स्मृतेः।[1]

ये तु आत्मनो भोजनार्थमेव **पचन्ति**, नतु विष्णुवैष्णवपूजार्थं[2] **ते पापाः** दुराचाराः **अघं** तन्निमित्तमेव भुञ्जते॥ १३॥

पुनरपि कर्मकर्तव्यतामाह - **अन्नादिति त्रिभिः॥**

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ १४॥

अन्नात् रेतोद्वारा **भूतानि** उत्पद्यन्ते। अन्नं च **पर्जन्यात्** भवति वृष्टिद्वारा। **यज्ञात्** परित्यक्तहविरादेः **पर्जन्यः**।

'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति।
आदित्याज्ञायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥' इति स्मृतेः।[3]

सः **यज्ञः** देवतोद्देशेन द्रव्यत्यागादिरूप ऋत्विग्यजमानादिकर्मणा जायते[4]॥ १४॥

---

[1] मात्स्ये (५२.१३-१६)- देवतानां पितृणां च मनुष्याणां च सर्वदा। कुर्यादहरहर्यज्ञैर्भूतर्षिगणतर्पणम्॥ स्वाध्यायैरर्चयेच्चर्षीन् होमैर्विद्वान् यथाविधि। पितृञ्छ्राद्धैरन्नदानैर्भूतानि बलिकर्मभिः॥ पञ्चैते विहिता यज्ञाः पञ्चसूनापनुत्तये। कण्डनी पेषणी चुल्ली जलकुम्भी प्रमार्जनी॥ पञ्च सूना गृहस्थस्य तेन स्वर्गं न गच्छति। तत्पापनाशनायामी पञ्च यज्ञाः प्रकीर्तिताः॥ [2] नतु वैश्वदेवाद्यर्थम्। **इति मधुसूदनसरस्वतीये** [3] **मनुस्मृतिः** ३.७६ [4] स च यज्ञो धर्माख्यः सूक्ष्मः कर्मसमुद्भवः ऋत्विग्यजमानव्यापारसाध्यः। **इति मधुसूदनसरस्वतीये**

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥ १५॥

कर्म च परब्रह्मोद्भवम्। 'एष ह्येव साधु कर्म कारयति एष ह्येवासाधु कर्म कारयति' इत्यादिश्रुतेः। कीदृशं ब्रह्म? **अक्षरसमुद्भवं** वेदाभिव्यङ्ग्यम्, वेदैकप्रमाणकम्। 'शास्त्रयोनित्वात्'[1] इति सूत्रात्। 'यश्छन्दसामृषभो विश्वरूपः छन्दोभ्योऽध्यमृतात् सम्बभूव' इत्यादिश्रुतेश्च। शास्त्रं योनिः = अभिव्यक्तिकारणं यस्य तदित्यर्थः। यस्मादेवं परम्परया यज्ञपर्जन्यान्नभूतवेदद्वारा यज्ञाभिव्यङ्ग्यं ब्रह्म, **तस्मात् सर्वगतम्** अपि **ब्रह्म नित्यं यज्ञे** विशेषतो भोक्तृत्वादिरूपेण सन्निहितम्[2]॥ १५॥[3]

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति॥ १६॥

आदौ परमेश्वरप्रेरितभूतैः कर्म हस्तादिव्यापाररूपम्, ततो यज्ञः, ततः पर्जन्यः, ततोऽन्नम्, ततो भूतानीति **एवम्** ईश्वरेण **प्रवर्तितं चक्रं यो नानुवर्तयति** नानुतिष्ठति, **सोऽघायुः** पापजीवनः **मोघं** व्यर्थमेव **जीवति**। तज्जीवनान्मरणमेव वरमित्यर्थः। ब्रह्मविदं व्यावर्तयति - **इन्द्रियाराम इति**॥ यतः इन्द्रियैर्विषयेष्वारामो यस्य सः।

असम्प्रज्ञातसमाधिनिष्ठो बाह्यानुसन्धानशून्यः स एवम्भूतं चक्रमननुतिष्ठन्नपि न प्रत्यवैतीत्याह - **य इति**॥

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते॥ १७॥

[1] **ब्रह्मसूत्रम्** १.१.३ [2] यस्मादेवं परम्परया यज्ञाभिव्यङ्ग्यं ब्रह्म, **तस्मात्** तन्नित्यं यज्ञे प्रतिष्ठितम्।**इति मध्वभाष्यम्** [3] तस्मात् साक्षात् परमात्मसमुद्भवतया सर्वगतं सर्वप्रकाशकं नित्यमविनाशि च ब्रह्म वेदाख्यं यज्ञे धर्माख्येऽतीन्द्रिये प्रतिष्ठितं तात्पर्येण। **इति मधुसूदनसरस्वतीये**

रतिः = दर्शनादिहेतुसुखम्। तृप्तिः = अलन्धीः। तृप्तिजनकं सुखं सन्तोषः। आत्मनः सकाशाद्रतिर्यस्य सः, आत्मदर्शनसुखवानित्यर्थः। एवशब्देनान्यस्मात् धनवनितातो रतिर्निरस्यते। **आत्मतृप्तः** आत्मना = परमात्मना भक्त्यादिना प्रसादितेन तृप्तः। कुतोऽस्य तृप्तिरलम्बुद्धिः? तत्राह - **आत्मन्येव च सन्तुष्टः** नान्यदेतस्य सन्तोषहेतुरित्यर्थः। भगवदपरोक्षज्ञानिन एवासम्प्रज्ञातसमाधिर्भवतीति ज्ञापयितुं **मानवः** इत्युक्तम्। 'मनु अवबोधने' इति धातोर्भावे उन्प्रत्ययः। ततो मत्वर्थीयोऽर्शआदित्वादच्। ततः प्रज्ञादित्वात् स्वार्थेऽण्। तथैवासम्प्रज्ञातसमाधिस्थस्य **कार्यं न विद्यते**।

भक्त्यादिनेश्वरप्रसादः, ततः परमाच्छादिकाया जीवानन्दाच्छादिकायाश्चाविद्याया निवृत्तिः, तत आविर्भूतपूर्णानन्दस्य जीवस्य स्वरूपानन्दातिरिक्ते स्रग्वनितादिसुखोत्पन्ने वैषयिके क्षुद्रानन्दे नेच्छादिकं न वा तत्प्राप्त्यर्थं किञ्चिल्लौकिकं वैदिकं वा कर्तव्यं विद्यत इति भावः।

एतादृशस्याभ्युदयार्थं निःश्रेयसार्थं प्रत्यवायपरिहारार्थं च कर्म नापेक्ष्यत इत्याह -

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ १८॥

तस्य आत्मरतेः **कृतेन** कर्मणाऽभ्युदयरूपो निःश्रेयसरूपो वाऽर्थः प्रयोजनं नास्ति। तस्य स्वर्गाद्यभ्युदयानर्थित्वात्। निःश्रेयसस्य तु प्राप्तत्वात्।

ननु माऽस्तु यज्ञादौ प्रवृत्तिः, यज्ञादिफलेषु तस्येच्छाभावात्। प्राप्तफलत्वाच्च[1] प्रत्यवायपरिहारार्थं सन्ध्योपासनादिकं नित्यनैमित्तिकं कर्मावश्यकम्। तत्राह - **नाकृतेनेति**॥ भावे निष्ठा। **अकृतेन** नित्यनैमित्तिककर्माकरणेन **कश्चनेह** लोके गर्हितत्वरूपः प्रत्यवायरूपो वा **अर्थो न** अस्ति। कुतः? आत्मविदः सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु कोऽपि **अर्थव्यपाश्रयः** प्रयोजनं सम्बन्धो **न** अस्ति। कञ्चिद्भूतमाश्रित्य कोऽपि क्रियासाध्योऽर्थो नास्तीत्यर्थः। कृताकृते निष्प्रयोजने 'नैवं कृताकृते तपतः' इति श्रुतेः। 'तस्य ह न देवाश्च नाभूत्या

[1] प्राप्तफलभूताच्च इति कोशे॥

ईशत आत्मा ह्येषां स भवति' इति श्रुतेः। देवा अपि मोक्षप्रतिबन्धाय समर्था न भवन्ति, अत निर्विघ्नत्वायापि[1] देवाराधनरूपं कर्म नानुष्ठेयं हि यत एषां देवानामात्मा तत्पदानाकाङ्क्षितत्वादात्मवत् प्रियो भवति। अत इहामुत्रक्रियासाध्यप्रयोजनाभावान्न तस्य किञ्चित् कार्यमिति भावः।

यत्तु[2] "एतादृशो ज्ञानिभूमिका सप्तकभेदेन निरूपितो वसिष्ठेन -

'ज्ञानभूमिः शुभेच्छाख्या प्रथमा परिकीर्तिता।
विचारणा द्वितीया स्यात् तृतीया तनुमानसा॥

सत्वापत्तिश्चतुर्थी स्यात् ततोऽसंसक्तिनामिका।
पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता॥' इति।

तत्र नित्यानित्यवस्तुविवेकादिपूर्वकफलपर्यन्तस्थायिनी मोक्षेच्छा प्रथमा। ततः श्रवणमननात्मिका द्वितीया। ततो निदिध्यासनात्मिका तृतीया। एतत्त्रितयं साधनरूपं जाग्रदवस्थोच्यते। जगतो भेदेन दर्शनात्। ततो वेदान्तवाक्यान्निर्विकल्पो ब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थी सुप्तावस्थोच्यते। सर्वस्यापि मिथ्यात्वेन श्रवणात्। अन्यास्तिस्रो जीवन्मुक्तेरेवाभ्यासपरिपाकेन चिरकालावस्थायिनी सा पदार्थाभावनी गाढसुषुप्तिरित्युच्यन्ते सा पञ्चमी। यतः स्वयमनुत्थानं परमप्रयत्नेन व्युत्थानं योगिनः सा षष्ठी। यतः स्वतः परतो वाऽनुत्थानं सा सप्तमी" इति तत् तुच्छम्।

वसिष्ठनामकग्रन्थस्य पौरुषेयस्य त्वद्वाक्यतुल्यत्वेनाप्रामाणिकत्वात्। निर्विशेषवादिनस्तव जीवन्मुक्तस्यावस्थात्रयोक्तेरतितुच्छत्वात्। ब्रह्मापरोक्षस्य चतुर्थ्यामेव जातत्वात् तदधिकस्य ज्ञेयस्यासत्वात्। त्वन्मते जगदधिष्ठानतया ब्रह्मणः सदा भानात् तदधिकस्य चित्तनिरोधे सत्यप्यभानात् समाधेरपि वैयर्थ्यात्। चतुर्थ्यामेव वेदान्तजन्यस्य तदभिमतनिर्विकल्पस्य ब्रह्मज्ञानस्य ब्रह्माज्ञाननिवर्तकस्य जातत्वात् तदनिवर्तिताज्ञानस्य तदतिरिक्तेनानधिकविषयकेन निवृत्त्यसम्भवाच्च।

[1] विघ्नाभावार्थमपि। **इति मधुसूदनसरस्वतीये**

[2] मधुसूदनसरस्वत्यः गूढार्थदीपिकायामित्यर्थः।

निवृत्ताविद्यस्य गुणमयशून्यस्य जीवन्मुक्तस्य सुषुप्त्यवस्थायास्तामस्या असम्भवाच्च। चतुर्थ्यां भानात् स्वरूपभानादधिकस्य पञ्चम्यादौ भातुं योग्यस्यैक्यादेरभावेन पञ्चम्यावस्थादेर्निरूपणस्य तव काकदन्तपरीक्षातुल्यत्वाच्च। नहि वेदान्तैरवबोधितस्य स्वरूपाधिकस्य ध्यानादौ भानं सम्भवति। वेदान्तैः स्वरूपाधिकबोधने सखण्डार्थकत्वापत्तेः। 'सर्वप्रत्ययवेद्ये परे ब्रह्मणि व्यवस्थितः' इति वदता ब्रह्मणः सर्वप्रत्ययवेद्यत्वस्वीकारेण श्रवणस्य, ब्रह्मणि विशेषानङ्गीकारेण मनननिदिध्यासनयोश्च वैय्यर्थ्यात्। मनोवृत्तिरूपज्ञानमात्रस्य त्वन्मते ब्रह्मविषयकत्वाद्विषयेभ्यः प्रत्याहृत्य मनस एकाग्र्यकरणस्य निरर्थकत्वाच्च।

अतः सप्तभूमिका एवं वर्णनीयाः। प्रथमायां मोक्षेच्छा। द्वितीयायां गुरुमुखाद्वेदान्तश्रवणम्। तृतीयायां युक्तिभिश्चिन्तनं मननम्। चतुर्थ्यां सजातीयप्रत्ययप्रवाहरूपं निदिध्यासनम्। पञ्चम्यां सम्भावनाविपरीतभावनानिवृत्तिपूर्विका भगवदेकाकारपरोक्षज्ञानधारा। षष्ठ्यामविच्छिन्नप्रेमप्रवाहपूर्वभगवदापरोक्षं नेत्रावष्टब्धाङ्गुल्या इवेश्वरेच्छादिकाया अविद्याया निवृत्तिश्च। सप्तम्यामीश्वरप्रसादेन जीवाच्छादिकाया अविद्याया निवृत्तिः परमानन्दाविर्भावश्च। तत्रान्तिमावस्थाद्वये सर्वकर्मानधिकारः। अन्यासु कर्माधिकारः। तत्राप्युत्तरोत्तरं भगवन्निष्ठाधिक्ये कर्मणो ह्रासः। षष्ठ्यां भूमिकायां सम्प्रज्ञातासम्प्रज्ञातभेदेन समाधिद्वैविध्यम्॥ १८॥

तत्रासम्प्रज्ञाते सर्वकर्मानधिकारः ततो व्युत्थाने सम्यक् समाध्यर्थं सम्यग्लब्धसमाधानस्य लोकसङ्ग्रहार्थं च स्वोचितं कर्म कार्यमतस्त्वमपि व्युत्थित इति स्वोचितं कर्म कुर्वित्याह - **तस्मादिति**॥ [1]

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः॥ १९॥

असक्तः फलकामनारहितः **सततं** सर्वदा नतु कदाचिदेव **कार्यम्** अवश्यकर्तव्यत्वेन वेदबोधितं 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन

[1] यस्मान्न त्वमेवम्भूतो ज्ञानी किन्तु कर्माधिकृत एव मुमुक्षुः। **इति मधुसूदनसरस्वतीये**

तपसा नाशकेन'[1] इति ज्ञानोपदेशेन विहितं नित्यमेव यज्ञादिकं तदेव कुरु। **असक्तो हि** यस्मात् **आचरन्** ईश्वराराधनरूपं निष्कामं कुर्वन् चित्तशुद्धिज्ञानहरिप्रसादद्वारा[2] **परं** स्वरूपाविर्भावरूपं मोक्षं प्राप्नोति॥ १९॥

'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' 'दृष्ट्वैव तं मुच्यते' इति श्रुतेः ज्ञानादेव मोक्षोक्तेः कथमसक्तः कर्माचरन्नेव परमाप्नोतीत्युक्तमित्याशङ्क्य निष्कामत्वेन विहितस्य कर्मणः कर्तव्यतायां शिष्टाचारं प्रमाणमाह - **कर्मणैवेति**॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि॥ २०॥

जनकादयः क्षत्रिया विद्वांसोऽपि **कर्मणैव** सह **संसिद्धिं** श्रवणादिसाध्यां ज्ञाननिष्ठाम् **आस्थिताः** प्राप्ताः **हि** यस्मादेवं तस्मात् त्वमपि क्षत्रियो विद्वान् कर्म कर्तुमर्हसीत्यनुषङ्गः। 'ब्राह्मणाः पुत्रेषणायाश्च वित्तेषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति सन्न्यासविधायके वाक्ये ब्राह्मणत्वं हि विवक्षितम्। 'स्वाराज्यकामो राजा राजसूयेन यजेत' इत्यत्र क्षत्रियत्ववत्। 'चत्वार आश्रमा ब्राह्मणस्य त्रयो राजन्यस्य द्वौ वैश्यस्य' इति च स्मृतेरिति ब्राह्मणस्यैव सन्न्यासः, त्वं क्षत्रियोऽसीति सन्न्यासाधिकाराभावात् कर्मैव कुर्विति भावः। नचोक्तश्रुतिविरोधः। श्रुतेर्ज्ञानाभावे मोक्षाभाव इत्येतत्परत्वात्।

वर्णाश्रमधर्मप्रवर्तकत्वेनापि क्षत्रियो धर्ममर्यादापालकोऽवश्यं कर्म कुर्यादित्याह - **लोकेति**॥ लोकानां स्वेस्वे धर्मे प्रवर्तनमुन्मार्गान्निवर्तनं च लोकसङ्ग्रहार्थं पश्यन्, अपिशब्दात् जनकादिशिष्टाचारमपि पश्यन् कर्म कर्तुमर्हसीत्यन्वयः। क्षत्रियदेहप्रापकेण कर्मणाऽऽरब्धशरीरस्त्वं जीवन्मुक्तोऽपि जनकादिवत् प्रारब्धकर्मशब्देन लोकसङ्ग्रहार्थं कर्म कर्तुं योग्यो भवसीति भावः॥ २१॥

ननु मया कर्मणि क्रियमाणे लोकः कथं तत्सङ्गृह्णीयात् ? इत्यत आह - **यदिति**॥

---

[1] **बृहदारण्यकोपनिषत्** ६.४.२२ [2] सत्वशुद्धिज्ञानप्राप्तिद्वारेण **इति मधुसूदनसरस्वतीये**

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ २१॥

श्रेष्ठः राजादिः **यद्यदाचरति** शुभमशुभं वा **इतरः** तदनुगतः **जनः तत्तदेव** आचरति। ननु शास्त्रमवलोक्याशास्त्रीयं श्रेष्ठाचारं परित्यज्य, शास्त्रीयमेव कुतो नाचरति लोकः? इत्यत आह - **स यदिति॥ सः** श्रेष्ठः **यत्** लौकिकं वैदिकं वा **प्रमाणं कुरुते** प्रमाणत्वेन मन्यते, **तत्** एव **लोकः** अपि **अनुवर्तते।** तथा च प्रधानभूतेन त्वया राज्ञा लोकरक्षणार्थं कर्तव्यमेवेति भावः॥ २१॥

अहमेवात्र दृष्टान्त इत्याह - **न म इति॥**

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥ २२॥

हे **पार्थ मे** मम **कर्तव्यं नास्ति।** यतः **त्रिषु** त्रिलोकेषु प्राक् **अनवाप्तमवाप्तव्यं च किञ्चन न** अस्ति, ईश्वरत्वात्। तथाऽपि **कर्मणि वर्त एव** कर्म करोम्येवेति भावः॥ २२॥

अकरणे लोकस्य नाशमाह - **यदीति॥**

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ २३॥

अहं यद्यतन्द्रितः अनलसः सन् **जातु** कदाचित् **न वर्तेयं** कर्माणि नानुष्ठेयम्, तदा **मम** शिष्टाग्रेसरश्रीवसुदेवसूनोः **वर्त्म** मार्गं हे **पार्थ मनुष्याः** कर्माधिकारिणः सन्तः **अनुवर्तन्ते** प्रवर्तेरन् **सर्वशः** सर्वप्रकारैः॥ २३॥

ततः किम्? अत आह - **उत्सीदेयुरिति॥**

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः॥ २४॥

अहम् ईश्वरश्च **यदि कर्म न कुर्यां** तदा मदनुवर्तिनां मन्वादीनामपि कर्मलोपेन लोकस्थितिहेतोः कर्मणो **लोका उत्सीदेयुः** विनश्येयुः। तथा च वर्णसङ्करस्य **कर्ता** अहमेव **स्याम्**। तेन **चेमाः** सर्वाः **प्रजाः** अहमेव हन्याम्। तत्पालनाय कृपया प्रवृत्तोऽहमीश्वरः कथं हन्याम्? इति भावः॥ २४॥

नन्वज्ञेनेव ज्ञानिनाऽपि कर्मकरणे विद्वदविद्वत्कर्मणोः को विशेषः? तत्राह - **सक्ता इति**॥

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।
कुर्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम्॥ २५॥

सक्ताः 'मदीयमिदं कर्मानेनेदं फलं मे भवतु' इति धीमन्तः। **असक्तः** 'भगवत्कारितमिदं कर्म न मदीयमनेन स एव प्रीयताम्' इति धीमान् **लोकसङ्ग्रहम्** इच्छुः कर्म **कुर्यात्**। अतो महदन्तरं तत्कर्मणोरिति भावः॥ २५॥

ननु तत्त्वज्ञानेनापि लोकोपकारः स्यात्। अतः कथमुच्यते कर्मणैव लोकसङ्ग्रहः? तत्राह - **नेति**॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्॥ २६॥

अज्ञानाम् आत्मतत्त्वमजानतां ज्ञानाधिकृतां **कर्मसङ्गिनां** 'मदीयमिदं कर्मानेनेदं फलं मम भविष्यति' इति कर्मण्यभिनिविष्टचित्तानां या बुद्धिः 'इदं कर्माहं करिष्ये तेनेदं फलं भोक्ष्ये' इति तस्या भेदं = आत्मतत्त्वोपदेशेन विपर्यासं कर्माकर्तृत्वरूपं **न जनयेत्**। किन्तु **युक्तः** अवहितः सन् **विद्वान्** लोकसङ्ग्रहं चिकीर्षुरविद्वदधिकारिकाणि **सर्वकर्माणि समाचरन्** तेषां श्रद्धामुत्पाद्य **जोषयेत्** सम्यगज्ञातात्मतत्त्वानां विषयासक्तचित्तानां मुमुक्षूणां बुद्धिविचालने कृते कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्य चानुत्पन्नत्वेनोभयभ्रष्टत्वं स्यादिति भावः॥ २६॥

विद्वदविदुषोः कर्मानुष्ठानसाम्येऽपि कर्तृत्वाभिमानतदभावाभ्यां विशेषं दर्शयन् 'सक्ताः कर्मणि' इति श्लोकार्थं विवृणोति - **प्रकृतेरिति द्वाभ्याम्**॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥ २७॥

प्रकृतेः सत्त्वादिगुणैः तज्जनितदेहेन्द्रियादिभिरुच्चावचयोनिकर्माणि **क्रियमाणानि सर्वशः** सर्वाणि, अहङ्कारेण = देहादावहंममेत्यभिमानेन विमूढः = स्वरूपविवेकासमर्थ आत्मा = मनो यस्य सः, 'तानि कर्माण्यहमेव केवलं करोमि' इति मन्यते।

जीवस्यानाद्यविद्यया देहेन्द्रियादावहंममेत्यभिमानजनितकर्मण्यपि मदीयमिदमनेनेदं फलं भोक्ष्य इति धीः ततः सुखदुःखकर्तृत्वादिकं मनसि क्षेत्रे उत्पन्नमविद्यासहकृतस्वामित्वसम्बन्धेन सत्यमेव वर्तते, तथा चाविद्याप्रयुक्ताभिमानाभावे जीवस्यादृष्टादौ सम्बन्धाभावाददृष्टघटितसम्बन्धेन जीवे कर्तृत्वाद्यभावात् स्वतोऽकर्ता जीव इति भावः॥ २७॥

विद्वांस्तु तथा न मन्यत इत्याह - **तत्त्वविदिति॥**

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते॥ २८॥

तत्त्वं याथात्म्यं गुणकर्मविभागयोर्वेत्तीति **तत्त्ववित्** गुणाः = देहेन्द्रियान्तःकरणानि, कर्माणि = तद्व्यापाररूपाणि, गुणकर्मेति द्वन्द्वैकवद्भावः, तेभ्यो विभज्यते मम देहो मम देहेन्द्रियं मनश्चेत्यादिना भिद्यते स विभागः, ततोऽत्यन्तविलक्षण आत्मा, तयोः = आत्मानात्मनोर्याथात्म्यवित् **गुणाः** इन्द्रियाद्याः **गुणेषु** विषयादिषु **वर्तन्ते** वृद्धिह्रासादिकं च लभन्ते आत्मा बुद्ध्यादिविकारशून्यः केवलोऽकर्ता **इति मत्वा** देहात्माभिमानादिना कर्मकर्तृत्वतत्फलभोगादौ **न सज्जते** ॥ २८॥

तदेवं विद्वदविदुषोः कर्माननुष्ठानसाम्येन विद्वानविदुषो बुद्धिभेदं न कुर्यादित्युक्तमुपसंहरति - **प्रकृतेरिति॥**

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्॥ २९॥

प्रकृतेः गुणैः सत्त्वादिभिः तत्कार्यदेहेन्द्रियादिभिश्च सम्मूढाः 'अहं स्थूलोऽहं काणो मदीयमिदं कर्मानेनेदं फलं भोक्ष्ये' इत्यभिमानवन्तो **गुणकर्मसु** गुणानां देहेन्द्रियादीनां व्यापारेषु 'मदीयोऽयं व्यापारोऽनेनेदं फलं प्राप्नुयाम्' इति **सज्जन्ते**। कीदृशान् ? **अकृत्स्नविदः** कृत्स्नानामात्मानात्मानां याथात्म्यमजानन्तः **मन्दान्** अशुद्धचित्तत्वेन ज्ञानाधिकारमप्राप्तान् **तान् कृत्स्नवित्** आत्मानात्मयाथात्म्यवित् **न विचालयेत्** कर्मश्रद्धातो न प्रच्यावयेत्॥ २९॥

एवं जीवः प्रकृतिगुणसहित एव कर्ता, न केवलः। अतः प्राप्ताप्राप्तविवेकेन गुणेष्वेव कर्तृत्वमित्यनुसन्धाय मुमुक्षुणा स्वोचितं कर्म कार्यमित्युक्तम्। इदानीमन्तर्यामिणि मयि कर्तृत्वं निधाय कर्म कार्यमित्याह - **मयीति**॥

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥ ३०॥

आत्मानं परमात्मानमधिकृत्य चेतस्तदध्यात्मचेतः, तेन। भ्रान्त्या स्वतन्त्रकर्तृत्वेन प्रतीयमानानि कर्माणि भगवानेवान्तःस्थः कारयति, न केवलमहं करोमीति बुद्ध्या, 'अनेन स एव प्रीयताम्' इति च धिया **मय्येव सन्न्यस्य** समर्प्य मत्प्रसादभिन्नकामशून्यः **निराशीर्निर्ममः** 'अहं करोमि ममेदं कर्म' इति भावशून्यः। **विगतज्वरः** सन्तापहेतुत्वाच्छोक एव ज्वरशब्देनोक्तः। ऐहिकपारत्रिकनिन्दापवादहेतुकशोकशून्यो भूत्वा **युद्ध्यस्व** स्वधर्मानुष्ठानं कुरुष्व॥ ३०॥

ननु विद्वांसः कर्म कुर्वन्तीति मया कार्यमित्येतावदेव न। किन्तु, मदर्पणबुद्ध्या निष्कामविहितकर्मानुष्ठानं ज्ञानभक्तिप्रसादद्वारेण मुक्तिहेतुरिति मम मतम्। अतः कार्यं कर्मेत्याह - **य इति**॥ [1]

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः॥ ३१॥

[1] फलाभिसन्धिराहित्येन भगवदर्पणबुद्ध्या विहितकर्मानुष्ठानं सत्वशुद्धिज्ञानप्राप्तिद्वारेण मुक्तिफलमित्याह। **इति मधुसूदनसरस्वतीये**

इदं निष्कामतया विहितकर्माचरणं मम **मतं नित्यं** तत्फलस्य मोक्षस्य नित्यत्वान्नित्यमित्युक्तम्। नित्यवेदबोधितत्वेनानादिपरम्पराऽऽगतम्। **मानवाः** मनुष्याधिकारित्वात् कर्मणाम्। **श्रद्धावन्तः** आचार्योपदिष्टेऽर्थे स्वयमननुभूतेऽप्येवमेवैतदिति विश्वासः श्रद्धा तद्वन्तः। **अनसूयन्तः** गुणेषु दोषाविष्कारोऽसूया। सा 'दुःखात्मके कर्मणि मां प्रवर्तयन्नकारुणिकोऽयम्' इत्येवंरूपा प्रकृते प्रसक्ता। तां हित्वा मयि गुरौ सुहृद्यं कुर्वन्तो **येऽनुतिष्ठन्ति तेऽपि** मद्भक्तिज्ञानप्रसादद्वारा **कर्मभिः** कर्मरूपानाद्यविद्यया **मुच्यन्ते** [1]॥ ३१॥

व्यतिरेके दोषमाह - **य इति॥**

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः॥ ३२॥

ये नास्तिकाः, अश्रद्धधानाः, **अभ्यसूयन्तः** दोषमुद्भावयन्तः **एतत्** मम **मतम् नानुतिष्ठन्ति, तान् अचेतसः** दुष्टचित्तान्, अत एव ज्ञानविमूढान् सर्वथाऽयोग्यान् **नष्टान्** सर्वपुरुषार्थभ्रष्टान् **विद्धि** ॥ ३२॥

ननु राज्ञ इव तव शासनातिक्रमे भयं पश्यन्तः कथमसूयन्तस्तव मतं नानुवर्तन्ते? कथं वा सर्वपुरुषार्थसाधने प्रतिकूला भवन्ति? इत्यत आह - **सदृशमिति॥**

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति॥ ३३॥

प्रकृतिः प्राचीनधर्माधर्मज्ञानेच्छादिसंस्कारो वर्तमानजन्मन्यभिव्यक्तोऽतिबलवान् 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च' इति श्रुतेः। **स्वस्याः** स्वीयायाः **प्रकृतेः सदृशम्** अनुरूपं सर्वो जन्तुः **ज्ञानवानपि** ब्रह्मविदपि गुणदोषविदपि[2] वा **चेष्टते।** किमुत मूर्खः ! अतो **भूतानि** सर्वप्राणिनः **प्रकृतिं यान्ति**

---

[1] तेऽपि सत्वशुद्धिज्ञानप्राप्तिद्वारेण सम्यक् ज्ञानिवन् मुच्यन्ते कर्मभिः धर्माधर्माख्यैः। **इति मधुसूदनसरस्वतीये** [2] गुणदोषविदपि इति क्वचिन्न पठ्यते।

अनुवर्तन्ते पुरुषार्थभ्रंशहेतुरूपामपि। तत्र मम राज्ञो वा **निग्रहः किं करिष्यति** महानरकसाधनत्वं ज्ञात्वाऽपि दुर्वासनाप्राबल्यात् पापेषु वर्तमाना न मच्छासनातिक्रमदोषाद्बिभ्यति इति भावः॥ ३३॥

नन्वेवं प्रकृतेर्दुर्जयाया उल्लङ्घनासम्भवेन विधिनिषेधयोः वैय्यर्थ्यापत्तेः तत्राह - **इन्द्रियस्येति**॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥ ३४॥

वीप्सया सर्वेषामिन्द्रियाणां **अर्थे** विषये शब्दे[1] स्पर्शे रूपे रसे गन्धे **रागद्वेषौ** पुरुषस्य **व्यवस्थितौ** आनुकूल्यप्रातिकूल्यव्यवस्थया स्थितौ। तत्र पुरुषप्रयत्नस्य शास्त्रस्य चायं विषयो यत् **तयोर्न वशमागच्छेत्** इति। पुरुषस्य प्रकृतिः बलवदनिष्टानुबन्धित्वज्ञानाभावसहकृतेष्टसाधनत्वज्ञाननिबन्धनं रागं पुरस्कृत्यैव शास्त्रनिषिद्धे कलञ्जभक्षणादौ प्रवर्तयति। तथा बलवदिष्टसाधनत्वज्ञानाभावसहकृतानिष्टसाधनत्वनिबन्धनं द्वेषं पुरस्कृत्य शास्त्रविहितादपि सन्ध्यावन्दनादेः निवर्तयति।

तत्र शास्त्रेण बलवदनिष्टानुबन्धित्वे ज्ञापिते सहकार्यभावात् केवलमिष्टसाधनताज्ञानं मधुविषसम्पृक्तान्नभोजनादाविव तत्र रागं जनयितुं न शक्नोति। एवं विहितस्य शास्त्रेण बलवदनिष्टानुबन्धित्वे बोधिते सहकार्यभावात् केवलमनिष्टसाधनत्वज्ञानं भोजनादाविव तत्र न द्वेषं कर्तुं शक्नोति। ततश्चाप्रतिबद्धे शास्त्रविहिते पुरुषं प्रवर्तयति निषिद्धाच्च निवर्तयतीति शास्त्रीयविवेकप्राबल्येन स्वाभाविकरागद्वेषयोः कारणोपमर्देनोपमर्दात्, न प्रकृतिः विपरीतमार्गे पुरुषं शास्त्रदृष्टिं प्रवर्तयितुं शक्नोतीति न शास्त्रपुरुषप्रयत्नयोः व्यैय्यर्थ्यम्। **तयोः** रागद्वेषयोः **वशं नागच्छेत्** तदधीनो न भवेत्। अपि तु शास्त्रविचारोत्थविवेकेन तौ नाशयेत्। **हि** यतः **तौ** रागद्वेषौ स्वाभाविकदोषप्रयुक्तौ। **अस्य** मुमुक्षोः **परिपन्थिनौ** शत्रू॥ ३४॥

ननु स्वाभाविकरागद्वेषप्रयुक्तपश्वादिसाधारणप्रवृत्तित्यागेन शास्त्रीयमेव कर्म कार्यं चेत्, तर्हि सुकरं भिक्षादिकमेव कार्यमत आह - **श्रेयानिति**॥

[1] शब्दे इति लुप्तं कोशे।

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ ३५॥

स्वस्य वर्णाश्रमौ प्रति यो विहितः स्वस्वधर्मः[1] **विगुणोऽपि** किञ्चिदङ्गहीनोऽपि **श्रेयान्** श्रेष्ठः। **परधर्मात्** स्वं प्रत्यविहितात् **स्वनुष्ठितात्** सर्वाङ्गयुक्तादपि। अतः **स्वधर्मे** किञ्चिदङ्गहीनेऽपि स्थितस्य **निधनम्** मरणमपि श्रेयः। परधर्मस्थजीवितादपि स्वधर्मस्थनिधनमिहलोके कीर्त्यावहम्, परलोके च स्वर्गादिप्रापकम्। **परधर्मः** तु इहाकीर्तिकरत्वेन परत्र नरकप्रदत्वेन **भयावहः** यतः॥ ३५॥

बहवः पापप्रवर्तका उक्ताः रागादयः। तेषु को बलवान्? यं विजेतुं महाप्रयत्नं करिष्यामीत्यभिप्रायेण पृच्छति - **अथेति॥**

अर्जुन उवाच
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥ ३६॥

अथ इत्यर्थान्तरम्। पापं कर्तुं **अनिच्छन्नपि**, **अयम्** नरः बलात्कारेण प्रेरित **इव** पापं करोति, **केन** प्रेरितः करोति? तं वदेति प्रश्नार्थः॥ ३६॥

काम एव बलवान्, तन्मूलत्वात् क्रोधादीनामित्युत्तरयति - **काम इति॥**

श्रीभगवानुवाच
काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥ ३७॥

यस्त्वया पृष्टो हेतुः बलादनर्थमार्गप्रवर्तकः स **एषः कामः** एव महान् शत्रुः। यन्निमित्ता सर्वानर्थप्राप्तिः। प्राणिनां काम एव केनचिद्धेतुना प्रतिहतः

[1] स तस्य स्वधर्मः इति स्यात्। तथा हि गूढार्थदीपिका।

क्रोधत्वेन परिणमते।[1] ततः **क्रोधः** अपि **एषः** काम एव। एतस्मिन्नेव महारौ निवारिते सर्वपुरुषार्थप्राप्तिरित्यर्थः। तन्निवारणोपायज्ञानाय तत्कारणमाह - **रजोगुणसमुद्भवः** दुःखप्रवृत्तिबलात्मको रजोगुण एव समुद्भवः कारणं यस्य। यद्यपि तमोगुणोऽपि तस्य हेतुः, तथाऽपि दुःखे प्रवृत्तौ च रजस एव प्राधान्यात् तस्यैव निर्देशः।

यद्वा, रजोगुणस्य प्रवृत्त्यात्मकस्य समुद्भव उद्बोधो यस्मात्। कामो हि विषयात्मक उद्भूतो रजः प्रवर्तयन् पुरुषं दुःखात्मके कर्मणि प्रवर्तयति। तेनायमवश्यं हन्तव्य इति भावः।

सामदानभेददण्डाः चत्वार उपायाः। तत्र प्रथमत्रिकस्यासम्भवे दण्डः प्रयोक्तव्य इति वक्तुं त्रयाणामसम्भवं बोधयति - **महाशनो महापाप्मा** इति॥ महदशनं यस्येति सः।

‘यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
नालमेकस्य तत् सर्वमिति मत्वा शमं व्रजेत्॥’ इति स्मृतेः।[2]

अतो न दानेन समाधानम्, नापि सामभेदाभ्याम्। यतो **महापाप्मा** अत्युग्रः, अत **इह** मोक्षमार्गे बलवन्तम् **एनं वैरिणं विद्धि** ॥ ३७॥

एतदेव दृष्टान्तेन स्पष्टयति -

धूमेनाव्रियते वह्निर्यथाऽदर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥ ३८॥

यथा धूमेनावृतः अग्निरन्यैः न दृश्यते, **तथेदं** हृदि स्थितं परमात्मस्वरूपं जीवस्य यथार्थस्वरूपं च **आवृतम्**। स्वपरज्ञोऽपीश्वरः कामाविष्टेन न दृश्यत

---

[1] ये त्वन्यथा वदन्ति ते सङ्करान्न सूक्ष्मं जानन्ति। **इति मध्वभाष्यम्** काम एव केनचित् प्रतिहतः क्रोधत्वेन परिणमते इति परेषां व्याख्यानं दूषयति - **ये त्विति**॥ एकान्तःकरणोपादानत्वलक्षणात् आनन्तर्यलक्षणाच्च सङ्करान्न सूक्ष्मं कामक्रोधयोरत्यन्तभेदम्। नहि गुणो गुणस्योपादानम्। किन्तु निमित्तमेव। **इति प्रमेयदीपिका** [2] मत्स्यपुराणे ३४.११, लिङ्गपुराणे १.६७.१७। ब्रह्माण्डेऽपि पठ्यते(२.६८.९८)। चतुर्थपादस्तु किञ्चिद्व्यत्यस्तः - ‘. इति पश्यन्न मुह्यति’। ब्राह्मे च(१२.४१) - ‘. इति कृत्वा न मुह्यति’।

इत्यर्थः। **यथा च** मलावृतादर्शो मुखाद्यभिव्यक्तिहेतुर्न भवति, **तथेदम्** अन्तःकरणं जीवेश्वराभिव्यक्तिहेतुर्न भवति। **यथोल्बेन** गर्भवेष्टनेन **आवृतो गर्भः** सङ्कुचितत्वात् स्वव्यापारक्षमो न भवति, **तथेदम्** जीवस्वरूपं मनस्युत्पन्नेन स्वोपार्जितादृष्टत्वादिसम्बन्धेन स्वस्मिन् विद्यमानेन कामेन **आवृतम्** स्वयाथात्म्यज्ञाने परमेश्वरापरोक्ष्ये च क्षमं न भवतीत्यर्थः[1] ॥ ३८॥

तथा तेनेदमावृतम् इत्युक्तं विवृणोति -

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥ ३९॥

ज्ञायतेऽनेनेति **ज्ञानम्** अन्तःकरणं **एतेन** कामेनावृतम्। तथाऽप्यापाततः सुखहेतुत्वादुपादेयः स्यादत आह - **ज्ञानिनः** इति। अज्ञो विषयभोगकाले कामं मित्रमिव पश्यन् तत्कार्ये प्राप्ते वैरित्वं वेत्ति 'कामेनेदं दुःखं मम प्रापितम्' इति। ज्ञानी तु भोगकालेऽपि जानाति 'अनेनाहमनर्थे प्रवेशितः' इति। अतो ज्ञानी भोगकाले तत्परिणामे च दुःखी भवतीति ज्ञानिनोऽसौ नित्यवैरी।[2] कीदृशेन? **कामरूपेण** काम इच्छा तृष्णा सैव रूपम् यस्य तेन।

नन्वविवेकिनः सुखहेतुत्वान्न तन्नाश उचितः। तत्राह **दुष्पूरेणानलेन च**। च इवार्थे। न विद्यतेऽलं पर्याप्तिर्यस्यानलोऽग्निः। स यथा हविषा पूरयितुमशक्यः, तथाऽयमपि भोगेनेत्यर्थः। अतो निरन्तरं सन्तापहेतुर्विवेकिन इवाविवेकिनोऽपि हेयश्चासौ।

'न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥' इति स्मृतेः।[3]

---

[1] यथा धूमेनाग्निरावृतः प्रकाशरूपोऽप्यन्येषां सम्यग्दर्शनाय तथा परमात्मा। यथाऽऽदर्शो मलेनावृतोऽन्याभिव्यक्तिहेतुर्न भवति तथाऽन्तःकरणं परमात्मादेर्व्यक्तिहेतुर्न भवति कामेनावृतम्। यथोल्बेनावृत्य बद्धो भवति गर्भस्तथा कामेन जीवः। **इति मध्वभाष्यम्** [2] असौ ज्ञानिनो नित्यवैरी। नतु मूर्खस्य। **इति शङ्करभाष्ये** नहि रोगिणां ममायं वैरीत्यविदितो चित्तस्य तात्कालिकेष्टापथ्यदो नावैरीत्युच्यते। - इति श्रीनरहरितीर्थाः। [3] **विष्णुपुराणम्** ४.१०.२३, ब्रह्माण्डपुराणे २.६८.९७, भागवते ९.१९.१४, ब्रह्मपुराणे १२.४०, मत्स्यपुराणे ३४.१०, लिङ्गपुराणे १.६७.१६

यद्वा, इच्छाया विषयसिद्धिनिवर्त्यत्वात्, इच्छारूपः कामो विषयभोगेन स्वयमेव निवर्तिष्यते। किं तत्रातियत्नेन? इत्यत उक्तम् - **दुष्पूरेणानलेन च** इति। विषयसिद्ध्या तत्कालमिच्छानिवृत्तावपि पुनरुत्पत्तिसम्भवात् न विषयसिद्धिरिच्छानिवर्तिका। किन्तु विषयदोषदृष्टिरेव तथेति भावः॥ ३९॥

शत्रोरधिष्ठाने ज्ञाते हि सुखेन विजेतुं शक्यः स इति तदधिष्ठानमाह - **इन्द्रियाणीति**॥

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्॥ ४०॥

इन्द्रियाणि श्रोत्रादीनि **मनः** सङ्कल्पात्मकं **बुद्धिः** अध्ययवसायात्मिका **अस्याधिष्ठानम्** आश्रयः **उच्यते। एतैः** इन्द्रियादिभिः स्वव्यापारवद्भिः स्वाश्रयैः विविधं मोहयति। **एषः** कामः **ज्ञानम्** विवेकं **आवृत्य** आच्छाद्य **देहिनम्** देहाभिमानिनम्॥ ४०॥

तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥ ४१॥

यस्मादिन्द्रियाधिष्ठानः कामो देहिनं मोहयति, **तस्मात् त्वमादौ** मोहनात् प्रागेव **इन्द्रियाणि नियम्य।** वशीकृतेषु तेषु मनोबुद्ध्योरपि वशीकरणं स्यात्। सङ्कल्पाध्यवसाययोः बाह्येन्द्रियप्रवृत्तिद्वारैव तदर्थहेतुत्वात्। **पाप्मानम्** पापमूलम् **एनम्** कामं वैरिणं **प्रजहि। हि** यतः ज्ञानं = परोक्षं विज्ञानम् = अपरोक्षम्, तयोर्नाशनम्॥ ४१॥

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ ४२॥

श्रोत्रादीनि ज्ञानेन्द्रियाणि स्थूलदेहमपेक्ष्य सूक्ष्मत्वात् **पराण्याहुः** पण्डिताः श्रुतयो वा। तथा **इन्द्रियेभ्यः परं मनः** सङ्कल्पविकल्पात्मकं तत्प्रवर्तकत्वात्

सूक्ष्मत्वाच्च। **मनसः परा बुद्धिः** अध्यवसायात्मिका। अध्यवसायो हि निश्चयः, तत्पूर्वक एव सङ्कल्पादिर्मनोधर्मः। **यो बुद्धेः परः** सूक्ष्मत्वात् प्रवर्तकत्वात् **सः** ज्ञेयः परमात्मा।[1]

'इद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः॥' इति श्रुतेः।[2]

आत्ममहत्पदाभ्यां महत्तत्त्वमुक्तम्। अव्यक्तं प्रधानम्। सूक्ष्मत्वात् सर्वप्रवर्तकत्वात् पुरुषोऽन्तर्यामी श्रीहरिरव्यक्तात् परः। अत्र परमेश्वरस्य परत्वमात्रे तात्पर्यम्। अतः 'इद्रियेभ्यः परा ह्यर्थाः' इति स्थाने 'अर्थेभ्यः पराणीन्द्रियाणि' इति विवक्षाभेदेन भगवदुक्तिर्न विरुद्ध्यते। 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति भगवज्ज्ञानस्येन्द्रियजये हेतुताया उक्तत्वात्॥ ४२॥

फलितमाह - **एवमिति॥**

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
जहि शत्रुं महाबाहो कामरूपं दुरासदम्॥ ४३॥

'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इत्यत्रोक्तो यः परः, तं परिपूर्णमनन्तगुणालयमानन्दविग्रहं सौन्दर्यलावण्यसीमानं बुद्ध्यादिपरं श्रीहरिं **बुद्ध्वा** निष्कामकर्मोत्पादितभक्त्या प्रसन्नं साक्षात्कृत्य **आत्मना** एतादृशनिश्चयात्मिकया बुद्ध्या **आत्मानम्** मनः **संस्तभ्य** स्थिरीकृत्य **शत्रुं कामरूपं जहि** मारय। हे **महाबाहो** शत्रुहनने कुशल। कीदृशम् ? **दुरासदम्** दुःखेन जेतुं शक्यम्॥ ४३॥

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां कर्मयोगवचनं तृतीयोऽध्यायः॥

[1] यस्तु बुद्धेः परस्तद्भासकत्वेनावस्थितः यं देहिनमिन्द्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारा मोहयतीत्युक्तं स बुद्धेर्द्रष्टा पर आत्मा। **इति मधुसूदनसरस्वतीये**

[2] **कठोपनिषत्** ३.१०-११

अध्यायः 4

ज्ञानयोगः

याथात्म्यं स्वावताराणां सम्प्रदायं च कर्मणाम्।
कर्मभेदान् धियः[1] श्रैष्ठ्यं तुर्येऽध्याये ब्रवीत्यजः॥

तत्रादौ 'मयि सर्वाणि'[2] इत्यत्रोक्तकर्मयोगे विश्वासाय रुचये च पूर्वैरतिशिष्टैरनुष्ठितोऽयं धर्म इत्याह - **इममिति त्रिभिः॥**

श्रीभगवानुवाच
इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥ १॥

इमम् अध्यायद्वयेनोक्तं **योगं** ज्ञाननिष्ठालक्षणं तदुपायभूतं कर्मयोगं च सर्गादिकाले **अहं** वासुदेवः सर्वपावको **विवस्वते** सूर्याय **प्रोक्तवान्। विवस्वान्** पुत्राय **मनवे** श्राद्धदेवाय। स च **मनुः** स्वपुत्राय **इक्ष्वाकवेऽब्रवीत्।** ज्ञानरूपतद्योगफलस्य[3] मोक्षस्याव्ययत्वात् तस्याप्यव्ययत्वम्। यद्यपि प्रतिमन्वन्तरं

---

[1] कर्मभेदाद् धियः -पा. [2] **भगवद्गीता** ३.३० [3] ज्ञानरूपेण योगफलस्य -पा.

स्वायम्भुवमन्वादिसाधारणोऽयं भगवदुपदेशः। तथाऽपि साम्प्रति वैवस्वतमन्वन्तराभिप्रायेणादित्यमारभ्य सम्प्रदायो गणितः॥ १॥

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप॥ २॥

एवम् आदित्यमारभ्य **परम्पराप्राप्तमिमं** योगम्। राजानश्च ते ऋषयश्च, प्रभुत्वे सति सूक्ष्मदृष्टयो निमिप्रभृतयः स्वपित्रादिप्रोक्तं **विदुः। स महता** दीर्घेण धर्मह्रासकरेण **कालेन नष्टः** विच्छिन्नसम्प्रदायो जातः॥ २॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्॥ ३॥

यः पूर्वं मयोपदिष्टः, अनन्तरं विच्छिन्नसम्प्रदायोऽभूत्, **स एवायं पुरातनो योगः मया** अतिस्नेहेन **ते** तुभ्यं **प्रोक्तः।** नत्वन्यस्मै कस्मैचित्। इतिर्हेतौ। यतस्त्वं **मे भक्तः** शरणागतत्वे सत्यत्यन्ताविच्छिन्नस्नेहधारावान् **सखा** त्वं पैतृष्वसेयः **च, असि**[1], अतस्तुभ्यमुक्तः। अन्यस्मै कुतो नोच्यते? तत्राह - **हि** यतः **एतत्** ज्ञानम् **उत्तमं रहस्यम्** अतिगोप्यम्॥ ३॥

'परं ब्रह्म परं धाम'[2] इति वक्ष्यमाणत्वेन श्रीकृष्णस्वरूपं जानन्नप्यर्जुनोऽजानन्निव पूर्णकामस्य सत्यसङ्कल्पस्य निखिलदेहशून्यस्य[3] जगदुदयस्थितिसंहृतिलीलस्य मुमुक्षुभिर्मुक्तैश्चासादितपदारविन्दमरन्दस्य परमकारुणिकस्य सदैकाकारज्ञानबलैश्वर्याद्यनन्तविभूतिसम्पन्नस्य सर्वेश्वरस्य कर्मवशादेव जन्म किमिन्द्रजालिकमिव मृषा? किं वा सत्यम्? सत्यत्वे च कथं जन्मप्रकारः? किमात्मकोऽयं देहः? कश्च जन्महेतुः? कदा च जन्म? किमर्थं वा जन्म? इति शङ्कां तत्स्वरूपमजानतां हृदि गतां निराकर्तुकामः पृच्छति - **अपरमिति॥**

---

[1] मम भक्तः शरणागतत्वे सत्यत्यन्तप्रीतिमान् सखा च समानवयाः स्निग्धसहायोऽसि।**इति मधुसूदनसरस्वतीये** [2] **भगवद्गीता** १०.१२ [3] निखिलदेहप्रशून्यस्य -पा.

अर्जुन उवाच
अपरं भवतो जन्म परं जन्म विवस्वतः।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति॥ ४॥

अल्पकालिकमिदानीमेव वसुदेवगेहे **भवतो जन्म। परं** बहुकालिकं सृष्ट्यादौ **विवस्वतो जन्म।** अतः **कथमेतद् विजानीयाम्** ? अविरुद्धार्थकतया। एतच्छब्दार्थमाह - **त्वमिति॥** इदानीन्तनः **त्वं** सृष्ट्यादौ कथं **प्रोक्तवान्।** विरुद्धमेतद्भातीति भावः॥ ४॥

स्वस्य सर्वज्ञत्वं सर्वज्ञप्रमाविषयत्वेन जन्मनां सत्यत्वं प्राच्यामिन्दोरिवाविर्भावमात्रत्वं चाह - **बहूनीति॥**

श्रीभगवानुवाच
बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप॥ ५॥

मम **जन्मानि** प्राच्यामिन्दोरिवाविर्भावलक्षणानि **बहूनि** लोकदृष्ट्या **व्यतीतानि, तव च** नूतनदेहलाभरूपाणि **तानि सर्वाणि** मदीयानि च **वेद** जानामि। नित्यसर्वज्ञत्वात्। **त्वं न वेत्थ** न जानासि। नित्यसर्वज्ञत्वाभावात्। अतो नित्यसच्चिदानन्दविग्रहस्याद्यन्तमध्यैकरसस्य सृष्ट्यादावुपदेशो न विरुद्ध इति भावः॥ ५॥

स्वावतारप्रकारं विग्रहयाथात्म्यम् अवतारहेतुं चाह - **अजोऽपीति॥**

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥ ६॥

अजोऽपि उत्पत्तिरहित एव सन् अव्यय आत्मा = देहो यस्य सः, **भूतानां** प्राणिनां चतुर्मुखादिस्तम्बपर्यन्तानाम् **ईश्वरोऽपि स्वां प्रकृतिं** सर्वनियन्तृत्वादिस्वभावम् **अधिष्ठाय** अजहदेव **आत्ममायया** स्वीयसर्वविषयकज्ञानेन सह **सम्भवामि**

आविर्भवामि। 'माया वयुनं ज्ञानम्' इति वचनात्। **मायया** कृपया वा। 'माया कृपायां दम्भे च' इति कोशात्। सदैकरससच्चिदानन्दघनविग्रहाभिन्नोऽहं स्व-स्वरूपे स्थित एव प्राच्यामिन्दुरिवाविर्भवामीत्यर्थः।

नच तद्विग्रहस्य नित्यत्वे मानाभावः[1]

'आदित्यवर्णं तमसः परस्तात्'[2]
'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं (पुरुषं ब्रह्मयोनिम्।)
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥'[3]
'पुरुषं कृष्णपिङ्गलम्'[4]
'विश्वतश्चक्षुः'[5]
'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्'[6]

इत्यादीनां मुक्तप्राप्यत्व-तमःपदवाच्यप्रकृतिपरत्वबोधकश्रुतीनां मानत्वात्।

'पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्॥' इति वक्ष्यमाणत्वाच्च।[7]

नच 'आदित्यवर्णम्' इत्यस्य स्वप्रकाशाविद्याविलक्षणस्वरूपतया, उपा-स्यरूपतया वोपपत्तिः। त्वदभिमतनिराकारस्वरूपवर्णपदाद्यसङ्गतेः। 'तमसः परस्तात्' इत्याद्युक्तस्य तमसः प्रकृतेः परत्वस्योपास्त्यसम्भवात्। 'ए-षोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते'[8] इत्यत्र वर्तमानत्वेनापरोक्षधीवि-षयत्वोक्तेः। नहि योषित्यग्नित्वं दृश्यत इत्युच्यते।[9]

नच नियम्यजीवपादादिना सर्वात्मकतया सर्वनियामकतया च ब्रह्मणः सर्वतः पाणिपादत्वाद्युक्तिः। नियम्यदुःखित्वशोकित्वादिना दुःखित्वादिव्यव-हारापत्तेः। नच सर्वतः पाणिपादत्वाद्यसम्भवः। एकैकावयवे सर्वावयवकार्यका-रणसामर्थ्यसत्वात्। नच पादाद्यभिन्नविग्रहस्य व्यापकत्वे देशविशेषावच्छेदेन

[1] केचित्तु नित्यस्य निरवयवस्य निर्विकारस्यापि परमानन्दस्यावयवावयविभावं वास्तवमेवे-च्छन्ति। ते 'निर्युक्तिकं ब्रुवाणस्तु नास्माभिर्विनिवार्यते' इति न्यायेन नापवाद्याः।**इति मधुसूद-नसरस्वतीये** । [2] **श्वेताश्वतरोपनिषत्** ३.८ [3] **मुण्डकोपनिषत्** ३.१.३ [4] **महानारायणोपनिषत्** १२.१ [5] **श्वेताश्वतरोपनिषत्** ६.३ [6] **इति ऋक्संहिता** १०.९०.१ [7] **भगवद्गीता** ११.५ [8] **मैत्रा-यण्युपनिषत्** ६.१ [9] योषितमग्निं ध्यायीतेत्यत्रेत्यर्थः।

परममुक्तगम्यत्वप्रवेष्टृत्वादेश्चोक्तिरसङ्गतेति वाच्यम्। निःशेषाविद्यानिवृत्त्यर्थं हि परस्य देहस्य[1] प्राप्तिरुच्यते। नत्वत्राप्राप्तस्य सविग्रहब्रह्मणः प्राप्त्यर्थम्। तत्राणुत्वाद्यनन्तशक्तिस्वीकारेण प्रवेष्टृत्वोपपत्तेः। अन्यत्र सर्वगते प्रतिव्यक्ति-समाप्त्यभावेऽपि गोत्वादिजातावेकैकारुणादिरूपव्यक्तिरिति मतेऽरुणादिरूपे च प्रतिव्यक्तिसमाप्तिवदन्यत्र सर्वगतेऽणुत्वक्रिययोरभावेऽपि प्रमाणबलाद्ब्रह्मण्युभ-यमस्ति। अतोऽन्तर्यामितया नियम्येषु प्रवेशः सूपपन्नः। नचाणुत्वमहत्वयोरे-कत्वविरोधः। अचिन्त्यशक्त्या विरोधपरिहारात्।

नचैवमज्ञत्वदुःखित्वादिकमपि तथा स्यात्। ऐश्वर्याविरोधिनां 'अणोर-णीयान् महतो महीयान्'[2] इत्यादिश्रुत्युक्तानां तत्र समावेशेऽपि तद्विरोधिनां दुःखित्वादीनां समावेशासम्भवात्। अनन्तब्रह्माण्डानि सखानि सलोकपालानि स्वाङ्करथादौ स्थितस्य मुखे पश्यतां श्रीयशोदार्जुनादीनां प्रत्यक्षस्यापि तत्र मानत्वात्। नहि 'दिव्यं ददामि ते चक्षुः'[3] इति वदता परमाप्तेनैन्द्रजालिक-वन्मायां प्रदर्श्य स्वैकशरणाः प्रतारणीयाः। षोडशसहस्रादिसङ्ख्याकानां विवाहे प्रतिगृहमेकस्मिन्नेव मुहूर्ते वसुदेवादीनां स्वस्य चानेकत्ववदेकस्याचिन्त्यम-हिम्नाऽनेकरूपत्वोपपत्तेः।

नच 'पश्यत्यचक्षुः स श्रुणोत्यकर्णः'[4] इति विरोधः। चक्षुरादिभिन्नावयव-स्यापि चक्षुरादिकार्यकरत्वोक्तेः।

'एतन्मयोक्तं नरदेवतत्त्वं नारायणो विश्वमिदं पुराणः।
स सर्गकाले च करोति सर्गं संहारकाले च संहर्ति भूयः॥' [5]
'संहृत्य सर्वं निजदेहसंस्थं कृत्वाऽप्सु शेते जगदन्तरात्मा॥'
इति प्रलयेऽपि विग्रहवत्त्वसत्वोक्तेश्च।

'वेदे भूरि प्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने॥
यस्मिन् प्रयोज्यमाने तु गुणयोगः सुपुष्कलः।

[1] प्रकृतेः परस्य देशस्य -पा. [2] **महानारायणोपनिषत्** १२.१ [3] **भगवद्गीता** ११.८ [4] **श्वेताश्व-तरोपनिषत्** ४.१९, **लिङ्गपुराणम्** १.८८.४१ [5] **महाभारतम्** १२.२९०.११०

तत्रैव मुख्यवृत्तोऽयमन्यत्र तूपचारतः[1]॥'[2]

इति गारुडे विग्रहस्यैव मुख्यब्रह्मशब्दार्थत्वमुक्तम्।

'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे।'[3]
'तमेव विद्वानमृत इह भवति नान्यः पन्था विद्यते अयनाय॥'[4]

इत्यादिना विग्रहस्य महत्वं मुमुक्षुज्ञेयत्वं ..[5] लोकमयः प्रकृतः। 'सहस्रशीर्षा'[6] इत्यादिना विग्रहसंस्थानमुपदिश्य, 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि'[7] इति सर्वभूतजातस्य तदेकदेशस्थत्वं तस्य नित्यत्वादिकं चोपदिश्य, अनन्तरं 'तस्माद्विराडजायत' इति त्रैलोक्यशरीरस्य विराजस्तत उत्पत्त्युक्तेः। नच 'अपाणिपादः'[8] इत्यादिश्रुतिविरोधः। प्राकृतपाणिपादादेरेव निषेधात्। अन्यथा 'असुखम्' इत्यादिना सुखरूपत्वस्यापि निषेधापत्तेः। 'नाभ्या आसीदन्तरिक्षम्'[9] इत्यादिना विग्रहस्य भूतकारणत्वोक्तेः। नच नाभित्वादिकल्पनया विराड्रूपमेवोक्तम्। 'तमसः परस्तात्'[10] इति प्रकृतेः परत्वोक्तेः। विराजः प्रकृतिकार्यत्वात्। 'एको नारायण आसीन्न ब्रह्मा नच शङ्करः' इति प्रलये[11] विग्रहसत्वोक्तेः।

नच नारायणपदं मायोपहितपरम्। 'न ब्रह्मा' इत्यादेः निषेधासङ्गतेः। मायोपहितस्य शङ्करादिसाधारणत्वात्। नारायणपदस्य विग्रहविशेषविशिष्टे योगरूढत्वाच्च। 'पुरा कल्पापाये स्वकृतमुदरीकृत्य ..शेषे' इति श्रुतौ प्रलयेऽपि विग्रहसत्वोक्तेः।

'सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः।
परमानन्दसन्दोहाः ज्ञानमात्राश्च सर्वशः॥'

इति श्रुत्या नित्यत्वाद्युक्तेश्च।

---

[1] .ण्यत्रोपचारतः -पा. [2] गारुडवचनत्वेन विजयीन्द्रतीर्थश्रीपादैरप्युदाहृतं तत्रतत्र। [3] 'तमसः परस्तात्' इति तु **कूर्मपुराणम्** २.९.१३ [4] **इति तैत्तिरीयारण्यकम्** ३.१.३, **इति नृसिंहपूर्वतापनीयोपनिषत्** १.६ [5] सप्ताष्टान्यक्षराणि त्रुटितानि। [6] **इति ऋक्संहिता** १०.९०.१ [7] **इति ऋक्संहिता** १०.९०.३ [8] **श्वेताश्वतरोपनिषत्** ४.१९ [9] **इति ऋक्संहिता** १०.९०.१४ [10] **श्वेताश्वतरोपनिषत्** ३.३.८ [11] प्रलयेऽपि -पा.

'आनन्दरूपममृतं यद्विभाति आप्रणखात् सर्वं स एवानन्दः'[1] इत्यादिश्रुतेश्च। स्वरूपविग्रहयोर्भेदाभावेऽपि, अहिकुण्डलन्यायेन[2] भेदप्रतिनिधिनाऽचिन्त्येश्वरशक्तिविशेषेण भेदव्यवहारोपपत्तेः। 'विचित्रशक्तिः पुरुषः पुराणः' इति श्रुतेः। 'आत्मनि चैवं विचित्राश्च हि'[3] इति सूत्राच्च।

नच श्रुत्युक्तिमात्रेण विग्रहसिद्धौ 'ब्रह्मैवेदं सर्वम्'[4] इत्यादिना प्रपञ्चस्य ब्रह्मरूपताऽपि स्यादिति वाच्यम्। प्रपञ्चस्य ब्रह्मरूपत्वे प्रत्यक्षादिविरोधवत् प्रकृते विरोधाभावात्। न 'पश्यत्यचक्षुः' इत्याद्युक्तदर्शनं प्रति कर्तृत्वानुपपत्तिरीशस्य जन्यज्ञानाङ्गीकारादिति वाच्यम्। नित्यं प्रत्यपि क्षेमसाधारणकर्तृतायाः सम्भवात्।

यत्तु 'भगवद्विग्रहो न नित्यः, महत्त्वे सति रूपवत्त्वात्, विग्रहत्वात्, सावयवत्वात्, अस्मदादिविग्रहादिवत्' इति गौडाधमप्रलपितम्, तन्न। प्राकृतत्वस्योपाधित्वात्। नचोपाधिः साधनव्यापकः। भगवद्विग्रहे प्रकृतिकार्यत्वरूपप्राकृतत्वस्य श्रुत्यादिबाधितत्वात्। ईश्वरस्यादृष्टभोगाद्यभावेन जन्यविग्रहवत्त्वे मानाभावात्। अप्रामाणिकध्वंसप्रागभावकल्पनागौरवाच्च।

'दध्यौ ब्रह्म परं विप्र प्रविश्य यमुनाजलम्।
फणा सहस्रमालाढ्यं बलभद्रं ददर्श सः॥'[5]

'तस्योत्सङ्गे घनश्याममाताम्रायतलोचनम्।
चतुर्बाहुमुदाराङ्गं चक्राद्यायुधभूषितम्॥'[6]

इति परब्रह्मणः समाधिविषयं रूपमुक्त्वा, 'बलकृष्णौ तथाऽक्रूरः प्रत्यभिज्ञाय विस्मितः'[7] इति मूलविग्रहावतारविग्रहयोरभेद उक्तो वैष्णवे। भारते च -

'हरिं सहस्रशिरसं सहस्रचरणेक्षणम्।
प्राहुर्नारायणं देवं यं विश्वस्य परायणम्॥'[8]

---

1 **मुण्डकोपनिषत्** २.२.७ 2 'उभयव्यपदेशात्तु अहिकुण्डलवत्' इति हि ब्रह्मसूत्रम्(३.२.२८)।
3 **ब्रह्मसूत्रम्** २.१.२८ 4 **इति नृसिंहपूर्वतापनीयोपनिषत्** ७.५ 5 **विष्णुपुराणम्** ५.१८.३५
6 **विष्णुपुराणम्** ५.१८.३९ 7 **विष्णुपुराणम्** ५.१८.४३ 8 **महाभारतम्** १२.४७.१४

'यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च।
गृणन्ति विश्वकर्माणं सत्यं सत्येषु सामसु॥'[1]

'यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिः॥'[2]

'महतस्तमसः पारं पुरुषं शाश्वतं हरिम्।
यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः॥' [3]

इति विग्रहविशिष्टज्ञानात् मोक्षः।

'यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः।
सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः॥'[4]

इति लोकमयं प्राकृतविग्रहमुक्त्वा,

'तच्च पश्यामि तत्त्वेन यत् ते रूपं सनातनम्।
द्यौस्त्वया शिरसा व्याप्ता पद्भ्याम् देवी वसुन्धरा॥
विक्रमेण त्रयो लोकाः पुरुषोऽसि सनातनः॥

अतसीपुष्पसङ्काशं पीतवाससमच्युतम्।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम्॥'[5]

इति श्रीवैष्णवे[6] अप्राकृतो विग्रह उक्तः।

'यत्त्वेतया(?) न विज्ञेयं रूपवानिति दृश्यते।
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद॥'

इति नारायणीयं वाक्यम्, तस्य 'अयं रूपवान्' इति हेतोः 'मया चक्षुषा न दृश्यते' इति त्वया न विज्ञेयम्। नहीन्द्रियप्रकाशकः तद्गोचरो भवति। किन्तु मयैषा माया कृपा सृष्टा प्रकटीकृता यत् यया मां पश्यसीत्यर्थः। 'माया कृपायां दम्भे च' इति कोशात्। 'यमेवैष वृणुते तेन लभ्यः'[7] इति श्रुतेः।

'धन्योऽस्म्यनुगृहीतोऽस्मि यत् ते दृष्टः स्वयं वपुः।

---

[1] **महाभारतम्** १२.४७.१६ [2] **महाभारतम्** १२.४७.१८ [3] **महाभारतम्** १२.४७.२५ [4] **महाभारतम्** १२.४७.४४ [5] **महाभारतम्** १२.४७.५८-६० [6] वैष्णवे -पा.। विष्णुपुराणवचनमत्र लुप्तमिति भाति। भारतस्यैव उपरिचरपरत्वात् विष्णुभक्तपरत्वाद्वा वैष्णवत्वकल्पनं तु क्लिष्टम्।
[7] **मुण्डकोपनिषत्** १.२.३

नहि तं दृष्टवान् कश्चित् पद्मयोनिरपि स्वयम्॥

नारदैतद्धि नासत्यं वचनं समुदाहृतम्।
नास्य भक्तात् प्रियतरो लोके कश्चन विद्यते॥'

इति तत्रैव श्रीविग्रहदर्शनस्य दुर्लभत्वोक्तेः।

यत् तु भगवद्विग्रहे क्षतरुधिरादिकं विग्रहत्यागादिकं क्वचित् पुराणादौ प्रतीयते, तत् त्वसुराणां मोहाय भगवता माया प्रदर्श्यते। किञ्चिच्छरीरं सृष्ट्वा त्यजत्येव। यत् तु बाल्यकौमाराद्यवस्थाप्रदर्शनम्, तत् तु स्वीयानां स्वस्मिन्ननुरागोत्पादनाय कृपाख्या माया। नहि लोके यादृशोऽनुरागः पुत्रादौ स्वाभाविको भवति, तादृशः स्वनियामके राज्ञि भवति।

निखिलनिगमगीते श्रीहरौ विश्वयोनौ
सदमितगुणसिन्धौ हेयशून्ये सुदेहे।
प्रलपति यदकाण्डे दूषणाभासमुच्चैः
सुगतशिशुरुपेक्ष्यो दैत्यपाशः स शिष्टैः॥ *॥

प्रथममवदुच्चैर्दूषणाभाससङ्घान्
वपुषि मुररिपोः पश्चान्न जानामि[1] कृष्णात्।
परमिति मुरलीयुक्ताधरात् पीतवस्त्रात्
स[2] सुररिपुरुपेक्ष्यो वञ्चकः सर्वशिष्टैः॥ *॥ ६॥

अवतारकालमाह - **यदेति॥**

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥ ७॥

---

[1] जानाति - पा. [2] तथाहि मधुसूदनसरस्वत्य अन्यत्र-
'वंशीविभूषितकरान्नवनीरदाभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृष्णात् परं किमपि तत्त्वमहं न जाने॥' इति।

यदा यदा धर्मस्य मदाराधानरूपस्य वर्णादिपुरस्कारेण वेदविहितस्य **ग्लानिः** हानिः, **अधर्मस्य** वेदनिषिद्धस्य **उत्थानम्** उद्भवः, **तदा आत्मानम्** स्वरूपाभिन्नदेहं **सृजामि** आविर्भावयामि। यद्यपि वेदविहितधर्मस्य रक्षा, अधर्मस्य तिरोधानमीश्वरेच्छामात्रेणैव स्यात्, नावतारप्रयोजनमस्ति। तथाऽपि तत्तद्भगवद्रूपगुणकर्मलीलाविलासादिचिन्तनैकतत्पराणां धर्मस्य भगवदाविर्भावं विना रक्षणं न भवतीति भावः[1]॥ ७॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगेयुगे॥ ८॥

साधूनां वेदोक्तस्वधर्मानुष्ठातॄणाम् अनुक्तनिषिद्धाननुष्ठातॄणां **परित्राणाय**, **दुष्कृतां** दैत्यानां तद्विपरीतानां **विनाशाय** च, **युगेयुगे सम्भवामि**। मुख्यप्रयोजनं तु साधूनां तत्तद्रूपादिचिन्तकानां परित्राणम्, दुष्कृतां दैत्यानां स्वमूर्तौ क्षतादिप्रदर्शनेनावज्ञादिकमुत्पाद्य, नरकपातादिरूपं नाशनम्।

नच सर्वसुहृद्भगवान् कथं तान् नाशयति? इति वाच्यम्। 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्'[2] इति सूत्राद्यनुसारात् तेषां तादृशादृष्टानुसारेण भगवतः फलादिदातृत्वेन वैषम्याद्यभावात्॥ ८॥

स्वावतारज्ञानफलमाह - **जन्मेति**॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥ ९॥

मम जन्म श्रीरामकृष्णादिरूपेण प्राच्यामिन्दोरिवाविर्भावरूपम्, सेतुबन्धगोवर्धनोद्धरणादिरूपं जगदुदयादिरूपं च **कर्म**, **दिव्यम्** मदेकासाधारणं लोकविलक्षणं **तत्त्वतः** निःसन्दिग्धं **यो वेत्ति**, **देहं** लिङ्गदेहं **त्यक्त्वा** परमानन्दरूपं **मामेति** ततो **न पुनर्जन्मैति**[3], किन्तु स्वरूपाविर्भावरूपं मोक्षं प्राप्नोतीत्यर्थः॥ ९॥

---

[1] न जन्मनैव परित्राणादिकं कार्यमिति नियमः। तथाऽपि लीलया स्वभावेन च यथेष्टचारी। **इति मध्वभाष्यम्** [2] **ब्रह्मसूत्रम्** २.१.३४ [3] न पुनर्जन्मैतीति - पा.

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।
बहवो ज्ञानतपसा पूता मद्भावमागताः॥ १०॥

रागः = विषयभोगतृष्णा। विषयभोगान् विहाय मोक्षमार्गे[1] कथं प्रवर्तितव्यम् ? इति त्रासो भयम्। सर्वविषयोच्छेदकोऽयं मोक्षमार्गः[2] कथं हितः स्यात् ? इति द्वेषः क्रोधः। एते वीता भगवज्जन्मादिचिन्तनहेतुकप्रसादेन विगता येभ्यस्ते[3] **मन्मयाः** मदेकचित्ताः[4], **मामुपाश्रिताः** एकान्तप्रेमभक्त्या **माम्** ईश्वरं शरणं गताः। **बहवः** ज्ञानरूपेण तपसा। तेन **पूताः** निरस्ताविद्याः सन्तः, **मद्भावं** शुद्धबुद्धसदानन्दघनं नित्यं मम भावं साम्यापरपर्यायं सायुज्यरूपमुक्तिम्[5] **आगताः**, 'निरञ्जनः परमं साम्यमुप्यैति'[6] इति श्रुतेः॥ १०॥

ननु त्वज्जन्मादिचिन्तनलब्धत्वदापरोक्ष्येण ये पूताः तान् मोक्षं, ये त्रैविद्याः तान् स्वर्गादिकम्, ये त्वामवजानन्ति तान् नरकम्, इतरान् पामरांस्तु नीचयोनिरूपां संसृतिं यापयसीति विषमोऽसीति कथं त्वं भजनीयः ? तादृशस्य ज्ञानान्मोक्षश्च कथं स्यात् ? अत आह -

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ ११॥

ये यथा सकामतया निष्कामतया द्वेषावज्ञानादिना **मां** भजन्ति, **तान् तथैव** स्वर्गनरकमोक्षसंसारादिदानेन **भजामि**। यथा कल्पतरुं यो यथाऽऽश्रयति, स तथैव ततः फलं प्राप्नोति तद्वदिति भावः।

ननु त्रैविद्यानामिन्द्रादियाजित्वात् कथं ते मुच्यन्ते? कथं च त्वां प्रपद्यन्ते? तत्राह - **ममेति॥ मम** सर्वान्तर्यामिणो **वर्त्म** भजनमार्गं सर्वे देवान्तरयाजका अपि **अनुवर्तन्ते**। शास्त्रस्य मनुष्याधिकारिकत्वात् **मनुष्याः** इत्युक्तम्। इन्द्रादौ स्थितस्तत्पूजाग्राहकः फलदाता चाहमेव। तथा च वक्ष्यति -

[1] ज्ञानमार्गे **इति मधुसूदनसरस्वतीये** [2] ज्ञानमार्गः **इति मधुसूदनसरस्वतीये** [3] वीता विवेकेन विगता येभ्यस्ते।**इति मधुसूदनसरस्वतीये** । [4] मन्मया मां परमात्मानं तत्पदार्थं त्वम्पदार्थाभेदेन साक्षात्कृतवन्तः मदेकचित्ताः**इति मधुसूदनसरस्वतीये** [5] मद्भावं मद्रूपत्वम् **इति मधुसूदनसरस्वतीये** [6] **मुण्डकोपनिषत्** ३.१.३

'येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥' इति[1]॥ ११॥

नन्वेवं त्वामेव सर्वेश्वरमनन्तसद्गुणालयं परमकारुणिकं शरणागतवत्सलं सर्वे कुतो न भजन्ते? तत्राह - **काङ्क्षन्त इति॥**

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥ १२॥

सर्व एव पुरुषाः **कर्मणां सिद्धिं** फलम् **इह** अस्मिन्नेव जन्मनि **काङ्क्षन्तः** इन्द्राद्याः **देवताः यजन्ते**। नतु फलाभिसन्धिराहित्येन सर्वयज्ञानां भोक्तारमिन्द्राद्यन्तःस्थं सर्वफलदातारं मां भजन्ते। तमोरजोभ्यामाविष्टचित्तत्वेन तेषां पापाविष्टचित्तत्वेन च कामान् विहाय निष्कामतया मदाराधने प्रवृत्तिर्न भवति।

'विषयाविष्टचित्तानां कृष्णावेशसमुद्भवैः।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते॥'

इत्यादिस्मृतेरित्याशयेनाह - **क्षिप्रमिति॥ क्षिप्रम्** अस्मिन्नेव जन्मनि **मानुषे लोके** ज्योतिष्टोमादिकर्मजा पश्वन्नपुत्राद्या **सिद्धिर्भवति**। अक्षीणानादिकालसञ्चितसदसत्कर्मवासनाप्रवाहेन लुप्तविवेका अत्यन्तविषयभोगत्वरिताः क्षिप्रफलाभिकाङ्क्षिणः पुत्रान्नाद्यर्थतया सर्वाणि कर्माणीन्द्राद्याराधनमात्राणि कुर्वन्ति। नतु संसारदुःखेनोद्विग्नचित्ता निष्कामं मदाराधनरूपं कर्म कुर्वन्तीति भावः॥ १३॥

देहारम्भकभक्तगुणवैषम्याज्जगत्पितुर्मम भजनाभावः[2], ततस्तेषां मोक्षेऽनधिकार इति बोधयितुं गुणभेदेन प्रजानामुत्पत्तिं स्वकर्तृकामाह - **चातुर्वर्ण्यमिति॥**

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥ १३॥

[1] भगवद्गीता ९.२३ [2] भक्तानां जन्मभावः - पा.

चत्वारो वर्णा एव **चातुर्वर्ण्यम्**। स्वार्थे ष्यञ्। **मया** सर्वेश्वरेण गुणविभागशः कर्मविभागशश्च। तथा हि। सत्वप्रधाना ब्राह्मणाः। तेषां शमदमादीनि कर्माणि। सत्वोपसर्जनरजःप्रधानाः क्षत्रियाः। तेषां शौर्यादीनि कर्माणि। तमउपसर्जनरजःप्रधाना वैश्याः। तेषां कृष्यादीनि तादृशान्येव कर्माणि। तमःप्रधानाः शूद्राः। तेषां तादृशान्येव त्रैवर्णिकशुश्रूषादीनि कर्माणि।

ननु विषमसृष्टिकर्तृत्वात् तवापि वैष्यम्यं स्यात्। तत्राह - **विद्धीति॥ तस्य** चातुर्वर्ण्यस्य **कर्तारमपि** क्रियायामभिनिवेशाभावात् **अकर्तारम्** [1] अत एव **अव्ययं** कर्तृत्वप्रयुक्तव्ययेन तद्विकारेण रहितम्। यद्वा, **अकर्तारं** नास्ति कर्ता यस्य तं कर्तृरहितं **विद्धि** इत्यर्थः॥ १३॥

तदेवाह - **नेति**॥ [2]

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥ १४॥

यतो मम **कर्मफले स्पृहा न** अस्ति, अतः **मां कर्माणि न लिम्पन्ति इति** इत्थं जीवोपाधिहीनं **मां** सर्वेश्वरं कर्मफलाद्यभिनिवेशरहितं **यः** वेद, **सः** मत्प्रसादलब्धनिर्लेपसामर्थ्येन प्रवाहानादिकर्मरूपयाऽविद्यया **न बध्यते**। क्रियमाणादिभिरपि कर्मभिः **न बध्यते** इत्यर्थः॥ १४॥

यतोऽभिमानाभावात् कर्मकर्तारं मां कर्माणि न लिम्पन्ति, अतोऽभिमानराहित्येन त्वमपि कर्म कुर्वित्याह - **एवमिति**॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात् त्वं पूर्वैः पूर्वतरं कृतम्॥ १५॥

एतत् **पूर्वैः** यदुप्रभृतिभिः मुमुक्षुभिः **एवम्** 'कर्तृत्वाद्यभिमानाभावेन कर्माणि न लिम्पन्ति' इति **ज्ञात्वा**, कर्तृत्वाद्यभिमानशून्यतया **कर्म कृतम्। तस्मात्**

[1] तस्य विषमस्वभावस्य चातुर्वर्ण्यस्य व्यवहारदृष्ट्या कर्तारमपि मां परमार्थदृष्ट्या विद्ध्यकर्तारमव्ययं निरहङ्कारत्वेनाक्षीणमहिमानम्।**इति मधुसूदनसरस्वतीये**

[2] अवतारिकेयं क्वचिन्न पठ्यते।

त्वम् अपि मुमुक्षुर्विद्वान् बाह्यानुसन्धानत्वात् क्षत्रियत्वेन सन्न्यासानाधिकाराच्च **कर्मैव** फलाभिसन्धिशून्यः सन् **कुरु**। **पूर्वैः** जनकादिभिः **पूर्वतरम्** अतिपूर्वं युगान्तरेऽपि **कृतम्** ॥ १५॥

कुरु कर्म इत्युक्तस्य कर्मणो जिज्ञासार्थं दुर्ज्ञेयत्वं वदन् विशेषेण वक्तुं प्रतिजानीते - **किमिति॥**

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत् ते(ऽ)कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १६॥

किं कीदृशं **कर्म**। **अकर्म** कर्माकरणम्, विरुद्धं कर्म च ग्राह्यम्[1] नञोऽभाववविरुद्धकर्मरूपद्वयार्थत्वात्। काम्यकर्मणो मोक्षविरोधित्वान्निषिद्धेऽन्तर्भावः। **अत्र** अर्थे **कवयोऽपि** प्रश्नोत्तरविवेके समर्था अपि **मोहिताः** भवन्ति। अतः **तत् कर्म ते** तुभ्यं प्रकर्षेण वक्ष्यामि। अनुष्ठानपर्यन्तं **यज्ज्ञात्वा अशुभात्** संसारात् **मोक्ष्यसे** ॥ १६॥

नन्वहमेतज्ज्ञानामि देहेन्द्रियव्यापारः कर्म, तत्त्यागोऽकर्म। किमत्र वक्तव्यमस्ति? इत्यत आह - **कर्मण इति॥**

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥ १७॥

हि यतः **कर्मणः** वेदविहितस्यापि तत्त्वं **बोद्धव्यम्** अस्ति। **विकर्मणश्च** प्रतिषिद्धस्य **अकर्मणश्च** तूष्णीम्भावस्य। अत्र त्रितयेऽपि 'तत्त्वमस्ति' इत्यध्याहारः। **कर्मणः** इत्युपलक्षणम्। कर्माकर्मविकर्मणां **गतिः** तत्त्वं गहनमित्यर्थः॥ १७॥

कीदृशं तर्हि कर्मादितत्त्वम्? तदाह - **कर्मणीति॥**

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥ १८॥

[1] अकर्मपदेन विकर्मोपलक्षणमिति पद्मनाभतीर्थभट्टारकाः भाष्यभावप्रदीपिकायाम्॥

यः विहिते **कर्मणि** क्रियमाणे, 'अन्तर्यामिप्रेरितदेहेन्द्रियादौ कर्म भवति, अहं निर्विकारः स्वतोऽकर्ता। यथा देहादिकमीश्वरप्रेरितं कर्मणि प्रेरितम्, तथाऽहमपि। न मदीयमिदं कर्म। किन्त्वीश्वरीयम्, तस्यैव पूजारूपं च' इति **अकर्म** स्वस्य कर्माभावं **पश्येत्। अकर्मणि** कर्म विहाय तूष्णीम्भावे मदीयं कर्म मया त्यक्तमकर्माहं तिष्ठामीत्यभिमानरूपं **कर्म यः पश्येत्।** यथा सकामं कर्म संसृतिदम्, तथा देहतत्कर्मादौ 'अहं मम' इत्यभिमानोऽपि संसृतिद इति **कर्म** पदेनोच्यते। कर्तृत्वाभिमाने सत्यसति च, **कर्म** निषिद्धं कर्म त्याज्यतयैव पश्यतीत्यपि चशब्देन सूचितम्। **मनुष्येषु** शास्त्राधिकारिषु **सः** मोक्षोपयुक्तबुद्धिमान्, **सः** एव **युक्तः** शास्त्रविचारवान्। स एव मत्प्रसादहेतुमदापरोक्ष्यप्रयोजककृत्स्नकर्मकृत्।

स्वस्य कर्तृत्वाभिमानराहित्येन निष्कामं भगवादाराधनरूपं कर्म, ततोऽन्तःकरणशुद्धिद्वाराऽविच्छिन्नस्नेहसन्ततिपूर्वकं सर्वोत्तमत्वेनानन्तगुणालयस्य हरेरापरोक्ष्यम्, ततः तन्महाप्रसादः ततः स्वस्वरूपानन्दाविर्भावरूपा मुक्तिरिति भावः॥ १८॥

कर्तृत्वाद्यभिमानराहित्येन कृतं कर्म ज्ञानाद्यर्थं भवतीत्याह - **यस्येति पञ्चभिः॥**

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ १९॥

यस्य सर्वे स्वोचितकर्मारम्भाः कर्माणि। 'इदं फलमनेन कर्मणा भूयात्' इति फलासक्तिः कामः, 'एतत्फलार्थमिदं कर्माहं करिष्ये' इति कर्मसङ्गः सङ्कल्पः, ताभ्यां वर्जिताः। 'हरिप्रेरणया देहादौ कर्म जायते, अहं तु केवलोऽकर्ता' इति ज्ञानेन दग्धानि कर्माणि अनादिकालप्रवृत्तसञ्चयरूपाणि क्रियमाणानि करिष्यमाणानि यस्य। **तं बुधाः** वेदार्थज्ञाः **पण्डितम्** अतिकुशलम् **आहुः।**

निरभिमानतया हर्याराधनरूपकर्मणाऽन्तःकरणशुद्धिद्वारा हर्यापरोक्ष्यम्, ततो महाप्रसादः, ततः कर्मरूपाविद्याया निवृत्तिरिति भावः॥ १९॥

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥ २०॥

कर्मणि कर्तृत्वाभिमानरूपं फले भोक्तृत्वाभिमानरूपं च सङ्गं[1] त्यक्त्वा नित्येन = स्वानन्देन हरिणा वा तृप्तः, हरिप्रसादादाविर्भूतस्वानन्देन तृप्त इत्यर्थः। निर्गतो भोगाद्यर्थमाश्रयो देहादिः यस्मात् सः। स्वानन्दतृप्तत्वेन सुखाद्यनुभवार्थमाश्रयस्य देहादेरपेक्षा नास्तीति भावः। एतादृशो लोकसङ्ग्रहार्थं संस्कारवशाद्वा **कर्मण्यभिप्रवृत्तोऽपि स नैव किञ्चित् करोति** फलं विकारादिकं तु किञ्चिन्न प्राप्नोतीत्यर्थः॥ २०॥

कामत्यागोपायमाह - **निराशीरिति॥**

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्॥ २१॥

निर्गता इहामुत्र फलभोगे आशिष अभिलाषा यस्य सः। यतौ नियतौ चित्तात्मानौ येन सः। **चित्तम्** अन्तःकरणम्। **आत्मा** बाह्येन्द्रियसहितदेहः। यतो यतेन्द्रियः, अतो विगततृष्णत्वात् **त्यक्तसर्वपरिग्रहः** त्यक्ताः सर्वपरिग्रहा भोगोपकरणानि येन सः। एतादृशोऽपि प्रारब्धकर्मवशात् **शारीरं** शरीरस्थितिप्रयोजकं[2] भिक्षाटनादिकं **केवलं** कर्तृत्वाभिमानशून्यं **कुर्वन्** अपि **किल्बिषं** संसाराख्यं **नाप्नोति**। मुमुक्षोः **निराशीः** इत्यादिकं साधनम्, जीवन्मुक्तस्य स्वाभाविकमिति भावः॥ २१॥

उक्तस्य जीवन्मुक्तस्य लक्षणमाह - **यदृच्छेति॥**

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।
समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते॥ २२॥

---

[1] आसङ्गमिति स्यात्। [2] शरीरं प्रति प्रयोजकं - पा.

शास्त्रानुमतस्यान्नादेरयत्नेनैव लाभो यदृच्छालाभः, तेन सन्तुष्टः तदधिकतृष्णारहितः। ननु स्वप्रयत्नमन्तरेणालाभे शीतादिपीडितः कथं जीवेत? तत्राह **द्वन्द्वातीतः** द्वन्द्वानि = क्षुत्पिपासाशीतोष्णवर्षादीनि अतीतः = अतिक्रान्तः। समाधौ तेषामस्फुरणात्। व्युत्थानकाले स्मरणेऽपि निदाघे महाह्रदनिमग्नगजस्येव परमानन्दघनात्मस्वरूपे स्थिरीकृतचित्तस्य द्वन्द्वैः क्षोभाभावात्[1] अत एव परस्य लाभे, स्वस्यालाभे **विमत्सरः**। परोत्कर्षासहनपूर्विका स्वोत्कर्षवाञ्छा मत्सरः, तद्रहितः। अत एव **समः** तुल्यः। यदृच्छालाभस्य **सिद्धावसिद्धौ च** सिद्धौ न हृष्टः, नाप्यसिद्धौ विषण्णः। देहादौ विगताहंममेत्यभिमानः। प्रारब्धकर्मवशात् भिक्षाटनादिकं कृत्वाऽपि **न निबध्यते** ॥ २२॥

त्यक्तसर्वपरिग्रहस्य यदृच्छालाभसन्तुष्टस्य यतेः शारीरं भिक्षाटनादिकं कर्म बन्धहेतुर्न भवतीत्युक्ते, गृहस्थस्य जनकादेः यज्ञयुद्धादिकं कर्म बन्धहेतुः स्यादित्याशङ्कामपाकर्तुं **त्यक्त्वा कर्मफलासङ्गम्** इत्युक्तं विवृणोति - **गतसङ्गस्येति॥**

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥ २३॥

गतसङ्गस्य फलासक्तिशून्यस्य स्वतन्त्रकर्तृत्वाभिमानमुक्तस्य[2] च ज्ञानेन ब्रह्मापरोक्ष्येण स्थितं स्थिरीकृतं चित्तं यस्य[3] तस्य। **यज्ञाय** विष्णवे तत्पूजार्थं विहितं कुर्वाणस्य **समग्रं** प्रारब्धभिन्नं **कर्म प्रविलीयते** नश्यति, बन्धकं न भवतीत्यर्थः।

भगवत्प्रेरणया कर्म भवति, अहं तु स्वतोऽकर्ता तेन स्वपूजारूपेण कर्मणा स्वकारितेन स एव प्रीणात्विति कुर्वाणस्य कर्माणि सकामानां बन्धहेतवोऽपि मुक्तय एव भवन्तीति भावः॥ २३॥

---

[1] द्वन्द्वानि क्षुत्पिपासाशीतोष्णवर्षादीनि अतीतोऽतिक्रान्तः। समाधिदशायां तेषामस्फुरणात्। व्युत्थानदशायां स्फुरणेऽपि परमानन्दाद्वितीयाकर्त्रभोक्त्रात्मप्रत्ययेन बाधात् तैर्द्वन्द्वैरुपहन्यमानोऽप्यक्षुभितचित्तः।**इति मधुसूदनसरस्वतीये** । [2] मुक्तस्य कर्तृत्वभोक्तृत्वाद्यध्यासशून्यस्य।**इति मधुसूदनसरस्वतीये** [3] ज्ञानावस्थितचेतसः निर्विकल्पब्रह्मात्मैक्यबोध एव स्थितं चित्तं यस्य।**इति मधुसूदनसरस्वतीये**

कर्त्रादिकारणषट्कस्य तत्साध्यक्रियायाः तत्फलस्य च ब्रह्माधीनत्वं चिन्तयन् कर्म कुर्वाणः कर्मभिर्न लिप्यत इत्याह - **ब्रह्मेति**॥

ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्म कर्म समाधिना॥ २४॥

अर्प्यतेऽनेनेति करणमधिकरणं देशकालादि। एवं **हविः** त्यागप्रक्षेपक्रिययोः साक्षात् कर्मकारकम्। तदपि **ब्रह्म**। एवं यत्र प्रक्षिप्यतेऽग्नौ सोऽपि ब्रह्मैव। **ब्रह्माग्नौ** इति समस्तं पदम्। एवं येन कर्त्रा यजमानेन हविस्त्यज्यते येनर्त्विजा वा **हुतं** सोऽपि ब्रह्म। तेन यागकर्त्रा यद्गम्यं फलं तदपि **ब्रह्म**। हवनरूपक्रियाऽपि ब्रह्म। सर्वत्रार्पणादिषु ब्रह्माधीनत्वाद् ब्रह्मपदप्रयोगः[1] 'धान्यमसि धिनुहि देवान्' इति क्रतुषट्कवाचकधान्यपदस्य धान्याधीने तण्डुले प्रयोगात्। ब्रह्माश्रितत्वं तु 'यस्मिन् द्यौः'[2] इत्यादिना प्रसिद्धम्। ततो जातत्वाद्वा तद्व्यपदेशः। 'ब्राह्मणोऽस्य मुखम्'[3] इत्यादिवत् 'इग्यणः सम्प्रसारणम्'[4] इत्यत्र सम्प्रसारणाज्ज्ञातो वर्णः सम्प्रसारणमिति महाभाष्योक्तेः।

अस्तु वा सर्वत्र समस्तं पदं **ब्रह्मार्पणम्** इत्यादि। तथा च ब्रह्माधीनक्रिया, तया ब्रह्माधीनफलमित्यनुसन्धानेन कर्मकरणादन्तःकरणशुद्धिद्वारा ज्ञानभक्तिमहाप्रसादमुक्तिपर्यवसायि भवति कर्म। नतु स्वर्गादिमात्रफलदमिति भावः॥ २३॥

एवं सामान्यतः कर्मोक्तम्। तच्च यज्ञोपासनादिभेदेन भिन्नमित्याह - **दैवमित्यष्टभिः**॥

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति॥ २५॥

अपरे यतयः **दैवमेव** दैवं विष्णुं **यज्ञं** यथा तथोपासते। यज्ञरूपिणमुपासते, मनसा ध्यायन्त इत्यर्थः। **अपरे** वनस्थाः **यज्ञेन** अन्तर्यामिणा विष्णुना प्रेरिता

[1] सर्वमेतद् ब्रह्मेत्युच्यते। तदधीनसत्ताप्रतीतित्वात्। नतु तत्स्वरूपत्वात्।**इति मध्वभाष्यम्** ।
[2] **मुण्डकोपनिषत्** २.२.५ [3] **इति ऋक्संहिता** १०.९०.१२ [4] **इति अष्टाध्यायी** १.१.४५

एव ब्रह्मरूपाग्नौ **यज्ञं** स्वोचितक्रियां जुह्वति। यथा 'दध्ना जुहोति' इत्यत्राग्नौ दध्यर्पणेन होमो भवति, तथा स्वकृतस्य कर्मणोऽन्तःस्थो भगवानेव कर्म कारयति, तेन स एव प्रीणात्वित्यर्पणेन होमो भवतीत्यर्थः।

अग्न्यादिगतं तमुद्देश्य तत्प्रीतये तत्प्रेरणया हविस्त्यागं करोमीति ज्ञात्वा तत्कृत्वा चान्तःकरणशुद्ध्यादिद्वारा मोक्षं लभन्त इति भावः॥ २५॥

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति॥ २६॥

अन्ये नैष्ठिकब्रह्मचारिणः तत्तदिन्द्रियसंयमाख्येष्वग्निषु विषयेभ्यः प्रत्याहृत्य **जुह्वति**। इन्द्रियसंयम एव यतन्त इत्यर्थः। **अन्ये** गृहस्थाः **इन्द्रियाग्निषु विषयान् जुह्वति** देहादावहंममेतिधीशून्याः, विषयेषु विगतस्पृहाः दैवाल्लब्धानिषिद्धविषयभोगं 'ऋतौ भार्यामुपेयात्' इत्यादिवेदाज्ञया श्रीहरिप्रीतये कुर्वन्तीत्यर्थः। विहितादनिषिद्धाच्चाभिमानरहितभोगाद्वासनाक्षयान्तःकरणशुद्धिज्ञानभक्तिप्रसादद्वारा मोक्षो भवतीति भावः॥ २६॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥ २७॥

अपरे पातञ्जलाः श्रोत्रादिज्ञानेन्द्रियकर्माणि श्रवणादीनि वागादिकर्मेन्द्रियकर्माणि व्यवहारादीनि प्राणानां दशानां कर्माणि प्राणस्य बहिर्गमनम्, अपानस्याधोगमनम्, व्यानस्याकुञ्चनप्रसारणादिकम्, समानस्य पीताशिनस्य सम्यगुनयनम्[1], उदानस्योर्ध्वनयनम्[2],

'उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः।
कृकरः क्षुद्विधौ ज्ञेयो देवदत्तो विजृम्भणे॥
न जहाति मृतं वाऽपि सर्वव्यापी धनञ्जयः॥'

[1] समे नयनम्, समनयन्म् - पा. [2] उदानस्योद्वेगगमनम् - पा. उदानस्योर्ध्वगमनम् - पा.

इत्येवंरूपाणि **प्राणकर्माणि। आत्मसंयमयोगाग्नौ** आत्मनो मनसः संयम एकाग्रता, स एव योग उपायः, स एवाग्निः, तस्मिन्। ध्येयविषयकेण ज्ञानेन **दीपिते** प्रज्वलिते। परमानन्दध्येयज्ञानेन मनसो निग्रहम् इन्द्रियान्तरव्यापारोपरतिश्चानायासेन भवतीति भावः॥ २७॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः[1]॥ २८॥

द्रव्यत्याग एव यथाशास्त्रं यज्ञो येषां ते श्रौतज्योतिष्टोमादिकर्मपराः पूर्तदत्ताख्यस्मार्तकर्मपराः। तथा च स्मृतिः

'वापीकूपतटाकादिदेवतायतनानि च।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते॥
शरणागतसन्त्राणं भूतानां चाप्यहिंसनम्।
बहिर्वेदिषु प्रदानं दत्तमित्यभिधीयते॥' इति।

तथा कृच्छ्रचान्द्रायणादितप एव यज्ञो येषां ते **तपोयज्ञाः** तपस्विनः। योगः चित्तवृत्तिनिरोधो यज्ञो येषां ते **योगयज्ञाः** यमनियमासनाद्यनुष्ठानपराः। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो हि योगस्याष्टाङ्गानि। तल्लक्षणान्यन्यत्र ज्ञेयानि। स्वाध्यायो वेदपाठः, तदर्थश्रवणादिश्च। ज्ञानं ब्रह्मादिपरापरतत्त्वविषयकं परोक्षापरोक्षरूपम्। **यतयः** यत्नशीलाः सम्यक् शितं निशितं तीक्ष्णं व्रतं येषां ते **संशितव्रताः**। शो तनूकरणे। **शंसितव्रताः** इति पाठे 'शंस कथने' इति धातोः विद्वत्कथितव्रता इत्यर्थः॥ २८॥

प्राणायामयज्ञमाह - **अपान इति॥**

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥ २९॥

[1] शंसितव्रताः - पा.

अपाने अपानवृत्तौ **प्राणं** प्राणवृत्तिं **जुह्वति** प्रक्षिपन्ति। बाह्यवायोः देहाभ्यन्तरप्रवेशेन पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। **प्राणेऽपानं तथाऽपरे** जुह्वति। देहवायोः बहिर्निर्गमनेन रेचकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। पूरकरेचककथनेन तदविनाभूतो द्विविधः कुम्भकोऽप्युक्त एव। यथाशक्ति वायुमापूर्य, अनन्तरं श्वासप्रश्वासनिरोधे क्रियमाणोऽन्तःकुम्भकः। यथाशक्ति सर्वं वायुं विरिच्य, अनन्तरं क्रियमाणो बहिःकुम्भकः। एतत्प्राणायामत्रयानुवादेन चतुर्थं कुम्भकमाह - **प्राणापानगती** इति॥ मुखनासिकाभ्यामान्तरस्य वायोः बहिर्निर्गमः श्वासः प्राणस्य गतिः। बहिर्निर्गतस्यान्तःप्रवेशः प्रश्वासोऽपानस्य गतिः। तत्र पूरके प्राणगतिनिरोधः। रेचकेऽपानगतिनिरोधः। कुम्भके तूभयगतिनिरोध इति क्रमेण युगपच्च श्वासप्रश्वासाख्ये **प्राणापानगती रुद्ध्वा , प्राणायामपरायणाः** सन्तः, **अपरे प्राणेऽपानं जुह्वति** [1] इत्यर्थः॥ २९॥

अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः॥ ३०॥

नियताहाराः नियमादियोगसाधननिष्ठाः[2] **प्राणेषु** बाह्याभ्यन्तरकुम्भकाभ्यां निगृहीतेषु **प्राणान्** ज्ञानेन्द्रियकर्मेन्द्रियरूपान् **जुह्वति** कुम्भकाभ्यासेन विलापयन्तीत्यर्थः। यद्वा, **नियताहाराः** आहारसङ्कोचनमभ्यसन्तः, आहारनियमेन शुष्कान् **प्राणान्** इन्द्रियव्यापारान् **प्राणेषु** इन्द्रियेषु। निराहारेण शुष्यमाणेन्द्रियवृत्तीनामिन्द्रियाग्निषु होमं श्रीहरिपूजात्वेन भावयन्तीत्यर्थः। उक्तानां यज्ञविदां फलमाह - **सर्व इति॥ एते** पूर्वोक्ताः **सर्वे यज्ञविदः** यज्ञकर्तारः। यज्ञैः क्षपितं नाशितं कल्मषं येषां ते॥ ३०॥

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम॥ ३१॥

यज्ञं कृत्वाऽवशिष्टे कालेऽन्नममृतपदवाच्यं भुञ्जते **यज्ञशिष्टामृतभुजः** ते सर्वेऽपि सत्त्वशुद्धिद्वारा ज्ञानभक्तिप्रसादानवाप्य[3] **सनातनं ब्रह्म** श्रुतिवेद्यं मत्प्रसादादाविर्भूतबृहद्गुणकं स्वस्वरूपं च **यान्ति** इत्यर्थः। 'परं ज्योतिरुपसम्पद्य

[1] अपाने प्राणं जुह्वति - पा. [2] साधनविशिष्टाः - पा. [3] सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यान्ति इति **मधुसूदनसरस्वतीये**

स्वेन रूपेणाभिनिष्पद्यते'[1] इति श्रुतेः। यज्ञाकरणे दोषमाह। उक्तयज्ञानां यस्यान्यतमो यज्ञो नास्ति, सः **अयज्ञः**। तस्य **अयम्** अल्पसुखो मनुष्यलोको **नास्ति** सर्वनिन्द्यत्वात्। **कुतोऽन्यो** विशिष्टसाधनसाध्यः परलोकः!॥ ३१॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे॥ ३२॥

एवंविधा **यज्ञा ब्रह्मणो मुखे विततः** मत्पूजारूपा इत्यर्थः। 'भोक्तारं यज्ञतपसाम्'[2] इति वक्ष्यमाणत्वात्। **कर्मजान्** कायिकवाचिकमानसकर्मजान् **विद्धि** जानीहि। **एवं** यज्ञानां कर्मजत्वं **ज्ञात्वा विमोक्ष्यसे।**

सर्वे यज्ञा ईश्वरप्रेरितदेहेन्द्रियादिकर्मजा नतु केवलं मत्कर्तृका इत्येवं ज्ञात्वोक्तयज्ञान् युद्धादिस्वधर्मं चानुष्ठाय कर्मफललेपरहितः सन् संसाराद्विमोक्ष्यत इति भावः॥ ३२॥

उक्तयज्ञेषु ज्ञानयज्ञस्य श्रेष्ठत्वमाह - **श्रेयानिति॥**

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥ ३३॥

साक्षान्मोक्षसाधनत्वात् **द्रव्यमयात्** द्रव्यसाध्यात् **यज्ञाज्ज्ञानयज्ञः श्रेयान्।** कुतः? यतो **अखिलं** निरवशेषं **सर्वं** ज्योतिष्टोमादिकं श्रौतं स्मार्तमुपासनादिकमुक्तयज्ञादिरूपं यत् **कर्म** तत् **ज्ञाने समाप्यते।** अन्तःकरणशुद्धिद्वारा ज्ञाने पर्यवसन्नं भवतीत्यर्थः। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन'[3] इति श्रुतेः॥ ३३॥

तज्ज्ञाने को मुख्य उपायः? तत्राह - **तदिति॥**

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ ३४॥

---

[1] छान्दोग्योपनिषत् ८.३.४ [2] भगवद्गीता ५.२९ [3] बृहदारण्यकोपनिषत् ६.४.२२

तत् सर्वकर्मफलभूतं ज्ञानं **विद्धि** लभस्व। आचार्यानभिगम्य तेषां **प्रणिपातेन** प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घदण्डनमस्कारः, तेन। 'कोऽहम् ? कथं बद्धः ? कथं मुच्येयम् ?' इत्यादिपरिप्रश्नेन। **सेवया** सर्वभावेन तदनुकूलकारितया। **उपदेक्ष्यन्ति ते** तुभ्यम् उपदेशेन **ज्ञानं** परमात्मविषयकं साक्षान्मोक्षहेतुं दास्यन्ति। **ज्ञानिनः** पदवाक्यन्यायादिमाननिपुणाः **तत्त्वदर्शिनः** कृतेश्वरतत्त्वसाक्षात्काराः। साक्षात्कारवद्भिरुपदिष्टं ज्ञानं फलपर्यवसायि, नतु तद्रहितैः पदवाक्यमाननिपुणैरिति। 'स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'[1] इति श्रुतेः।

यद्यपि सर्वेषां ज्ञानदेवज्ञानिवृन्दैश्चिन्तितपादारविन्देन[2] भगवतोपदिष्टोऽर्जुनो नारायणसखो नरावतारत्वेन प्रागेव ज्ञातात्मतत्त्वश्चेति **उपदेक्ष्यन्ति** इति नोपपन्नम्। तथाऽप्यर्जुनोपदेशव्याजेन परमकारुणिकेन सज्जनानुद्दिधीर्षुणा विद्या प्रकटिता **तद्विद्धि** इत्यनेन। गुरुशिष्यपरम्परयोक्तप्रकारेणेयं विद्या प्राप्तव्येति भावः॥ ३४॥

गुरूपदेशप्राप्तज्ञानफलमाह - **यदिति॥**

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥ ३५॥

तव ज्ञानित्वेऽपीदानीं प्रारब्धकर्मवशादीषत्तिरोभावाद्बन्धुस्नेहादिनिमित्तकमोहसद्भावेऽपि मदुपदेशानन्तरम् **एवं** प्रकारं **मोहं न यास्यसि**। किञ्च **येन** ज्ञानेन **अथ** मोहनाशानन्तरं **आत्मनि** सर्वव्यापके **मयि भूतानि अशेषेण** साकल्येन **द्रक्ष्यसि** भूतानामुत्पत्तिस्थितिनाशान् मदधीनं जानन् स्वस्य नाशाद्यकर्तृत्वमनुसन्दधन्, **एवं मोहं न यास्यसि** इति भावः॥ ३५॥

ज्ञानं स्तौति - **अपि चेदिति॥**

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥ ३६॥

[1] **मुण्डकोपनिषत्** १.२.१२ [2] पदारविन्देन - पा.

अपि चेत् इत्यसम्भाविताभ्युपगमप्रदर्शनार्थं निपातौ। यद्यपि ज्ञानिनः पापकर्तृत्वं न सम्भवत्येव। तथाऽपि ज्ञानप्रभावकथनायाभ्युपेत्योच्यते। यद्यपि त्वं पापकारिभ्यः सर्वेभ्योऽप्यतिशयेन पापकारी **पापकृत्तमः** स्यात्। तथाऽपि **सर्वं वृजिनं** पापमतिदुस्तरत्वेनार्णवसदृशं **ज्ञानप्लवेनैव सन्तरिष्यसि** । वृजिनपदेनात्र पापपुण्यफलजन्ममरणादिसंसारोऽभिप्रेतः॥ ३६॥

विद्यमानसमुद्रस्येव पापतरणं न विवक्षितम्, किन्तु नाश एवेत्याह - **यथेति**॥

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा॥ ३७॥

यथैधांसि काष्टानि **समिद्धः** प्रज्वलितः **अग्निः भस्मसात् कुरुते** हे **अर्जुन**। मदापरोक्षज्ञानरूपोऽग्निः **सर्वकर्माणि** संसारप्रदानि सवासनानि प्रारम्भकभिन्नानि **भस्मसात् कुरुते तथा**।

'भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥' इति श्रुतेः।[1]

'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्'[2] इति सूत्राच्च। ब्रह्माधिगमे उत्तरस्य क्रियमाणस्याश्लेषो निर्लेपः, पूर्वस्याघराशेर्विनाश इत्यर्थः। आरम्भककर्मणां तु भोगादेव क्षयः। 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति श्रुतेः। 'भोगेन त्वितरौ क्षपयित्वा सम्पत्स्यते'[3] इति सूत्राच्च।

अधिकारिणां तु यान्येव ज्ञानोत्पादकदेहारम्भकाणि तान्येव देहारम्भकाण्यपि। यथा वसिष्टादीनाम्। 'यावदधिकारमवस्थितिराधिकारिकाणाम्' इति सूत्रात्। अनेकदेहारम्भकं बलवत्प्रारब्धफलं कर्म तच्च भगवदुपासतामेव नान्येषाम्। अनारब्धफलानि नश्यन्ति, आरब्धफलानि तु यावद्भोगसमाप्तिं तिष्ठन्ति। भोगश्चैकेन देहेन, अनेकेन वेति न विशेषः। निष्कामकर्मणा हरे-

[1] **मुण्डकोपनिषत्** २.२.८, **इति महोपनिषत्** ४.८२ [2] **ब्रह्मसूत्रम्** ४.१.१३ [3] **ब्रह्मसूत्रम्** ४.१.१९

राराधनम्, ततः श्रवणं मननं निदिध्यासनम्, ततोऽविच्छिन्नप्रेमसन्ततिपूर्वकसर्वोत्तमत्वेन हर्यापरोक्ष्यम्, ततः तन्महाप्रसादः, ततो हृदयपदवाच्यानाद्यविद्याया देहादौ 'अहं मम' इत्यभिमानहेतोर्निवृत्तिः, अथ सर्वकर्मालेपः, प्रारब्धवशाद्देहावस्थानं दण्डव्यापारे निवृत्ते कुलालचक्रे किञ्चित् कालं भ्रमावस्थानवत् स एव जीवन्मुक्त इति भावः॥ ३७॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनाऽत्मनि विन्दति॥ ३८॥

न हि ज्ञानेन सदृशं पवित्रं शुद्धिकरमन्यत् **इह** लोके **विद्यते**। प्रायश्चित्तादेः पापनिवर्तकत्वेऽपि पापमूलाविद्योच्छेदकत्वाभावात्। भागवतज्ञानेन[1] सर्वपापमूलमविद्योच्छिद्यते। ननु सर्वे कुतो नाप्नुवन्ति तज्ज्ञानम्? तत्राह - **तदिति॥** महता **कालेन योगसंसिद्धः** योगेन पूर्वोक्तेन संसिद्धो योग्यतामापन्नः स्वयमेव **आत्मनि** भगवति तज्ज्ञानं तद्विषयकं ज्ञानं **विन्दति**। **आत्मनि** भगवति प्रसन्ने सति वा। **आत्मनि** मनसि वा **तत्** ज्ञानं ब्रह्मापरोक्ष्यं **विन्दति** इत्यर्थः॥ ३८॥

ज्ञानस्योत्कृष्टमावश्यकं यत् साधनम्, तदाह - **श्रद्धेति॥**

श्रद्धावान् लभते ज्ञानं मत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ ३९॥

गुरुवेदान्तवाक्ये 'इदमित्थमेव' इति प्रमारूपास्तिक्यबुद्धिः श्रद्धा। तद्वान् पुरुषो **ज्ञानं लभते**। एतादृशः कश्चिदलसः स्यात्। तत्राह - **मत्परः** ज्ञानोपाये गुरूपासनादावत्यन्ताभियुक्तः। एतादृशः कश्चिदजितेन्द्रितोऽपि स्यात्। तत्राह - **संयतेन्द्रियः** संयतानि विषयेभ्यो निवर्तितानीन्द्रियाणि येन सः। एवं विशेषणत्रययुक्तोऽवश्यं ज्ञानं प्राप्नोति। प्रागुक्तप्रणिपातादिस्तु बाह्यः, मायाविनाऽपि सम्भवादनैकान्तिकः। श्रद्धावत्त्वादिस्त्वैकान्तिक इत्यर्थः। एतादृशोपायेन **लब्ध्वा**, **अचिरेणैव** ज्ञानाव्यवहितोत्तरकालेनैव **पराम्** अविद्यानिवृत्तिपूर्वकस्वस्वरूपानन्दाविर्भावरूपां[2] मुक्तिम् **अधिगच्छति**।

[1] भगवज्ज्ञानेन [2] अविद्यातत्कार्यनिवृत्तिरूपाम् **इति मधुसूदनसरस्वतीये**

यथा दीपोदयोत्तरकाल एवान्धकारनिवृत्तिः, न विलम्बेन, तथा भगवदापरोक्ष्योदयकाल एव जीवानन्दाच्छादिकाविद्यानिवृत्तिः, नतु विलम्बेनेति भावः[1]॥ ३९॥

अत्र संशयो न कार्य इत्याह - **अज्ञ इति॥**

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥ ४०॥

अज्ञः अनधीतशास्त्रत्वेनात्मज्ञानशून्यः। गुरुवेदान्तवाक्ये 'इदमेवं न भवत्येव' इति विपर्ययरूपा नास्तिक्यधीः अश्रद्धा। तद्वान् **अश्रद्धधानः**। 'इदमेवं भवति न वा' इति संशयाक्रान्तचित्तः **संशयात्मा विनश्यति** स्वार्थाद्भ्रष्टो भवति। **नायं** मनुष्यलोकः **अस्ति** सर्वत्र संशयेन वित्तार्जनाद्यसम्भवात्। **न परो लोकः** स्वर्गमोक्षादिः। धर्मज्ञानाद्यभावात्। **न सुखं** भोजनादिकृतं **संशयात्मनः** सन्देहाक्रान्तचित्तस्य।

अज्ञस्याश्रद्धधानस्य च परो लोको नास्ति, ऐहिकं भोजनादिकृतं सुखं त्वस्ति। संशयात्मनस्तु नोभयम्। अत्यन्तपापीयानयमित्यर्थः॥ ४०॥

ज्ञानसाधनमनुवदन् ज्ञानमाह - **योग इति॥**

योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय॥ ४१॥

योगेन भगवदाराधनरूपसमत्वबुद्धिरूपेण सन्न्यस्तानि मयीश्वरे समर्पितानि कर्माणि येन तत्। ज्ञानेन = आत्मतत्त्वनिश्चयेन च्छिन्नः संशयो येन तम्। कुत एतत्? अत आह - **आत्मवन्तं** मयि भक्तिमन्तम्[2], अप्रमादिनम्, सदा

[1] यथाहि दीपः स्वोत्पत्तिमात्रेणैवान्धकारनिवृत्तिं करोति, नतु कञ्चित् सहकारिणमपेक्षते, तथा ज्ञानमपि स्वोत्पत्तिमात्रेणैवज्ञाननिवृत्तिं करोति, नतु किञ्चित् प्रसङ्ख्यानादिकमपेक्षत इति भावः।**इति मधुसूदनसरस्वतीये** [2] आत्मवन्तं परमात्मभक्तम्।**इति गीतातात्पर्ये**

सावधानं[1] वा। अप्रमादित्वेन ज्ञानवन्तं ज्ञानसञ्छिन्नसंशयत्वेन **योगसन्न्यास-कर्माणम्।** **कर्माणि** लोकसङ्ग्रहाद्यर्थानि क्रियमाणान्यपि **न निबध्नन्ति** इष्टमनिष्टं वा देहं नारभन्त इत्यर्थः॥ ४१॥

एवमुपदिष्टं कर्मकर्तृत्वमुपसंहरति - **तस्मादिति**॥

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥ ४२॥

अज्ञानात् = अविवेकात् उत्पन्नम्। **हृत्स्थं** मनसि स्थितम्। कारणस्याश्रयस्य च ज्ञाने सुखेन[2] विजेतुं शक्यत इत्युभयोक्तिः। सर्वानर्थमूलभूतम् 'अहं स्वतन्त्रः कर्ता पराधीनो वा?' इति **संशयम्।** **आत्मनः** परमेश्वरस्य स्वतन्त्रकर्तृत्वम्, ममाधीनमतोऽहमस्वतन्त्रकर्तेति **ज्ञानासिना** खड्गेन च्छित्वा **योगं** सम्यग्दर्शनोपायं मदाराधनरूपं निष्कामं कर्म कुरु। अत इदानीं स्वधर्माय युद्धायोत्तिष्ठ हे **भारत** ॥ ४२॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानयोगो नाम चतुर्थोऽध्यायः॥ ४॥

---

[1] आत्मवन्तम् अप्रमादिनं सर्वदा सावधानम्।**इति मधुसूदनसरस्वतीये** [2] शत्रुः सुखेनेति स्यात्।

अध्यायः 5

सन्न्यासयोगः

ज्ञानकर्माधिकारं हि सम्यङ्निर्णीय माधवः।
सन्न्यासं कर्मणां ब्रूते पञ्चमे करुणानिधिः॥

तत्र तृतीये ज्ञानानधिकृतस्य कर्मावश्यकृतान्तरुचिकृतस्य लोकसङ्ग्रहाद्यर्थं कर्मानुष्ठानं भवेत्। नत्वावश्यकत्वेनेत्युक्तम्। ज्ञानिनः कर्माधिकारे निश्चिते प्रारब्धवशात् कर्मानुष्ठानं सन्न्यासो वेति चतुर्थे निर्णीतम्। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन'[1] इत्यादिश्रुतेः, 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते'[2] इति भगवदुक्तेश्च ज्ञानार्थानि सर्वकर्माणि। तथा कर्मसन्न्यासोऽपि ज्ञानार्थं श्रूयते 'एतमेव[3] प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्'[4] 'त्यजतैव हितं ज्ञेयं त्यक्तुः [5] प्रत्यक् परं पदम्' 'सत्यानृते सुखदुःखे वेदानिमं लोकममुञ्च परित्यज्यात्मानमन्विच्छेत्' इत्यादौ। तत्रैकमेवाज्ञं जिज्ञासुं प्रति ज्ञानार्थत्वेन कर्मतत्त्यागयोर्विधानात्, तयोश्च युगपदनुष्ठानासम्भवात् मम किमिदानीमनुष्ठेयम् ? इति सन्दिहानोऽर्जुनः पृच्छति - **सन्न्यासमिति॥**

---

[1] **बृहदारण्यकोपनिषत्** ६.१४.२२ [2] **भगवद्गीता** ४.३३ [3] तमेव इति कोशयोः। [4] **बृहदारण्यकोपनिषत्** ४.४.२३ [5] त्यक्तं - आ

अर्जुन उवाच
संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्॥ १॥

हे **कृष्ण** सदानन्दविग्रह भक्तपापकर्षणेति वा। पक्वं मां प्रति नित्यादिकर्मणां **सन्न्यासं** त्यागं **शंससि** वदसि। 'एतमेव[1] प्रव्राजिनः' इत्यादिश्रुत्या 'योगसन्न्यस्तकर्माणम्'[2] इत्यादिगीतावाक्येनैव वा। **पुनश्च** 'तमेतं ब्राह्मणाः' इत्यादिवाक्येन 'योगमातिष्ठ'[3] इत्यादिगीतावाक्येन वा कर्मानुष्ठानं **शंससि** कथयसि। एकेन युगपद्विरुद्धयोरनुष्ठानासम्भवात् तयोर्मध्ये **यदेकं श्रेयः** प्रशस्ततरं कर्म तत्त्यागो वा, **तन्मे ब्रूहि सुनिश्चितं** तव मतमनुष्ठानाय सुनिश्चितं यथा स्यात् तथा ब्रूहीति वा॥ १॥

श्रीभगवानुवाच
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते॥ २॥

संन्यासः कर्मयोगश्च इति **उभौ** मोक्षरूपनिःश्रेयसकरौ। एकैनैवावस्थाभेदेनानुष्ठेयौ। **तयोः** कर्मसन्न्यासादपक्वज्ञानेन पुरुषेण कृतात् फलेच्छां विहाय **कर्मयोगो विशिष्यते** ॥ २॥

सन्न्यासस्य मोक्षसाधनत्वमुपपादयितुं सन्न्यासशब्दार्थं स्मारयति[4] - **ज्ञेय इति**॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते॥ ३॥

सः एव **नित्यसन्न्यासी ज्ञेयः**। कोऽसौ? यो भगवदर्पणबुद्ध्या क्रियमाणकर्मणि निष्फलत्वशङ्कया **न द्वेष्टि** स्वर्णादिकं च **न काङ्क्षति**। **निर्द्वन्द्वः** रागद्वेषरहितः **हि** यतः

[1] तमेव - आ [2] **भगवद्गीता** ४.४१ [3] **भगवद्गीता** ४.४२ [4] सन्न्यासस्य निःश्रेयसकरत्वं ज्ञापयितुं तच्छब्दार्थं स्मारयति। **इति मध्वभाष्यम्**

संसारबन्धात् **सुखम्** अनायासेन ज्ञानभक्तिप्रसादं लब्ध्वा प्रमुच्यत इत्यर्थः[1] ॥ ३॥

ननु कर्मानुष्ठाता कथं सन्न्यासी? त्यागानुष्ठानयोर्युगपद्विरोधादित्यत आह - **साङ्ख्येति**॥

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥ ४॥

सङ्ख्या सम्यगात्मबुद्धिः, तां निष्पादयतीति साङ्ख्यः = सन्न्यासः, योगः = कर्मानुष्ठानम्, तौ पृथक्फलौ **बालाः** शास्त्रार्थविवेकज्ञानशून्याः **प्रवदन्ति न पण्डिताः। एकमपि** सन्न्यासकर्मणोर्मध्ये **सम्यक्** अवस्थितः स्वाधिकारानुरूपेण सम्यक् यथाशास्त्रं कृतवान् सन् **उभयोः फलं** ज्ञानाद्युत्पत्तिद्वारा[2] **विन्दते** ॥ ४॥

कथम् ? तत्राह - **यदिति**॥

यत् साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति॥ ५॥

साङ्ख्यैः भगवज्ज्ञानाभ्यासपरैः, इह जन्मनि जन्मान्तरे वा कृतकर्मभिः शोधितान्तःकरणैः सन्न्यासिभिः श्रवणादिपूर्वकज्ञाननिष्ठया भगवत्प्रसादद्वारा **यत् स्थानं** वैकुण्ठाख्यं मोक्षरूपं स्वस्वरूपानन्दाविर्भावरूपं प्राप्यते। **योगैरपि** भगवदर्पणधिया फलेच्छारहितेन कृतानि कर्माणि स्वोचितानि योगास्ते विद्यन्ते येषां ते योगाः। अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः। तैः सन्न्यासश्रवाणादिकं प्राप्य तत्स्थानं गम्यते। अत एकफलत्वात् **सन्न्यासं च योगं च य एकं पश्यति सः** एव सम्यक् **पश्यति** ॥ ५॥

ननु प्रथमः सन्न्यास एव मुमुक्षुणा कुतो न क्रियते? ज्ञाननिष्ठाहेतुत्वेन तस्यावश्यकत्वात्। अत आह - **सन्न्यास इति**॥

---

[1] हि यस्मात् सुखमनायासेन हे महाबाहो बन्धात् अन्तःकरणाशुद्धिरूपात् ज्ञानप्रतिबन्धात् प्रमुच्यते। नित्यानित्यवस्तुविवेकादिप्रकर्षेण मुक्तो भवति। **इति मधुसूदनसरस्वतीये**

[2] ज्ञानोत्पत्तिद्वारा **इति मधुसूदनसरस्वतीये**

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥ ६॥

अयोगतः , योगो मदाराधनरूपमन्तःकरणशोधकं निष्कामकर्मानुष्ठानम्, तद्विना हठादेव कृतो यः **सन्न्यासः** , स **तु दुःखमाप्तुम्** एव भवति। अशुद्धान्तःकरणत्वेन तत्फलज्ञाननिष्ठाया असम्भवात् ज्ञानकर्मोभयभ्रष्टत्वं स्यादित्यर्थः। कर्मयोगयुक्तस्तु शुद्धान्तःकरणतया मननशीलः **मुनिः** सन्न्यासी **भूत्वा, ब्रह्म** बृहद्गुणं हरिम्, आविर्भूतबृहद्गुणकं स्वस्वरूपं च[1] **नचिरेण** शीघ्रमेव साक्षात्करोति, प्राप्नोति च॥ ६॥

ननु 'कर्मणा बध्यते जन्तुः'[2] इति कर्मणो बन्धकत्वश्रवणात् कथं ततो मोक्षः? अत आह - **योगेति**॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥ ७॥

फलेच्छाशून्यतया मदाराधानरूपकर्मयोगेन युक्तो **विशुद्धात्मा** रजस्तमोभ्यामकलुषितमनाः, अत एव जितबाह्यान्तरेन्द्रियत्वात् सन्न्यासयोगयुक्तोऽप्येतादृशस्य तत्त्वज्ञानमवश्यम्भवतीत्याह - **सर्वेति**॥ सर्वभूतानामात्मभूते मयीश्वरे सर्वान्तर्यामिणि आत्मा मनो यस्य सः **सर्वभूतात्मभूतात्मा**। [3] 'एष त आत्माऽन्तर्याम्यमृतः'[4] इति श्रुतेः। अन्तर्यामिण एव कारयितृत्वस्य स्वतोऽकर्तृत्वस्य च ज्ञानात् कर्मफललेपाभावादन्तःकरणशुद्धा सन्न्यासः, ततस्तत्त्वज्ञानमिति भावः।

मुमुक्षादशायां साधनत्वेन जीवन्मुक्तिदशायां प्रारब्धकर्मवशात् क्रियमाणैरपि कर्मभिः **न लिप्यते** ,[5] स्वस्य स्वतोऽकर्तृत्वानुसन्धानादिति भावः॥ ७॥

सन्न्यासमेव स्पष्टयति - **नैवेति द्वाभ्याम्**॥

---

[1] ब्रह्म सत्यज्ञानादिलक्षणमात्मानम्। **इति मधुसूदनसरस्वतीये** [2] सन्न्यासोपनिषत् २.२१
[3] सर्वभूत आत्मभूतश्चात्मा स्वरूपं यस्य स तथा। जडाजडात्मकं सर्वमात्ममात्रं पश्यन्नित्यर्थः। **इति मधुसूदनसरस्वतीये** [4] **बृहदारण्यकोपनिषत्** ३.७.३ [5] क्रियमाणन्यायिनुकि न लिप्यते कर्माणि न लिप्यन्ते - आ

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्छृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन्॥ ८॥

प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ ९॥

युक्तः नियमितबाह्यान्तरिन्द्रियः **तत्त्ववित्** 'अहं ज्ञानान्दस्वरूपः स्वतो निर्विकारः **नैव किञ्चित् करोमि' इति मन्येत** चक्षुरादिज्ञानेन्द्रियैर्वागादिकर्मेन्द्रियैः प्राणादिवायुभिरन्तःकरणचतुष्टयेन चेत्यन्तर्यामिप्रेरितैस्तत्तच्चेष्टासु क्रियमाणासु हरिप्रेरितेन्द्रियादीन्येव **इन्द्रियार्थेषु** स्वस्वविषयेषु **वर्तन्ते** प्रवर्तन्ते, नत्वहमिति यथावत् **धारयन्।**

तत्र दर्शनश्रवणस्पर्शनघ्राणरसनानि चक्षुःश्रोत्रत्वग्घ्राणरसनानां पञ्चज्ञानेन्द्रियाणां व्यापाराः **पश्यन् शृण्वन् स्पृशन् जिघ्रन्नशन्** इत्युक्ताः। गतिः पादयोः, प्रलापो वाचः, विसर्गः पायूपस्थयोः, ग्रहणं हस्तयोरिति पञ्चकर्मेन्द्रियव्यापाराः **गच्छन् प्रलपन् विसृजन् गृह्णन्** इत्युक्ताः। **श्वसन्निति** प्राणादिपञ्चकव्यापारोपलक्षणम्। **उन्मिषन् निमिषन्** इति नागकूर्मादिपञ्चकस्य। **स्वपन्** इत्यन्तःकरणचतुष्टयस्य।

अनाद्यविद्यया जीवस्य प्रवाहानाद्यदृष्टसम्बन्धः, ततो देहेन्द्रियादिष्वीश्वरे प्रेरितेषु जायमानं कर्मादिकं प्रागुक्तसम्बन्धेन वास्तवं जीवे समबध्यन्ते, ततोऽस्य संसारः निष्कामकर्मयोगादिनाराधितेश्वरप्रसादादविद्यानिवृत्तिः, ततो देहेन्द्रियजन्यकर्मादिष्वहंममेत्यभिमाननिवृत्त्याऽभिमानघटितस्य स्वस्वामिभावसम्बन्धस्य जीवान्तःकरणयोरभावेन कर्मादृष्टसुखदुःखादिकं प्रारब्धकर्मादिवशात् देहादौ क्षेत्रे जातमपि जीवे न सम्बद्ध्यते। एतादृगवस्था जीवन्मुक्तस्य भवति। मुमुक्षुणोक्तसम्बन्धेन दुःखादिमताऽपि तत्स्वरूपं सदा चिन्तयता स्वोचितं कर्म कार्यम्। मुक्तानां 'जक्षन् क्रीडन् रममाणः'[1] इति श्रुत्या क्रियात् साम्याधिक्येनेश्वरस्येव(?) 'निरञ्जनः परमं साम्यमुपैति'[2] इति

[1] **छान्दोग्योपनिषत्** ८.१२.१३ [2] **मुण्डकोपनिषत्** ३.१.३

श्रुत्या निर्मुक्तत्वनिर्लेपत्वपूर्णानन्दत्वादिना मुक्तस्येश्वरसाम्योक्तेरिति भावः॥ ८,९॥

ननु वृक्षोत्पन्नदण्डेन संयोगेन पुरुषस्य वास्तवदण्डित्वं यथा, तथा देहादावहंममेत्यभिमानवतो मुमुक्षोर्वास्तवकर्मादृष्टदुःखादिसम्बन्धित्वात् कथं स्वस्याकर्तृत्वभावनामात्रेण तन्निवृत्तिः? नहि शुक्तौ रूप्यवत् कर्मकर्तृत्वादिकमात्मन्यारोपितं येन शुक्तित्वज्ञानाद्रजतमिव स्वस्याकर्तृत्वज्ञानात् तन्निवर्तेतेति। तत्राह - **ब्रह्मणीति**॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ १०॥

ब्रह्मणि सर्वेश्वरेऽन्तर्यामिणि मयि **आधाय** समर्प्य **सङ्गं** फलाभिलाषं **त्यक्त्वा** 'ईश्वरार्थे भृत्य इव स्वाम्यर्थे फलनिरपेक्षतया करोमि' इत्यभिप्रायेण **कर्माणि** लौकिकानि वैदिकानि चानिषिद्धानि **यः करोति, स पापेन** संसारहेतुस्वकृतदुःखात्मकेन कर्ममात्रेण **न लिप्यते। पद्मपत्रम्** उपरि प्रक्षिप्तेन **अम्भसा** न लिप्यते। एतादृशेन कर्मानुष्ठानेन भगवज्ज्ञानम्, तेन सेतुदर्शनेन सत्याया ब्रह्महत्याया यथा निवृत्तिः, तथा सत्याविद्याभिमानादेर्निवृत्तिरिति भावः॥ १०॥

तदेव विवृणोति - **कायेनेति**॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥ ११॥

कायेन मनसा बुद्ध्येन्द्रियैरपि योगिनः कर्मफलासक्तिं **त्यक्त्वा कर्म कुर्वन्ति**। कायादीनां सर्वेषां **केवलैः** इति विशेषणम् 'ईश्वरप्रीत्यै करोमि, नतु फलाय नेदं मदीयं कर्म' इत्यादिममताशून्यैरित्यर्थः। **आत्मशुद्धये** चित्तशुद्ध्यर्थम्॥ ११॥

ननु कर्मकर्तृत्वाविशेषेऽपि कथमेकस्य मोक्षः, परस्य बन्धः कर्मणा? इत्यत आह - **युक्त इति**॥

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते॥ १२॥

युक्तः जितेन्द्रियः, विषयभोगालम्पटो भगवत्प्रीत्यर्थमिदं कर्म न मम फलायेत्यभिप्रायवान् **कर्मफलं त्यक्त्वा** , कर्माणि कुर्वन् **शान्तिं** मोक्षाख्यां **नैष्ठिकीं** सत्त्वशुद्धिं श्रवणमनननिदिध्यासनापरोक्षप्रसादनिष्ठाक्रमेण जाताम्।[1] यस्तु **अयुक्तः** अजितेन्द्रियः, उक्ताभिप्रायशून्यः सः **कामकारेण** कामतः प्रवृत्त्या मम फलायैवेदं कर्म करोमीति **फले सक्तो निबद्ध्यते** तत्तत्कर्मफलभोगाय नीचोच्चयोनिं नितरां गच्छतीत्यर्थः॥ १२॥

अपक्वकषायस्यास्थिरचित्तस्य कर्मयोगः श्रेयानिति पूर्वं प्रपञ्च्य, अधुना पक्वकषायस्य शुद्धचित्तस्य सन्न्यास एव श्रेयानित्याह - **सर्वेति॥**

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन् न कारयन्॥ १३॥

देही देहेन्द्रियादावहंममेत्यभिमानशून्यः नित्यं नैमित्तिकं काम्यं निषिद्धं चेति सर्वाणि **मनसा** स्वस्य स्वतोऽकर्तृत्वं निश्चिन्वन् 'ईश्वरकारितानीमानि **नवद्वारे** सेन्द्रिये देहे जायन्ते, न मयि' इति देहे **सन्न्यस्य न कुर्वन् न कारयन्** वा **आस्ते**। किन्तु स्वस्य देहादितो भिन्नतयाऽकर्तृत्वादिना[2] ज्ञानेन **सुखमास्ते**। कुतः ? यतो **वशी** नियमितबाह्यान्तरेन्द्रियः। कर्मकर्तृत्वं कारयितृत्वं च जीवस्य देहाद्यभिन्नतयाऽभिमानात् भवति। तन्निवृत्तौ पूर्णानन्दस्य स्वतो निर्विकारस्य तदुभयं न सम्भवतीति भावः॥ १३॥

ननु यदुक्तं 'नैव किञ्चित् करोमीति मन्येत' इति, सा भ्रान्तिः। 'कर्ता शास्त्रार्थवत्त्वात्'[3] इति सूत्रेण जीवस्य कर्मकर्तृत्वोक्तेः। तथा च कथं भ्रान्तिरूपज्ञानान्मोक्षः ? तदुपदेष्टुर्विप्रलम्भकत्वप्रसङ्गश्चेत्याशङ्कानिरासाय श्रीहरिप्रेरित एव कुर्वन् कारयन्नपि स्वातन्त्र्येण न करोति कारयति चेत्युच्यत इत्याह - **नेति॥**

[1] नैष्ठिकीं सत्वशुद्धिं नित्यानित्यवस्तुविवेकसन्न्यासज्ञाननिष्ठाक्रमेण जाताम्। **इति मधुसूदनसरस्वतीये** [2] भिन्नतया नन्दयतोऽकर्तृत्वादिना - आ [3] **ब्रह्मसूत्रम्** २.३.३३

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥ १४॥

देहेन्द्रियाद्यपेक्षया **प्रभुः** समर्थो जीवः **लोकस्य** देहेन्द्रियादेः **कर्तृत्वं न सृजति**। **कर्माणि** स्वयं न सृजति। **न कर्मफलसंयोगं** सम्बन्धं स्वस्यात्यल्पं वा सृजति। कर्मकर्तृत्वाभावादेव कर्मजन्यफलसम्बन्धो नास्तीत्यर्थः। स्वं = जीवं भावयति = व्यापारयतीति **स्वभावः** परमेश्वरः,[1] स एव मरुतः स्वयं करोति कर्म नाहं स्वातन्त्र्येण किञ्चित् करोमि, तदधीनकर्मणैवाहं विहितकर्मकृदिति भावयन्नेव **प्रवर्तते** इत्यर्थः। 'एष ह्येव साधु कर्म कारयति तं यमुन्निनीषते। एष उ वाऽसाधु कर्म कारयति तं यमधोनिनीषते' इत्यादिश्रुतेः।

'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥' इति स्मृतेश्च।[2]

नच भगवान् कांश्चित् सुखयति दुःखयति च कांश्चिदिति विषमो निर्घृणश्च स्यादिति वाच्यम्। 'वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति'[3] इति सूत्रेण 'पुण्येन पुण्यं लोकं नयति पापेन पापम्'[4] इति श्रुत्या च जीवादृष्टसापेक्षकर्तृत्वोक्त्या वैषम्याद्यसम्भवात्। नच विविध कर्मापि तेनैव कारितमिति वैषम्यादिकं तदवस्थमिति वाच्यम्। पूर्वपूर्वकर्मसापेक्षेणैवोत्तरं हि कर्म कार्यते। कर्मणां प्रवाहानादित्वेन दोषाभावात्। नचैवमागतं जीवस्य कर्मादौ स्वातन्त्र्यम्। पूर्वपूर्वकर्मणामपि जीवेनेश्वरप्रेरितेनैव कृतत्वात्। नचैवं जीवस्य स्वर्गनरकादिभोगो न स्यात्, तस्य कर्माभावादिति वाच्यम्। अनाद्यविद्यादेहेन्द्रियकर्मादृष्टादावहंममेति प्रवाहानाद्यभिमानः, ततः प्रागुक्तसम्बन्धेन कर्तृत्वादृष्टसुखदुःखादेर्वृक्षोत्पन्नदण्डस्य संयोगेन पुरुष इव[5] वास्तवस्य जीवे विद्यमानत्वात्। अतोऽविद्यया सम्बन्धादीश्वराधीनत्वात् स्वतोऽकर्तृत्वाज्जीवस्य कर्तृत्वादिबोधकवाक्यद्वयमप्युपपन्नमिति भावः॥ १४॥

एवं प्रवृत्तस्य सन्न्यासिनः फलमाह - **नादत्त इति**॥

[1] स्वयमेव भवति भावयति चेति स्वभावो भगवान्। **इति गीतातात्पर्ये** [2] **शिवपुराणम्** ७.१.५। उत्तरार्धः अग्निपुराणेऽपि पठ्यते २१६.१४ [3] **ब्रह्मसूत्रम्** २.१.३४ [4] **षट्प्रश्नोपनिषत्** ३.७
[5] दण्डित्वं पुरुष इवेत्यर्थः।

नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥ १५॥

अयं परापरात्मतत्त्वज्ञानी **कस्यचित्** देहादेः **पापं सुकृतं च नादत्ते** न भुङ्क्ते। कर्मादृष्टसुखदुःखादीनां क्षेत्रं देहेन्द्रियान्तःकरणादिकम्, बीजं प्रवाहानाद्यदृष्टम्, वृष्टिस्थानीयो भगवान्, अविद्यावान् जीव अभिमानिकः फलभोक्ता, अविद्यानिवृत्तावभिमाने च निवृत्ते देहेन्द्रियाद्युत्पन्नकर्मजन्यं पापफलं दुःखं सुकृतफलं सुखं नादत्ते। क्षेत्रे त्यक्ताभिमानकृषिकारस्येव तस्य तत्रासङ्गत्वात्। नहि कृषिकारेण यत्नादुदितादपि विक्रयादिना त्यक्ताभिमानात् कृष्यादितो नष्टात् समृद्धाद्वा कृषिकारस्य दुःखादिकं भवति।

ननु सर्वप्रेरकमनन्तगुणं सर्वेश्वरं स्वान्तःस्थं[1] स्वस्वरूपमिव सर्वे जीवाः कुतो न जानन्ति? इत्यत आह - **अज्ञानेनेति॥ अज्ञानेन** यथार्थज्ञानविरोधिनाऽविद्याख्येनानाद्येन नित्यं जीवस्वरूपात्मकं **ज्ञानं** भगवद्विषयकम् **आवृतम्। तेन** हेतुना **जन्तवो मुह्यन्ति** सर्वेश्वरस्य सर्वप्रेरकस्यानन्दघनस्य स्वतो कर्तुः[2] यथार्थज्ञानाभावं प्राप्नुवन्तीत्यर्थः।

नित्यं भगवद्विषयकं स्वस्वरूपविषयकं च जीवे स्वरूपभूतं ज्ञानमस्ति। अविद्यया तस्येश्वरविषयतायाः स्वविषयतायाश्च सम्बन्धरूपायाः प्रतिबन्धान्नेश्वरस्वस्वरूपयोर्यथार्थस्फूर्तिः। श्रवणादिजन्यभगवद्विषयकापरो वान्तःकरणवृत्तिप्रागभावनाश एव जीवस्वरूपज्ञानमज्ञानस्योक्तज्ञेयेन सह सम्बन्धः नित्यस्यापि ज्ञानविशेषादेर्हरिप्रसादस्य जीवे सनाश एव सम्बन्धः। तथा च यथा श्रवणमनननिदिध्यासनजन्यापरोक्षरूपा भगवद्गतविशेषविषयिकान्तःकरणवृत्तिः, तथा भगवत्प्रसादस्य जीवे सम्बन्धः, तथैवाविद्याशैथिल्यं स्वानन्दाविर्भावश्च। स्वयोग्याशेषभगवद्गतविशेषापरोक्ष्ये च हरेर्महाप्रसादः, तेनाशेषाविद्यानिवृत्तिः पूर्णस्वानन्दाविर्भावश्च।

मायिनां वृत्तिश्चिदुपरागार्थेति मते सर्वगतनित्यायाश्चितोऽपि वटादिना वृत्तिद्वारक एव सम्बन्धो जायते न स्वतः, तार्किकमते सर्वगस्यापि गोत्वादेः

---

[1] स्वतन्त्रम् - पा. [2] स्वख्यवद्वैचित्यम् इत्यधिकं कोशे।

सास्नादिमत्येव सम्बन्धो केशरादिमति यथा, तथा नित्यस्य जीवस्वरूपज्ञानस्य श्रवणादिजन्यहर्यपरोक्षरूपाया अन्तःकरणवृत्तेः प्रागभावस्य नाशे सत्येव ज्ञेये परेशे जीवे च सम्बन्धो जायते। एवं नित्यस्यापि ज्ञानादिविशेषस्य हरिप्रसादयुक्तवृत्तिप्रागभावनाशे सत्येव जीवे सम्बन्धो जायत इति भावः॥ १५॥

नन्वीश्वरज्ञानस्याज्ञानावृतत्वे योगादिकं साधनं व्यर्थम्। तत्राह - **ज्ञानेनेति**॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥ १६॥

ज्ञानेन श्रवणमनननिदिध्यासनाकं श्रीहरिगुरुभक्तिसहितं श्रीहर्यवान्तरप्रसादसहकृतं च यत् साधनं तज्जन्येन स्वयोग्यभगवद्गताशेषविषयकेणापरोक्षरूपेण **आत्मनः** जीवस्वरूपस्याच्छादकम् **अज्ञानं येषां नाशितम्, तेषां** स्वरूपभूतं **ज्ञानम्** अनावृतं सत्, यत् परं ब्रह्म **तत् प्रकाशयति** विषयीकरोति। यथाऽऽदित्यो लोकं प्रकाशयति, तद्वत्।

तथा च प्रथमं श्रवणादिजन्यपरोक्षवृत्तिः, ततोऽन्तःकरणादिवृत्तिरूपं भगवदपरोक्षम्, ततो महाप्रसादः, ततो जीवं प्रतीश्वरजीवानन्दाद्याच्छादकाविद्यानिवृत्तिः, तत आदित्यप्रकाशवज्जीवेश्वरस्यानन्दादिविषयः प्रकाश इति भावः। **तेषाम्** इत्यनेन जीवानां मोक्षे बहुत्वं सिद्धम्॥ १६॥

भगवदपरोक्षज्ञानोत्पत्तावव्यवहितं साधनमाह[1] - **तदिति**॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ १७॥

तस्मिन् = सदनन्तगुणालये सकृत्पदारविन्दचिन्तनेनाखिलपुरुषार्थदे सर्वेश्वरे परमकारुणिके पुनःपुनः धारारूपा वेदान्तजन्या बुद्धिर्येषां ते। स

[1] अपरोक्षज्ञानाव्यवहितसाधनमाह। **इति मध्वभाष्यम्**

एवात्मा = परमप्रेमास्पदो येषां ते। तस्मिन् आत्मा = 'भगवानस्माकं स्वामीष्टदेवता' इति मनो येषामिति वा। तस्मिन् निष्ठा = कायिकवाचिकमानसव्यापारपर्यवसायान्ता येषां ते। महापद्यपि ततोऽचलत्वमित्यर्थः। क्रियामात्रस्य तत्प्रीत्यर्थमेवानुष्ठानमिति भावः। **तत्परायणाः** स एव परममयनम् = प्राप्योऽस्माकमिति धीमन्तः। तादृशसाधनैर्जातं यद्भगवदपरोक्षं ज्ञानं तेन निर्धूतमनाद्यविद्यारूपं कल्मषं ते **अपुनरावृत्तिम्** आविर्भूतस्वानन्दादिबृहद्गुणकाः सन्तः पुर्णानन्दत्वनिर्मुक्तत्वादिना भगवत्साम्यरूपां मुक्तिं प्राप्नुवन्तीत्यर्थः।

गच्छन्ति इत्यनेन जीवानां मुक्तावणुत्वं सिद्धम्। नहि विभोर्गमनं सम्भवति। मध्यमपरिमाणत्वे चानित्यत्वं स्यादित्यणुत्वमेव सिद्ध्यति। 'एषोऽणुरात्मा चेतसा वेदितव्यः'[1] इत्यदिश्रुतेः। 'सोऽस्माच्छरीरादुत्क्रम्यामुं लोकं गच्छति अमुष्मादिमं लोकमागच्छति' इति गमनश्रुतेः। नच बुद्धिगतं गमनादिकमात्मन्युपचर्यत इति वाच्यम्। 'प्रद्योतेनैष आत्मा निष्क्रामति' इति निष्क्रमणस्यात्मनिष्ठत्वोक्तेः। 'तद्यथा नः सुसमाहितमुत्सर्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जद्याति'[2] इति श्रुतौ स्वाभाविकगत्याश्रयशकटदृष्टान्तोक्तेश्च। नचाणोः देहस्यैकदेशे स्थितस्य युगपत् सर्वाङ्गे दुःखाद्यनुभवापत्तिः। गुणिनोऽणुत्वेऽपि दीपप्रभावद्गुणेन व्याप्त्या भोगोपपत्तेः। नच गुणिनं विहाय गुणस्यावस्थितिर्न युक्तेति वाच्यम्। धर्मिणं विना जातिसमुदायादेररुणादिरेकैकैव व्यक्तिरिति मीमांसकमते आरुण्यादेरवस्थानात्। नच जात्यादिवज्ज्ञानस्यापि व्यापकत्वं स्यात्। स्यादेव हि यदि मानं स्यात्। देह एव तत्कार्योपलब्ध्या तावद्व्याप्तिः कल्प्यते। नच प्रभा द्रव्यान्तरम्। दीपे नष्टे क्षणचतुष्टयावस्थानापत्तेः। पुष्पं विहाय गन्धस्य गमनाच्च। नच पुष्पपरमाणवो गच्छन्तीति वाच्यम्। पुष्पकस्तूर्यादेः क्षयापत्तेः। नच पुनर्द्रव्योत्पत्तिः। पुनरुत्पत्तेरप्रामाणिकत्वात्। सगन्धस्य द्रव्यस्योत्पत्त्या गन्धह्रासप्रत्ययानापत्तेः। देहैकदेशपतितचन्दनबिन्दुना कृत्स्नदेहशैत्यवदणोरपि कृत्स्नदेहभोगोपपत्तेः। अलातचक्रवदुपपत्तेश्च॥ १७॥

सर्वत्रान्तर्यामितया स्थितस्य भगवतः साम्यज्ञानं विषमदेहादिस्थितानां साम्यज्ञानं च भक्तिप्रसादद्वारा मुक्तिहेतुरित्याह - **विद्येति**॥

---

[1] **मुण्डकोपनिषत्** ३.१.९ [2] **बृहदारण्यकोपनिषत्** ४.३.३५

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥ १८॥

विद्या वेदार्थज्ञानं ब्रह्मज्ञानं वा, **विनयः** निरहङ्कारत्वमनौद्धत्यम्, ताभ्यां सम्पन्ने ब्रह्मविदि विनीते च **ब्राह्मणे** सात्त्विके सर्वोत्तमे तथा **गवि** राजस्यां मध्यमायाम्, तथा **हस्तिनि शुनि श्वपाके च** अत्यन्ततामसे सर्वाधमे सत्त्वादिगुणैः तज्जैः संस्कारैरस्पृष्टमेव **समम्** अन्तर्यामिणं तत्तुल्यं जीवतत्त्वं च द्रष्टुं शीलं येषां ते **समदर्शिनः**।

सर्वत्र जीवेषु तत्प्रेरके च समत्वदर्शनेन रागद्वेषादिराहित्येन श्रवणादिकमनुतिष्टन्तः क्रमेण मुक्ता भवन्तीति भावः[1]॥ १८॥

ते जीवन्मुक्ता भवन्तीत्याह - **इहेति॥**

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः॥ १९॥

येषाम् उक्तसाम्ये **मनः स्थितम् तैरिहैव** जन्मनि **सर्गः** जन्मादिरूपः संसारो जितः। ननु विषमस्य वस्तुनः समदर्शनमात्रेण कथं मुक्तिः? तत्राह - **निर्दोषमिति॥ हि** यतः **परं ब्रह्म** निर्दोषत्वात् **समम्** , जीवाख्यमपि तत्तुल्यत्वात् **समम्** , अतः **समदर्शिनः** सर्वत्र समब्रह्मदर्शित्वात् जीवेष्वीश्वरनियम्यज्ञानानन्दनिर्विकारत्वादिना साम्यदर्शित्वेन द्वेषादिराहित्याच्च **ब्रह्मणि स्थिताः** अपरोक्षीभूते ब्रह्मण्येवास्थिताः, तेषां तादृशदृष्ट्यव्यवहितकाल एव परब्रह्मापरोक्ष्यं भवतीति भावः॥ १९॥

अतःपरमध्यायशेषेन योगसन्न्यासज्ञानानि मेलयित्वा प्रपञ्चयति।[2] तत्रादौ सन्न्यासं प्रपञ्चयति - **न प्रहृष्येदिति॥**

---

[1] यथा गङ्गातोये तडागे सुरायां मूत्रे वा प्रतिबिम्बतस्यादित्यस्य न तद्गुणदोषसम्बन्धः, तथा ब्रह्मणोऽपि चिदाभासद्वारा प्रतिबिम्बितस्य नोपाधिगतगुणदोषसम्बन्ध इति प्रतिसन्दधाना सर्वत्र समदृष्ट्यैव रागद्वेषराहित्येन परमानन्दस्फूर्त्या जीवन्मुक्तिमनुभवन्तीत्यर्थः । **इति मधुसूदनसरस्वतीये**

[2] सन्न्यासयोगज्ञानानि मिलित्वा प्रपञ्चयत्यध्यायशेषेण। **इति मध्वभाष्यम्**

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः॥ २०॥

आत्मभिन्नं **प्रियं प्राप्य न प्रहृष्येत्, अप्रियं प्राप्य नोद्विजेत्।** परमानन्दस्वरूपे ब्रह्मणि निमग्नचित्तत्वात्। ज्ञातात्मतत्त्वस्यात्मव्यतिरिक्तप्रियाप्रियप्राप्त्ययोगान्न तन्निमित्तौ हर्षविषादावित्यर्थः। कीदृशः? **स्थिरबुद्धिः** स्थिरा निश्चला सन्नासपूर्वकवेदान्तविचारपरिपाकेन संशयशून्यत्वेन निश्चयरूपा ब्रह्मणि बुद्धिर्यस्य सः। श्रवणमनननिदिध्यासनादिफलप्राप्तेः प्रागिति यावत्। **असम्मूढः** निदिध्यासनेन विजातीयप्रत्ययानन्तरितरसजातीयप्रत्ययप्रवाहरूपेण विपरीतभावनाख्यसम्मोहरहितः। ततः प्रतिबन्धापगमाज्ञातेश्वरावन्तरप्रसादात् **ब्रह्मवित्** अनन्तगुणालयपरमेश्वरसाक्षात्कारवान्। 'मया प्रसन्नेन तवार्जुनेदं रूपं परम् दर्शितमात्मयोगात्'[1] इति प्रसादस्य ज्ञानहेतुत्वं वक्ष्यति। ततो महाप्रसादयुक्तः आविर्भूतबृहदानन्दादिगुणके **ब्रह्मणि** स्वस्वरूपे **स्थितः**। 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'[2] इति श्रुतेः। जीवन्मुक्तस्येदं स्वाभाविकम्। मुमुक्षुणा समदर्शनादिना प्रहर्षादिकं त्याज्यमिति भावः[3]॥ २०॥

ननु बाह्यविषयास्यानेकजन्मानुभूतत्वेन प्रबलत्वात् तदासक्तचित्तस्य कथमलौकिके ब्रह्मणि चित्तस्थितिः? तत्राह - **बाह्येति॥**

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥ २१॥

इन्द्रियैः स्पृशन्त इति **स्पर्शाः** शब्दादयः। ते च बाह्याः, अनात्मधर्मत्वात्। तेषु **असक्तात्मा** अनासक्तचित्तः। **आत्मनि** स्वस्मिन्निन्द्रियान्तःकरणा-

[1] **भगवद्गीता** ११.४७ [2] **छान्दोग्योपनिषत्** ८.३.४ [3] अद्वितीयात्मदर्शनमेव विवृणोति - **स्थिरेति॥** स्थिरबुद्धिः स्थिरा निश्चला सन्न्यासपूर्वकवेदान्तवाक्यविचारपरिपाकेन सर्वसंशयशून्यत्वेन निर्विचिकित्सा निश्चिता ब्रह्मणि बुद्धिर्यस्य स तथा। लब्धश्रवणमननफल इति यावत्। एतादृशस्य सर्वासम्भावनाशून्यत्वेऽपि विपरीतभावनाप्रतिबन्धात् साक्षात्कारो नोदेतीति। निदिध्यासनमाह - **असम्मूढ इति॥** असम्मूढः निदिध्यासनस्य विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहस्य परिपाकेन विपरीतभावनाख्यसम्मोहरहितः, ततः सर्वप्रतिबन्धापगमात् ब्रह्मवित् ब्रह्मसाक्षात्कारवान्, ततश्च समाधिपरिपाकेन निर्दोषे समे ब्रह्मण्येव स्थितो नान्यत्रेति जीवन्मुक्तः स्थितप्रज्ञ इत्यर्थः। एतादृशस्य द्वैतदर्शनाभावात् प्रहर्षोद्वेगौ न भवत इत्युचितमेव। साधकेन तु द्वैतदर्शने विद्यमानेऽपि विषयदोषदर्शनादिना प्रहर्षविषादौ त्याज्यावित्यभिप्रायः। **इति मधुसूदनसरस्वतीये**

दिविक्षेपाभावात् समाध्यादावभिव्यक्तं तात्कालिकं **यत्सुखं विन्दति। ब्रह्मयोगः** प्रसादाख्यब्रह्मसम्बन्धः, तेन युक्तः **आत्मा** स्वरूपम्। यद्वा, ब्रह्मणि **योगः** तैलधारावदविच्छिन्नापरोक्षान्तःकरणवृत्तिः, तया युक्त **आत्मा** चित्तं यस्य सः। कदाचिदिन्द्रियाद्यविक्षेपेण बद्धदशायां कदाचित् कदाचित् स्फुरति, तदेव **अक्षयम्** निवृत्तावरणमनवरतम् **अश्नुते**। तेनैव स्वरूपभूतेन स्वयोग्यतया पूर्णानन्दमनुभवतीत्यर्थः। तस्मादात्मीयाक्षयसुखानुभवार्थी सन् [1] क्षणिकायाः महानरकानुबन्धिन्याः सकाशादिन्द्रियाणि निवर्तयेत्। तावतैव ब्रह्मणि स्थितिर्भवतीति भावः॥ २१॥

बाह्यविषयप्रीतिनिवृत्तौ आत्माक्षयसुखानुभवः, तस्मिंश्च सति महानन्दानुभवेन क्षुद्रानन्दे प्रीतिनिवृत्तिरित्यन्योन्याश्रयात् कथं स्वरूपानन्दानुभवः? इत्याशङ्क्य विषयदोषदर्शनाभ्यासादेव तत्प्रीतिनिवृत्तिर्भवतीत्याह[2] - **ये हीति**॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥ २२॥

हि यतः **ये संस्पर्शजाः** विषयेन्द्रियसम्बन्धजाः **भोगाः** क्षुद्रसुखानुभवाः। इह वा परत्र वा रागद्वेषादिव्याप्तत्वात् **दुःखयोनय एव ते**। सर्वेऽपि ब्रह्मलोकपर्यन्तं दुःखयोनय एव।

'यावतः[3] कुरुते जन्तुः सम्बन्धान् मनसः प्रियान्।
तावन्तोऽस्य निषण्यन्ते हृदये शोकसङ्कवः॥' इति श्रीवैष्णवोक्तेः।[4]

एतादृशा अपि न स्थिराः, किन्तु **आद्यन्तवन्तः**। आदिः विषयेन्द्रियसंयोगः, अन्तश्च तद्वियोगः; तौ विद्येते येषां ते। अतः **तेषु बुधः** विवेकी **न रमते**। 'परिणामतापसंकारदुःखैः गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः'[5] इति पतञ्जलिनाऽप्युक्तम्।[6] 'न संसारे सुखगन्धोऽस्ति' इति बुद्ध्वा ततः सर्वाणीन्द्रियाणि निवर्तयेदिति भावः॥ २२॥

---

[1] बाह्यविषयप्रीतिः (सत्वाख्यविषयप्रीतिः ?) इत्यधिकं कोशे। [2] .टीत्याशयेनाह - आ [3] यावन्तः - पा. [4] **विष्णुपुराणम्** १.१७.६६ [5] **इति पात न्जलयोगसूत्रम्** २.१५ [6] श्रीपतञ्जलिनाऽप्युक्त - आ.

सन्न्यासविरोधी महानर्थावाप्तिहेतुः कामो महतां जेय इत्याह - **शक्नोतीति॥**

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥ २३॥

आत्मनोऽनुकूलेषु सुखहेतुषु दृश्यमाणेषु श्रूयमाणेषु स्मर्यमाणेषु वा तद्गुणानुसन्धानाभ्यासेन यो रत्यात्मकोऽभिलाषो लोभः स कामः। यद्वा, स्त्रीभोगतृष्णा कामः, धनतृष्णा लोभः। अत एव 'कामः क्रोधस्तथा लोभः'[1] इति पृथक् वक्ष्यति। इह तु तृष्णासामान्याभिप्रायेण कामशब्दः प्रयुक्त इति लोभः पृथङ्नोक्तः। एवमात्मनः प्रतिकूलेषु दृश्यमाणेषु श्रूयमाणेषु स्मर्यमाणेषु वा तद्दोषानुसन्धानाभ्यासेन यः प्रज्वलनात्मको द्वेषो मन्युः स क्रोधः। तयोरुत्कटावस्था लोकवेदविरोधप्रतिसन्धानप्रतिबन्धकतया प्रवृत्त्युन्मुखत्वरूपा नदीवेगसाम्येन वेग इत्युच्यते। यथा नद्या वेगो वर्षास्वतिप्रबलतया विरोधप्रतिसन्धानेनानिच्छन्तमपि[2] गर्ते पातयित्वा निमज्जयति चाधो नयति च। तथा कामक्रोधयोरपि वेगो विषयाभिध्यानाभ्यासेन वर्षाकालस्थानीयेनातिप्रबललोकवेदविरोधप्रतिसन्धानेनानिच्छन्तमपि गर्ते[3] पातयित्वा संसारसमुद्रे मज्जयति चाधो महानरकान् नयति चेति वेगपदप्रयोगेण सूचितम्। एतादृशं कामक्रोधोद्भवं वेगमन्तःकरणप्रक्षोभरूपं स्तम्भस्वेदाद्यनेकबाह्यलिङ्गं **प्राक् शरीरविमोक्षणात्** शरीरविमोक्षणपर्यन्तमनेकनिमित्तवशात् सर्वदा सम्भाव्यमानं विस्रम्भणीयमन्तरुत्पन्नमात्रम्। **इहैव** च बहिरिन्द्रियरूपाद्गर्तपतनात् प्रागेव यो यतिधीरस्तिमिङ्गिल इव नदीवेगं विषयदोषदर्शनाभ्यासेन वशीकारसञ्ज्ञाकवैराग्येण **सोढुम्** तदनुकूलकार्यासम्पादनेऽनर्थकं कर्तुं **शक्नोति** समर्थो भवति, **सः** एव **युक्तः** योगी, **सः** एव **सुखी**, सः एव **नरः** पुमान् पुरुषार्थसम्पादनात्। इहोत्पन्नयोः कामक्रोधयोः वेगसहने प्रस्तुते तयोरनुत्पत्तिमात्रे न दृष्टान्त इति॥ २३॥

जीवन्मुक्तस्य लक्षणमाह - **योऽन्त इति॥**

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।

[1] भगवद्गीता १६.२१ [2] लोकवेदविरोधप्रतिसन्धानेना.. -पा. [3] विषयगर्ते **इति मधुसूदनसरस्वतीये**

स योगी ब्रह्म निर्बाणं ब्रह्मभूतोऽधिगच्छति॥ २४॥

अन्तः बाह्यविषयनिरपेक्षमन्तरेवाभिव्यक्तस्वरूपसुखं यस्य सः **अन्तःसुखः**। आत्मन्यभिव्यक्तस्वरूपानन्द एवारामो रमणं क्रीडा यस्य, नतु स्त्र्यादिविषयेषु सुखसाधने सः **अन्तरारामः**। कुत एतत्? अत आह - **अन्तर्ज्योतिरेव यः**॥ अन्तरेवात्मनि ज्योतिर्विज्ञानं न बाह्येन्द्रियैः यस्य सः **अन्तर्ज्योतिः**। एवकारो विशेषणत्रयेऽपि सम्बद्ध्यते। असम्प्रज्ञातसमाधौ प्रतिभासकाभावान्न शब्दादीनामनुभवः। व्युत्थानकाले बाह्यदर्शनेऽपि चित्तविक्षेपाभावात् ब्रह्मदर्शनापेक्षया बाह्यदर्शनस्य दग्धपटन्यायेन वर्तमानस्यापि प्राचुर्यव्यावृत्तिः।[1] **स योगी** ब्रह्मणि परमानन्दघने स्वरूपे निर्वाणं समाप्तिं निर्वृत्तिरूपं सुखं स्वस्वरूपम् **ब्रह्माधिगच्छति**।[2]

नन्वब्रह्मभूतस्य कथम् ब्रह्मभावः? अतः ब्रह्मभूतः ब्रह्मत्वस्य बृहद्गुणकत्वस्यैतन्निष्टस्याविद्ययाऽऽवृतस्य, अविद्यानाशे तदाविर्भूतं भवति। 'ब्रह्मविद् ब्रह्मैव भवति'[3] इति श्रुतेः। यथा भृङ्गं ध्यात्वा कीटो भृङ्गो भवति[4] तद्वत्। अन्येषां तु[5] चिन्मात्रस्य सदा स्फुरणात् तद्भिन्नस्यावृतस्य पश्चादाविर्भवनीयस्य विशेषणस्याभावादसङ्गतोऽयं ग्रन्थः॥ २४॥

पापक्षयादेवैतादृशं ज्ञानं भवतीत्याह - **लभन्त इति**॥

लभन्ते ब्रह्मनिर्बाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥ २५॥

प्रथमं निष्कामकर्मभिरीश्वराराधनरूपैः **क्षीणकल्मषाः** ततोऽन्तःकरणशुद्धा **ऋषयः** सूक्ष्मवस्तुविवेकसमर्थाः सन्न्यासिनः। ततः श्रवणादिपरिपाकेन **छिन्नद्वैधाः**

---

[1] समाधिकाले शब्दादिप्रतिभासाभावात् व्युत्थानकाले तत्प्रतिभासेऽपि मिथ्यात्वनिश्चयान्न बाह्यविषयैस्तस्य सुखोत्पत्तिसम्भव इत्यर्थः। **इति मधुसूदनसरस्वतीये** [2] स एवं यथोक्तविशेषणसम्पन्नः स योगी समाहितः ब्रह्म निर्वाणं ब्रह्म परमानन्दघनरूपं कल्पितद्वैतोपशमरूपत्वेन निर्वाणं तदेव कल्पिताभावस्याधिष्ठानात्मकत्वात् अविद्यावरणनिवृत्त्याऽधिगच्छति नित्यप्राप्तमेव प्राप्नोति। यतः सर्वदैव ब्रह्मभूतो नान्यः। 'ब्रह्मैव सन् ब्रह्माप्येति' इति श्रुतेः। 'अनवस्थितेरिति काशकृत्स्नः' इति न्यायाच्च।**इति मधुसूदनसरस्वतीये** [3] **मुण्डकोपनिषत्** ३.२.९ [4] कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः। याति तत्सात्मतां राजन् पूर्वरूपमसन्त्यजन्॥ (भा. ११.९.२३) [5] मधुसूदनसरस्वतीनामित्यर्थः।

निवृत्तसर्वसंशयाः, ततो मनननिदिध्यासनाभ्यां संयतात्मानः परमात्मन्येवैकाग्रचित्ताः सर्वभूतेषु भगवतोऽन्तर्यामिणो दृष्ट्याऽऽत्मसर्वदर्शनात् **सर्वभूतहिते रताः**[1] स्वहितवत् सर्वभूतहितं वाञ्छन्तीत्यर्थः। एतादृशा **ब्रह्मनिर्वाणम्** ब्रह्मणि निवृत्तिं **लभन्ते। लभन्ते** इत्यनेन मुक्तानां बहुत्वं स्पष्टमुक्तम्[2] ॥ २५॥

पूर्वं कामक्रोधयोरुत्पन्नयोरपि वेगः सोढव्य इत्युक्तम्। अधुना तु तयोरुत्पत्तिप्रतिबन्ध[3] एव कर्तव्य इत्याह - **कामेति॥**

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्बाणं वर्तते विदितात्मनाम्॥ २६॥

कामक्रोधयोः वियोगः तदनुत्पत्तिरेव तद्युक्तानां कामक्रोधवियुक्तानां **यतचेतसां यतीनाम्** यत्नशीलानां सन्न्यासिनां **विदितात्मनाम्** साक्षात्कृतपरमात्मनां **अभितः** उभयत जीवतां मृतानां च तेषां **ब्रह्मनिर्वाणं** मोक्षो वर्तते॥ २६॥

परमेश्वरार्पितकर्मणाऽन्तःकरणशुद्धिः, ततः श्रवणादिजन्यं ज्ञानं, ततः सन्न्यासः, ततोऽविच्छिन्नस्नेहपूर्वकभगवदापरोक्ष्यम्म्, ततः प्रसादः, ततो मोक्ष इत्युक्तम्।[4] अधुना **स योगी ब्रह्मनिर्वाणम्** इत्यत्र सूचितं ध्यानयोगं सम्यग्दर्शनस्यान्तरङ्गं साधनं विस्तरेण वक्तुं सूत्रस्थानीयांस्त्रीन् श्लोकानाह। षष्टे एतस्यैव प्रपञ्चः। तत्र द्वाभ्यां सङ्क्षेपेण योग उच्यते। तृतीये तु तत्फलं परमात्मज्ञानमित्याशयेनाह - **स्पर्शानिति॥**

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥ २७॥

स्पर्शान् शब्दादीन् **बाह्यान्** बहिर्भवानपि श्रोत्रादिद्वारा तत्तदाकारान्तःकरणवृत्तिभिरन्तःप्रविष्टान् पुनर्बहिरेव **कृत्वा** परवैराग्यवशेन तत्तदाकारान्तःकरणवृत्तिमनुत्पाद्येत्यर्थः। अन्तःस्वभावानामुपायसहस्रेणापि बहिर्भावो न सम्भवति,

[1] द्वैतादर्शित्वेन सर्वभूतहिते रताः। **इति मधुसूदनसरस्वतीये** [2] बहुवचनं 'तद्यो यो देवानाम्' इत्यादिश्रुत्युक्तनियमप्रदर्शनार्थम्। **इति मधुसूदनसरस्वतीये** [3] तयोरुत्पत्तिबन्ध -अ. [4] पूर्वमीश्वरार्पितसर्वभावस्य कर्मयोगेनान्तःकरणशुद्धिः, ततो सर्वकर्मसन्न्यासः, ततः श्रवणादिपरस्य तत्त्वज्ञानं मोक्षसाधनमुदेतीत्युक्तम्। **इति मधुसूदनसरस्वतीये**

स्वभावभङ्गप्रसङ्गात्। बाह्यानां रागतोऽन्तःप्रविष्टानां वैराग्येण पुनर्बहिर्भावः स्यादिति दर्शयितुं **बाह्यान्** इत्युक्तम्। वैराग्यमुक्त्वा, अभ्यासमाह। **चक्षुश्चैवान्तरे भ्रुवोः कृत्वा** इत्यनुषङ्गः। अत्यन्तनिमीलने हि निद्राख्या लयात्मिका वृत्तिरेका भवेत्। प्रसारणे तु प्रमाणविपर्ययविकल्पस्मृतयश्चतस्रो विक्षेपात्मिका वृत्तयो भवेयुः। पञ्चापि वृत्तयो निरोद्धव्या इत्यर्धनिमीलनेन भ्रूमध्ये चक्षुषो निधानम्। तथा **प्राणापानौ समौ** तुल्यौ ऊर्ध्वाधोगतिविच्छेदेन **नासाभ्यन्तरचारिणौ** कुम्भकेन कृत्वेत्यर्थः॥ २७॥

[1]यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥ २८॥

उक्तोपायेन संयता इन्द्रियमनोबुद्धयो येन सः। **मोक्षपरायणः** सर्वविषयविरक्तः। **मुनिः** मननशीलः। **विगतेच्छाभयक्रोधः** व्याख्यातं प्राक्।[2] एतादृशो देहादौ वर्तमानोऽपि **मुक्त एव सः** ॥ २८॥

एतादृशमहोपायेन किं ज्ञेयम् ? यज्ज्ञानान्मुक्तिः, तत्राह -

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ २९॥

सर्वेषां यज्ञानां तपसां **भोक्तारं** यज्ञादिरूपां पूजां गृहीत्वा तत्फलदातारमित्यर्थः।[3] सर्वेषां लोकानां महान्तमीश्वरं हिरण्यगर्भादीनामपि नियन्तारं सर्वेषां **भूतानां** प्राणिनां **सुहृदं** प्रत्युपकारनिरपेक्षतयोपकारिणं सर्वान्तर्यामिणं परिपूर्णसच्चिदानन्दैकरसं **मां ज्ञात्वा शान्तिम्** मुक्तिं **ऋच्छति** प्राप्नोति।[4]

महेश्वरम् इत्यनेन 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्ति, अभिसंविशन्ति'[5] इत्युक्तं जगदुदयादिकर्तृत्वम्, 'सत्यं

[1] जितेन्द्रिय.. - पा. [2] विगतेच्छाभयक्रोध इति वीतरागभयक्रोधः(२.५६) इत्यत्र व्याख्यातम्। **इति मधुसूदनसरस्वतीये** [3] सर्वेषां यज्ञानं तपसां च कर्तृरूपेण भोक्तारं भोगकर्तारम्। **इति मधुसूदनसरस्वतीये** [4] सर्वप्रत्ययसाक्षिणं नारायणं मां प्रत्यगभेदेन ज्ञात्वा साक्षात्कृत्य तद्भावं प्राप्य शान्तिमनुपाध्यवस्थां निरुपाख्यां कैवल्यसञ्ज्ञां ऋच्छति प्राप्नोति।**इति मधुसूदनसरस्वतीये**
[5] **तैत्तिरीयोपनिषत्** ३.१

ज्ञानमनन्तं ब्रह्म'[1] इत्युक्तं सत्यत्वादिकं मुमुक्षूणां ज्ञेयमुक्तम्। अनेन निर्विकल्पकब्रह्मज्ञानं श्रुतिजन्यं मोक्षहेतुरिति वदन्तो निरस्ताः।

नच जगत्कर्तृत्वादिकं शाखाचन्द्रन्यायेन तटस्थलक्षणम्, सत्यत्वमेव स्वरूपलक्षणमिति वाच्यम्। सत्यत्वादेर्हि स्वरूपभिन्नत्वे मिथ्यात्वे चाङ्गीकारे कर्तृत्वतुल्यत्वापत्त्या स्वरूपलक्षणत्वासम्भवात्। सत्यत्वे चाद्वैतहानेः। तेषां ब्रह्माभिन्नत्वे लक्षणत्वासम्भवात्। नहि घटो घटस्य लक्षणम्। शाखोपस्थाप्यचन्द्रगतप्रकृष्टप्रकाशस्येव कर्तृत्वाद्युपस्थाप्यस्य धर्मस्य त्वन्मते ब्रह्मण्यभावेन कर्तृत्वासम्भवाच्च। अतो यावद्द्रव्यभावित्वरूपं स्वरूपलक्षणमेव। जगदुत्पत्त्याद्यनुकूलकृतिरूपस्य कर्तृत्वस्य भगवति सदा सत्वेऽपि प्रधानेन तत्सम्बन्धापादाकस्य सृष्ट्यादिकालस्य सदा सत्वाभावान्न सदा सृष्ट्याद्यापत्तिरिति॥ २९॥

हरेराराधकैर्ज्ञेयो हरिर्नान्यैः कदाचन।
तज्ज्ञानादेव मुक्तिः स्यान्नान्यथेत्युक्तवान् हरिः॥

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे पञ्चमोऽध्यायः॥ ५॥

[1] तैत्तिरीयोपनिषत् २.२.१

अध्यायः 6

ध्यानयोगः

पञ्चमान्तेऽवदद्योगं सङ्क्षेपेण रमापतिः।
तस्य व्याख्यानरूपोऽयं षष्ठाध्यायः प्रतन्यते॥[1]

तत्र सर्वकर्मानादरेण योगनिष्ठा वक्तव्या। तत्र त्याज्यत्वेन कर्मयोगस्य हीनत्वशङ्का स्यात्। तन्निरासायाधिकारिणां कर्मयोगं स्तौति - **अनाश्रित इति द्वाभ्याम्**॥

श्रीभगवानुवाच
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥ १॥

कर्मणां फलं **अनाश्रितः** अनपेक्षमाणः सन्, **कार्यं** स्वस्य कर्तव्यतया शास्त्रेण विहितं नित्यमग्निहोत्रादि **कर्म करोति यः**, **सः** कर्म्यपि[2] **सन्न्यासी च योगी च** इति।

---

[1] योगसूत्रं त्रिभिः श्लोकैः पञ्चमान्ते यदीरितम्।
षष्टस्त्वारभतेऽध्यायस्तद्व्याख्यानाय विस्तरात्॥**इति मधुसूदनसरस्वतीये**

[2] सकर्माऽपि - पा..

सन्न्यासो हि त्यागः। चित्तगतविक्षेपाभावश्च योगः। तौ चास्य स्तः। फलत्यागात् फलतृष्णारूपचित्तविक्षेपाभावाच्च। कर्मफलतृष्णात्याग एवात्र गौण्या वृत्त्या सन्न्यासयोगशब्दाभ्यामभिधीयते सकामानपेक्ष्य प्राशस्त्यकथनाय। एतादृशकर्मानुष्ठातुः सन्न्यासयोगौ अवश्यंसम्भाविनौ इत्यर्थः। अतो यद्यपि **न निरग्निः** नाग्निसाध्यश्रौतकर्मत्यागी। **न** वा **निष्क्रियः** नाग्निनिरपेक्षश्रौतस्मार्तक्रियात्यागी। तथाऽपि सन्न्यासी योगी चेति मन्तव्यः। अत्र **अक्रियः** इत्यनेनैव सर्वकर्मसन्न्यासिनि लब्धे **निरग्निः** इति व्यर्थं स्यादित्यग्निशब्देन सर्वाणि कर्माण्युपलक्ष्य निरग्निरिति सन्न्यासी, क्रियाशब्देन चित्तवृत्तीरुपलक्ष्य अक्रिय इति निरुद्धचित्तवृत्तिर्योगी च कथ्यते। तेन न निरग्निः सन्न्यासी मन्तव्यः, न चाक्रियो योगी मन्तव्य इति यथासङ्ख्यमुभयव्यतिरेको दर्शनीयः। एवं सति नञ्द्वयमप्युपपन्नमिति द्रष्टव्यम्॥ १॥

असन्न्यासेऽपि सन्न्यासपदप्रयोगनिमित्तं गुणयोगमाह - **यमिति॥**

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन॥ २॥

यं कर्मतत्फलपरित्यागं **सन्न्यासमिति प्राहुः** श्रुतयः 'पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इत्याद्याः, **योगं** फलेच्छाकर्तृत्वाभिमानयोः त्यागेन विहितकर्मानुष्टानं **तं सन्न्यासं विद्धि।** 'अब्रह्मदत्तमित्याह तं वयं मन्यामहे ब्रह्मदत्तसदृशोऽयम्' इति न्यायात्, अन्यवाचकशब्दोऽन्यत्र प्रयुज्यमानः सादृश्यं बोधयति गौण्या वृत्त्या। सादृश्यमेवाह - **नहीति॥ हि** यतः **असन्न्यस्तसङ्कल्पः** अत्यक्तफलसङ्कल्पः कश्चिदपि **योगी न भवति।** अपि तु, सर्वो योगी त्यक्तफलसङ्कल्प एव भवतीति फलत्यागसाम्यात् तृष्णारूपचित्तवृत्तिनिरोधसाम्याच्च गौण्या कर्म्यैव सन्न्यासी च योगी च भवतीत्यर्थः। तदाह भगवान् पतञ्जलिः 'योगश्चित्तवृत्तिनिरोधः'[1] इति॥ २॥

ननु किं प्रशस्तत्वात् कर्मयोग एव यावज्जीयमनुष्टेयः? तत्राह - **आरुरुक्षोरिति॥**

[1] पातञ्जलसूत्रम् १..२

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते॥ ३॥

योगं भगवति चित्तैकाग्र्यं[1] **आरुरुक्षोः** आरोढुमिच्छोः **मुनेः** शास्त्रविहिताग्निहोत्रादि **कर्म** भगवदर्पणधिया कृतं **कारणम्** आरोहणे साधनम् **उच्यते** अनुष्टेयमुच्यते वेदमुखेन मया। **योगारूढस्य** चित्तैकाग्र्यं प्राप्तस्य **तस्यैव** प्राक् कर्मिणोऽपि सतः **शमः** कर्मसन्न्यास एव भगवादापरोक्ष्ये मुख्यं **कारणं** साधनम् **उच्यते** ॥ ३॥

कदा योगारूढः स्यात् ? तत्राह - **यदेति॥**

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते॥ ४॥

यदा चित्तसमाधानकाले **इन्द्रियार्थेषु** शब्दादिषु **कर्मसु** च नित्यनैमित्तिककाम्यनिषिद्धेषु **नानुषज्जते** स्वस्य स्वतोऽकर्तृत्वानुसन्धानादाविर्भूतस्वरूपानन्दानुभवेन चेतरप्रयोजनाभावात् 'अहमेतेषां कर्ता, ममैतेर्भोग्याः' इत्यभिनिवेशरूपमनुषङ्गं न करोति **हि** यतः, तस्मात् **सर्वसङ्कल्पसन्न्यासी** सर्वेषां सङ्कल्पानां 'इदं मया कर्तव्यम्, अनेनैतत् फलं भोक्तव्यम्' इत्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां कामानां तत्साधनानां च कर्मणां त्यागशीलः, **तदा** शब्दादिषु कर्मसु चानुषङ्गस्य तद्धेतोश्च सङ्गल्पस्य योगारोहणप्रतिबन्धकस्याभावाद्योगं भगवति तैलधारावन्निश्चलामेकाग्रचित्तवृत्तिमारूढो **योगारूढः** इत्युच्यते॥ ४॥

यो यदेवं योगारूढो भवति तदा तेनैवात्मा संसारादुद्धृत इत्याह - **उद्धरेदिति॥**

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥ ५॥

[1] योगम् अन्तःकरणशुद्धिरूपं वैराग्यम्। **इति मधुसूदनसरस्वतीये**

आत्मना वेदान्तश्रवणादिना वासितेन मनसा **आत्मानं** स्वं जीवं संसाराब्धौ निमग्नम् **उद्धरेत्** विषयसङ्गपरित्यागेन योगारूढतां प्रापयेत्। नतु विषयासक्त्या **अवसादयेत्** संसारसमुद्रे मज्जयेत्। **हि** यतः, **आत्मैव** मन एव **आत्मनः** जीवस्य **बन्धुः** हितकारी संसारान्मुक्तिहेतुः, **आत्मैव** मन एव **आत्मनः** स्वस्य जीवस्य **रिपुः** अहितकारी।

'मन एव मनुष्याणां हेतुर्बन्धमोक्षयोः[1]
बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः॥' इति स्मृतेः[2]॥ ५॥

आत्मनः शतृत्वमित्रत्वे विवृणोति - **बन्धुरिति॥**

बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥ ६॥

येन जीवेन **आत्मना** धृत्या **आत्मा** मनोदेहेन्द्रियादिः **जितः**, तस्मात् मनो जीवस्य **आत्मनो बन्धुः। अनात्मनः** निर्जितमनस्कस्य पुरुषस्य **आत्मैव** मन एव **शत्रुत्वे** शत्रुभावेन **वर्तेत शत्रुवत्** बाह्यशत्रुवत्॥ ६॥

जितात्मनो बन्धुत्वमाह - **जितेति॥**

जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥ ७॥

शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्स्वपि **तथा मानापमानयोः** पूजानादरयोः चित्तविक्षेपहेत्वोः सतोरपि तेषु समत्वेन **जितात्मनः** प्रागुक्तजितमनस्कस्य **प्रशान्तस्य** रागद्वेषशून्यस्य पुरुषस्य **परमात्मा** परमेश्वरः समाधिविषयो भवति। अतो जितात्मा प्रशान्तश्च भवेदिति भावः॥ ७॥

[1] कारणं बन्धमोक्षयोरिति तु पुराणपाठः सर्वाभिमतः। [2] **विष्णुपुराणम्** ६..७..२८

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥ ८॥

ज्ञानम् शास्त्रीयम्, **विज्ञानम्** [1] श्रवणमनननिदिध्यासनाज्ञातं भगवदापरोक्ष्यम्[2], ताभ्यां **तृप्तः** सञ्जातालम्प्रत्ययः **आत्मा** चित्तं यस्य सः। तथा **कूटस्थः** विषयसन्निधावपि विकारशून्यः। अत एव विजितानि रागद्वेषपूर्वकविषयग्रहणाद्व्यावर्तितानीन्द्रियाणि येन सः। अत एव हेयोपादेयधीशून्यत्वेन समानि मृत्पिण्डकाषाणकाञ्चनानि येन सः। योगी भवति निरुद्धचित्तः स **युक्तः** योगारूढ इत्युच्यते॥ ८॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥ ९॥

सुहृत् प्रत्युपकारमनपेक्ष्य पूर्वस्नेहसम्बन्धं च विनैवोपकर्ता। **मित्रं** स्नेहेनोपकारकः। **अरिः** स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता। **उदासीनः** विवदमानयोरुभयोरप्युपेक्षकः। **मध्यस्थः** विवदमानयोरुभयोरपि हितैषी। **द्वेष्यः** स्वकृतापकारमपेक्ष्यापकर्ता। **बन्धुः** सम्बन्धेनोपकर्ता। एतेषु। **साधुषु** शास्त्रोक्तकारिषु **पापेषु** शास्त्रनिषिद्धकारिषु चकारादन्येषु च सर्वत्रान्तर्यामिणो दृष्ट्या जीवानां समत्वदृष्ट्या च **समः** रागद्वेषशून्यः स **विशिष्यते** सर्वत उत्कृष्टो भवति[3] एतादृशसमत्वबुद्धिः मोक्षे श्रेष्टसाधनमिति सा सदाऽभ्यसनीयेति भावः॥ ९॥

योगारूढस्य लक्षणं फलं चोक्त्वा तस्य साङ्गं योगं विधत्ते - **योगीत्यादि स योगी परमो मत इत्यन्तेन॥**

योगी युञ्जीत सततमात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥ १०॥

[1] ज्ञानं शास्त्रोक्तानां पदार्थानामौपदेशिकं ज्ञानम्, विज्ञानं तदाप्रामाण्यशङ्कानिराकरणफलेन विचारेण तथैव तेषां स्वानुभवेनापरोक्षीकरणम्। **इति मधुसूदनसरस्वतीये** [2] श्रवणान्मननाच्चैव यज्ज्ञानमुपजायते। तज्ज्ञानं दर्शनं विष्णोर्विज्ञानं शम्भुरब्रवीत्॥ **इति मध्वभाष्यम्**

[3] एतेषु साधुषु शास्त्रविहितकारिषु पापेषु शास्त्रप्रतिषिद्धकारिष्वपि चकारादन्येषु च सर्वेषु समबुद्धिः कः कीदृक्कर्मेत्यव्यापृतबुद्धिः सर्वत्र रागद्वेषशून्यः विशिष्यते सर्वत्र उर्कृष्टो भवति। **इति मधुसूदनसरस्वतीये** ।

योगी योगारूढः **आत्मानं** चित्तं **सततं** निरन्तरं **युञ्जीत** क्षिप्तमूढविक्षिप्तभूमित्रयपरित्यागेनैकाग्रनिरोधभूमिभ्यां परमानन्दे भगवति समाहितं कुर्यात्। 'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः' इति योगभाष्यम्। अस्यार्थः। क्षिप्तं रजसा विषयेष्वेव बुद्धिमत्। मूढं तमसा निद्रादिवृत्तिमत्। क्षिप्ताद्विशिष्टं विक्षिप्तम्, सत्वाधिक्येन समं दधदपि चित्तं रजोमात्रयान्तराविषयान्तरवृत्तिमत्। एकस्मिन्नेव विषये अग्रं शिखा यस्य चित्तदीपस्येत्येकाग्रम्, सम्प्रज्ञातसमाधिप्राप्तम्। निरुद्धं निरुद्धसकलवृत्तिकं संस्कारमात्रशेषमसम्प्रज्ञातसमाधिप्राप्तमित्यर्थः। **रहसि** गिरिगुहादौ योगप्रतिबन्धकदुर्जनादिवर्जितदेशे **स्थितः** , **एकाकी** , त्यक्तसर्वग्रहपरिजनः[1] **चित्तम्** अन्तःकरणं **आत्मा** देहश्च संयतौ योगविरोधिव्यापारशून्यौ यस्य सः। **निराशीः** वैराग्यदार्ढ्येन विगततृष्णः। अत एव **अपरिग्रहः** शास्त्राभ्यानुज्ञातेनापि योगविरोधिपरिग्रहेण शून्यः॥ १०॥

तत्रासननियममाह - **शुचाविति द्वाभ्याम्**॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥ ११॥

शुचौ स्वभावतो वा संस्कारतो वा शुद्धगङ्गातटगुहादेशे समे स्थाने **प्रतिष्ठाप्य** , **स्थिरं** निश्चलं **नात्युच्छ्रितं** नात्युच्चं **नाप्यतिनीचं चैलाजिनकुशोत्तरं** चैलं = मृदुवस्त्रम्, अजिनम् = मृदुव्याघ्रादिचर्म, ते कुशेभ्य उत्तरे उपरितने यस्मिन् तत्। आस्यतेऽस्मिन्निति **आसनम्**। कुशोपर्यजिनं तदुपरि चैलमित्यर्थः। **आत्मनः** इति परासनव्यावृत्त्यर्थम्॥ ११॥

ततः किम् ? अत आह - **तत्रेति**॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥ १२॥

तस्मिन् **आसने उपविश्य** एव, नतु शयानः तिष्टन् वा। 'आसीनः सम्भवात्'[2] इति सूत्रात्। **यताः** संयताः चित्तस्येन्द्रियाणां च **क्रियाः** वृत्तयो येन

---

[1] त्यक्तसर्वपरिग्रहपरिजनः - पा.., त्यक्तसर्वगृहपरिजनः - पा..। [2] **ब्रह्मसूत्रम्** ४..१..७

सः। तथा **योगं** भगवति समाधिं[1] **युञ्जीत** अभ्यसेत्। किमर्थम् ? **आत्मविशुद्धये**, **आत्मनः** चित्तस्य लयविक्षेपशून्यत्वेन, अतिसूक्ष्मतया स्थिरत्वेन चेश्वरसाक्षात्कारयोग्यत्वाय। 'दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः'[2] इति श्रुतेः। किं कृत्वाऽभ्यसेत् ? तत्राह - **एकाग्रं** राजसतामसमिश्रभूमित्रयपरित्यागेनैकविषयधारावाहिकानेकवृत्तियुक्तचित्तमुद्रिक्तसत्वं **मनः कृत्वा** भगवदाकारमनोवृत्तिप्रवाहं निदिध्यासनाख्यं **योगम्** अभ्यसेदित्यर्थः॥ १२॥

बाह्यासनमुक्त्वा, अधुना तत्र कथं शरीरधारणमित्युच्यते - **सममिति**॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ १३॥

कायः शरीरमध्यम्, स च शिरश्च ग्रीवा च **कायशिरोग्रीवम्** मूलाधारादारभ्य मूर्धपर्यन्तं **समम्** अवक्रम्, **अचलम्** अकम्पम् **धारयन्**, **स्थिरः** दृढप्रयत्नो भूत्वा **स्वं** स्वीयं **नासिकाग्रं सम्प्रेक्ष्य** एव लयविक्षेपराहित्यात् विषयाप्रवृत्तिरनिमीलितनेत्र इत्यर्थः। **दिशश्चानवलोकयन्** अन्तरान्तरा दिशां वाऽवलोकनमकुर्वन्, योगविरोधित्वात् तस्य। एवम्भूतः सन् **आसीनः** इत्युत्तरेणान्वयः॥ १३॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥ १४॥

प्रकर्षेण शान्तः = रागादिदोषरहितः आत्मा = मनो यस्य सः। शास्त्रीयनिश्चयदार्ढ्यात् **विगतभीः** सर्वकर्मत्यागे युक्तत्वायुक्तत्वशङ्का विघ्नशङ्का च यस्य सः। **ब्रह्मचारिव्रते स्थितः** ब्रह्मचर्यगुरुशुश्रूषया भिक्षाभोजनादौ स्थितः सन्, **मनः संयम्य** विषयाकारवृत्तिशून्यं कृत्वा **मयि** सदनन्तगुणालये सकलवेदान्तप्रतिपाद्येऽन्तर्यामिणि सर्वेश्वरे शरणागतवत्सले[3] विषयान्तरं विहाय चित्तं यस्य सः। पुत्रादौ प्रियान्तरे चिन्तनीये विद्यमाने त्वय्येव कथं चित्तवृत्तिः स्यात् ? तत्राह - **मत्परः**। अहमेव परमानन्दरूपत्वात् परः पुरुषार्थो यस्य सः। 'तदेतत्

---

[1] योगं समाधिम्।**इति मधुसूदनसरस्वतीये** [2] **कठोपनिषत्** ३..१२ [3] मयि परमेश्वरे प्रत्यक्चिति सगुणे निर्गुणे वा। **इति मधुसूदनसरस्वतीये**

प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरन्तरं यदयमात्मा' इति श्रुतेः। कश्चित् स्त्रीचित्तो नतु स्त्रियमाराध्यत्वेन गृह्णाति, किन्तु राजदेवादिकम्। कश्चित् राजादिकमाराध्यत्वेन नत्वहर्निशं तदेकचित्तः।अयं त्वाराध्यत्वेन मां गृह्णन्, अहर्निशं तैलधारावत् प्रवाहेन मदेकचित्तश्चेति भावः[1]॥ १४॥

ततः किं स्यात् ? अत आह - **युञ्जन्निति**॥

युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥ १५॥

एवम् उक्तप्रकारेण **आत्मानं युञ्जन्** अभ्यासवैराग्याभ्यां समाहितं कुर्वन् **योगी सदा** योगाभ्यासपरोऽभ्यासातिशयेन नियतं = निरुद्धं मानसं = मनो येन सः। **निर्वाणात्** लिङ्गदेहनाशात् **परमाम्** उत्तरकालिकीं **शान्तिं** विदेहमुक्तिम् **अधिगच्छति**। न केवलां जीवन्मुक्तिमेव। कीदृशीम् ? **मत्संस्थां** मत्साम्यरूपामित्यर्थः॥ १५॥

एवमभ्यासनिष्टस्याहारादिनियममाह - **नातीति द्वाभ्याम्**॥

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥ १६॥

यद्भुक्तं सञ्जीर्य्यति शरीरस्य च कार्यक्षमतां सम्पादयति तदात्मसम्मितमन्नम्। तदतिक्रम्य लोभेनाधिकम् **अश्नतो न योगोऽस्ति** , अजीर्णदोषेण व्याधिपीडनात्। **नचैकान्तमनश्नतः** त्यक्ताहारस्य **योगोऽस्ति** , निराहारादल्पाहाराच्च देहपोषणाभावेन कार्याक्षमत्वात्। 'यदु ह वा आत्मसम्मितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत् कनीयो न तदवति'[2] इति श्रुतेः। अतो योगी नात्मसम्मितादन्नादधिकं न्यूनं वाऽश्नीयादित्यर्थः।

यद्वा

[1] भवति कश्चिद्रागी स्त्रीचित्तो नतु स्त्रियमेव परत्वेनाराध्यत्वेन गृह्णाति, किं तर्हि ? राजानं वा देवं वा। अयं तु मच्चित्तो मत्परश्च सर्वाराध्यत्वेन मामेव मन्यत इति भाष्यकृतां व्याख्या।
व्याहृक्यातृत्वेऽपि मे नात्र भाष्यकारेण तुल्यता।
गुञ्जायाः किं नु हेमैकतुलारोहेऽपि तुल्यता॥ **इति मधुसूदनसरस्वतीये**

[2] **शतपथब्राह्मणम्** १०.४.१

'पूरयेदशनेनार्धं तृतीयमुदकेन तु।
वायोः सञ्चारणार्थाय चतुर्थमवशेषयेत्॥'

इत्यादियोगशास्त्रोक्तपरिमाणादधिकं न्यूनं वा। अतो योगो न सम्पद्यत इत्यर्थः। तथाऽतिनिद्राशीलस्य, अतिजाग्रतश्च **योगो नैवास्ति।** एकश्चशब्द उक्ताहारातिक्रमसमुच्चयार्थः। यथोक्तं मार्कण्डेये[1] -

'नाध्मातः क्षुधितः श्रान्तो नच व्याकुलचेतनः।
युञ्जीत योगं राजेन्द्र योगी सिद्ध्यर्थमात्मनः॥

नातिशीते नचैवोष्णे न द्वन्द्वे नानिलान्विते।
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः॥' इति॥ १६॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ १७॥

युक्तौ = नियतपरिमाणौ आहारविहारौ यस्य। प्रणवादिजपोपनिषदावर्तादिकर्मसु युक्ता = नियतकाला चेष्टा यस्य। युक्तौ = नियतकालौ स्वप्नः = निद्रा अवबोधः = जागरः, तौ यस्य तस्य **योगो भवति** साधनपाटवात् समाधिर्भवति नान्यस्य। योगफलमाह - **दुःखहेति**॥ संसाररूपदुःखोच्छेदक इत्यर्थः॥ १७॥

योगसम्पूर्तिकालमाह - **यदेति**॥

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥ १८॥

---

[1] **मार्कण्डेयपुराणम्** ३९..४६-४७

यदा यस्मिन् काले वैराग्याभ्यासाभ्यां नियतं = निरुद्धं विगतरजस्तमस्कं चित्तं विषयान्तरादयत्नादेव व्यावृत्तम् **आत्मन्येव** परमानन्दघने सर्वेश्वरे[1] मय्येव **अवतिष्ठते**, **तदा** तस्मिन् काले स **युक्तः** समाहितः **इत्युच्यते**। कः? यः **सर्वकामेभ्यो निःस्पृहः** निर्गता दोषदर्शनेन सर्वेभ्यः दृष्टादृष्टविषयेभ्यः स्पृहा = तृष्णा यस्य सः॥ १८॥

भगवत्येकाग्रस्य वृत्त्यन्तरशून्यस्य चित्तस्योपमानमाह - **यथेति**॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥ १९॥

दीपचलनहेतुना वातेन रहिते देशे स्थितो **दीपो यथा नेङ्गते** न चलति **सोपमा स्मृता** स दृष्टान्तश्चिन्तितो योगज्ञैः। कस्येयमुपमा योगिनः भगवति सम्प्रज्ञातसमाधिमतः **यतचित्तस्य** तत्रैवासम्प्रज्ञातसमाधिमतः। सम्प्रज्ञातसमाधौ भगवदङ्गादिविषयकचित्तवृत्तयो जायन्ते। असम्प्रज्ञातसमाधौ चान्तःकरणवृत्तिमात्रस्योपरमाद्भगवत्प्रसादात् स्वरूपाच्छादिकाविद्यायाः शैथिल्येनाविर्भूतस्वरूपभूतज्ञानेन भगवन्तं स्वस्वरूपानन्दं चानुभवति। स्वरूपज्ञानस्याविर्भूतस्य तद्विषयकत्वस्वाभाव्यात् असम्प्रज्ञातसमाधौ बाह्यान्तरज्ञानस्याभावेन जन्यज्ञानासम्भवात्। अन्तःकरणवृत्तित्वाङ्गीकारेऽसम्प्रज्ञातात् तयोर्भेदस्योक्तिमात्रत्वापत्तेः। असम्प्रज्ञातसमाधावाविर्भूतस्वरूपभूतज्ञानानङ्गीकारे तस्यापुमर्थत्वापत्त्या तदर्थं प्रयत्नानापत्तेः।

कीदृशस्यैतादृशसमाधिः? तत्राह - **आत्मनः** परमानन्दमूर्तेः परमात्मनः **योगं युञ्जतः** विषयान्तरतो वैराग्येण चित्तवृत्तीर्व्यावृत्त्य भगवदेकाकाराः कुर्वतः॥ १९॥

एवं सामान्येन योगमुक्त्वा विस्तरेण निरोधसमाधिं विवरीतुमारभते - **यत्रेति**॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनाऽऽत्मानं पश्यत्यात्मनि तुष्यति॥ २०॥

[1] आत्मन्येव प्रत्यक्चिति अनात्मानुपरक्ते। **इति मधुसूदनसरस्वतीये**

यत्र योगसेवया योगाभ्यासपाटवेन योगपरिपाके जाते **चित्तं निरुद्धम्** एकविषयकवृत्तिप्रवाहरूपामेकाग्रतां त्यक्त्वा निरिन्धनाग्निवदुपशाम्यन्निर्वृत्तिकं सदुपरमते यत्र च चित्तोपरमावस्थायां **आत्मना** भगवत्प्रसादादाविर्भूतस्वस्वरूपज्ञानेन **आत्मानं** स्वं भगवन्तं च **पश्यति** , **आत्मनि** आविर्भूतस्वरूपानन्दे स्वस्मिन् भगवति वा तुष्यति, तं सर्वचित्तनिरोधरूपं 'योगं विद्यात्' इति परेणान्वयः।

"**यत्र योगसेवया चित्तं निरुद्धं** सर्ववृत्तिनिरोधरूपेण परिणतं भगवति यत्र च यस्मिंश्च परिणामे सति आत्मनान्तःकरणेनात्मानं प्रत्यक्चैतन्यं परमात्माभिन्नं सच्चिदानन्दमनन्तमद्वितीयं पश्यन् वेदान्तप्रमाणजन्यया वृत्त्या साक्षात्कुर्वन्नात्मन्येव तुष्यति"[1] इति। तदसत्। प्रमाणं विना चित्तवृत्तेरसम्भवात्। वृत्तिं विना परिणतचित्तावस्थाने मानाभावात्। किञ्चिद्विषयकवृत्तिरूप एव हि चित्तस्य परिणामः। असम्प्रज्ञातसमाधौ वृत्त्यात्मकज्ञानरूपक्रियाभावेनान्तःकरणे मानाभावाच्च। जीवपरेशयोरभेदस्य स्वरूपभिन्नस्य समाधौ भाने सम्प्रज्ञातत्वहानिः, अभेदस्य स्वरूपात्मकत्वे स्वरूपस्य त्वन्मते ज्ञानाद्यधिष्टानतया सुखादिसाक्षितया सदाभानात् साधनवैय्यर्थ्यात्। एकस्मिन् निर्विशेषे सच्चिदानन्दमद्वितीयमित्यादिपदानां वैय्यर्थ्यात्। सत्वादीनां ब्रह्मभिन्नानां भाने त्वद्वैतहानेः। वेदान्तजन्यवृत्तेरसम्प्राज्ञतसमाधावभावेन वेदान्तेत्युक्तेः तुच्छत्वाच्च। अहमिति ज्ञाने चैतन्यमात्रस्य भानात्। तदधिकस्य वेदान्तजन्यवृत्तावप्यभावात्, वेदान्तश्रवणादेरपि वैय्यर्थ्याच्च। नच विशिष्टमेव चैतन्यं प्रत्यक्षे भासते, न शुद्धमिति वाच्यम्। विशिष्टभाने विशेष्यभानस्यावश्यकत्वात्। नहि दण्डिनि भाते पुरुषो न भासते।

योगश्चित्तवृत्तिनिरोधः। स च द्विविधः। सम्प्रज्ञातोऽसम्प्रज्ञातश्चेति। सम्प्रज्ञाते ध्येयाकारा चित्तवृत्तिः। असम्प्रज्ञाते वृत्त्यभावः। स च चित्तस्यावस्थाविशेष एव। अभावस्याधिकरणात्मकत्वात्। ननु यत्किञ्चिद्वृत्तिनिरोधः सदैवास्ति। वृतिसामान्याभावश्च सम्प्रज्ञातसमाधौ नास्तीति योगश्चित्तवृत्तिनिरोध इति लक्षणमसम्भवीति चेन्न। 'यदा द्रष्टुः स्वरूपेऽवस्थानम्' इत्यग्रिमसूत्रसाहित्येनैतत्सूत्रस्य लक्षणबोधकत्वात्। द्रष्टुः स्वरूपावस्थितिहेतुश्चित्तवृत्तिनिरोधो हि लक्षणम्। व्युत्थानकालिको निरोधश्च न तद्धेतुः। सम्प्रज्ञातनि-

[1] मधुसूदनसरस्वत्यः।

रोधश्चासम्प्राज्ञातद्वाराऽस्त्येव स्वरूपावस्थाने हेतुः। तदुक्तम् - "सन्निरोधे त्वसम्प्रज्ञातं समाधिः तस्य लक्षणविधित्सयेदं सूत्रं योगश्चित्तवृत्तिनिरोधः। सर्वशब्दाग्रहणात् सम्प्रज्ञातोऽपि योग इत्याख्यायते" इति योगिनस्तेषामस्मदुक्तार्थ एव तात्पर्यम्।

सुखमेव हि पुरुषार्थम्। न तु दुःखाभावः। तस्यात्मनाशेऽपि सम्भवेन बौद्धाभिमतात्मनाशोऽपि मोक्षः स्यात्। 'रसो वै सः' 'रसं लब्ध्वाऽऽनन्दी भवति' 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'[1] 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'[2] इत्यादिश्रुत्या 'स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते'[3] 'सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्'[4] इत्यादिभगवदुक्त्या च सुखस्यैव पुरुषार्थत्वसिद्धेः।

ननु दुःखादिविषयकसाक्षिरूपज्ञानस्य नित्यत्वेन नाशासम्भवेन, अनुभवनाशं विना संस्कारानुत्पत्त्या कालान्तरेऽतीतदुःखादिस्मरणानुपपत्तिरिति चेन्न। ज्ञानज्ञेययोः सम्बन्धनाशस्यैव संस्कारजनकत्वात्। दुःखादीनां साक्षिविषयाणां नाशात् संस्कारोत्पत्तिः, स्मरणोत्पत्तिश्च। यत्र संस्कारस्मृत्योरुत्पत्तिः, तत्र स्वाश्रयाश्रयत्वसम्बन्धेन ज्ञानज्ञेयसम्बन्धस्य नाशः। स्वं ज्ञानज्ञेयसम्बन्धनाशः तदाश्रयो ज्ञानं ज्ञेयं च तदाश्रयोऽन्तःकरणं तदेव संस्कारस्मृत्योरधिकरणम्।

सुषुप्तौ स्वरूपसुखमेव गृह्यते। तच्च यद्यपि नित्यम्, ज्ञानमपि स्वरूपभूतं नित्यम्। तथाऽपि विषयाख्यसम्बन्धप्रयोजकस्य नाडीविशेषस्थभगवन्मूर्तिविशेषसम्बन्धस्य जाग्रदादावभावात् सम्भवति विषयताख्यसम्बन्धनाशः ततश्च संस्कारः। नचान्तःकरणानिष्ठेन साक्षिणा कथं तत्र संस्कारोत्पत्तिः? अनुभवसंस्कारयोः सामानाधिकरण्यनियमादिति वाच्यम्। अणुपरिमाणस्य साक्षिणोऽन्तःकरणनिष्ठत्वसम्भवात् साक्षिणोऽन्तःकरणे स्वादृष्टार्जितत्वादिकमेव वा विलक्षणं[5] फलबलकल्प्यसम्बन्धः।

नच 'गृहीतं चक्षुर्गृहीतं मनः' इत्यादिश्रुत्या सुषुप्तावन्तःकरणलय उक्तः। सङ्कल्पविकल्पादिरूपान्तःकरणवृत्तीनां लयोक्तेः। नच सुषुप्तावन्तःकरणसत्वे

---

[1] **तैत्तिरीयोपनिषत्** २..४..१ [2] **तैत्तिरीयोपनिषत्** २..१..१ [3] ५..२१ [4] **भगवद्गीता** ६..२१

[5] विलक्षणः - पा..

जन्यज्ञानापत्तिः। जन्यज्ञानमात्रप्रयोजकत्वगात्मसम्बन्धाभावात्। त्वचं विहायाणोरात्मनो नाडीस्थभगवन्मूर्तौ प्रवेशात्। 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं वेद नान्तरम्' इति श्रुतेः। बाह्यं रूपादि चक्षुरादिना, आन्तरं दुःखादि मनसा च न वेदेत्यर्थः।

मूर्छाप्रलयादौ तादृशविषयतानियामकसम्बन्धाभावान्न सुखप्रकाशः। स्वप्ने तूद्बुद्धसंस्कारसहकृतेन मनसा केषाञ्चित् पदार्थानां केषाञ्चित्तु साक्षिणा प्रकाशः। जागरे च साक्षिणा केषाञ्चित्, केषाञ्चित्तु प्रमाणान्तरैः प्रकाशः। समाधौ सम्प्रज्ञाते मानसमेव ज्ञानम्। असम्प्रज्ञाते स्वरूपावरकाविद्याया नाशे शैथिल्ये वा सति, आविर्भूतस्वरूपभूतज्ञानेन स्वस्वरूपानन्दस्य परमेश्वरस्य च विषयीकरणम्। तज्ज्ञानस्य वस्तुगत्या स्वस्वरूपेश्वरस्वरूपविषयकत्वात् सुषुप्ताविव भगवन्मूर्तिविशेषसम्बन्धो विषयतानियामकः। मुक्तौ वेदान्तजन्यभगवदपरोक्षज्ञानप्रागभावध्वंसो विषयतानियामकः॥ २०॥

आत्मन्येव तोषहेतुमाह - **सुखमिति॥**

सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥ २१॥

यत्र यस्मिन्नवस्थाविशेषे **आत्यन्तिकं** परिपूर्णं **सुखं यत् तत् बुद्धिग्राह्यं** भगवत्प्रसादादाविर्भूतस्वरूपज्ञानेनैव ग्राह्यं सुखं योगी **वेत्ति, अतीन्द्रियम्** इन्द्रियजन्यज्ञानाविषयम्। आत्मस्वरूपस्य मनसा सदा ग्रहेऽपि पूर्णानन्दत्वस्याविर्भूतस्वरूपज्ञानेनैव ग्राह्यत्वात्। **अयं** तादृशसुखानुभविता **यत्र** अवस्थायां **स्थितः, तत्त्वतः** आत्मस्वरूपात् पूर्णानन्दस्वरूपात् **न चलति** , तं योगसञ्ज्ञितं विद्यादिति परेणान्वयः।

यद्यपि तत् सुषुप्तावपि भासते। तथाऽपि सुषुप्तावावरणस्य नाडीविशेषस्थभगवन्मूर्तिसान्निध्येन किञ्चित् शैथिल्यमात्रेण किञ्चिदेव सुखं स्फुरति। न तु स्वरूपभूतज्ञानस्याविर्भावो येनाशेषसुखं भासेत॥ २१॥

उक्तमेवोपपादयति - **यमिति॥**

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते॥ २२॥

यं चित्तस्य निवृत्तिकतया लयाख्यावस्थाविशेषं पूर्णानन्दविषयकजीवस्वरूपभूतज्ञानाविर्भावकस्येश्वरप्रसादस्य जीवे सम्बन्धसम्पादकं **लब्ध्वा** प्राप्य निरन्तराभ्यासेन सम्पाद्य, **अपरं लाभं ततोऽधिकं न मन्यते**। 'कृतं कृत्यं प्राप्तं प्रापणीयमित्यात्मलाभान्न[1] परं विद्यते' इति स्मृतेः।

एवं विषयभोगवासनया समाधेर्विचालनं नास्तीत्युक्त्वा शीत-वात-मशकाद्युपद्रवनिवा तन्नास्तीत्याह। **यस्मिन्** हरिप्रसादाविर्भूतस्वरूपानन्दमये[2] चित्तावस्थाविशेषे **स्थितो योगी गुरुणा** महता शस्त्रपातादिनिमित्तेन महता **दुःखेन न विचाल्यते** ॥ २२॥

तं विद्याद् दुःखसंयोगवियोगं योगसञ्ज्ञितम्।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा॥ २३॥

यत्रोपरमते इत्यारभ्य बहुभिर्विशेषणैरविद्यावरणनिवर्तकपूर्णानन्दजीवस्वरूपाविर्भावहेतुभगवत्प्रसादसम्पादकचित्तावस्थाविशेष उक्तः[3] **तं** चित्तवृत्तिनिरोधं दुःखसंयोगस्य = जीवे दुःखसम्बन्धस्य वियोगं सर्वदुःखविरोधित्वेन दुःखवियोगमेव सन्तं **योगसञ्ज्ञितं** वियोगशब्दार्हमपि विरोधिलक्षणया योगशब्दवाच्यं **विद्यात्** जानीयात्। एतादृशयोगे निश्चयानिर्वेदयोः साधनत्वविधानायाह - **स इति॥** यथोक्तफलो **योगो निश्चयेन** शास्त्राचार्यविषयतात्पर्यविषयोऽर्थः सत्य एवेत्यध्यवसायेन **योक्तव्यः** अभ्यसनीयः। **अनिर्विण्णचेतसा** एतावताऽपि कालेन योगो न सिद्धः, किमतः परं कष्टेन? इत्यनुतापो निर्वेदः, तद्रहितेन चेतसा। इह जन्मनि जन्मान्तरे वा सेत्स्यति किं त्वरया? इति धैर्ययुक्तेन मनसेत्यर्थः॥ २३॥

किमभ्यसनीयम्? तत्राह - **सङ्कल्पेति॥**

[1] प्रापणीयमात्मलाभान्न - पा.. [2] यस्मिन् परमात्मसुखमये निर्वृत्तिकचित्तावस्थाविशेषे। **इति मधुसूदनसरस्वतीये** [3] यत्रोपरमत इत्यारभ्य बहुभिर्विशेषणैर्यो निर्वृत्तिकः परमानन्दाभिव्यञ्जकश्चित्तावस्थाविशेष उक्तः **इति मधुसूदनसरस्वतीये** ।

सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥ २४॥

सङ्कल्पो दुष्टेष्वपि विषयेष्वशोभनत्वादर्शनेन शोभनत्वभ्रान्तिः। तस्माच्च सङ्कल्पादिदं स्यादिति कामा भवन्ति। तान् शोभनत्वभ्रान्तिजनितान्। विचारजन्याशोभनत्वनिश्चयेन शोभनत्वभ्रान्तिनिवृत्त्या दुष्टेषु स्रक्चन्दनवनिताषु, अदुष्टेषु पारिजाताप्सरसःप्रभृतिषु श्ववान्तपायसवत् स्वत एव ब्रह्मपर्यन्तान् **अशेषतः** सवासनांस्त्यक्त्वा। अत एव कामपूर्वकत्वादिन्द्रियप्रवृत्तेस्तन्नाशे सति विवेकयुक्तेन **मनसैवेन्द्रियग्रामं** चक्षुरादिसमूहं **समन्ततः** सर्वेभ्यो विषयेभ्यो **विनियम्य** शनैःशनैरुपरमेदित्यर्थः॥ २४॥

शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥ २५॥

धृतिः = धैर्यमखिन्नता, तया **बुद्ध्या** कर्तव्यतानिश्चयरूपया **शनैःशनैः** गुरूपदिष्टमार्गेण **उपरमेत्** मनो निरुन्ध्यात्। **मनः** आत्मनि = परमात्मनि सम्यक् स्थितं निश्चलं **कृत्वा** तद्व्यतिरिक्तं **किञ्चिदपि न चिन्तयेत्**। इति सम्प्रज्ञातसमाधिः। असम्प्राज्ञातसमाधौ त्ववृत्तिकचित्तस्य लय एव स्वरूपज्ञानेन सुखरूपात्मानुभव इति विवेकः। **शनैःशनैः** इत्यनेन कण्टकलतानुष्वक्तं वस्त्रं शनैःशनैर्निस्सारयन्ति कुशलाः। तथा निर्वेदादिकं विहायानादिकालं विषयासक्तचित्तमुपरमेदियुक्तं भवति।

यत्तु "यथा घट उत्पद्यमाने वियत्पूर्ण एवोत्पद्यते जलादि पश्चात् पूर्यते निःसार्यते च, वियत् तु निःसारयतुं न शक्यते, तथा चित्तमुत्पद्यमानं चित्तपूर्णमेवोत्पद्यते। उत्पन्ने च तस्मिन् मूषानिषिक्तद्रुतताम्रवत् घटदुःखादिरूपत्वं भोगहेतुधर्माधर्मकृतसामग्रीवशाद्भवति। तत्र घटदुःखाद्यनात्माकारे विरामप्रत्ययाभ्यासेन निवारितेऽपि निर्निमित्तश्चिदाकारो वारयितुं न शक्यते। ततो निवृत्तिकेन चित्तेन संस्कारमात्रशेषतयाऽतिसूक्ष्मत्वेन निरुपाधिकचिदा-

त्ममात्राभिमुखत्वाद्वृत्तिं विनैवात्माऽनुभूयते"[1] इति तन्न।

संस्काररूपेण चित्तावस्थानस्य सुषुप्तावपि सत्वेनासम्प्रज्ञातसमाधाविव तत्राप्यानन्दानुभवापत्तेश्च। चित्तस्य ज्ञानत्वाभावेन तदवच्छिन्नत्वेऽपि चितस्त्वया चिद्विषयत्वानङ्गीकारेणासम्प्रज्ञाते आत्मानुभवोक्तेस्तुच्छत्वाच्च। न ह्यन्तःकरणं सविषयकम्। निर्विषयकस्य तदवच्छिन्नस्य च ज्ञानत्वे घटस्य तदवच्छिन्नस्य च ज्ञानत्वापत्तेः॥ २५॥

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥ २६॥

शब्दादीनां चित्तविक्षेपहेतूनां मध्ये **यतोयतो** यस्माद्यस्मान्निमित्तात् शब्दादेर्विषयाद्रागद्वेषादेश्च **चञ्चलं** विक्षेपाभिमुखं सत् **मनो निश्चरति**, विक्षिप्तं सत् विषयाभिमुखीं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमामपि समाधिविरोधिनीं वृत्तिमुत्पादयति। तथा लयहेतूनां निद्राशेषबह्वशनश्रमादीनां मध्ये **यतोयतो** निमित्तादस्थिरं लयाभिमुखं सत् **मनो निश्चरति**, लीनां सत् समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति, **ततस्ततो** विक्षेपनिमित्तात् लयनिमित्ताच्च **नियम्य, एतत्** मनो निवृत्तिकं कृत्वा, **आत्मन्येव** परमानन्दघने[2] सर्वेश्वरे मय्येव निरुद्ध्य स्वस्ववशं **नयेत्** वशं कुर्यात्। यथा पुनर्निक्षेपेत न वा लीयेतेति॥ २६॥

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्॥ २७ ॥[3]

[1] गूढार्थदीपिकाया अर्थानुवादोऽयम्। तत्र त्वित्थं पठ्यते - "यथा घट उत्पद्यमानः स्वतो वियत्पूर्ण एवोपपद्यते। जलतण्डुलादिपूरणं तूत्पन्ने घटे पश्चात् पुरुषप्रयत्नेन भवति। तत्र जलादौ निःसारितेऽपि वियन्निःसारयितुं न शक्यते। मुखपिधानेऽप्यन्तर्नियदवतिष्ठत एव। तथा चित्तमुत्पद्यमानं चैतन्यपूर्णमेवोत्पद्यते। उत्पन्ने तु तस्मिन् मूषानिषिक्तद्रुतताम्रवत् सुखदुःखादिरूपत्वं भोगहेतुधर्माधर्मसहकृतसामग्रीवशाद्भवति। तत्र घटदुःखाद्यनात्माकारे विरामप्रत्ययाभ्यासेन निवारितेऽपि निर्निमित्तश्चिदाकारो वारयितुं न शक्यते। ततो निरोधसमाधिना निर्वृत्तिकेन चित्तेन संस्कारमात्रशेषतयाऽतिसूक्ष्मत्वेन निरुपाधिकचिदात्ममात्राभिमुखत्वाद्वृत्तिं विनैव निर्विघ्नमात्माऽनुभूयते।" इति। [2] आत्मन्येव स्वप्रकाशपरमानन्दघने।**इति मधुसूदनसरस्वतीये** [3] अयं श्लोकः, अस्य व्याख्या च जम्मुकोशे न पठ्यते। अन्यस्मिन् कोशे तु युञ्जन्नेवमिति श्लोकानन्तरमयं श्लोकः पठ्यते, व्याख्या च।

प्रकर्षेण शान्तं निर्वृत्तिकतया निरुद्धं मनो यस्य तं **प्रशान्तमनसं** वृत्तिशून्यतया निर्मनस्कम्। निर्मनस्कत्वे हेतुगर्भविशेषणद्वयं **शान्तरजसम्, अकल्मषम्** इति। शान्तं विक्षेपकं रजो यस्य तम्, विक्षेपकरजःशून्यम्। तथा न विद्यते कल्मषं लयहेतुस्तमो यस्य तम् **अकल्मषं** लयशून्यम्। **शान्तरजसम्** इत्यनेनैव तमोगुणोपलक्षणम्। **अकल्मषं** संसारहेतुधर्माधर्मादिवर्जितमिति वा। **ब्रह्मभूतं** श्रवणादिजन्यभगवत्प्रसादादाविर्भूतस्वस्वरूपम्[1] **उपैति** गच्छतीत्यर्थः॥ २७॥

उक्तं सुखं योगिनः स्फुटीकरोति - **युञ्जन्निति**॥

युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते॥ २८॥

एवं 'मनसैवेन्द्रियग्रामम्'[2] इत्याद्युक्तक्रमेण, **आत्मानं** मनः **सदा युञ्जन्** समादधन् **योगी** योगेन नित्यसम्बन्धी **विगतकल्मषः** संसारहेत्वविद्याख्यमलरहितः[3] **सुखेन** अनायासेन, ईश्वरप्रणिधानात् सर्वान्तरायनिवृत्त्या ब्रह्मणः सम्यक्स्पर्शो विषयताख्यसम्बन्धो यस्यां सा ब्रह्मसंस्पर्शा सा चासौ मतिश्च सा अन्तः चरमकारणं यस्मिन् तत् **ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते**[4] सा मतिस्त्वाविर्भूतस्वरूपात्मिकैव। यद्वा ब्रह्मणः सम्यक्स्पर्शः प्रसादाख्यः सम्बन्धो यस्मिन् तत् **अत्यन्तं** दुःखलेशवर्जितं निखिलसाधनसम्पत्त्या जातपरेशापरोक्ष्ये जीवे ब्रह्मणः प्रसादाख्यः सम्बन्धः, तेनाविद्यानिवृत्त्याऽऽविर्भूतपूर्णानन्दस्वरूपसुखम् **अश्नुते** इत्यर्थः॥ २८॥

इदानीं सिद्धयोगस्य जीवन्मुक्तस्य निःशेषाविद्यानिवृत्तस्य हरिप्रसादादाविर्भूतस्वरूपस्यान्तरायसहस्राप्रतिबद्धस्नेहसन्ततिपूर्वकं रागिणां विषयेष्विव स्वाभाविकं सर्वत्र सर्वोत्तमत्वेन भगवद्दर्शनमाह - **सर्वेति**॥

---

[1] ब्रह्मभूतं ब्रह्मैव सर्वमिति निश्चयेन समं ब्रह्मप्राप्तं जीवन्मुक्तम्।**इति मधुसूदनसरस्वतीये**

[2] **भगवद्गीता** ६..२४ [3] विगतकल्मषः विगतमलः संसारहेतुधर्माधर्मरहितः।**इति मधुसूदनसरस्वतीये** [4] ब्रह्मसंस्पर्शं सम्यक्त्वेन विषयासंस्पर्शेन सह ब्रह्मणः स्पर्शतादात्म्यं यस्मिन् तद्विषयासंस्पर्शि ब्रह्मस्वरूपमित्येतत् अत्यन्तं सर्वानन्तान् परिच्छेदानतिक्रान्तं निरतिशयं सुखमानन्दमश्नुते व्याप्नोति।**इति मधुसूदनसरस्वतीये** ।

सर्वभूतस्थमात्मानं सर्वभूतानि चाऽत्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥ २९॥

योगयुक्तात्मा योगेन = निर्विकारवैशारद्यरूपेण युक्तः = प्रसादं निर्मलतां प्राप्तः आत्मा = चित्तं यस्य सः। **आत्मानं** सर्वेश्वरं मां नियामकत्वेन व्यापकत्वेन च **सर्वभूतस्थं** ब्रह्मादिस्तम्बपर्यन्तेष्वप्रच्युतैश्वर्यमयत्नत एव **ईक्षते** अपरोक्षतः पश्यति। कीदृशः? सर्वत्र व्यवहिताव्यवहितविप्रकृष्टाविप्रकृष्टवस्तुषु सममपरोक्षरूपं दर्शनं यस्य सः। यद्वा, सर्वेषु जीवेषु ज्ञानानन्देश्वरनियम्यत्वादिना समानं दर्शनं यस्य सः॥ २९॥

एवं दर्शनयुक्तो ममात्यन्तप्रिय अहमपि तस्यात्यन्तप्रिय इत्याह[1] - **य इति॥**

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥ ३०॥

यो योगी **मां** सर्वेश्वरं सर्वान्तर्यामित्वेन सर्वव्यापकत्वेन च **सर्वत्र** सर्वभूतेषु **पश्यति, सर्वं च** चिज्जडसम्बन्धं **मयि पश्यति** इति पूर्वश्लोकोक्तस्यानुवादः। आत्मपदस्य स्वभिन्नत्वभ्रान्तिनिरासाय **तस्याहं न प्रणश्यामि** मृतो व्यवहितो[2] विप्रकृष्टो वा नाथ इव तस्यादर्शनं परोक्षतां न व्रजामि। **स च मे न प्रणश्यति** मृतो व्यवहितो विप्रकृष्टो वा भृत्य इव मम परोक्षतां सोऽपि न व्रजति।

अयं भावः। मत्प्रसादादाविर्भूतस्वयोग्याशेषविषयकस्वरूपस्य मय्यन्तरायसहस्राप्रतिबद्धाविच्छिन्नप्रेमप्रवाहयुक्तस्य योगिनो विस्मृतविषयो न भवामि। किन्तु, तद्वशीभूत करामलकवत् समन्ततोऽपरोक्षतया तिष्ठामि। ममानन्तब्रह्माण्डोदयादिकारणे नानाविधमदाराधकानां फलदाने दुष्टनिग्रहे मुक्तवृन्दानामन्वये व्यासक्तस्याप्याकाशवदुदासीनस्य च प्रेमरसतया हृदये बद्धमदङ्घ्रिः सोऽप्यदर्शनमुपेक्षणीयतां न व्रजति। किन्तु, तस्य जीवन्मुक्तस्य मदेकानुबद्धरागस्य योगक्षेमं वहामीति॥ ३०॥

[1] ममात्यन्तप्रिय इत्याह - पा.. [2] विवर्धितो - पा..

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते॥ ३१॥

सर्वभूतेषु ब्रह्मादिस्तम्बपर्यन्तेषु नियामकत्वेन व्यापकत्वेन च स्थितं **मां य एकत्वं** कैवल्यं जीवन्मुक्तिमास्थितो **भजति** तैलधारावदविच्छिन्नां सर्वोत्तमत्वधीपूर्विकां स्नेहसन्ततिं मयि करोति, **स योगी** सदा मदपरोक्षयुक्तो यावच्छरीरादिकं वर्तते तावत् प्रारब्धकर्मप्राबल्यात् सर्वकर्मत्यागेन वा याज्ञ्यवल्क्यादिवत्, विहितेन कर्मणा वा जनकादिवत्, प्रतिषिद्धेन वा कर्मणा दत्तात्रेयजडभरतादिवत् **सर्वथा** येन केनापि रूपेण **वर्तमानोऽपि** मत्प्रसादेन निवृत्तस्वरूपानन्दमत्स्वरूपाच्छादिकाविद्यत्वेनापरोक्षीभूते **मयि** एव जले मत्स्यवद्वर्तते विहरति[1] कृतकृत्यस्य तस्य कार्यं किञ्चिन्नास्तीत्यर्थः॥ ३१॥

भगवदपरोक्षज्ञानिनो निवृत्ताविद्यस्य प्रारब्धकर्मवशात् समाधेर्व्युत्थानेऽपीत्थं वर्तत इत्याह - **आत्मेति**॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः॥ ३२॥

आत्मैवौपम्यमुपमा तेन आत्मदृष्टान्तेन **सर्वत्र** प्राणिजाते **सुखं यदि वा दुःखं समं** तुल्यं पश्यति स्वस्यानिष्टं यथा न सम्पादयति तथा परस्याप्यनिष्टं न सम्पादयति। प्रद्वेषतद्बीजाविद्याशून्यत्वात्। एवं स्वस्येष्टं यथा सम्पादयति, तथा परस्यापीष्टं यः सम्पादयति। रागतद्बेत्वविद्याशून्यत्वात्। **सः** निर्वासनयोपशान्तमनाः **परमः** श्रेष्टः पूर्वस्मात्।

उत्पन्नेऽपि भगवदापरोक्षे कश्चिन्मनोनाशवासनाक्षययोर्निःशेषतया भावाज्जीवन्मुक्तिसुखं स्वयोग्यकृत्स्नं नानुभवति, चित्तविक्षेपेण यद्दृष्टसुखमनुभवति सः परो योगी कैवल्यभागित्वात् देहसद्भावपर्यन्तं च दृष्टदुःखानुभवात्। अयं तु जातस्वयोग्याशेषभगवद्विशेषापरोक्षो लब्धपूर्णतत्प्रसादो निवृत्तनिःशेषाविद्यो

[1] येनकेनापि रूपेण वर्तमानोऽपि व्यवहरन्नपि स योगी ब्रह्माहमस्मीति विद्वान् मयि परमात्मन्येवाभेदेन वर्तते।**इति मधुसूदनसरस्वतीये** ।

जातमनोनाशवासनाक्षयः युगपदभ्यासात् दृष्टदुःखनिवृत्तिपूर्वकं जीवन्मुक्तिसुखमनुभवन् प्रारब्धकर्मवशात् समाधेर्व्युत्थानेऽपि स्वदृष्टान्तेन सर्वप्राणिनां सुखं दुःखं च समं पश्यन् यस्तिष्ठति स परमो योगीति भावः॥ ३२॥

उक्तमर्थमाक्षिपन् पृच्छति - **य इति**॥

अर्जुन उवाच
योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन।
एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम्॥ ३३॥

योऽयं सर्वत्र समसुखदुःखादिलक्षणः परमो **योगः साम्येन** समत्वेन चित्तगतानां रागद्वेषादीनां विषमदृष्टिहेतूनां निराकरणेन **त्वया** सर्वज्ञेनेश्वरेणोक्तः हे **मधुसूदन** सर्वान्तर्यामिन् सर्ववैदिकसम्प्रदायप्रवर्तक[1] **एतस्य** त्वदुक्तस्य सर्वमनोवृत्तिनिरोधलक्षणयोगस्य **स्थितिं** विद्यमानतां **स्थिरां** निरन्तरदीर्घकालानुवर्तिनीं[2] **न पश्यामि** न सम्भावयामि। कुतः? **चञ्चलत्वात्** 'मनसः' इति शेषः॥ ३३॥

तदेवोपपादयति -

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥ ३४॥

चञ्चलं सदाऽतिचलनस्वभावं **मनो हि** प्रसिद्धमेवैतत् भक्तानां पापादिदोषान् सर्वान् वारयितुमशक्यानपि कर्षति तेषामेव सर्वथा प्राप्तुमशक्यानपि पुरुषार्थानाकर्षति[3] प्रापयतीति वा **कृष्णः** तेन सम्बोधयन् दुर्निवारमपि चित्तचाञ्चल्यं निवार्य दुष्प्राप्यमपि समाधिसुखं त्वमेव प्रापयितुं शक्नोषीति सूचयति। न केवलं चञ्चलम्, **प्रमाथि** शरीरमिन्द्रियाणि च प्रमथितुं क्षोभयितुं [4] शीलं यस्य तत्। किञ्च, **बलवत्** अभिप्रेताद्विषयात् केनाप्युपायेण निवारयितुं न शक्यम्।

[1] मधुसूदन वैदिकसम्प्रदायप्रवर्तक।**इति मधुसूदनसरस्वतीये** [2] स्थिरां दीर्घकालानुवर्तिनीम्।**इति मधुसूदनसरस्वतीये** [3] पुरुषार्थानपकर्षतीति पाठः प्रामादिकः। [4] प्रथितुं क्षेपितुं - पा..

किञ्च **दृढं** वासनासहस्रानुस्यूतत्वाद्भेत्तुमशक्यं तस्यातिदृढतया बलवतो बलवत्तया प्रमाथिनः प्रमाथित्वादतिचञ्चलस्य महामत्तस्य राजस्येव मनसः **निग्रहं** निरोधं निवृत्तिकतयाऽवस्थानं **सुदुष्करं** सर्वथा कर्तुमशक्यं **मन्ये वायोरिव** यथाऽऽकाशे दोधूयमानस्य वायोर्निश्चलत्वं सम्पाद्य निरोधनमशक्यं तद्वत्॥ ३४॥

उत्तरमाह - **असंशयमिति॥**

श्रीभगवानुवाच
असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥ ३५॥

सम्यग्विदितं ते चित्तचेष्टितमतो निग्रहीतुं शक्यसीति सन्तोषेण सम्बोधयति हे **महाबाहो** प्रारब्धकर्मप्राबल्यादसंयतात्मना **दुर्निग्रहं** दुःखेनापि निग्रहीतुमशक्यं चञ्चलत्वं चलस्वभावं **मनः** इति **असंशयं** नास्त्येवात्र संशयः। एवं सत्यपि संयतात्मना समाधिमात्रोपायेन योगिना **अभ्यासेन च**[1] **गृह्यते** निगृह्यते। मनोनिग्रहेऽभ्यासवैराग्ययोः समुच्चयबोधनाय चशब्दः॥ ३५॥

प्रारब्धकर्मणा तत्त्वज्ञानादपि प्रबलेन स्वफलदानाय मनसो वृत्तिषूत्पाद्यमानासु कथं तासां निरोधः? इति यदुक्तं तथैव। परन्तूपायेन निरोधः सम्भवतीत्याह - **असंयतात्मनेति॥**

असंयतात्मना योगो दुष्प्राप इति मे मतिः।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥ ३६॥

भगवत्साक्षात्कारे उत्पन्नेऽपि वैराग्याभ्यासाभ्यां न संयतो निरुद्धोऽवृत्तिकतां प्रापित आत्मा चित्तं येन तेन **असंयतात्मना योगः** मनोनिरोधः **दुष्प्रापः** दुःखेनापि प्राप्तुं न शक्यते प्रारब्धकर्मकृताच्चित्तचाञ्चल्यादिति चेत् त्वं वदसि तत्र **मे मतिः** सम्मतिस्तथैवेत्यर्थः। **वश्यात्मना तु** वैराग्यपरिपाकेन वासनाक्षये

[1] वैराग्येणाभ्यासेन चेति स्यात्।

सति वश्यः स्वाधीनो विषयपारतन्त्र्यशून्य आत्मा मनो यस्य तेन, वैराग्येण विषयतो विमुखीकरणात्, अभ्यासे तु भगवदाकारताकरणाच्चेत्युपायतो मनोनिरोध **आप्तुं शक्यः।** पुरुषप्रयत्नस्य च लौकिकस्य वैदिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात्। अन्यथा लौकिकानां कृष्यादिप्रयत्नस्य वैदिकानां ज्योतिष्टोमादिप्रयत्नस्य च वैय्यर्थ्यापत्तेः। प्रारब्धकर्मसत्वे ततः फले सम्भवे किं पुरुषप्रयत्नेन? तदसत्वे तु सर्वथाऽसम्भवात् किं तेन? इति विकल्पस्य सर्वत्र सम्भवात्। अथ कर्मणः स्वयमदृष्टरूपस्य दृष्टसाधनं विना फलजननासमर्थत्वादपेक्षितः कृष्यादौ पुरुषप्रयत्न इति चेत्, योगाभ्यासेऽपि समम्।

यद्वा, प्रारब्धकर्मफलं तत्त्वज्ञानात् प्रबलमिति दृष्टत्वात् तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलोऽस्तु शास्त्रीयप्रयत्नस्य सर्वतः प्राबल्यात्। यद्वा, जीवन्मुक्तितः प्रागेव मनोनिग्रहस्य शक्यत्वाशक्यत्वविचारः, जीवन्मुक्तस्य जातभगवन्महाप्रसादस्य निवृत्तनिश्शेषाविद्यस्य मनोनिग्रहादिकं किमपि कर्तव्यं नास्तीत्यर्थः॥ ३६॥

एवं प्राक्तनग्रन्थेनोत्पन्नभगवदापरोक्षोऽनुत्पन्ननिःशेषाविद्यानिवृत्तिपूर्वक- स्वस्वरूपाविर्भावरूपजीवन्मुक्तः परो योगी मतः। उत्पन्नपरब्रह्मापरोक्ष उत्पन्नजीवन्मुक्तिस्तु परमो योगी मतः। पूर्वस्य भगवदाच्छादिकाविद्याया निवृत्तत्वेऽपि स्वरूपानन्दाच्छादिकाया अनिवृत्तत्वात्। अन्त्यस्याविद्याद्वयस्यापि निवृत्तेः। 'विमुक्तश्च मुच्यते' इत्यादौ बन्धद्वयनिवृत्त्युक्तेरित्युक्तम्।[1] यस्तु स्वकर्मफललब्धविविदिषापर्यन्ता चित्तशुद्धिः, कृतकर्मत्वात् कर्माणि सन्न्यस्य जीवन्मुक्तं परबोधनदक्षं गुरुमुपसृत्य ततो वेदान्तोपदेशं प्राप्य, सम्भावनाविपरीतभावनानिवृत्तिपूर्वकं भगवन्तमापरोक्षीकर्तुम् 'अथातो ब्रह्मजिज्ञासा' इत्यादि 'अनावृत्तिः शब्दात्' इत्यान्तया चतुर्लक्षणमीमांसया श्रवणमननिदिध्यासनानि गुरुप्रसादात् कर्तुमारभते, स श्रद्धधानोऽप्यायुषिऽल्पत्वेनाल्पप्रयत्नत्वादलब्धज्ञानपरिपाकः, श्रवणादौ क्रियमाणेष्वेव मध्ये व्यापद्यते। सः जातसम्यग्भगवदपरोक्षत्वेन न संसारान्मुच्यते नापि स्वर्गादिफलभोक्ता। तत्साधनकर्मणां त्यागात्। अतः 'एतादृशो योगभ्रष्टः कीटादिभावेन कष्टं गतिमियात्, अज्ञत्वे सति देवपितृयानाद्यसम्बन्धित्वात्, वर्णाश्रमाचारभ्रष्टवत्'। अथवा, 'कष्टं गतिं

[1] तयोरुभयोरपि ज्ञानादज्ञाननाशेऽपि यावत्प्रारब्धभोगं कर्म देहेन्द्रियसङ्घातावस्थानात् प्रारब्धभोगकर्मापाये च वर्तमानदेहेन्द्रियसङ्घातापायात् पुनरुत्पादकाभावाद्विदेहकैवल्यं प्रति काऽपि नास्त्याशङ्का।**इति मधुसूदनसरस्वतीये**

नेयात्, शास्त्रनिन्दितकर्मशून्यत्वात्, वामदेवादिवत्' इति सन्दिहानः पृच्छति -

अर्जुन उवाच
अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति॥ ३७॥

अयतिः अल्पयत्नवान्। 'लवणा यवागूः' इतिवत् नञल्पार्थकः। **श्रद्धयोपेतः** गुरुवेदान्तवाक्येषु विश्वासयुक्तः। श्रद्धा च शमाद्युपलक्षणम्। 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्'[1] इति श्रुतेः। नित्यानित्यवस्तुविवेक इहामुत्र भोगविरागः शमदमोपरतितितिक्षाश्रद्धादिसम्पत् मुमुक्षा चेति साधनचतुष्टयसम्पन्नोऽप्यायुषोऽल्पत्वेन मरणकाले चेन्द्रियव्याकुलत्वेन साधनासम्भवेन **योगाच्चलितमानसः। योगात्** श्रवणादिजन्मनस्तत्त्वज्ञानाच्चलितं तत्फलमप्राप्तं मानसं यस्य सः। **योगसंसिद्धिं** ब्रह्मापरोक्षनिमित्तां मुक्तिमप्राप्यातत्त्वज्ञ एव मृतः **कां गतिं** दुर्गतिं सुगतिं वा **गच्छति**। स्वोचितकर्मत्यागात्, शास्त्रोक्तमोक्षसाधनानुष्टायित्वात्, गर्हितकर्मशून्यत्वाच्च॥ ३७॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि॥ ३८॥

कच्चित् इति साभिलाषप्रश्ने महान्तः सर्वेषां भक्तानां सर्वोपद्रवनिवारणे समर्थाः पुरुषार्थचतुष्टयदानसमर्था वा चत्वारो बाहवो यस्य सः। **ब्रह्मणः पथि** ब्रह्मप्राप्तिमार्गे विमूढचित्तः। अनुत्पन्नोऽनन्तगुणालयस्य ब्रह्मणः साक्षात्कारो यस्य सः[2] **अप्रतिष्ठः** देवयानादिसाधनैस्तत्प्रापकसाधनै रहितः सः **उभयविभ्रष्टः** कर्ममार्गात् ज्ञानमार्गाच्च विभ्रष्टः **छिन्नाभ्रमिव** वायुना च्छिन्नं विशकलितं पूर्वस्मान्मेघाद्भ्रष्ट उत्तरमेघं चाप्राप्तमभ्रं यथा वृष्ट्ययोग्यं सदन्तराल एव नश्यति, तथा योगभ्रष्टोऽपि पूर्वस्मात् कर्ममार्गाद्विच्छिन्न उत्तरं च ज्ञानमार्गमप्राप्तोऽन्तराल एव नश्यति, कर्मफलं ज्ञानफलं च लब्धुं योग्यो न किम्? इति प्रश्नार्थः॥ ३८॥

[1] **बृहदारण्यकोपनिषत्** ४.४.२३ [2] अनुत्पन्नब्रह्मात्म्यैक्यसाक्षात्कार इति यावत्।**इति मधुसूदनसरस्वतीये** ।

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥ ३९॥

एतत् एतं पूर्वोक्तं **मे** मम **संशयमशेषतः** संशयमूलाधर्माद्युच्छेदेन **त्वदन्यः** त्वत्तः सर्वज्ञाच्छास्त्रकृतः परमात्मादतिकारुणिकादन्योऽनीश्वरो जीवः **छेत्ता** सम्यगुत्तरदानेन नाशयिता **हि** यतो **नोपपद्यते** न सम्भवति, तस्मात् त्वमेव सर्वप्रत्यक्षदर्शी सर्वस्य परमगुरुरेतं संशयं **छेत्तुमर्हसि** इत्यर्थः॥ ३९॥

उभयोर्विभ्रष्टो योगो नश्यतीति कोऽर्थः? किमिह लोके निन्दितो भवति स्वकर्मत्यागात्? किं वा परत्र निकृष्टां गतिं प्राप्नोति? तदुभयमपि नेहेत्याह -

श्रीभगवानुवाच
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते।
नहि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति॥ ४०॥

हे **पार्थ तस्योभयत्र विनाशः** निन्दानिष्टप्राप्तिरूपः **न विद्यते। हि** यतः **कल्याणकृत्** शास्त्रविहितकारी **कश्चिदपि दुर्गतिम्** इहाकीर्तिं परत्र कीटादिरूपतां **न गच्छति।** अयं तु जातजिज्ञासः श्रवणाद्यनुष्टाता सर्वोत्कृष्ट एव, दुर्गतिं न गच्छतीति किमुत वक्तव्यम् !

यदुक्तं 'योगभ्रष्टः कष्टां गतिं गच्छति, देवयानाद्यसम्बन्धित्वे सत्यज्ञत्वात्, स्वधर्मभ्रष्टवत्' इति, तदयुक्तम्। देवयानाद्यसम्बन्धित्वहेतोरसिद्धेः। 'य इत्थं विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरमभिसम्भवन्ति' इति पञ्चाग्निविद्यायां पञ्चाग्निविदामिवातत्क्रतूनां श्रद्धासत्यवतां मुमुक्षूणामपि देवयानेन ब्रह्मलोकप्राप्तिकथनात् श्रवणादिपरायणस्य श्रद्धान्वितो भूत्वेत्यनेन श्रद्धायाः प्राप्तत्वात्। 'शान्तो दान्तः' इत्यादिनाऽनृतभाषणरूपवाङ्गियमस्य सत्यस्य प्राप्तत्वाद्बहिरिन्द्रियोच्छृङ्खलव्यापारनिरोधरूपदमस्य योगाङ्गत्वेन यमनियमादेश्च प्राप्तत्वात्। अतत्क्रतुत्वेऽपि ब्रह्मलोकप्राप्तिसम्भवात्। 'सन्न्यासाद्ब्रह्मणः स्थानम्' इति स्मृतेः॥ ४०॥

तदेवं योगभ्रष्टस्य निन्दापगती निवार्य प्राप्यमाह - **प्राप्येति॥**

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते॥ ४१॥

योगभ्रष्टः कश्चित् पूर्वोपचितयोगवासनाप्रादुर्भावाद्विषयेभ्यः स्पृहयति। कश्चित् तु वैराग्यभावनादार्ढ्यान्न स्पृहयति। तयोः प्रथमः **पुण्यकृताम्** अश्वमेधादिकृतामर्चिमार्गेण ब्रह्मलोकादीन् प्राप्य तत्र **उषित्वा शाश्वतीः समाः** ब्रह्मपरिमाणेन क्षयाः(?) संवत्सरान् तदन्ते **शुचीनां** सिद्धानां **श्रीमतां** राज्ञां **गेहे** भोगवासनाशेषसद्भावात् जनकादिवत् **योगभ्रष्टोऽभिजायते**। योगवासनाप्राबल्याद्ब्रह्मलोकान्ते *सर्वकर्मसन्न्यासायोग्यो महाराजश्चक्रवर्ती भवतीत्यर्थः॥ ४१॥*

द्वितीयं प्रति पक्षान्तरमाह - **अथवेति॥**

अथवा योगिनामेव कुले भवति धीमताम्।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्॥ ४२॥

श्रद्धावैराग्यादिकल्याणगुणाधिक्ये तु भोगवासनाविरहात् पुण्यकृतां लोकान् वाऽकिञ्चनानां **धीमतां** ब्रह्मविदां **कुले** योगभ्रष्टो **भवति**। यच्छुचीनां श्रीमतां राज्ञां गेहे योगिनो जन्म तदपि दुर्लभम्। अनेकसुकृतसाध्यत्वात्, मोक्षपर्यवसायित्वाच्च। यत्तु शुचीनामकिञ्चनानामृषीणां ब्रह्मविद्यावतां वसिष्टादीनां कुले **जन्म एतत् हि** प्रसिद्धं दुर्लभादपि दुर्लभम्। **लोके यदीदृशं** सर्वप्रमादशून्यं जन्मेति द्वितीयः स्तूयते भोगवासनाशून्यत्वेन सन्न्यासार्हत्वात्॥ ४२॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन॥ ४३॥

तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहे भवं **पौर्वदेहिकं** सर्वकर्मसन्न्यासगुरूपसदनश्रवणमनननिदिध्यासनानां मध्ये यावत्पर्यन्तमनुष्ठितं तावत्पर्यन्तमेव **तं**

परब्रह्मविषयया बुद्ध्या[1] संयोगं तत्साधनकलापमिति यावत् **लभते** प्राप्नोति। न केवलं लभत एव, किन्तु **ततः** तल्लाभादनन्तरं **भूयः** अधिकं साधनसम्पत्तिं **संसिद्धौ** मुक्तौ **यतते** प्रयत्नं करोति॥ ४३॥

ननु यो वैराग्यवासनाप्राबल्यात् प्रकृष्टपुण्यप्रकटितपरमेश्वरप्रसादवशेन प्राणोत्क्रान्तिसमयेऽनुद्भूतभोगस्पृहः, तस्य ब्रह्मविदां कुले जातस्य प्राचीनसंस्कारोद्बोधात् पुनरपि परब्रह्मनिष्ठा मोक्षपर्यन्तमस्तु। यस्तु श्रीमतां राज्ञां कुले बहुविधभोगव्यवधानेनोत्पन्नः, तस्य कथमिति व्यवहितज्ञानसंस्कारोद्बोधः ? तत्राह - **पूर्वेति**॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते॥ ४४॥

अतिव्यवहितजन्मोपचितेनापि **तेनैव पूर्वाभ्यासेन** प्रागर्चितसंस्कारेण **अवशोऽपि** मोक्षसाधनायाप्रयतमानोऽपि **ह्रियते** स्ववशीक्रियते। अकस्मादेव भोगवासनाभ्यो व्युत्थाप्य मोक्षायोन्मुखः क्रियते। **जिज्ञासुः** ज्ञातुमिच्छुः **अपि योगस्य** मोक्षसाधनज्ञानस्य। ज्ञानमप्राप्य मृतो बहून् विषयान् भुक्त्वा महाराजकुले समुत्पन्नोऽपि योगभ्रष्टः प्राचीनसंस्कारवशात् तस्मिन् जन्मनि **शब्दब्रह्म** वेदं कर्मप्रतिपादकम् **अतिवर्तते** कर्माधिकारातिक्रमेण ज्ञानाधिकारी भवतीत्यर्थः॥ ४४॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥ ४५॥

प्रयत्नात् पूर्वकृतादप्यधिकमधिकं **यतमानः** अधिकं प्रयत्नं कुर्वन् **योगी** पूर्वोपचितसंस्कारवशात् तेनैव योगप्रयत्नपुञ्जेन **संशुद्धकिल्बिषः** धौतज्ञानप्रतिबन्धकपापमलः। अत एव संस्कारोपचयपुण्योपलब्धानेकैर्जन्मभिः संसिद्धः संस्कारातिरेकेण पुण्यातिरेकेण च प्राप्तचरमजन्मा **ततः** साधनपरिपाकात् **परां** प्रकृष्टां **गतिं** मुक्तिं **याति** ॥ ४५॥

[1] ब्रह्मात्मैक्यविषयया बुद्ध्या। **इति मधुसूदनसरस्वतीये**

योगिनं स्तौति - **तपस्वीति॥**

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ ४६॥

तपस्विभ्यः कृच्छ्रादिनिष्ठेभ्यः। अत उत्कृष्टो योगी तत्त्वज्ञानानन्तरनिरोधेन मनोनाशवासनाक्षयकारी यो योगी स तत्त्वज्ञानिभ्योऽपि श्रेष्ठः। अतः **कर्मिभ्योऽपि** ज्योतिष्ठोमाद्यनुष्ठातृभ्यश्च **अधिको योगी** कर्मितपस्विनोरज्ञत्वेन मोक्षानर्हत्वात्। **ज्ञानिभ्यः** परोक्षज्ञानिनोऽप्यपरोक्षज्ञानवान् **अधिको मतः** मम सम्मतः। यस्मादेवं **तस्मात्** अधिकाधिकप्रयत्नबलात् त्वं योगभ्रष्ट इदानीं तत्त्वज्ञानमनोनाशवासनाक्षयैर्युगपत्सञ्जातैः[1] **योगी** जीवन्मुक्तो यः 'स योगी परमो मतः' इति प्रागुक्तः स तादृशो **भव** साधनपरिपाकात्॥ ४६॥

इदानीमुक्तसर्वयोगिभ्यः श्रेष्ठमसम्प्रज्ञातसमाधिं प्राप्तमाविर्भूतस्वरूपज्ञानेन श्रीहरिमनुभवन्तं तैलधारावदविच्छिन्नस्नेहसन्ततिं तत्र कुर्वन्तं योगिनं सर्वोत्तमत्वेन वर्णयन्नुपसंहरति - **योगिनामिति॥**

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥ ४७॥

पञ्चम्यर्थे षष्ठी। प्रागुक्तेभ्यः सर्वेभ्यो योगिभ्यः मयि = भगवति सदनन्तगुणालये व्युत्थाने तैलधारावदविच्छिन्नवृत्तिप्रवाहोऽन्तरात्मा = मनो यस्य तादृशः सन् **मां भजते** मय्येव तैलधारावदविच्छिन्नस्नेहसन्ततिं कुरुते **स मे युक्ततमो मतः** श्रद्धावान् गुरुवेदान्तवाक्ये विश्वासयुक्तः भगवान्नारायणः सर्वान्तर्यामी परमानन्दमूर्तिमम स्वामी प्राणादिसहस्रेभ्योऽपीष्टतम इति धी रागिणां विषयेष्विव स्वाभाविक्यनपायिनी यस्य व्युत्थानकालेऽस्य सम्प्रज्ञातसमाधौ स्वरूपज्ञानेनैव मामनुभवन्ति समाहितचित्तेभ्य उक्तविधमद्भक्तिशून्येभ्यः श्रेष्ठो **मे** मम सर्वज्ञस्य **मतः** निश्चयः। अतः मद्भक्तस्यैव सर्वापेक्षया श्रेष्ठत्वात् त्वमपि मद्भक्तो भवेति[2] भावः॥ ४७॥

[1] सम्पातैः - पा.., सम्पादितैः - मधुसूदनीयपाठः। [2] भवतीतीति कोशे।

कर्माधिकारमर्यादां साङ्गं योगं धियं स्वतः।
स्वभक्तं योगिषु श्रेष्ठं षष्ठेऽवदद्रमापतिः॥

ॐ तत्सदिति श्रीमद् भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठोऽध्यायः॥ ६॥

अध्यायः 7

ज्ञानविज्ञानयोगः

ज्ञानं कर्म च सन्न्यासं योगभक्ती रमापतिः।
स्वप्राप्तयेऽवदच्छड्भिः भक्तेश्च मुख्यता ततः॥ १॥

प्राप्तेर्जीवस्य रूपं चाविर्भूतं स्वप्रसादतः।
स्वप्रसादादविद्याया जीवस्थाया निवर्तनम्॥ २॥

भक्तेर्विवृद्धयेऽथेशः षड्भिः सदनन्तगुणालयम्।
योगिनां ध्यानगम्यं यत् तद्ब्रवीतीह माधवः॥ ३॥

सप्तमे स्वस्वरूपस्य याथात्म्यं क्वचिदाकृतिः।
स्वप्रसादान्निवृत्तिश्च जीवस्येति निरूप्यते॥ ४॥

'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यम् (उपैति)॥'[1]
'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति'[2]
'तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्'[3]

[1] **मुण्डकोपनिषत्** ३.१.३ [2] **श्वेताश्वतरोपनिषत्** १.६ [3] **कठोपनिषत्** ५.१२

'तरति शोकमात्मवित्'[1]
'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'[2]

इति श्रुतिभिर्भगवज्ज्ञानस्यैव मोक्षहेतुत्वमुक्तम्। तच्चाविच्छिन्नस्नेहसन्तति-सहितं निश्चयात्मकमपरोक्षं मोक्षहेतुः। अपरोक्षश्च दैत्यानां द्वेषेण तद्ध्यान-तत्पराणां केषाञ्चिदस्ति। संशयस्य 'संशयात्मा विनश्यति'[3] इति भगव-ताऽनिष्टहेतुतोक्ता। परोक्षं तु विषयिणामप्यस्तीति विशेषणत्रयमुक्तम्। अत एव सर्वयोगिषु 'मद्गतेनान्तरात्मना'[4] इत्यनेन स्नेहपूर्वकज्ञानवतः श्रैष्ठ्यमुक्तम्। सर्वोत्तमत्वज्ञानं स्नेहधारासहितं तादृशज्ञानसहितोऽविच्छिन्नस्नेहप्रवाहो वा भक्तिः। सा च सद्गुणाधिक्यज्ञानात्। अलौकिकस्य वस्तुनो ज्ञानं च लक्ष-णज्ञानाद्भवति। अतो भक्तवात्सल्यादयः सद्गुणा जगदुदयादिकर्तृत्वादिकं च लक्षणमित्येतद्द्वयं प्रष्टव्यमर्जुनेन। अपृष्टमप्यतिकारुणिको विवक्षुराह - **मयीति**॥

श्रीभगवानुवाच
मय्यासक्तमनाः पार्थ योगं युञ्जन् मदाश्रयः।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥ १॥

मयि परे जगदुदयादिलीले सकलजगदायतनत्वादिविविधविभूतिमति का-रुण्यौदार्यसौशील्यभक्तवात्सल्यसौन्दर्यलावण्याद्यनन्तामितसद्गुणे, आसक्तं = विषयान्तरपरिहारेण रागिणां विषयेष्विव स्वाभाविकं मनो मयि यस्य तव स त्वं **मदाश्रयः** मदेकशरणः राजाश्रयो भार्याद्यासक्तश्च राजभृत्यो प्रसिद्धः। मुमुक्षुस्तु मदाश्रयो मदासक्तमनाश्च। त्वं त्वद्विधो वाऽन्यः **योगं युञ्जन्** मनःस-माधानं षष्ठोक्तप्रकारेण मयि कुर्वन्, **असंशयं** यथा स्यात् तथा **समग्रं** स्वापरो-क्षयोग्याशेषगुणविशिष्टं **यथा** येन प्रकारेणापरोक्षीकरिष्यसि तथा तं प्रकारं **शृणु**। त्वद्योग्याशेषागुणवर्णनं ततस्तेषां श्रवणमनननिदिध्यासनैर्मत्प्रसादासादितैरप-रोक्षतस्तान् गुणान् न ज्ञास्यसि, यथा स्वतः परोक्षस्यापि षड्जादिस्वरस्य गान्धर्वशास्त्रवासितेन श्रोत्रेणापरोक्षम्, तथा स्वतः परोक्षस्यापि स्वयोग्या-नन्तगुणविशिष्टस्य हरेः श्रवणमनननिदिध्यासनवासितेन मनसाऽऽपरोक्ष्यम्।

[1] **छान्दोग्योपनिषत्** ७.१.३ [2] **श्वेताश्वतरोपनिषत्** ३.८ [3] **भगवद्गीता** ४.४० [4] **भगवद्गीता** ६.४७

अर्जुनमुपलक्षीकृत्य कृपयाऽन्यान् मुमुक्षून् संसारादुद्धर्तुमुपदिशति। नत्वर्जुनमेवोद्धर्तुम्। तस्य नरावतारस्य जीवन्मुक्तत्वादिति भावः॥ १॥

वक्ष्यमाणं ज्ञानं श्रोतुराभिमुख्याय स्तौति - **ज्ञानमिति॥**

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥ २॥

इदम् अनन्तसद्गुणविशिष्टं मज्ज्ञानं स्वतः परोक्षस्यापि मम प्रसादादिनाऽपरोक्षं **ज्ञानम्** , विज्ञानेन = विविक्ततया विशेषज्ञानेन सहितं निखिलहेयशून्यतयाऽनवधिकासङ्ख्येयकल्याणगुणानन्तमहाविभूतितया जीवाज्जडाच्च यथाऽहं विविक्तः, तेन विविक्तज्ञानेन सह मत्स्वरूपज्ञानं[1] साधनफलादिसाहित्येन निरवशेषं कथयिष्यामीत्यर्थः। **यज्ज्ञात्वा** प्राप्य मयि पुनरपि **ज्ञातव्यं नावशिष्यते** स्वयोग्याशेषगुणानामपरोक्षस्य जातत्वादिति भावः॥ २॥

परोक्षस्य सर्वेन्द्रियप्रवर्तकस्येन्द्रियैः स्प्रष्टुमयोग्यस्वरूपस्यापरोक्षरूपं ज्ञानं मत्प्रसादं विना केवलं पुरुषानुष्ठितश्रवणादिभिर्दुर्लभमित्यभिप्रायेणाह - **मनुष्याणामिति॥**

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ ३॥

मनुष्याणां शास्त्राधिकृतां **सहस्रेषु कश्चित्** एव **सिद्धये** मदपरोक्षाय **यतते** सर्वतः **यततामपि** मदपरोक्षाय यत्नं कुर्वतामपि **कश्चित्** एव सिद्धो ज्ञानी भवति। **सिद्धानां** मदपरोक्षवतामपि मध्ये **तत्त्वतः** आप्तकामस्य जगदुदयादिकर्तृत्वम्, सर्वत्रोदासीनस्यापि भक्ताभक्तयोरनुग्रहनिग्रहादिकर्तृत्वम्, अतिमहतो गरुडादिकमारुह्य गन्तृत्वम्, एकस्यापि युगपदनेकावतारैः प्रतिजीवं सत्यैर्नित्यैरन्तर्यामिरूपैश्चालौकिकानेककार्यकर्तृत्वम्, रथादिस्थस्यापि व्यापकत्वमेवमादयो

---

[1] इदं मद्विषयं स्वतोऽपरोक्षज्ञानम् असम्भावनादिप्रतिबन्धेन फलमजनयत् परोक्षमित्युपचर्यते। असम्भावनादिनिरासे तु विचारपरिपाकान्ते तेनैव प्रमाणेन जनितं ज्ञानं प्रतिबन्धाभावात् फलं जनयदपरोक्षमित्युच्यते। विचारपरिपाकनिष्पन्नत्वाच्च तदेव विज्ञनम्। तेन विज्ञानेन सहितमिसमपरोक्षमेव ज्ञानं शास्त्रजन्यं ते तुभ्यमहं परमाप्तः वक्ष्यामि।**इति मधुसूदनसरस्वतीये**

लोकविरुद्धा धर्मा भगवत्यचिन्त्यशक्त्या **तत्त्वतः** परमार्थभूता एव सम्भवन्ति नत्वैन्द्रजालवन्मृषेति **माम्** अचिन्त्यानेकशक्तियुक्तं मन्महाप्रसादयुक्तः **कश्चित्** एव **वेत्ति** न सर्वः। मदापरोक्ष्यं तु यथा कथञ्चिन्मद्ध्यानं कुर्वतां भवत्येव। एतादृशं तु मन्महाप्रसादं विना न भवतीति भावः।

यत्तु[1] "**तत्त्वतः** प्रत्यगभेदेन 'तत्त्वमसि' इत्यादिगुरूपदिष्टमहावाक्येभ्योऽनेकेषु मनुष्येष्वात्मपरमात्मनोरभेदज्ञानसाधनानुष्ठाता दुर्लभः" इति, तन्न। अभेदबोधकपदाभावात्। स्वरूपातिरिक्तस्याभेदस्य महावाक्यजन्ये चोद्यविषयत्वे वेदान्तानां त्वदभिमताखण्डार्थकत्वहानेः। अद्वैतहानेश्च। श्रुतितात्पर्यगोचराभेदस्य मृषात्वासम्भवात्, तन्मिथ्यात्वे तद्बोधकश्रुतेरप्रामाण्यापत्तेः। भेदस्य सत्यत्वापत्तेश्च। अभेदस्य स्वरूपाभिन्नत्वे हि स्वरूपस्याज्ञानाधिष्ठानतया सुखादिसाक्षितया च सदा भानेन शास्त्रवैय्यर्थ्यापत्तेः। तदित्यादिप्रत्येकपदद्वयाबोधितस्यैक्यादेर्महावाक्यजन्यबोधे भाने सखण्डार्थकत्वम्, अभाने महावाक्यवैय्यर्थ्यं स्यात्॥ ३॥

सर्वोत्पत्त्यादिकर्तृत्वसर्वनियामकत्वादिरूपनिरतिशयाचिन्त्यैश्वर्यज्ञानं यत् प्रतिज्ञातम्, तदाह - **भूमिरिति**॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ ४॥

पञ्चतन्मात्राणि, अहङ्कारः, महान्, अव्यक्तमित्यष्टप्रकृतयः। पञ्च महाभूतानि, पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, उभयसाधारणं मनश्चेति षोडश विकाराः। एतान्येव चतुर्विंशतितत्त्वानि। तत्र पृथिव्यप्तेजोवाय्वाकाशाख्यपञ्चमहाभूतानि सुक्ष्मावस्थारूपाणि गन्धरसरूपस्पर्शशब्दात्मकानि पञ्च तन्मात्राणि **भूमिः** इत्यादिना लक्ष्यन्ते। बुद्ध्यहङ्कारशब्दौ स्वार्थावेव। मनःपदेन च शिष्टमव्यक्तं लक्ष्यते। प्रकृतिशब्दसामानाधिकरण्येन स्वार्थहानेरावश्यकत्वाच्च। मदीया जडरूपा **प्रकृतिरियं** महत्तत्त्वादिरूपेण **अष्टधा भिन्ना** अष्टभिः प्रकारैर्भेदमागता। सर्वोऽपि जडवर्गोऽत्रैवान्तर्भवतीत्यर्थः॥ ४॥

चिद्रूपां प्रकृतिमाह - **अपरेति**॥

[1] मधुसूदनसरस्वतीय इत्यर्थः।

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥ ५॥

इयम् अष्टधा भिन्ना जडरूपा प्रकृतिः, वक्ष्यमाणचित्प्रकृतितः **अपरा** अपकृष्टा। **इतः** अपरप्रकृतितः **अन्यां जीवभूतां** जीवत्वेन चिद्रूपत्वेन भूतां = सदा विद्यमानां श्रियं **प्रकृतिं पराम्** उत्तमां मदधीनां च **विद्धि। यया** चिद्रूपया जडा **धार्यते** चेतनप्रकृत्यधिष्ठिता जडा प्रकृतिर्हरीक्षणयुक्ता च जगदाकारेण परिणता भवतीत्यर्थः।

यद्वा, **जीवभूतां** जीवस्वरूपां भोज्यजडप्रकृत्यपेक्षया **परां** भोक्तृत्वेन प्रधानभूतां **मे** मदीयां मदधीनां **विद्धि। ययेदं** कृत्स्नमचेतनं जगत् स्वार्जितादृष्टद्वारा धार्यत इत्यर्थः। कालशक्तिना भगवता जीवादृष्टानुरोधेनैव जगतो धारणादिकं न स्वतः, निरपेक्षत्वात्, उदासीनत्वाच्चेति भावः॥ ५॥

एतत्प्रकृतिद्वयकारणकं कृत्स्नं जगदित्याह - **एतदिति॥**

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रळयस्तथा॥ ६॥

एते = परापरप्रकृती, योनी येषां तानि। **भूतानि** भवनधर्मकाणि **सर्वाणि** चेतनाचेतनात्मकानि निखिलानि **इत्युपधारय।** ननु प्रथमपरोक्षे चिदचित्प्रकृतिद्वयपरिणाममिदं विश्वं द्वितीये अदृष्टद्वारा जीवाधिष्ठितजडप्रकृतेरेव परिणामः। तव सर्वेश्वरस्यात्र क्वोपयोगः? तत्राह - **अहमिति॥** 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म'[1] इत्यादिश्रुत्युक्तः **अहम्** अस्य **कृत्स्नस्य जगतः प्रभवः** प्रकर्षेण भवत्यस्मादिति प्रभवः = उत्पादकः। प्रकर्षेण लीयतेऽस्मिन्निति **प्रलयः।** प्रकर्षस्तूभयत्र स्वातन्त्र्यो प्रकृतिरुपादानमहं तस्यामीक्षणाख्यवीर्याधायकः क्षोभकः कार्यकारणयोरन्तःप्रविश्य धारकश्च स्वतन्त्रो कर्ता निर्विकारोऽचिन्त्यशक्तिर्जगज्जन्मादिहेतुत्वाद्यनन्तमहिमविशिष्टो मुमुक्षुज्ञेय इति भावः।

---
[1] **तैत्तिरीयोपनिषत्** ३.१

नच निमित्तहेतौ लयो न दृष्ट इति जगदध्यवस्थानत्वेन तस्योपादानत्वमिति वाच्यम्। निमित्तहेतौ लूनायां तन्तूनां लयदर्शनात्। नच लूनोपादानत्वं तन्तूनामिति वाच्यम्। तस्यानाशेऽपि तन्तूनामवस्थानात्। उपादानत्वे ब्रह्मणो विकारप्राप्तेः।

नचासमसत्ताको तात्त्विकोऽन्यथाभावरूपो विवर्तत एव प्रपञ्चो ब्रह्मण इति वाच्यम्। अन्यथाभावो स्वान्यथाभवनम्, अन्यथाभानमात्रं वा? आद्ये विकारित्वापत्तिः। द्वितीये विवर्तद्रष्टुरधिष्ठानातिरिक्तस्याविवर्तरूपस्याभावेन विवर्तासम्भवात्। विवर्तस्य मायिकस्य मायामोहं विनाऽपरोक्षासम्भवे नश्वरस्य तत्पालकत्वासम्भवात्। 'स तपोऽतप्यत स तपस्तप्त्वा सर्वमसृजत तत्सृष्ट्वा तदेवानुप्राविशत्' इत्याद्यालोचनपूर्वकसृष्टप्रवेशाद्यनुपपत्तेः। नहि शुक्तिरीक्षणपूर्वकं रूप्यं सृजति तदेवानुप्रविशति[1] च। अतो बद्धमुक्तचितां कार्यकारणात्मकान्वितनियामकत्वसत्ताप्रदत्वाद्यनन्तगुणविशिष्टो मुमुक्षुज्ञेय इति सिद्धम्॥ ६॥

जडादुत्पत्तिस्थितिकर्तृत्वं स्वतन्त्रं यत् स्वस्योक्तं तदुपपादयति - **मत्त इति॥**

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥ ७॥

यथा सर्वकारणभूतायाः प्रकृतेर्बद्धाबद्धजीवजातस्य नियामकत्वेन धारकत्वेन कार्यमात्रोत्पादकत्वेनाहं परः, तथाऽचिन्त्यशक्तिज्ञानबलैश्वर्यवीर्यवैभवयोगेनाहमेव परतरः = अतिश्रेष्ठः **मत्तोऽन्यत् किञ्चित् परतरं नास्ति।** यद्यपि 'मत्तोऽन्यत् परं किञ्चिन्नास्ति' इत्येव वाच्यम्। 'न त्वत्समोऽस्त्यभिधिकः कुतोऽन्यः'[2] इति वक्ष्यमाणत्वेन समाधिकमात्रस्य निषेधसिद्धा तरप्प्रत्ययो व्यर्थः। समस्येषदधिकस्य वा सत्वे ह्यतिशयाधिक एव निषेध्यः, तदर्थकत्वेन तरप् सार्थकः स्यात्। तथाऽपि सर्वोत्तमानन्तगुणवत्त्वेनोत्तमत्वसिद्धावपि ततोऽपकृष्टस्य कर्मकरणसम्प्रदानापादानाधिकरणादेर्विश्वसृष्ट्या-

[1] तत्रानुप्रविशति - पा. [2] **भगवद्गीता** ११.४३

द्युपयुक्तस्य कुलालकर्तृकघटादिसृष्टौ मृदादेरिव स्वातन्त्र्यशङ्का स्यात्, तन्नि-
रासाय तरप्प्रत्ययः। आह भगवान् 'तदनन्यत्वमारम्भणशब्दादिभ्यः'[1] यद्यपि
कुलालादिकर्तृका सृष्टिः स्वतन्त्रबहुसाधनापेक्षा दृष्टा। तथाऽपि तद्दृष्टान्तानु-
सारेण ब्रह्मणः सृष्टिः तथा न कल्प्या। किन्तु स्वतन्त्रसाधनस्य तदनन्यत्वं
अन्यत्वाभावः स्वतन्त्रं साधनं नास्तीत्यर्थः। 'किंस्विदासीदधिष्ठानमारम्भणं
कतमत्स्वित्'[2] इति स्वतन्त्राधिष्ठानाक्षेपकारम्भणशब्दादिभ्यः। आरभ्यतेऽनेने-
त्यारम्भणं साधनम् अधिष्ठानम् अधिकरणम्। अग्रे उत्तराभावान्न प्रश्नार्थकः
किंस्विदिति शब्दः। किन्त्वाक्षेपार्थक एव।

नच स्वरूपेणैवान्यस्य निषेधोऽस्तु, सङ्कोचे मानाभावादिति वाच्यम्।
'सत्त्वाच्चावरस्य'[3] इति सूत्रेण 'तम आसीत् तमसा गूलहमग्रे प्रकेतम्'[4]
'अस्मान्मायी सृजते विश्वमेतत्' इति श्रुत्या चावरस्येश्वराधीनस्य सत्त्वबो-
धनात्।

'असद्व्यपदेशादिति चेन्न धर्मान्तरेण वाक्यशेषात्'[5] इति सूत्रेण सृष्टेः प्राक्
'असद् वेदमग्र आसीत्'[6] इत्यसत्वमाशङ्क्य धर्मान्तरेणैव निषेध उक्तः। 'नैवेह
किञ्चनाग्र आसीन्मिषत्' इति वाक्यशेषे मिषत्वेन विकसितत्वेनैव हि निषेधः।
स्वरूपेणैव निषेधाङ्गीकारे 'मत्तो नान्यत्' इत्येतावतैव सिद्धा 'परतरम्' इति
वैय्यर्थ्यापत्तेः। भिन्ननिषेधस्यापि भिन्नत्वेन भिन्नमात्रनिषेधस्य व्याहतत्वाच्च।

न केवलं विश्वोदयादिकर्तृत्वेनैव परः, अपि तु सर्वाधारकत्वेनापीत्याह
- **मयीति**॥ यथा **मणिगणाः सूत्रे** प्रोताः **तिष्ठन्ति**, तथेदं बद्धमुक्तजीवजडात्मकं
विश्वं सकलश्रुतिप्रतिपाद्येऽचिन्त्यानन्तशक्तिमति **मयि प्रोतं** मदधीनसत्ताकं ति-
ष्ठति। 'द्युभ्वाद्यायतनं स्वशब्दात्'[7] इति सूत्रेण 'यस्मिन् द्यौश्च पृथिवी च'
इत्यादिनोक्ते द्युभ्वाद्यायतने 'तमेवैकं जानथ आत्मानम्' इति स्वस्य ब्रह्मणो
वाचकात्मशब्दप्रयोगात् द्युभ्वाद्यातनं परं ब्रह्मैवेत्यर्थकेन 'वायुना वै गौतम
सूत्रेणायं लोकः परलोकश्च सर्वाणि भूतानि सञ्चारणानि भवन्ति सर्वे वाव
एते प्राणाश्च प्राणिनश्च देवाश्च दिव्यानि च लोकाश्च लोकिनश्च विष्णावेवोताश्च
प्रोताश्च' इति श्रुत्या

---

[1] **ब्रह्मसूत्रम्** २.१.१५। [2] **इति ऋक्संहिता** १०.८१.२ [3] **ब्रह्मसूत्रम्** २.१.१७ [4] **इति ऋक्संहिता** १०.१२९.३ [5] **ब्रह्मसूत्रम्** २.१.१८ [6] **तैत्तिरीयोपनिषत्** २.७ [7] **ब्रह्मसूत्रम्** १.३.१

'यत्रोतमेतत् प्रोतं च विश्वमक्षरसञ्ज्ञके।
आधारः सर्वभूतस्य[1] स प्रसीदतु मे हरिः॥'[2] इति वैष्णवेन
'यस्मिन् नित्ये तते तन्तौ दृढे स्रगिव तिष्ठति।
सदसद्ग्रथितं विश्वं विश्वाङ्गे विश्वकर्मणि॥' [3]
'यस्मिन् विश्वानि भूतानि तिष्टन्ति च विशन्ति च।
गुणभूतानि भूतेशे सूत्रे मणिगणा इव॥' [4]
'बुद्धिर्मनो महद्वायुः तेजोऽम्भः खं मही च या।
चतुर्विधं च यद्भूतं सर्वं कृष्णे प्रतिष्टितम्॥' [5]
चतुर्विधानां भूतानां त्रिषु लोकेषु माधवः।
प्रभवश्चैव सर्वेषां निधनं च युधिष्टिर॥' इति महाभारतेन च

सर्वधारकत्वेन मुमुक्षुज्ञेयस्य सर्वोत्तमत्वं सिद्धम्॥ ७॥

सर्वनियामकत्वेनानन्तविभूतिमत्त्वेन सर्वव्यापकत्वेन च चिन्तयितुमशक्तानामारम्भभक्तानां चिन्तनार्थं काश्चिद्विभूतीराह - **रस इत्यादि चतुर्भिः॥**

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥ ८॥

रसादिव्यापकत्वात्, नियामकत्वात्, विभूतिमत्वाच्च रसादिपदवाच्यः **अहम्** एव। 'सर्वं समाप्नोषि ततोऽसि सर्वः'[6] इति वक्ष्यमाणत्वात्। सर्वव्यापकत्वेनाहं ज्ञातुमशक्तश्चेत्, रसादिव्यापकत्वेनैव ज्ञेय इत्यर्थः। अपां सूक्ष्मावस्था तन्मात्रारूपा[7] **शशिसूर्ययोः प्रभा** भास्वरशुक्लरूपं तद्युक्तं द्रव्यं वा। **वेदेषु** वेदमूलं **प्रणवः**। **खे शब्दः** तन्मात्रारूपः। **नृषु पौरुषम्** अहम्॥ ८॥

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु॥ ९॥

---

[1] आधारभूतः सर्वस्य इति पुराणपाठः। [2] **विष्णुपुराणम्** १.१९.८३ [3] शां.४७.२२
[4] शां.४७.२१ [5] सभा.३८.२५ [6] **भगवद्गीता** ११.४० [7] अपां रसस्तन्मात्रारूप इति स्यात्।**इति मधुसूदनसरस्वतीये** ।

पृथिव्यां पुण्यो गन्धः सौरभः। **विभावसौ** अग्नौ **तेजः**। **सर्वभूतेषु जीवनं** प्राणधारणम्। **तपस्विषु तपश्च** अहम्॥ ९॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्॥ १०॥

सर्वभूतानां चराचरभूतानां **बीजं** सजातीयकार्योत्पादनसामर्थ्यं **सनातनम्** उत्तरोत्तरकार्येष्वनुस्यूतम्। **बुद्धिः** प्रज्ञा। **तेजस्विनां** प्रागल्भानां **तेजः** प्रागल्भ्यम्॥ १०॥

बलं बलवतां चाहं कामरागविवर्जितम्।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ॥ ११॥

कामादिविवर्जितं **बलम्**। **धर्माविरुद्धः** ऋतुकालिकः प्रजार्थं **कामः** चाहम्।

यद्वा, रसयति रसं प्रेरयतीत्यादे रस इत्युच्यते। 'प्रातिपदिकाद्धात्वर्थो बहुलमिष्टवच्च' इति सूत्रेण णिच्प्रत्यये कृते ततो धातुसञ्ज्ञाया मन्प्रत्यये सति णिचो लोपेन रस इति भवति। एवं प्रभासनात् स्वयं प्रभासमानत्वात् प्रभाप्रेरकत्वाच्चेति प्रभा। प्रणौति स्तौति स्तावकं प्रेरयति स्वयं वक्ति शब्दं प्रेरयति चेति प्रणवः शब्दश्च। पुण्यं गन्धं करोति तदाचष्ट इति पुण्यो गन्धः। तेजयति तेजः प्रेरयतीति वा तेजः। जीवनं करोति प्रेरयति वा जीवनम्। तपति तपः प्रेरयति चेति तपः। बीजं करोति तदाचष्टे प्रेरयति वा बीजम्। स्वयं बुद्धत्वाद् बुद्धिप्रेरकत्वाच्च बुद्धिः। भोगनिरपेक्षबलपूर्णकामविवर्जितं बलम्। अस्थाने अप्रयुज्यमानत्वात् रागविवर्जितम्। रागिणामस्थाने बलं प्रयुज्यते। एवं समन्वयाध्यायोक्तरीत्या सकलवैदिकशब्दवाच्यो भगवांस्तथा ज्ञातुमश-

क्वश्चेत्, कतिपयशब्दवाच्यत्वेन चिन्त्य इति भावः[1]॥ ११॥

न केवलं रसादीनां धर्माणां व्यापकत्वेन प्रेरकत्वेन च तत्तत्पदवाच्योऽहम्। अपि तु पृथिव्यादिधर्मिव्यापकत्वादिना तत्तत्पदवाच्योऽहमित्याह - **य इति**॥

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि॥ १२॥

सात्त्विकाः मनइन्द्रियाधिष्ठातृदेवादयः सात्विकोऽहङ्कारश्च तद्धेतुः राजसानीन्द्रियाणि अहङ्कारस्तद्धेतुः **तामसाः** भूतमात्रादयः। चशब्दात् प्रकृतिमहत्तत्त्वे। ते सर्वे **भावाः** पदार्थाः **मत्त एव तान् विद्धि** तेषामुत्पत्तिस्थितिलयसत्तादिकं मदधीनं विद्धीत्यर्थः।

ननु भूभूधरयोरिवान्योन्याधीनत्वमपि तदधीनः स्यात्। नेत्याह - **नत्विति॥ ते मयि** आधेयत्वेन स्थिताः। **न त्वहं तेषु** आधेयत्वेन तिष्ठामि। मणिषु सूत्रमिव तिष्ठामि तदाधार एव नतु तदाधेयः। 'भर्ता सन् भ्रियमाणो बिभर्ति'[2] 'एको देवो बहुधा निविष्टः'[3] 'तदाश्रितं जगत् सर्वं नासौ कुत्रचिदाश्रितः' इत्यादिश्रुतेः। इतरनिरपेक्षः सर्वजगदुदयादिकर्ता सर्वाधारः सर्वप्रेरकः सर्वव्यापक उदासीनो भक्तवत्सलः सर्वशब्दाभिधेयो जायमानो वसुदेवसूनुरद्भुतैश्वर्योऽहमिति भावः॥ १२॥

ननु यद्येवं गुणमयानां नियामकत्वात् त्वं गुणातीतः, तर्हि त्वां सर्वे जीवास्तथा कुतो न जानन्ति? इत्यत आह - **त्रिभिरिति**॥

[1] सोऽप्सु स्थित्वा रसयति रसनामा ततः स्मृतः।
सूर्यचन्द्रादिषु स्थित्वा प्रभानामा प्रभासनात्॥ वेदस्थः प्रणवाख्योऽसावात्मानं यत् प्रणौत्यतः।
खे स्थितः शब्दनामाऽसौ यच्छहब्दयति केशवः॥ पुण्यापुण्यं गन्धयति स्वयं पुण्यो धरास्थितः।
तेजयत्यग्निसंस्थः सन्भूतस्थो जीवनप्रदः॥ तपस्विस्थस्तपयति व्यञ्जनाद् बीजसञ्ज्ञितः।
बोधनाद् बुद्धिनामाऽसौ बुद्धिमत्सु व्यवस्थितः॥ नित्यपूर्णबलत्वात्तु बलं कामविवर्जितम्।
अरागजबलश्चैव स्थानेभ्योऽन्येष्वयोजनात्॥ एतादृशबलात्माऽसौ बलिनां बलदः स्वयम्।
वेति पूर्णत्ववाची स्यात् तद्रतेर्बलमुच्यते॥ प्रायो हि कामिता अर्था धर्मं हन्युर्हरिः पुनः।
न धर्महानिकृत् किन्तु कामितो धर्मवृद्धिकृत्॥ धर्मविरुद्धकामोऽतो विष्णुर्भूतेषु संस्थितः।
एवं स सर्वतश्चान्यः स्वतन्त्रश्चैव सर्वगः॥
व्यवस्थयैव सर्वेषां सर्वदा सर्वदः प्रभुः॥ **इति गीतातात्पर्ये**

[2] **इति तैत्तिरीयारण्यकम्** ३.१४.१अ

[3] **इति तैत्तिरीयारण्यकम्** ३.१४.१

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥ १३॥

एभिस्त्रिभिर्गुणमयैः सात्त्विकराजसतामसैः कार्यकारणसङ्घातैः **मोहितं** देहगेहादावहंममेति वैचित्यं मयि सर्वेश्वरे जगदुदयादिकर्तरि सदेहत्वेनान्यसाधरणरूपवैचित्यं च प्रापितम् **इदं जगत्** प्राणिजातं मत्प्रसादभाजनमदेकशरणभित्तम्(?) **एभ्यः** त्रिभ्यः **परं** तद्व्यापकत्वनियामकत्वादिनोत्कृष्टम् **अव्ययं** स्वरूपतो धर्मतो देहतश्च विकारशून्यं सदैकाकारं **मां** जगदुदयादिकर्तारं वासुदेवं **नाभिजानाति** किन्तु गुणात्मकब्रह्मादिदेहदृष्टान्तेन देहादित्वेन हेतुना विष्णुदेहादिरपि गुणमय इति मन्यते।

कदाचिन्महद्भ्यः श्रुत्वाऽप्यसम्भावनाविपरीतभावनाग्रस्तत्वात् पुण्यप्रचयशून्यत्वाच्चाभितः सम्यग्यथास्वरूपमपरोक्षतो न जानातीति भावः॥ १३॥

नन्वनादिसिद्धगुणमयमायाबद्धानां जीवानां स्वातन्त्र्याभावेन तत्परित्यागसामर्थ्याभावे कदाऽपि मुक्तिर्न स्यादित्यत आह - **दैवीति॥**

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥ १४॥

देवस्येयं **दैवी**[1] देवो जगदुदयादिक्रीडायुक्तः। लीलैव हि हरेर्जगत्सर्जनादिकम्। 'लोकवल्लीलाकैवल्यम्'[2] इति न्यायात्। **गुणमयी** सत्त्वादिगुणप्रचुरा। **मम** मदधीना। अत एव **दुरत्यया** महास्वामिकत्वात्। तर्हि कस्यापि संसारादुद्धारो न स्यादित्यत आह - **मामिति॥ मां** मायास्वामिनं शरणागतवत्सलं परमकारुणिकं सर्वेश्वरं कर्तुमकर्तुमन्यथाकर्तुं समर्थमनन्तसौन्दर्यमनन्तसद्गुणालयमभिनवजलदशोभाहरणवर्णं परमानन्दघनमूर्तिं महाभीष्टदं सकृच्चिन्तितपदारविन्दवैरिञ्चप्रपञ्चवैभवमनवरतमनुचिन्तयन्तो **ये मां प्रपद्यन्ते** 'भगवानेवास्माकं सर्वस्वम्' इति धिया मदेकशरणङ्गताः, ते मत्प्रेत्य महानन्दसमुद्रमग्नमनस्त्वेन समस्तमायागुणविकारैरनभिभूतचित्ता मत्प्रसादान्मन्मायां

[1] कथं दैवी? मदीयत्वात्।**इति मध्वभाष्यम्** । [2] **ब्रह्मसूत्रम्** २.१.३४

तरन्ति मद्विलासविनोदाकुला एते मदुन्मूलनसमर्था इति शङ्कमानेव माया तेभ्योऽपसरति वारविलासिनीव क्रोधनेभ्यस्तपोधनेभ्यः। तस्मान्मायातरणार्थी मामीशं सततं चिन्तयेदिति भावः।

ननु मायातरणं तन्नाश एव। 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः'[1] इत्यनुसारात्। स तु 'अजां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजन्तीम्'[2] इति श्रुतिसिद्धायाः प्रकृतेर्न सम्भवति। 'गौरनाद्यन्तवती' इति श्रुत्या तस्या उत्पत्तिविनाशयोर्निरासादिति चेत्। मायाशब्देन हि प्रवाहानादिकर्मरूपाविद्यैव विवक्षिता। ईश्वराधिष्ठितमायापदवाच्यत्रिगुणात्मकप्रकृतिकार्यदेहेन्द्रियादौ जीवस्य प्रवाहानाद्यहंममेत्यभिमानः, ततस्त्रिविधानि कर्माणि, ततस्तत्फलभोगाय त्रिविधदेहा इत्येवं जीवस्यानादिसंसृतिः। निष्कामाराधितेशप्रसादलब्धनिर्वेदादेः पुरुषस्य तदेकशरणागतिरूपा भक्तिः, ततोऽनन्तगुणालयस्य सर्वोत्तमतया स्नेहपूर्वापरोक्षोऽहम्, ततो महाप्रसादः, ततः स्वपरमानन्दस्वरूपाच्छादाकाविद्यानिवृत्त्या स्वस्वरूपानन्दाविर्भावरूपा मुक्तिः। 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'[3] इति श्रुत्या 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन'[4] इति स्वयं कर्मरूपाविद्याया रामेश्वरज्ञानेन सेतुदर्शनेन[5] ब्रह्महत्यायाः सत्याया एव नाशोक्तेः। त्रिगुणमायाकार्यत्वात् त्रिगुणमायामयत्वाद्युक्तिरिति तत्त्वम्॥ १४॥

यद्येवम्, तर्हि सकलानर्थप्रसूत्यविद्यानिवृत्तये सर्वेश्वरं करुणाब्धिं शरणागतवत्सलं त्वामेव सर्वे कुतो न प्रपद्यन्ते? चिरसञ्चितप्रबलदुरितप्रतिबन्धादित्याह - **न मामिति॥**

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः॥ १५॥

पापतारतम्याच्चतुर्विधा **दुष्कृतिनो मूढा नराधमा माययाऽपहृतज्ञाना आसुरं भावमाश्रिता मां न प्रपद्यन्ते** गुरुशास्त्रोपासनाऽभावेन मत्स्वरूपापरिज्ञानाद्विपरीतज्ञानाद्देहगेहादावहंममेत्यभिमानात् क्षुद्रविषयेष्वेव सक्ता **मूढाः** पामराः। अन्ये **नराधमाः** अनन्यसाधारणतया मत्स्वरूपे[6] ज्ञातेऽपि मदधीनं देहगेहादिकं स्वाधीनं

[1] **भगवद्गीता** ५.१६.१ [2] **श्वेताश्वतरोपनिषत्** ४.५ [3] **मुण्डकोपनिषत्** २.२.८ [4] **भगवद्गीता** ४.३७
[5] 'इति स्वयं कर्मरूपाविद्यायाः सत्याया एव, रामेश्वरस्थसेतुदर्शनेन ब्रह्महत्याया सत्याया इव, नाशोक्तेः' इति स्यात्। [6] सन्दीमत्स्वरूपे इति कोशे।

मन्यमानाः। अन्ये **माययाऽपहृतज्ञानाः** सदनन्तालौकिकगुणवैभवालयस्वरूपविषयकं ज्ञानमसकृत्प्रस्तुतमपि तदसम्भावनाविपरीतभावनापादकया नेत्रावष्टम्भेन सूर्याच्छादकाङ्गुल्येव जीवं प्रति मत्स्वरूपाच्छादिकया पापकर्मजनितदुर्वासनयाऽपहृतं येषां ते। अन्ये **आसुरं भावमाश्रिताः** सदनन्तविभूतिमतो मम ज्ञानं सूपपन्नमपि येषां द्वेषायैव भवति ते। उत्तरोत्तराः पापिष्ठाः। आद्यास्त्रयः कदाचिन्मदनुग्रहादिना साध्याः, अन्तिमस्त्वसाध्य एवेति भावः॥ १५॥

ये त्वासुरभावरहिताः पुण्यकर्माणो विवेकिनस्तु पुण्यकर्मतारतम्येन चतुर्विधाः सन्तो मां भजन्ते क्रमेण च कामनाराहित्येन मत्प्रसादान्मायां तरन्तीत्याह -

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ १६॥

ये सुकृतिनः पूर्वानन्तजन्मकृतपुण्यसञ्चयाः **जनाः** सफलजन्मानः, त एव नान्ये, ते **मां भजन्ते** सेवन्ते। तत्रैकोऽकामः, त्रयः सकामाः। आर्तो हि शत्रुव्याध्याद्यापदाग्रस्तस्तन्निवृत्तिमिच्छन् यथा जरासन्धकारागारवर्तिराजनिचयो द्यूतसभाया वस्त्राकर्षणे द्रौपदी च ग्राहग्रस्तो गजेन्द्रश्च **जिज्ञासुः** आत्मज्ञानार्थी मुमुक्षुर्यथा मुचुकुन्दो जनकः श्रुतदेव उद्धवश्च **अर्थार्थी** इहामुत्र भोगोपकरणेच्छुः तत्रेह यथा सुग्रीवो विभीषणश्च परत्र यथा ध्रुवः। एतेन त्रयोऽपि भगवद्भजनेन मायां तरन्ति।

तत्र जिज्ञासुर्ज्ञानोत्पत्त्या साक्षादेव मायां तरति। आर्तोऽर्थार्थी च जिज्ञासुत्वं प्राप्यैवेति विशेषः। आर्तस्यार्थार्थिनश्च जिज्ञासुत्वसम्भवात्, जिज्ञासोश्चार्तत्वज्ञानोपकरणार्थार्थित्वसम्भवात्, उभयोर्मध्ये जिज्ञासुरुक्तः। **ज्ञानी च** ज्ञानं भगवत्तत्त्वसाक्षात्कारः तेन नित्ययुक्तो यथा सनकादिर्नारदः प्रह्लादः शुकश्च शुद्धप्रेमयुक्तो यथा गोप्यादिरक्रूरो युधिष्ठिरादिश्च। कंसशिशुपालादयस्तु भयात् द्वेषाच्च भगवच्चिन्तापरा अपि न भक्ताः। अनुरक्तेरभावात्॥ १६॥

निष्कामतया मां प्रति प्रेमयुक्ततया तेषु ज्ञानी श्रेष्ठ इत्याह - **तेषामिति**॥

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ १७॥

चतुर्विधानां मध्ये ज्ञानी मत्साक्षात्कारवान् **नित्ययुक्तः** मयि रागिणां विषयेष्विव निरन्तराविच्छिन्नसमाहितचित्तवृत्तिः **एकभक्तिः** सर्वोत्तमत्वधीपूर्वकाविच्छिन्नस्नेहप्रवाहरूपा एका = मुख्या मयि भक्तिर्यस्य सः। यद्वा, एकस्मिन्नेव मयि तादृशी भक्तिर्यस्य सः। **विशिष्यते** अतिरिच्यते सर्वोत्कृष्ट इत्यर्थः। **हि** यतः त्यक्तसमस्तैहिकपारत्रिकभोगतया प्राणादितोऽप्यतिप्रेमतया मयि तैलधारावद्बद्धचित्तवृत्तिर्ममातिप्रियः अहमपि परमानन्दतयाऽतिसुहृत्तया तस्य **प्रियः** । अतिशब्दोऽत्राभिधेयस्यैद्यपरः[1] ज्ञानी यथा मम प्रियोऽहं च तस्य प्रियः, तस्य[2] मया सर्वज्ञेन वक्तुं न शक्यते तत्प्रेम्णा इयत्ताया अभावेन तज्ज्ञानं मम सर्वज्ञस्यापि नास्तीत्यर्थः॥ १७॥

किमार्तादयस्तव न प्रियाः? इत्यत आह - **उदारा इति॥**

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥ १८॥

एते आर्तादयः सकामा अपि मद्भक्ताः **सर्वे** अपि **उदारा एव** उत्कृष्टा एव। पूर्वजन्मार्चितानेकसुकृतराशित्वात्। अन्यथा हि मामेव न भजेयुरेव। आर्तस्य जिज्ञासोरर्थार्थिनश्च मद्विमुखस्य क्षुद्रदेवताभक्तस्यापि बहुलमुपलम्भात्। अतो मम प्रिया एव ते। नहि स्वयोग्याशेषज्ञानवान् कश्चिदपि भक्तो ममाप्रियो भवति। किन्तु यस्य यादृशी मतिरुदासीनस्य सर्वत्र समस्यापि मम तादृशी प्रीतिरिति स्वभावसिद्धमेतत्। तत्र सकामानां त्रयाणां काम्यमानं प्रियमहं च प्रियः, ज्ञानिनस्तु प्रियान्तरशून्यस्याहमेव निरतिशयप्रियः। ममानन्तब्रह्माण्डादिसर्जनादिव्यासक्तस्यापि स एव निरतिशयप्रियः क्षणमपि त्यक्तुमशक्यः। अन्यथा मम कृतज्ञता न स्यात्। यथा हि 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति'[3] इत्यत्र तरबर्थस्य विवक्षितत्वाद्विद्यादिकं विनाऽपि

---

[1] अतिशब्दोऽत्रातिशयत्वपर इति स्यात्॥ [2] तस्य मर्यादा इति स्यात्। [3] **छान्दोग्योपनिषत्** १.१.१०

कृतं कर्म वीर्यवत् भवत्येव। तथाऽत्यर्थं ज्ञानी भक्तो मम प्रिय इत्युक्ते, यो ज्ञानव्यतिरेकेण भक्तः सोऽपि प्रिय इति पर्यवस्यत्येव। प्रागुक्तात्यर्थमिति विशेषणस्य विवक्षितत्वात्। उक्तं हि 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्'[1] इति। **ज्ञानी त्वात्मैव** आत्मवन्मम प्रिय इति **मतं** सम्मतम्। **हि** यतः **स युक्तात्मा** मयि समाहितचित्तः सन् **मां** सर्वेश्वरं परमानन्दमूर्तिम् **अनुत्तमां** सर्वोत्कृष्टां **गतिं** गन्तव्यं परमं फलम् **आस्थितः** परमफलत्वेन स्वीकृतवान्। मद्भिन्नं किमपि फलं न मन्यत इत्यर्थः॥ १८॥

तादृशज्ञानी दुर्लभ इत्याह -

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ १९॥

बहूनां जन्मनां किञ्चित्किञ्चित्पुण्योपचयहेतूनाम् **अन्ते** चरमे जन्मनि सर्वसुकृतविपाकरूपे **वासुदेवः सर्वमिति ज्ञानवान्** सन् **मां** निरुपाधिप्रेम्णा **प्रपद्यते। स महात्मा** महाशयो निवृत्ताविद्यतया जीवन्मुक्तः **सुदुर्लभः** मनुष्याणां सहस्रेष्वपि दुःखेनापि लब्धुमशक्यः। सर्वव्यापकत्वात् 'सर्वं समाप्नोषि ततोऽसि सर्वः'[2] इति वक्ष्यमाणत्वात् वासुदेवः सर्वं सर्वशब्दप्रवृत्तिनिमित्तानां धर्माणां तत्र सत्वात् 'ब्राह्मणोस्य मुखम्'[3] इतिवद्वासुदेवाज्ञातत्वाद्वा सर्वं वासुदेवः। 'धान्यमसि धिनुहि देवान्' इति धान्याधीने तण्डुले धान्यशब्दप्रयोगवत् वासुदेवाधीनत्वात् सर्वं वासुदेवः। यद्वा, वासुदेव एव प्राप्यं फलम्, प्रापकश्चान्तर्यामितया सोऽनुष्ठाता कारयितेन्द्रियादिप्रेरकः सुहृत् स्वामीष्टोऽन्यदपि यत्किञ्चित् सन्मनोऽर्थगोचरः, तत् **सर्वं** सर्वस्वं **वासुदेवः** इति धिया मां यः **प्रपद्यते** सः **सुदुर्लभः** इत्यर्थः॥ १९॥

ज्ञानिन उत्कर्षमुक्त्वा सकामानां त्रयाणां देवतान्तरभक्तेभ्य **उदाराः सर्वे** इति प्रतिज्ञातोत्कर्षो विव्रियते यावदध्यायसमाप्ति।

आयासे तुल्येऽपि मद्भक्ताः क्रमेण सर्वोत्कृष्टं मोक्षाख्यं फलं लभन्ते। क्षुद्रदेवताभक्तास्तु क्षुद्रमेव पुनः संसृतिरूपं फलम्। तत्र परमपुरुषार्थफलकं

---
[1] **भगवद्गीता** ४.११ [2] **भगवद्गीता** ११.४० [3] **इति ऋक्संहिता** १०.९०.१२

भगवद्भजनमुपेक्ष्य क्षुद्रफलके क्षुद्रदेवताभजने पूर्ववासनाविशेष एवासाधारणहेतुरित्याह - **कामैरिति॥**

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया॥ २०॥

मोहनस्तम्भनमारणाकर्षणवशीकरणोच्चाटनादिविषयकैः **कामैः** क्षुद्रैरभिलाषैर्भगवत्सेवया लब्धुमशक्यत्वेन ज्ञातैः **तैस्तैः** हृतम् अपहृतं भगवतो वासुदेवाद्विमुखीकृत्य तत्तत्फलदातृत्वाभिमतक्षुद्रदेवताद्यभिमुख्य नीतं ज्ञानम् = अन्तःकरणं येषां ते **अन्यदेवताः** सर्वेश्वरान्मत्तोऽन्यदेवताः **तं तं नियमं** जयोपवासप्रदक्षिणनमस्कारादिरूपतत्तद्देवताराधने प्रसिद्धम् **आस्थाय** आश्रित्य **प्रपद्यन्ते** भजन्ते। क्षुद्रदेवतानां मध्येऽपि केचित् काञ्चिदेव भजन्ते **स्वया प्रकृत्या नियताः** असाधारणया पूर्वाभ्यासवासनया रजोगुणादिप्रचुरया वशीकृता सन्तः॥ २०॥

ननु तत्तद्देवताप्रसादात् तेषामपि त्वयि सर्वेश्वरेऽनन्तसद्गुणालये भक्तिर्भविष्यतीत्यत आह - **य इति॥**

यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ २१॥

यो यः कामी **यां यां तनुं** देवतामूर्तिं **श्रद्धया** जन्मान्तरवासनाबलप्रादुर्भूतया भक्त्या संयुक्तः सन् **अर्चितुम्** अर्चयितुम् **इच्छति** प्रवर्तते। चौरादिकस्य णिजभावपक्षे रूपमिदम्। **तस्य तस्य** कामिनः **तामेव** देवतातनुं प्रति **श्रद्धां** च पूर्ववासनावशां तां भक्तिम् **अचलां** स्थिरां **विदधामि** करोमि **अहम्** अन्तर्यामी नतु मद्विषयां श्रद्धां तस्य तस्य करोमीत्यर्थः। **तामेव श्रद्धाम्** इति व्याख्याने यच्छब्दानन्वयः स्पष्टः। तस्मात् प्रतिशब्दमध्याहृत्य व्याख्यातम्[1]॥ २१॥

[1] तामेव श्रद्धामिति व्याख्याने यच्छब्दानन्वयः स्पष्टः। तस्मात् प्रतिशब्दमध्याहृत्य व्याख्यातम्।**इति मधुसूदनसरस्वतीये** यां यां तनुमिति यच्छब्दान्वयस्तु यो यां देवतातनुमर्चितुमिच्छतीत्यादिवदद्भिराचार्यैरुत्तरश्लोकस्थतस्या इत्यनेन दर्शितः। एतेन यां देवतातनुं प्रति श्रद्धां विदधामि तामेव श्रद्धामिति व्याख्याने यच्छब्दानन्वयः स्पष्टः। तस्मात् प्रतिशब्दमध्याहृत्य व्याख्यातमिति प्रत्युक्तम्। तामेव श्रद्धामिति भाष्यकृद्व्याख्याने प्रतिशब्दाध्याहारं विनैव उक्तरीत्या यच्छब्दान्वयस्य स्पष्टत्वेनैवं वदतामज्ञतया अतिस्फुटत्वात्। इति भाष्योत्कर्षदीपिका।

स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हि तान्॥ २२॥

सः कामी **तया** मद्विहितया स्थिरया **श्रद्धया युक्तः, तस्य** देवतातन्वा **आराधनं** पूजनम् **ईहते** निर्वर्तयति। उपसर्गरहितोऽपि राधयतिः पूजार्थः। **ततः** देवतातन्वा सकाशात् **कामान्** ईप्सितान् **तान्** पूर्वसङ्कल्पितान् **हि** प्रसिद्धं **मयैव** सर्वज्ञेन सर्वकर्मफलदायिनां तत्तदेवतान्तर्यामिणा विहितांस्तत्फलविपाकसमये निर्मितान्। **हितान्** मनःप्रियान् इत्यैकपद्यं वा। अहितत्वेऽपि हिततया प्रतीयमानानित्यर्थः॥ २२॥

ननु यद्यन्तर्यामितया भगवानेवाराध्यः फलप्रदश्च, तर्हि तद्दत्तस्य फलस्य स्वभक्तैः प्राप्यात् फलात् को विशेषः? तत्राह - **अन्तवदिति॥**

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि॥ २३॥

अल्पमेधसां मन्दप्रज्ञेन वस्तुविवेकासमर्थानां तत्तद्देवताभक्तानां मया विहितमपि तत्तद्देवताराधनजं फलम् **अन्तवत्** एव विनाश्येव। नतु मद्भक्तानां विवेकिनामिवानन्तं तेषामित्यर्थः। कुत एवम्? यतो **देवान्** इन्द्रादीनन्तवन्त एव यजते मदन्यदेवताराधनपरा मामन्तर्यामिणं तत्र वस्तुगत्या स्थितं सर्वपूजाग्राहकं सर्वफलदं चाजानन्तो **यान्ति** नश्वरैर्देवैस्तत्तल्लोकैश्च सह नश्यन्तीत्यर्थः। **मद्भक्ताः** तु त्रयः सकामाः प्रथममभीष्टान् कामानवाप्नुवन्ति। ततो मद्भजनपरिपाकात् मामनन्तघनमीश्वरं यान्ति। अतः समानेऽपि सकामानां मद्भक्तानामन्यदेवताभक्तानां चायासे महदन्तरम्। तस्मात् साधूक्तम् 'उदाराः सर्व एवैते'[1] इति॥ २३॥

ननु त्वद्भजनस्यैवम्फलकत्वे त्वद्विमुखाः सन्तः कथमन्यदेवानुपासते जीवाः? तत्राह - **अव्यक्तमिति॥**

---

[1] भगवद्गीता ७.१८

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तमम्॥ २४॥

अव्यक्तम् इन्द्रियाद्यगोचरं भोगादृष्टाद्यभावेनानित्यदेहशून्यं नित्याप्राकृताभौतिकदिव्यविग्रहं जगदनुग्रहाय कृपयैव स्वेच्छयैवाविर्भूतं सन्तमपीश्वरं **मां** देहग्रहणात् प्राक्कार्याक्षमम् इदानीं वसुदेवगृहे **व्यक्तिं** भौतिकदेहं प्राप्य कार्यक्षमतां प्राप्तं जीवसाधारणम् **अबुद्धयः** अनाद्यविद्यया नष्टविवेकाः **मन्यन्ते**।

यद्वा, **अव्यक्तं** सर्वकारणमपि मत्स्याद्यनन्तनित्यरूपैः स्थितं कृपया कदाचित् तत्तद्रूपेणाविर्भूतं सन्तं **मां व्यक्तिं** कार्यरूपतां मत्स्याद्यनेकावताररूपेण प्राप्तं **मन्यन्ते**।

अबुद्धयः इत्युक्तं विवृणोति - **परं भावं** सर्वजगदुदयादिकर्तृत्वं सर्वान्तर्यामित्वं सर्वाधारत्वं चेत्यादि **अव्ययं** ध्वंसप्रागभावादिरहितम् अनन्तगुणदेहादिवैभवम्, **अनुत्तमं** सर्वोत्कृष्टं **मम** वसुदेवसूनोरेतादृगैश्वर्यम् **अजानन्तः** अतो मां विहाय देवतान्तरं भजन्ति। ततश्चान्तवदेव फलं प्राप्नुवन्तीत्यर्थः॥ २४॥

ननु जन्मकाले योगिज्ञेयं श्रीवैकुण्ठस्थमैश्वरमेव रूपमाविर्भावयति सम्प्रति च श्रीवत्सकौस्तुभाद्यसाधारणालौकिकोपस्करणशालिनि कम्बुकमलकौमोदकीचक्रवरधारिचतुर्भुजे श्रीमद्वैनतेयवाहने सुरासुरजेतरि विविधदिव्यलीलाविलासे साक्षाद्वैकुण्ठनायके लोकानुग्रहाय भुव्यवतीर्णे विरिञ्चप्रपञ्चसम्भवि[1] निरतिशयसौन्दर्यसारसर्वस्वमूर्तौ बाललीलाविमोहितविधातरि तरणिकिरणोज्ज्वलदिव्यपीताम्बरे निरुपमश्यामसुन्दरे करदीकृतपारिजातार्थपराजितपुरन्दरे बाणयुद्धविजितशितिकण्ठे नारदादिभिरतिशयमुपास्यपदाम्बुजे त्वयि कथमविवेकिनोऽपि मनुष्यबुधिर्जीवबुद्धिर्वा? इत्याशङ्कामपाकर्तुमाह - **नाहमिति**॥

नाहं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥ २५॥

---

[1] ..प्रपञ्चासम्भवि इति मधुसूदनीयपाठः।

अहं सर्वलोकस्य **न प्रकाशः** स्वेन रूपेण प्रकटो न भवामि। किन्तु, केषाञ्चिन्मद्भक्तानामेव। कथं सर्वस्य लोकस्य न प्रकटः? तत्राह - **योगमायासमावृतः** योगः = मम सङ्कल्पः, तद्वशवर्तिनी माया योगमाया, तया 'मदभक्तो जनो मां यथार्थतो न जानातु' इति सङ्कल्पानुविधायिन्या मायया तान् प्रति सम्यगावृतः। सत्यपि देहादौ ज्ञानकारणे न ज्ञानविषयत्वयोग्यः कृतः। नच भगवतो व्यामोहकत्वे वैषम्याद्यापत्तिः। तत्कर्मणां प्रवाहानादीनां पूर्वपूर्वतत्कर्मापेक्षमत्सङ्कल्पाधीनानां विपरीतभावनाहेतूनामेव व्यामोहकत्वेन मम वैषम्याद्यसम्भवात्॥ २५॥

मायाया मदधीनत्वेनाहं नित्याप्रतिबद्धज्ञान इत्याह - **वेदेति॥**

वेदाहं समतीतानि वर्तमानानि चार्जुन।
भविष्याणि च भूतानि मां तु वेद न कश्चन॥ २६॥

अहं कालत्रयाप्रतिबद्धसर्वविषयकज्ञानः मायया सर्वां लोकां मोहयन्नपि **समतीतानि** चिरविनष्टानि **वर्तमानानि भविष्याणि च** एवं कालत्रयवर्तीनि **भूतानि** स्थावरजङ्गमानि सर्वाणि **वेद** जानामि। अतोऽहं सर्वज्ञः परमेश्वरः। **मां** सर्वदर्शनं मायास्वामिनं मायाविनमिव तन्मायामोहितः **कश्चन** कोऽपि मदनुग्रहभाजनं मद्भक्तं विना **न वेद**। मन्मायामोहितत्वात्। अतो मत्तत्त्वज्ञानाभावादेव जीवा मां न भजन्त इति भावः॥ २६॥

योगमायां भगवत्तत्त्वज्ञानप्रतिबन्धहेतुमुक्त्वा देहेद्रियसङ्घाताभिमानातिशयपूर्वकं भोगाभिनिवेशं हेत्वन्तरमाह - **इच्छेति॥**

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप॥ २७॥

इच्छाद्वेषाभ्याम् = अनुकूलप्रतिकूलविषयाभ्यां समुत्थेन शीतोष्णसुखदुःखादिद्वन्द्वनिमित्तेन मोहेन 'अहं सुखी, अहं दुःखी' इत्यादिविपर्ययेण सर्वाण्यपि

भूतानि **सम्मोहं** विवेकायोग्यत्वं **सर्गे** देहस्थूलोत्पत्तौ सत्यां **यान्ति**। नहीच्छा-द्वेषरहितं किञ्चिदस्ति। नहि ताभ्यामाविष्टस्य बहिर्विषयकमपि ज्ञानं यथार्थं सम्भवति, किम्पुनः परमात्मविषयकम्। अतो रागद्वेषव्याकुलचित्तत्वात् सर्वाण्यपि भूतानि मां सर्वेश्वरं सदनन्तगुणालयं वासुदेवं[1] न जानन्ति न भजन्ते चेत्यर्थः॥ २७॥

यदि सर्वभूतानि सम्मोहं यान्ति, तर्हि कथमुक्तं 'चतुर्विधा भजन्ते माम्' इति? अत आह - **येषामिति**॥

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः॥ २८॥

येषां तु इतरैर्विलक्षणानां सफलजन्मनां **पुण्यकर्मणाम्** अनेकजन्मसु पुण्याचरणशीलानां तैस्तैः पुण्यैः मदाराधनरूपैः स्वोचितनिष्कामकर्मभिर्मद्विषयकपापम् **अन्तगतम्** अन्तम् अवसानं प्राप्तं **ते** पापाभावेन निमित्तेन द्वन्द्वमोहेन = रागद्वेषादिनिबन्धनविपर्यासेन स्वत एव निर्मुक्ताः **दृढव्रताः** अचलसङ्कल्पाः सर्वथा भगवानेव भजनीयप्रेष्ठः स चैवंरूप एवेति प्रमाणजनिताप्रामाण्यशङ्काशून्यविज्ञानाः सन्तः **मां** सर्वेश्वरं **भजन्ते** अनन्यशरणाः सन्तः सेवन्ते। अतः सत्त्वशोधकमदाराधनरूपनिष्कामकर्मानुष्ठानाय यजनीयमिति भावः॥ २८॥

'मां भजन्ते' इत्युक्तानुवादेनोक्तमेव भगवद्भजनस्य विज्ञानाख्यं फलं तत्रान्योपायनिवृत्त्यर्थमाह - **जरेति**॥

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥ २९॥

जरामरणविविधदुस्सहसंसारदुःखनिरासाय **मां** सर्वेश्वरं सदनन्तगुणालयम् **आश्रित्य** शरणागत्य **यतन्ति** यतन्ते, मदर्पितानि फलाभिसन्धिरहितानि स्वो-

[1] मां परमेश्वरमात्मभूतम्।**इति मधुसूदनसरस्वतीये**

चितानि कर्माणि कुर्वन्ति। **ते** क्रमेण शुद्धचित्ताः सन्तः **ब्रह्म** बृहद्गुणकं[1] मां विदुः। **कृत्स्नमध्यात्मं** विदुः **अखिलं कर्म च** विदुः[2]॥ २९॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः॥ ३०॥

अधिभूताधिदैवेन सहितं ब्रह्मसञ्ज्ञितं **मां ये विदुः** जानन्ति ये च यज्ञाख्येन मद्रूपान्तरेण सहितं **च** मां विन्दन्ति ते मयि न्यस्तमनसो भूत्वा मरणकाले मामेव प्राप्नुवन्तीत्यर्थः। 'ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म च' इति 'अधिभूतमधिदैवं विदुः' इति वक्तव्ये **साधिभूताधिदैवं माम्** इत्युक्तिरधिभूतादिज्ञानस्य स्वज्ञानार्थत्वसूचनार्था। अध्यात्मादिशब्दार्था उत्तराध्याये वक्ष्यन्ते। भगवद्भजनादन्यस्तज्ज्ञानोपायो नास्तीति भावः॥ ३०॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः॥ ७॥

[1] ब्रह्म निर्गुणं तत्पदलक्ष्यम्।**इति मधुसूदनसरस्वतीये** [2] कृत्स्नमुपाध्यपरिच्छिन्नं त्वम्पदलक्ष्यं विदुः। कर्म च तदुभयवेदनसाधनं गुरूपसदनश्रवणमननाद्यखिलं निरवशेषं फलाव्यभिचारी विदुर्जानन्तीत्यर्थः।**इति मधुसूदनसरस्वतीये**

अध्यायः 8

अक्षरब्रह्मयोगः

मुमुक्षूणां सदा ज्ञेयं मुक्तप्राप्यमीश्वरम्।
स्वस्वरूपं ब्रवीतीह मुक्तामुक्तपथौ हरिः॥

सप्तमान्ते सप्तपदार्था ज्ञेयत्वेन भगवतोक्ताः। तान् ज्ञातुमर्जुनः पृच्छति

-

अर्जुन उवाच
किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते॥ १॥

तद् ब्रह्म किं परं ब्रह्म वेदादिकं किञ्चिद्वा? यद्यपि वासुदेव एव ब्रह्मेति जानात्येव पार्थः। तथाऽपि 'मां विदुः' इत्यनुक्त्वा 'ते ब्रह्म तद्विदुः' इति पारोक्ष्योक्त्या प्रकृते परब्रह्मैव स्वात्मकं भगवतोक्तम्, अन्यद्वा? इति भवति सन्देहः। आत्मानं देहम् अधिकृत्य वर्तमानं श्रोत्रादि, जीवो वा? **कर्म** किं ज्योतिष्टोमादिकं परेशकर्तृकं जगत्सर्जनादिरूपं वा? **अधिभूतं च किं** यत्किञ्चित् कार्यम्, समस्तमेव वा कार्यजातम्? **अधिदैवं** हिरण्यगर्भोऽन्यद्वा?

परं ब्रह्म प्राप्यतया मुमुक्षुज्ञेयम्, अध्यात्मं जीवतत्त्वमपि विवेचनाय ज्ञेयम्, कर्म जगत्सर्जनाख्यं ज्ञेयम्, तज्ज्ञानस्य भक्तिवर्धकत्वात्, अधिभूतं च त्याज्यतया ज्ञेयम्, अधिदैवं हिरण्यगर्भो मोक्षप्रापकत्वाद्गुरुत्वेन ज्ञेयः 'स एनान् ब्रह्म गमयति'[1] इति श्रुतेरिति तत्प्रश्नः॥ १॥

अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः॥ २॥

अत्र ब्रह्मादिषट्के **अधियज्ञः** यज्ञमधिगतो देवताऽऽत्मा परब्रह्म वा? तयोर्विविच्य ज्ञेयत्वात् प्रश्नः। स च **कथं** केन प्रकारेण चिन्तनीयः? किमस्मिन् देहे वर्तमानतया, उत ततो बहिर्भावेन वा?[2] देहे चेत्, सः **कोऽत्र** परमेश्वरो जीवो वा?[3] **अधियज्ञः कथं कोऽत्र** इति न प्रश्नद्वयम्, किन्तु सप्रकारक एक एव।

प्रयाणकाले च सर्वकरणवैकल्याच्चित्तसमाधानानुपपत्तेः **कथं** केन प्रकारेण **नियतात्मभिः** समाहितचित्तैः **ज्ञेयोऽसि** उक्ताशङ्कासूचनार्थश्चकारः। एतत् सर्वज्ञत्वात् परमकारुणिकत्वाच्च शरणागतं मां प्रति कथयेत्यभिप्रायः॥ २॥

प्रश्नक्रमेणोत्तरकरणे प्रष्टुरभीष्टसिद्धिरनायासेन स्यादित्यभिप्रायवान् प्रश्नक्रमेणैवोत्तरमाह - **अक्षरमिति**॥

श्रीभगवानुवाच
अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः॥ ३॥

न क्षरतीति **अक्षरम्। परमं** देहतः स्वरूपतो गुणतश्चोत्पत्त्यादिरहितः। **परमम्** उत्कृष्टं जगदुदयादिकारणं 'यतो वा इमानि भूतानि जायन्ते येन

[1] **छान्दोग्योपनिषत्** ४.१५.५ [2] कथं केन प्रकारेण चिन्तनीयः? किं तादात्म्येन किं वाऽत्यन्ताभेदेन? सर्वथाऽपि किमस्मिन् देहे वर्तते ततो बहिर्वा? **इति मधुसूदनसरस्वतीये** [3] कोऽत्र बुद्ध्यादिः, तद्व्यतिरिक्तो वा? **इति मधुसूदनसरस्वतीये**

जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म'[1] इति श्रुत्या 'एतस्य वाऽक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृतौ तिष्ठतः सूर्याचन्द्रमसौ विधृतौ तिष्ठतः'[2] इति श्रुत्या द्युभ्वाद्यायतनत्वेनोक्तमक्षरम्। 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्'[3] इति वक्ष्यमाणं च स्वस्वरूपमक्षरमत्र ब्रह्मपदेनोक्तं नान्यात् किञ्चिद्वेदादीत्यर्थः।

'ते ब्रह्म तद्विदुः'[4] इत्यत्र वेदितृत्वेन प्रस्तुतो जीवः स्व इत्युच्यते। भावः सदैकाकारस्वरूपेण विद्यमानः। स्वश्चासौ भावश्च **स्वभावः** जीवः। सदैकाकारतयेश्वरोऽपि विद्यमानोऽस्ति। परं स न स्वम्। भेदग्राहकप्रत्यक्षादिविरोधात्। नापि स्वीयः। तस्य प्रधानत्वात्। अप्रधानस्य लोके स्वीयपदेन बोधनात्। जडवर्गस्तु देहादिः स्वीयोऽपि न सदैकाकारतया विद्यमानः। आत्मानं देहमधिकृत्य वर्तमानम् **अध्यात्मम्** उत्पत्त्याद्यवस्थाशून्यो निर्विकारतया स्थितो जीवोऽध्यात्मपदवाच्य इत्यर्थः।[5]

भूतानां = प्राणिनां जीवानां भावानां च = जडपदार्थानाम् उद्भवकरः विशेषेण सर्जनं **विसर्गः** ईश्वरकर्तृकः सृष्ट्यादिरूपो व्यापार इत्यर्थः।

यद्वा, भूतानां = भवधर्मकाणां सर्वेषां स्थावरजङ्गमाणां भावम् = उत्पत्तिम्, उद्भवं = वृद्धिं करोति यो विसर्गः त्यागस्तत्तच्छास्त्रविहितो योगदानहोमात्मकः स इह **कर्मसञ्ज्ञितः** कर्मशब्देनोक्त इति यावत्।

'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥'[6] इति स्मृतेः।

'ते वा एते आहुती हुते उत्क्रामतः' इत्यादिश्रुतेश्च।

---

[1] **तैत्तिरीयोपनिषत्** ३.१ [2] **बृहदारण्यकोपनिषत्** ३.८.९ [3] **भगवद्गीता** ८.२१ [4] **भगवद्गीता** ७.२९

[5] परममक्षरं **परं ब्रह्म**। वेदादिशङ्काव्यावृत्त्यर्थमेतत्। आत्मन्यधि यत् तदध्यात्मम्। आत्माधिकारे यत् तदिति वा। तथाहि जैवः **स्वभावः**। स्वाख्यो भाव स्वभाव इति व्युत्पत्त्या जीवो वा **स्वभावः**। सर्वदाऽस्त्येवैकप्रकारेणेति **भावः**। अन्तःकरणादिव्यावृत्त्यर्थो भावशब्दः। नह्येकप्रकारेण स्थितिरन्तःकरणादेः। विकारित्वात्। स्वशब्द ईश्वरव्यावृत्त्यर्थः। भूतानां जीवानां भावानां जडपदार्थानां चोद्भवकरेश्वरक्रिया **विसर्गः**। विशेषेण सर्जनं विसर्ग इत्यर्थः।**इति मध्वभाष्यम्**

[6] **मनुस्मृतिः** ३.७६

यद्वा, भूतभावः = मनुष्यादिभावः, तदुद्भवकरो **विसर्गः** 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति'[1] इति श्रुतिसिद्धो योषित्सम्बन्धजः स **कर्मसञ्ज्ञितः** इत्यर्थः।[2]

अग्रिमप्रश्नत्रयस्योत्तरमाह - **अधिभूतमिति**॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर॥ ४॥

भूतान् = सशरीरान् जीवान् अधिकृत्य तदुपकारित्वेन यदस्ति तत् **अधिभूतम्**। क्षरतीति **क्षरः** विनाशिकार्यरूपः **भावः** वियदादिः सशरीरजीवोपकारकत्वेनाधिभूतपदेनोच्यत इत्यर्थः। **पुरुषः** जीवे विशेषो हिरण्यगर्भः। 'हिरण्यगर्भः समवर्तताग्रे'[3] इति श्रुत्या 'आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत'[4] इति स्मृत्या च प्रतिपादितः। **अधिदैवतं** सर्वजीवाधिपतित्वेन जीवविशेषानधिदैवतानिन्द्रादीनधिकृत्याधिपतित्वेन वर्तत इत्यधिदैवतम्। पुरि शेत इति पुरुषः। यद्यपि जीवसामान्यमध्यात्मपदेनोक्तम्, तथाऽपि हिरण्यगर्भस्य सर्वजीवगुरुत्वाद्विशेषतो ज्ञानाय पृथगुक्तिः। सङ्कर्षणो वा पुरुषः सर्वदैवकप्रेरकत्वादधिदैवतम्। दैवतप्रेरकत्वादिधर्मविशिष्टस्य विशेषतो ज्ञानाय स्वीयरूपविशेषस्य सङ्कर्षणस्योक्तिः।[5]

अधिगतो यज्ञमिति **अधियज्ञः**। अधिगतो यज्ञो येनेति वा। **अत्र** देहे प्रत्यक्षसिद्धयज्ञादेः कर्तृभोक्तृफलदातॄणां सर्वप्राणिनां देहे प्रेरकत्वेन यज्ञादिप्रवर्तकत्वेन वाऽन्तर्यामितया स्थितः **अहमेव**। 'मां साधियज्ञं च ये विदुः'[6] इत्यत्राधियज्ञसाहित्यस्योक्त्वा 'अक्षरं ब्रह्म परमम्'[7] इति परब्रह्मत्वोक्त्या चाधियज्ञस्य स्वस्माद्भेदप्रतीतेः, तन्निरासाय **अधियज्ञोऽहमेव** इत्येवकारः। तथा च बृहदुणकत्वजगदुदयादिकर्तृत्वव्यापकत्वादिनाऽहं ब्रह्मपदवाच्योऽन्तर्यामितया

---

[1] **छान्दोग्योपनिषत्** ५.३.३, ५.९.१ [2] भूतभावः मनुष्यादिभावः तदुद्भवकरो यो विसर्गः 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति श्रुतिसिद्धो योषित्सम्बन्धजः स कर्मसञ्ज्ञितः।**इति रामानुजभाष्ये** [3] १०.१२१.१ [4] **शिवपुराणम्** ७.१.१०, **कूर्मपुराणम्** १.४.३८ [5] भूतानि सशरीरान् जीवानधिकृत्य यत् तदधिभूतम्। क्षरो भावः विनाशिकार्यपदार्थः। ... पुरु शयनात् पुरुषो जीवः। स च सङ्कर्षणो ब्रह्मा वा। स सर्वदेवानधिकृत्य पतिरित्यधिदैवतम्। देवाधिकारस्थ इति वा। देवानिन्द्रियाण्यपेक्ष्य।**इति मध्वभाष्यम्** [6] **भगवद्गीता** ७.३० [7] **भगवद्गीता** ८.३

यज्ञादिप्रवर्तकत्वेनाधियज्ञादिपदवाच्यः। साहित्यं चाभेदेऽपि मत्स्यादाविवाचिन्त्यशक्त्या रूपभेदेनोपपन्नम्। 'भोक्तारं यज्ञतपसाम्'[1] इत्यादिना भगवतः सर्वयज्ञभोक्तृत्वादिनाऽधियज्ञत्वं प्रसिद्धमेवेति 'कथम् ?' इति प्रश्नस्य परिहारः पृथङ्नोक्तः[2]॥ ४॥

'प्रयाणकाले च कथं ज्ञेयोसि ?' इति सप्तमप्रश्नस्योत्तरमाह - **अन्तेति॥**

अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥ ५॥

'स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्'[3] इत्युक्तनित्यस्मरणसमुच्चायकश्चशब्दः। सदनन्तगुणालयं जगदुदयादिलीलं सच्चिदानन्दघनविग्रहं सर्वेश्वरं सर्वान्तर्यामिणं वासुदेवं **मामेव स्मरन्** सदा चिन्तयन्[4] तत्संस्कारपाटवात् समस्तकरणवैकल्यवत्यन्तकालेऽपि स्मरन् **कलेवरं मुक्त्वा** देहाभिमानं त्यक्त्वा प्राणवियोगकाले **यः प्रयाति सः** अर्चिरादिमार्गेण **मद्भावं** पूर्णत्वनिर्मुक्तत्वादिरूपं मत्साम्यं **याति**। 'निरञ्जनः परमं साम्यमुपैति'[5] इति श्रुतेः। 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः'[6] इति वक्ष्यते।

अर्चिरादिमार्गस्तु 'अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति'[7] इति श्रुतिसिद्धः ब्रह्मज्ञानिनोऽस्मिंल्लोके प्राप्यं समीचीनं कुर्वन्ति न वा सर्वथा विषमे वाभिसम्भवन्ति तन्मार्गेण ब्रह्मैव प्राप्नुवन्तीत्यर्थः। अत्रार्चिरादिपदेन तत्तन्मार्गाधिष्ठातारो देवा उच्यन्ते। तन्मार्गगतानां प्रतीकोपासकानां व्यापकोपासनामप्यधिकृतां नारदादीनां ब्रह्मणा सह मोक्षः 'सोऽश्नुते सर्वान् कामान्'[8] इति श्रुतेः ये वाऽनधिकारिणो व्यापकानन्तगुणालयब्रह्मोपासनया जाततदपरोक्षाः शुकादयस्तेषां

[1] **भगवद्गीता** ५.२९ [2] भगवांश्चेत् तद्भोक्तृत्वादेरधियज्ञत्वं सिद्धमिति कथमित्यस्य परिहारः पृथङ्नोक्तः।**इति मध्वभाष्यम्** [3] **पद्मपुराणम्** उत्तरखण्डे ७१.१०८ [4] मामेव भगवन्तं वासुदेवमधियज्ञं सगुणं निर्गुणं वा परममक्षरं ब्रह्म नत्वाध्यात्मादिकं स्मरन् सदा चिन्तयन्।**इति मधुसूदनसरस्वतीये** [5] **मुण्डकोपनिषत्** ३.१.३ [6] **भगवद्गीता** १४.२ [7] **छान्दोग्योपनिषत्** ४.१५.५ [8] **तैत्तिरीयोपनिषत्** २.१.१

तन्मार्गेण सद्यः स्वस्वरूपाविर्भावरूपो मोक्षः। यद्यपि ब्रह्म व्यापकं सर्वत्रैवास्ति स्वयोग्याशेषविशेषविशिष्टब्रह्मापरोक्षपूर्णप्रसादश्च तस्य जात एवेति कर्तव्यं प्राप्यं च किञ्चिन्नास्त्येव। तथाऽपि 'अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'[1] 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः'[2] इत्यादिश्रुत्यनुसारात् प्राकृतांशस्य लिङ्गदेहादेर्निश्शेषतया नाशो लोकस्थभगवन्मूर्तिविशेषं प्राप्यैव।

नच 'तस्य प्राणा नोत्क्रामन्ति'[3] इति श्रुतिविरोध इति वाच्यम्।[4] 'तासां मूर्धानमभिनिस्सृतैका तयोर्ध्वमायन्नमृअतत्वमेति'[5] 'स एवं विद्वान्' 'तस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानवाप्यामृतः समभवत्' इति श्रुत्या,

'ऊर्ध्वमेकः स्थितस्तेषां यो भित्वा सूर्यमण्डलम्।
ब्रह्मलोकमतिक्रम्य तेन यान्ति परा गतिम्॥'[6]

इति स्मृत्या चोत्क्रमणोक्तेः।

'न तस्य प्राणा उत्क्तामन्ति' इत्यनया मुक्तसम्बन्धिप्राणानामनुत्क्रमणमुक्तम्। नतु तस्याप्यनुत्क्रमणं जन्माभावात् तस्य प्राणोत्क्रमणरूपं मरणं न भवतीत्यर्थः। प्राणादीनामिहैवाशेषेण स्वस्वकारणेषु पृथिव्यादिषु लयः, नतु स्वर्गादिनामिन इवांशेन सह गच्छन्तीत्यर्थः। **अत्र** सदा चिन्तनाद्भगवदपरोक्ष्ये, ततः भगवन्तं प्राप्य, स्वस्वरूपाविर्भावरूपमोक्षे सन्देहो **नास्ति** इत्यर्थः॥ ५॥

अन्तकाले भगवन्तमनुध्यायतो भगवत्प्राप्तिर्नियतेति वक्तुमन्यदपि यं कञ्चित्काले ध्यायतो देहं त्यजतस्तत्प्राप्तिरवश्यम्भवतीत्याह - **यं यमिति**॥

यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेबरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः॥ ६॥

---

[1] **छान्दोग्योपनिषत्** ८.३.४ [2] **छान्दोग्योपनिषत्** ८.१२.३ [3] न तस्य प्राणा उत्क्रामन्तीति तु श्रुतिपाठः **इति नृसिंहपूर्वतापनीयोपनिषत्** ५ [4] निर्गुणब्रह्मस्मरणपक्षे तु कलेवरं त्यक्त्वा प्रयातीति लोकदृष्ट्यभिप्रायम्। 'न तस्य प्राणा उत्क्रामन्त्यत्रैव समलीयन्ते' इति श्रुतेस्तस्य प्राणोत्क्रमणाभावेन गत्यभावात् स मद्भावं साक्षादेव याति। 'ब्रह्मैव सन् ब्रह्माप्येति' इति श्रुतेर्नास्त्यत्र देहव्यतिरिक्त आत्मनि मद्भावप्राप्तौ वा संशयः।**इति मधुसूदनसरस्वतीये** [5] **कठोपनिषत्** ६.१७
[6] **अग्निपुराणम्** ३७५.२१

न केवलं मां स्मरन् मद्भावं यातीति नियमः, किन्तु **यं यं भावं** देवताविशेषं वाकारादन्यदपि यत्किञ्चित् **स्मरन्** चिन्तयन् **अन्ते** प्राणवियोगकाले **कलेवरं त्यजति** सः **तं तमेवैति** नान्यदाप्नोति। अन्तकाले स्मरणोद्यमासम्भवेऽपि पूर्वाभ्यासजनिता वासनैव स्मृतिहेतुरियाह - **सदा** सर्वदा तस्मिन् = तद्देवताविशेषादौ भावो = भावना वासना तद्भावः, स भावितः = सम्पादितो येन स तथा। आहिताग्न्यादेराकृतिगणत्वाद्भावितपदस्य परनिपातः॥ ६॥

यतः सर्वदा चिन्तनाभ्यासादेव संस्कारदार्ढ्यादिन्द्रियवैकल्यकाले स्मृतिर्भवति, अतः सर्वदा भगवच्चिन्तनमनवरतं कार्यमित्याह - **तस्मादिति**॥

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः॥ ७॥

यतो मदपोक्षज्ञानिनां प्रारब्धकर्माभावे नित्यस्मृतिजन्यान्तस्मृत्या मत्प्राप्तिर्नियमेन भवति, **तस्मात् सर्वेषु कालेषु मां** सदनन्तगुणालयं जगदुदयादिकर्तारं सच्चिदानन्दघनविग्रहं **अनु** निरन्तरं सस्नेहं **स्मर**। यदि निरन्तरमविच्छिन्नतैलधारावन्मत्स्मरणं कर्तुमशक्तश्चेत्, तर्हि मदाराधनरूपं स्वोचितं निष्कामं कर्म कुर्वित्याह - **युद्ध च** जातजिज्ञासस्यास्थिरचित्तस्य निष्कामकर्मानुष्ठानं ततः श्रवणमनननिदिध्यासनरूपं सदा मच्चिन्तनं ततो मदापरोक्ष्यं प्रसादश्च ततो मत्प्राप्तिरूपो मोक्ष इयाह - **मयीति॥ मयि** सर्वेश्वरेऽर्पिते सङ्कल्पाध्यवसायरूपे मनोबुद्धी येन सः। **मामेव** सर्वेश्वरम् **एष्यसि**।

यद्यपि स्वरूपानन्दाविर्भावरूप एव मुक्तिः, नत्वीश्वरप्राप्तिः। तथाऽपि तादृक्स्वरूपाविर्भावः सर्वेश्वरं प्रसन्नापरोक्षीभूतं प्राप्यैव भवति, नान्यथा 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रुतेरित्यभिप्रायः॥ ७॥

तदेवं सप्तप्रश्नानामुत्तरमुक्त्वा, प्रयाणकाले हरिस्मरणस्य हरिप्राप्तिरूपं फलं वर्णयन् निरतिशयैश्वर्यं निरूपयितुमारभते - **अभ्यासेति**॥

अभ्यासयोगयुक्तेन चेतसाऽनन्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥ ८॥

अभ्यासः = विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहः स एव योगः = समाधिः, तेन युक्तं तत्रैव व्यापृतं भगवदाकारवृत्तीतरवृत्तिशून्यं यच्चेतः, तेन **चेतसा** अभ्यासपाटवेन **अनन्यगामिना** नान्यत्र विषयान्तरे निरोधप्रयत्नं विनाऽपि गन्तुं शीलमस्येति। तेन **परमं** निरतिशयं पुरुषं पूर्णगुणं **दिव्यम्** अतिवैरिञ्चिप्रपञ्चवैभवं **याति** अर्चिरादिमार्गेण प्राप्नोति। **अनुचिन्तयन्** शास्त्राचार्योपदेशमनुध्यायन्॥ ८॥

पुनरपि मुमुक्षुज्ञेयं मुक्तप्राप्यं पुरुषं विशिनष्टि - **कविमिति॥**

कविं पुराणमनुशासितारं
अणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपं
आदित्यवर्णं तमसः परस्तात्॥ ९॥

कविं सर्वज्ञं **पुराणं** सर्वस्यादिभूतं स्वस्यादिरहितम् **अनुशासितारम्** अन्तर्यामिणं **अणोरणीयांसं** सूक्ष्मादपि सूक्ष्मं **सर्वस्य धातारं** सर्वस्य जीवजडादेर्धारकं पोषकं वा। **अचिन्त्यरूपम्** अणुत्वमहत्वसर्वकर्तृतौदासीन्यसर्वभूतसमत्वदुष्टनिग्राहकत्वभक्तानुग्राहकत्वादीनां लोके एकत्र विरुद्धानां च ज्ञानानन्दाद्यनन्तगुणानामालयत्वेन तत्प्रसादं विना चिन्तयितुमशक्यमित्यर्थः। **आदित्यवर्णं** सूर्यवत् स्वपरप्रकाशकवर्णोपेतं **तमसः** प्रकृतेः **परस्तात्**। [1]

प्रकृतिपरत्वं तन्नियामकत्वं तद्धर्मास्पृष्टत्वं च। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'[2] इति श्रुतेः।

'तमोऽव्यक्तं शिवं नित्यमजं योनिः सनातनम्।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ॥

अनुद्रिक्तमनूनं च ह्यकम्पमचलं ध्रुवम्।

---

[1] आदित्यस्येव सकलजगदवभासको वर्णः प्रकाशो यस्य तं सर्वस्य जगतोऽवभासकमिति यावत्। अत एव तमसः परस्तात् तमसो मोहान्धकारादज्ञानलक्षणात् परस्तात् प्रकाशरूपत्वेन तमोविरोधिनमिति यावत्।**इति मधुसूदनसरस्वतीये**

[2] **श्वेताश्वतरोपनिषत्** ४.१०

सदसच्चैव तत्सर्वमव्यक्तं त्रिगुणं स्मृतम्।
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः॥'[1]
इत्याश्वमेधिके तमःप्रकृतिशब्दयोः पर्यायत्वोक्तेः॥ ९॥

स्वभक्तस्य योगिनः प्रयाणकाले कर्तव्यमाह - **प्रयाणकाल इति॥**

प्रयाणकाले मनसाऽचलेन
भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम्॥ १०॥

प्रयाणकाले अन्तकाले **अचलेन** एकाग्रेण भगवदाकारातिरिक्तवृत्तिशून्येन **मनसा** श्रवणादिवासितेन **तं पुरुषं** 'योऽनुस्मरेत्' इत्यनुवर्तते। कीदृशः? **भक्त्या** भगवद्विषयकप्रेमप्रवाहेण **युक्तः** योगस्य = चित्तसमाधेः बलेन, तज्जनितसंस्कारसमूहेन व्युत्थानसंस्कारविरोधिना च युक्तः। एवं प्रथमं हृदयपुण्डरीके वशीकृत्य गुरूपदिष्टमार्गेणोक्तक्रमेण **भ्रुवोर्मध्ये** आज्ञाचक्रे **प्राणमावेश्य** स्थापयित्वा **सम्यक्** अप्रमत्तो ब्रह्मरन्ध्रादुत्क्रम्य **सः** एवं[2] **तं** 'कविं पुराणम्' इत्युक्तलक्षणं **परं** जगदुदयादिकर्तारं **पुरुषं** पूर्णगुणं **दिव्यं** द्योतनात्मकम् **उपैति** प्राप्नोति॥ १०॥

ध्यानकाले येन केनचित् मन्त्रेणानुस्मरणे प्राप्ते

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्॥'[3]

इत्यादिश्रुतिप्रतिपादितत्वेन प्रणवेनैवाभिधानेन तदनुस्मरणं कार्यं नान्यमन्त्रेणेति नियमायोपक्रमते - **यदिति॥**

---

[1] **महाभारतम्** १४.३९.२२-२३ [2] एवमुपासक इति स्यात् मधुसूदनीयानुगुण्यात्। [3] **कठोपनिषत्** २.१५

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये॥ ११॥

यदक्षरम् उत्पत्त्यादिषड्विकारशून्यं सदैकाकारं ब्रह्म **वेदविदो वदन्ति** 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घम्' इत्यादिवचनैरितरजीवजडस्थूलत्वादिधर्मनिषेधतया[1] 'एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च'[2] इत्याकाशादिसर्वजगदाधारतया 'एतस्य् वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः'[3] इति सूर्यादिनियामकतया च वदन्ति। न केवलं प्रमाणकुशलैस्तैरेवं ज्ञातैः, किन्तु मुक्तैः प्राप्यतयाऽनुभूतमपीत्याह - **विशन्ति**[4] **यद्यतयः** यत्नशीलाः सन्न्यासिनः **वीतरागाः** इहामुत्र भोगनिस्पृहा अशेषाविद्यानिवृत्तिपूर्वकं प्राप्नुवन्ति।

प्रवेशः खगादीनां वृक्षादिष्विव संश्लेषविशेषः। स एव सायुज्यपदवाच्यो मोक्षः। सह युनक्तीति सयुक्, सयुजो भावः सायुज्यमिति व्युत्पत्तेः। 'अथ पुनर्मृत्युं जयन्ति ब्रह्मणः सायुज्यं गच्छन्ति' इत्यादिश्रुत्या साम्यरूपमेव सायुज्यमुक्तम्। नतु स्वरूपैक्यम्। 'यद्देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छन्ति। पितृणामेव महिमानं चन्द्रमसः सायुज्यं गच्छन्ति। अग्रेर्वायोरादित्यस्य सायुज्यं गच्छन्ति' इत्यादिश्रुतिषु सायुज्यशब्दस्य साधर्म्यवाचकत्वदर्शनात्। मुक्तेः प्राक् परेणापि जीवानामभेदानङ्गीकारात्। एकत्रैक्यं प्राप्तानामन्यत्र गमनासम्भवाच्च।

सायुज्यं साधर्म्यम्, सारूप्यं समानरूपत्वं चतुर्भुजादिना, सामीप्यं विग्रहविशेषेण निकटस्थत्वम्, सालोक्यं समानलोकस्थितत्वमिति चतुर्धा मुक्तिः। तत्र केषाञ्चित् चतस्रोऽपि, केषाञ्चित् तिस्रः, केषाञ्चिद्द्वे, केषाञ्चिदेकैव। उदकपूर्णस्वल्पमहाघटानामिव सर्वेषां पूर्णत्वान्निश्शेषाविद्यानिवृत्तेश्च तासूपाधिः पूर्णानन्दा[5] तेषामैच्छिको विग्रहः। 'सङ्कल्पादेव तच्छ्रुतेः'[6] इति सूत्रात्। 'यदि

[1] इत्यादिवचनैः सर्वविशेषनिवर्तनेन**इति मधुसूदनसरस्वतीये** [2] **बृहदारण्यकोपनिषत्** ५.८.११
[3] **बृहदारण्यकोपनिषत्** ५.८.९ [4] विशन्ति स्वरूपतया। **इति मधुसूदनसरस्वतीये** [5] तामपि इत्यधिकं पठ्यते कोशे। [6] **ब्रह्मसूत्रम्** ४.४.८

पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति'[1] इत्यादिश्रुतेश्च। 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति'[2] इति श्रुत्या मुक्तानामिच्छोक्तेः। 'कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्'[3] इति सूत्रेण सर्वकार्याणां प्रलये स्वाध्यक्षेण स्वामिना चतुर्मुखेन सह, अतश्चतुर्मुखात् परं गच्छन्तीत्यर्थः। तेन 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'[4] इति श्रुत्या च मुक्तौ भोगोक्तेः। 'स एनान् ब्रह्म गमयति'[5] इति श्रुत्या चतुर्मुखस्य मोक्षप्रापकत्वोक्तेः।

'ये च मुक्ता भवन्तीह नरा भरतसत्तम।
तेषां लक्षणमेतद्यच्छ्वेतद्वीपनिवासिनाम्॥'[6]

'तत्र नारायणपरा मानवाश्चन्द्रवर्चसः।
अनिन्द्रिया अनाहारा अनिष्पन्दा सुगन्धिनः॥'

एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः।
तत्र च पुरुषाः सर्वे पञ्चेन्द्रियविवर्जिताः॥

प्रतिबुद्धाश्च ते सर्वे भक्ताश्च पुरुषोत्तमम्।
अर्चयन्ति सदा देवं तैः सार्धं रमते च सः॥

न तत्राभ्यधिकः कश्चित् सर्वे ते समतेजसः।
कृताञ्जलिपुटा हृष्टा नम इत्येव वादिनः॥'[7]

इति मोक्षधर्मे मुक्तानां प्राकृतेन्द्रियाद्यभावः, दिव्याप्राकृतदेहेन्द्रियादिकं चोक्तम्।

न केवलं मुक्तैरनुभूतम्। साधकानामपि सर्वप्रयासस्तदर्थ इत्याह - **यदिच्छन्तः** यज्ज्ञानं नैष्ठिकब्रह्मचर्यं गुरुकुलवासादि तपः **चरन्ति** यावज्जीवं **तत्** अक्षराख्यं **पदं** पदनीयं प्राप्यं **ते** तुभ्यं **सङ्ग्रहेण प्रवक्ष्ये।**

वदन्ति इत्यादिना ब्रह्मणः सर्वशब्दावाच्यत्वं ब्रुवन्तो निरस्ताः। नच 'यतो वाचो निवर्तन्ते'[8] इत्यादिश्रुत्या वाच्यत्वं निषिद्धम्। तस्याः साकल्येनावा-

---

[1] **छान्दोग्योपनिषत्** ८.२.१ [2] **छान्दोग्योपनिषत्** ८.१.६ [3] **ब्रह्मसूत्रम्** ४.३.१० [4] **तैत्तिरीयोपनिषत्** २.१.१ [5] **छान्दोग्योपनिषत्** ४.१५.५ [6] **महाभारतम्** १२.३२२.१४ [7] इदं वाक्यजातं प्रक्षेपोच्छेदादिभिः सहितं केषुचित् पुस्तकेषु पठ्यते **महाभारतम्** शान्ति. ३३६.२८-४१ [8] **तैत्तिरीयोपनिषत्** २.४.२२

च्यत्वपरत्वात्। 'यतः' इत्यनेनैव वाच्यत्वाच्च। नच लक्ष्यमेव शुद्धं ब्रह्म, अन्यत्तूपासनाविषयीभूतं मन्दाधिकारिणामशुद्धं स्वरूपमुक्तमिति वाच्यम्। अत्रोपासनबोधकपदाभावात्। मुक्तप्राप्यत्वबोधकपदसत्वाच्च। सर्वशब्दावाच्ये लक्षणाया अदृष्टत्वादसम्भवाच्च। 'वेदैश्च सर्वैरहमेव वेद्यः'[1] इत्यत्रैवकारेण सर्वेश्वरसदनन्तगुणालयवासुदेवभिन्नस्य सर्ववेदवेद्यताया निराकरिष्यमाणत्वाच्च॥ ११॥

'प्रवक्ष्ये' इति प्रतिज्ञातार्थमाह - **सर्वेति द्वाभ्याम्॥**

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायाऽत्मनः प्राणमास्थितो योगधारणाम्॥ १२॥

सर्वेन्द्रियद्वाराणि **संयम्य** विषयेभ्यो दोषदर्शनाभ्यासेन प्रत्याहृत्य। बाह्येन्द्रियनियमनेऽपि मनसः प्रचारः स्यात्। अत आह - **मनो हृदि निरुध्य च** हृदये मनो निरुद्ध्य, असम्प्रज्ञातसमाधिपर्यन्तं मनः[2] प्राप्य। एवं बहिरन्तरुपलब्धिद्वाराणि सर्वाणि निरुद्ध्य क्रियाद्वारं प्राणमपि सर्वतो निरुद्ध्य क्रमेण **मूर्ध्न्याधाय** भ्रुवोर्मध्ये तदुपरि वा गुरूपदिष्टमार्गेणावेश्य **आत्मनः** परमात्मनो योगस्य धारणाम् **आस्थितः** ॥ १२॥

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥ १३॥

ओमित्येकाक्षरं ब्रह्मवाचकत्वात् **ब्रह्म व्याहरन्** उच्चरन् तदर्थं सदनन्तालौकिकबृहद्गुणकं **मामनुस्मरन्** सस्नेहाविच्छिनमनोवृत्तिधाराविषयीकुर्वन् ब्रह्मरन्ध्रेण **देहं त्यजन् यः प्रयाति सः** अर्चिरादिमार्गेणाचिरादेव **परमां** स्वस्वरूपानन्दाविर्भावरूपां **गतिं** मुक्तिं **याति** प्राप्नोति।

प्रतीकोपासकश्चेत् ब्रह्मलोकं गत्वा, तद्भोगान्ते मुच्येत। सर्वव्यापकत्वानन्तगुणवत्वस्य ध्यानेन जातस्वयोग्याशेषविशेषापरोक्षश्चेत्, सद्य एवार्चिरा-

[1] **भगवद्गीता** १५.१५ [2] मन इति द्वितीया।

दिमार्गेण मुच्येत। अधिकारिणां नारदादीनां व्यापकोपासनया जातब्रह्मापरोक्षाणामप्यधिकारान्ते मोक्षः विदेहकैवल्यप्रतिबन्धकानामारम्भककर्मणां सत्वात्। 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति श्रुतेः॥ १३॥

य एवं ब्रह्मरन्ध्रेण स्वेच्छया देहं त्यक्तुं न शक्नोति, किन्तु कर्मक्षयेणैव परवशो देहं त्यजति, तस्य किं स्यात्? अत आह - **अनन्येति**॥

अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥ १४॥

न विद्यते मदन्यविषये चेतो यस्य सः **अनन्यचेताः। सततं** निरन्तरं **नित्यशः** यावज्जीवं **यो माम्** अतिप्रेम्णा स्मरति **तस्य** स्ववशतया परवशतया वा देहं त्यजतोऽपि **नित्ययुक्तस्य** सततं समाहितचित्तस्य **योगिनः** अहं सर्वेश्वरो जगदुदयादिकर्ताऽन्यस्यातिदुर्लभोऽपि **सुलभः** सुखेन लभ्यः। हे **पार्थ** तव मन्मित्रस्याहमतिसुलभ इति भावः।

यावज्जीवं विक्षेपान्तरशून्यतया हरेश्चिन्तनमेव परमगतिहेतुर्ब्रह्मरन्ध्रेण स्वेच्छयोत्क्रमणं भवतु न वेति नातीवाग्रहः। तदनुस्मरणं विना ब्रह्मरन्ध्रेणोक्तमरणमपि न मोक्षदमिति भावः॥ १४॥

सदनन्तगुणं वासुदेवं प्रसन्नमपरोक्षीभूतं प्राप्य न निवर्तेत इत्याह - **मामिति**॥

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥ १५॥

मां सर्वेश्वरं प्राप्य। **पुनर्जन्म** मनुष्यादिदेहसम्बन्धम्। कीदृशम्? **दुःखालयं** गर्भवासयोनिनिर्गमनाद्यनेकदुःखस्थानम्। **अशाश्वतम्** अस्थिरम्। **नाप्नुवन्ति** पुनर्नावर्तन्ते। यतः **महात्मानः** महाशया गम्भीराशयाः प्राकृतभोगेभ्यो निवृत्तचित्ता इत्यर्थः।

मां प्राप्य मत्प्रसादात् स्वस्वरूपाविर्भावरूपां सम्यक् सिद्धिं **परमां** निवृत्ताशेषप्राकृताशतया विदेहकैवल्यरूपां ध्वस्तलिङ्गतयाऽपुनरावृत्तिरूपां गताः। 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'[1] 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः'[2] इत्यादिश्रुतेः 'विहारोपदेशात्'[3] इति सूत्राच्च॥ १५॥

भगवन्तं प्राप्तानां ध्वस्तलिङ्गत्वादपुनरावृत्तिमुक्त्वा सम्यग्भगवद्दर्शनहीनानामत एव तदप्राप्तानां सत्यलोकं गतानामपि लिङ्गदेहस्य सत्वेन पुनरावृत्तिर्भवतीत्याह - **आब्रह्मेति**॥

आब्रह्मभवनाल्लोकाः[4] पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥ १६॥

भवन्त्यत्र भूतानीति भुवनं लोकः। **आब्रह्मभुवनात्** इत्यत्राभिविधावाकारः। ब्रह्मलोकेन सह सर्वेऽपि लोका सम्यक् मद्दर्शनप्रसादहीनानां सम्यगनुष्ठितब्रह्मचर्यसन्न्यासादीनां भोगार्थाः। **ब्रह्मभवनात्** इति पाठे भवनं = वासस्थानमिति स एवार्थः। **मां** सर्वेश्वरमप्राकृतवैभवम् **उपेत्य** प्राप्य **पुनर्जन्म** न विद्यते। 'मामुपेत्य'[5] इत्युक्तस्य पुनरुक्तिर्दार्ढ्याय। अर्चिरादिमार्गेण गतानां जातव्यापकब्रह्मापरोक्षाणां ब्रह्मलोके गतानामपि तत्तत्क्षणमेव मुक्तिः, नतु तत्रावस्थानम्। परिच्छिन्नतया प्रतिमादिषूपासकानां ब्रह्मलोकेऽवस्थानम्, भोगान्ते च मुक्तिः। भक्तिं विना केवलं मासादिनैव गतानां पुनरावृत्तिरिति विवेकः॥ १६॥

ब्रह्मलोकेन सह सर्वे लोकाः पुनरावृत्तिनः कालपरिच्छिन्नत्वादित्याह - **सहस्रेति**॥

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥ १७॥

सहस्रं युगानि = चतुर्युगानि पर्यन्तः = अवसानं यस्य तत्। 'चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते'[6] इति पुराणवचनम्। तादृशं **ब्रह्मणः** प्रजापतेः **अहः** दिनं

[1] **छान्दोग्योपनिषत्** ८.१२.३ [2] **छान्दोग्योपनिषत्** ८.१२.३ [3] **ब्रह्मसूत्रम्** २.३.३४ [4] आब्रह्मभुवनाल्लोकाः - पा. [5] **भगवद्गीता** ८.१५ [6] 'चतुर्युगसहस्रं तु कथ्यते ब्रह्मणो दिनम्' इति तु **विष्णुपुराणम्** ६.३.११, ब्राह्मे च २३२.११

यत् ये **विदुः**। तथा **रात्रिं युगसहस्रान्तां** चतुर्युगसहस्रपर्यन्तां 'विदुः' इत्यनुवर्तते। **तेऽहोरात्रविदः** योगिनः **जनाः**। ये तु चन्द्रार्कगत्यैव विदुः, न तेऽहोरात्रविदः। स्वल्पदर्शित्वादित्याशयः॥ १७॥

यथोक्ताहोरात्रैः पक्षमासादिगणनया पूर्णं वर्षशतं प्रजापतेः परमायुरिति कालपरिच्छिन्नत्वात्[1] तल्लोकात् पुनरावृत्तिर्युक्तैव। ततोऽर्वाचीनानां तदहर्मात्रपरिच्छिन्नत्वात् सुतरां पुनरावृत्तिरित्याह - **अव्यक्तादिति**॥

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसञ्ज्ञके॥ १८॥

अत्र दिनसृष्टिप्रलोययोरुपक्रान्तत्वात्, तत्र चाकाशादीनां सत्वादव्यक्तपदेन स्वगुणसाम्यावस्थं प्रधानं नोच्यते। किन्तु प्रजापतेः स्वापावस्थैव। तथा च **अव्यक्तात्** प्रजापतिस्वापकालावच्छिन्नतया स्थितात् प्रधानात् **अहरागमे** प्रजापतेः प्रबोधकाले **प्रभवन्ति** अभिव्यज्यन्त इत्यर्थः। **रात्र्यागमे** तस्य स्वापकाले पूर्वोक्ताः सर्वाः **व्यक्तयः लीयन्ते** तिरोभवन्ति। यत आविर्भूताः **तत्रैवाव्यक्तसञ्ज्ञके**।

यद्वा, अहोरात्रे हरेरेव गृह्येते। **अव्यक्तात्** हरेरेव तत् **अहरागमे** सृष्टिकाले समागते लूनायास्तन्त्ववव इव हरेर्निमित्तकारणरूपात् प्रधानमहदाद्याः पदार्थाः **प्रभवन्ति** अभिव्यज्यन्ते। **रात्र्यागमे** प्रलयकाले समागते **तत्रैवाव्यक्तसञ्ज्ञके** हरौ सर्वे पदार्थाः **प्रलीयन्ते**। सहस्रयुगशब्दो द्विपरार्धात्मककाललक्षकः।[2]

'प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि॥
परमात्मा च सर्वेषामाधारः पुरुषोत्तमः।
स विष्णुनामा वेदेषु वेदान्तेषु च गीयते॥'[3]
'द्विपरार्धात्मकः कालः कथितो हि मया तव।

[1] कालपरिवृत्तत्वात् - पा. [2] द्विपरार्धप्रलय एवात्र विवक्षितः।**इति मध्वभाष्यम्** [3] **विष्णुपुराणम्** ६.४.३९-४०

तदहस्तस्य मैत्रेय विष्णोरीशस्य कथ्यते॥

व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा।
तत्र स्थिते निशा चान्या तत्प्रमाणा महामुने॥

नैवाहस्तस्य नित्यस्य न निशा परमात्मनः।
उपचारस्तथाऽप्येषस्तस्येशस्य द्विजोच्यते॥'[1]

इति वैष्णवोक्तेः।

अतो ज्ञानेच्छाकृतीनां भगवति नित्यत्वेऽपि जीवादृष्टादेरपि सत्वेन न सदा सृष्ट्यादिः, तत्कालत्वाभावात्। एकैव हरीच्छा सृष्टिकालसहिता सिसृक्षा, प्रलयकालसहिता च जिहीर्षा॥ १८॥

आशुविनाशिनोऽपि संसारस्य न निवृत्तिः, क्लेशकर्मादिवशतया पुनःपुनः प्रादुर्भावात्। प्रादुर्भूतस्य च पुनः कर्मादिवशेनैव तिरोधानात्। संसारे परिवर्तमानानां विवशानां जन्ममरणादिदुःखप्रबन्धसम्बन्धादलमनेन संसारेणेति वैराग्योत्पत्त्यर्थमाह - **भूतेति**॥

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे॥ १९॥

भूतग्रामः भूतसमूहः स्थावरजङ्गमरूपो यः पूर्वस्मिन् कल्पे स्थितः **स एवायम्** एतस्मिन् कल्पे प्रादुर्भूतः, न तु प्रतिकल्पमन्योऽन्यश्च। असत्कार्यवादानभ्युपगमात्। 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः'[2] इति श्रुतेः।

'यथर्त्तुषु तु लिङ्गानि नामरूपाणि वै यथा।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु॥'[3] इति स्मृतेश्च।

---

[1] **विष्णुपुराणम्** ६.४.४७-४९ [2] **महानारायणोपनिषत्** ५.७ [3] **महाभारतम्** १.१.३७

महत्तत्त्वाद्या घटत्वाद्यन्ताः प्रकृतेरवस्थाविशेषाः तत्तत्कारणैरभिव्यज्यन्ते। दण्डादिना मृदि घटत्वाद्यवस्थाव्यक्तिरेव घटाद्युत्पत्तिः। मुद्गलादिना तत्तिरोधानं कपालत्वचूर्णत्वाद्यवस्थाभिव्यक्तिर्घटादीनां नाशः। तत्र ये पूर्वकल्पे जीवन्मुक्ता ब्रह्मादयः, ते त्वधिकारान्ते प्रारम्भककर्मक्षये विमुच्यन्ते। तन्नामका अन्ये तदधिकारं कल्पान्तरे प्राप्नुवन्तीत्यमुक्तानां पुनः संसारः, जडवर्गस्तु स एवेति भावः॥ १९॥

ब्रह्मलोकगतानामपि हरिभक्तिं विना पुनरावृत्तिमुक्त्वा, 'मामुपेत्य पुनर्जन्म न विद्यते' इत्येतद्विवृणोति **पर इति द्वाभ्याम्** ॥

परस्तस्मात् तु भावोऽन्योऽव्यक्तो व्यक्तात् सनातनः।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥ २०॥

तस्मात् स्थूलसूक्ष्मादिनानारूपात् **व्यक्तात्** चक्षुरादिगोचरात् **अव्यक्तः** चक्षुराद्यगोचरः **भावः** स्वतन्त्रः **अन्यः** भिन्नः **परः** उत्कृष्टो नियामकतया **सनातनः** सदैकाकारः। तुशब्दो हेयादनित्यादुपादेयत्वाव्यक्तत्वादिना वैलक्षण्यं सूचयति। **सर्वेषु भूतेषु नश्यत्सु** अवस्थान्तरं प्राप्नुवत्स्वपि **न विनश्यति** नावस्थान्तरं प्राप्नोति। 'सदैकरूपरूपाय विष्णवे प्रभविष्णवे[1,2] इति वैष्णवोक्तेः। तस्य तद्वैभवस्य चान्यथाभावरूपनाशोत्पत्त्याद्यभावात् तत्साम्यं गतानां न पुनरावृत्तिरिति भावः॥ २०॥

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥ २१॥

अव्यक्तः इन्द्रियागोचरः केवलमौपनिषदो न क्षरति न विकारं प्राप्नोतीति **अक्षरः** इहान्यत्र च **उक्तः तमाहुः** श्रुतयः स्मृतयश्च।

'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः'[3] इति।
'मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय'[4] इति च।

---

[1] सर्वजिष्णवे इति तु पुराणपाठः। [2] **विष्णुपुराणम्** १.२.१ [3] **कठोपनिषत्** ३.११ [4] **भगवद्गीता** ७.७

परमां गतिं परमप्राप्यं मामेवाहुरित्यर्थः। निरस्ताविद्याः सन्तः **यं प्राप्य** सिद्धाः **न निवर्तन्ते** न संसारिणो भवन्ति **तद्धाम** स्वरूपं **परमं** सर्वनियामकमनन्तसद्गुणं **मम** स्वरूपम्। 'राहोः शिरः' इतिवदभेदे षष्टी।

यद्वा **धाम** लोको वैकुण्ठाख्यं[1] प्राकृतस्वभाववर्जितं लक्ष्मीक्रीडार्थं नित्योऽप्राकृतोऽमुक्ताप्राप्यो भगवल्लोकोऽस्ति। 'सहस्रस्थूणे वितते दृढे उग्रे यत्र देवानामधिदेव आस्ते। क्षयन्तमस्य रजसः पराके योस्याध्यक्षः परमे व्योमन् तद्विप्राः सोऽहिमन्यवो ताग्रवांसः समिन्धक्ते यत्र पूर्वे साध्या सन्ति देवाः। तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इत्यादिश्रुतेः।

'ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः।'[2]

'यत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदम्॥'[3]

'यमाहुः सर्वभूतानां प्रकृतेः प्रकृतिं ध्रुवम्।
अनादिनिधनं देवं प्रभुं नारायणं परम्॥

ब्रह्मणः सदनात् तस्य परं स्थानं प्रकाशते।
न देवा अपि यत्[4] पश्यन्ति सर्वतेजोमयं शुभम्॥

अत्यर्कानलदीप्तं तत् स्थानं विष्णोर्महात्मनः।
स्वयैव प्रभया राजन् दुःप्रेक्ष्यं देवदानवैः॥

यत्र भूतेश्वरस्तात सर्वप्रकृतिरात्मभूः।
भासयन् सर्वभूतानि सुश्रियाऽभिविराजते॥

नात्र ब्रह्मर्षयस्तात कुत एव महर्षयः।
प्राप्नुवन्ति गतिं ह्येतां यतीनां कुरुसत्तम॥

न तं ज्योतींषि सर्वाणि प्राप्य भास्वन्ति पाण्डव।
स्वयं प्रभुरचिन्त्यात्मा तत्र ह्यतिविराजते॥

यतयस्तत्र गच्छन्ति भक्त्या नारायणं हरिम्।

---

[1] परमं मम धामेति वैकुण्ठभवनम्।**इति वल्लभभाष्ये** [2] **ब्रह्माण्डपुराणम्** १.२१.१७५, **मत्स्यपुराणम्** १२४.११२ [3] **ब्रह्माण्डपुराणम्** १.२१.१७६, **मत्स्यपुराणम्** १२४.११३ [4] ., देवाश्च यत्नात् - मुद्रितपाठः।

परेण तपसा युक्ता भाविताः कर्मभिः शुभैः॥
योगसिद्धा महात्मानस्तमोमोहविवर्जिताः।
तत्र गत्वा पुनर्नेमं लोकमायान्ति भारत॥
स्वयम्भुवं महात्मानं देवदेवं सनातनम्।
स्थानमेतत् महाभाग ध्रुवमक्षयमव्ययम्॥'[1]
अर्चिरादिना तत् प्राप्यते' इति महाभारताद्युक्तेश्च।

नच जयविजययोः पुनरावृत्तिः प्रसिद्धा। तयोः प्रकृतिभागस्थहरिलोकद्वारपालकत्वेन प्रकृत्यसृष्टहरिलोकाप्राप्तत्वात्। ध्वस्तलिङ्गदेहानामेव हि महावैकुण्ठे गमनम्। न च तेषां पुनः प्राकृतदेहसम्भावना। एकस्यैव लोकस्य भागविशेषो लोकान्तरमेव वेत्यन्यदेतत्॥ २१॥

सर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपया भक्त्यैव प्राप्योऽहमित्याह - **पुरुष इति**॥

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्॥ २२॥

सः परः निरतिशयपूर्णगुणः **पुरुषः** अहमेव **अनन्यया** न विद्यतेऽन्यो विषयो यस्यास्तस्याऽविच्छिन्नप्रेमप्रवाहरूपया **भक्त्या** एव **लभ्यः**, नान्यथा। स कः? इत्यपेक्षायामाह - **यस्यान्तस्थानि** अन्तर्वर्तीनि सर्वाण्याकाशादीनि **भूतानि**, द्युभ्वाद्यायतन इत्यर्थः। **येन** पुरुषेण **इदं सर्वं** जीवजडात्मकं जगत् **ततं** व्याप्तम्।

'यच्च किञ्चित् जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः॥'[2] इत्यादिश्रुतेः।

सर्वसद्गुणपूर्णो जगदादिकर्ता सर्वेश्वरोऽनन्यभक्तिं विना दुष्प्राप्य इति भावः॥ २२॥

---

[1] **महाभारतम्** ३.१६०.१७-२३, पाठव्यत्यासैः पठ्यते। [2] **महानारायणोपनिषत्** १३.५

भगवन्तं प्राप्तस्य न पुनरावृत्तिः, इतरेषां पुनरावृत्तिरित्युक्तम्। तदुभयेषां मार्गं वक्तुं प्रतिजानीते -

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥ २३॥

ज्ञानयोगिनः कर्मयोगिनश्च मृताः सन्तो **यत्र** कालाभिमानिदेवेषु तदधिष्टितमार्गेषु **प्रयाताः** प्राप्ताः **अनावृत्तिमावृत्तिं च** क्रमेण **यान्ति**। ज्ञानिनोऽनावृत्तिं कर्मिण आवृत्तिमित्यर्थः। **तं** कालाभिमानिनं देवं तदधिष्टितमार्गं **वक्ष्यामि** इत्यर्थः।

यद्यप्यर्चिरादिमार्गगतानाम् 'आब्रह्मभुवना....' इत्यनेन पुनरावृत्तिरुक्ता। तथाऽपि पितृयानगतानां सर्वेषां पुनरावृत्तिः, देवयानगतानां भगवदभक्तानामेव नान्येषामिति भावः। यद्वा पुनरावर्तिनां सर्वेषां कर्मिणां पितृयानेनैव गतिः, न त्वर्चिरादिमार्गेण। अर्चिरादिमार्गान्ते 'स एतान् ब्रह्म गमयति'[1] इति ब्रह्मपरप्राप्तिश्रुतेः। 'आब्रह्म....' इति तु कैमुत्योक्तिः। भगवद्विमुखानां ब्रह्मलोकगतानामपि पुनरावृत्तिः। वस्तुतो भगवद्विमुखानामर्चिरादिमार्गेण तत्र गमनस्यैवासम्भवात्। अतो ब्रह्मलोकगताः क्रमेण सद्य एव वा मुच्यन्ते, न त्वावर्तन्ते। किन्तु, त्रिलोकीस्थाः कर्मिण एवावर्तन्त इति भावः॥ २३॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ २४॥

अग्निर्ज्योतिः इत्यर्चिरभिमानिनी देवो लक्ष्यते। **अहः** इत्यहरभिमानी, **शुक्लः** इति शुक्लपक्षाभिमानी, **षण्मासा उत्तरायणम्** इति तदभिमानिनी देवो लक्ष्यते। 'तेऽर्चिषमभिसम्भवन्ति। अर्चिषोऽहरह आपूर्यमाण पक्षाद्यान् षडुदङ्ङेति मासान् तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतम्। एतत् पुरुषो मानवः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' इति श्रुत्युक्तदेवान्तरोपलक्षिका स्मृतिरिति भावः। **तत्र** तस्मिन् मार्गे प्राप्ता **जना ब्रह्म गच्छन्ति** सर्वशब्दाभिधेयमनन्तानवद्यगुणालयं परमकाष्टारूपं ब्रह्म प्राप्नुवन्तीत्यर्थः। कुतः? यतः

[1] छान्दोग्योपनिषत् ४.१५

ब्रह्मविदः। 'यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेति प्रेत्य भवति' इति श्रुतेः। 'देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि'[1] इति भगवदुक्तेश्च। एतेन प्रतिपद्यमाना नावर्तन्त इत्युक्त्या पितृयानगतानां पुनरावृत्तिः प्रतीयते॥ २४॥

देवयानमार्गस्तुत्यर्थं पितृयानमाह - **धूम इति**॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥ २५॥

अत्रापि **धूमः** इति धूमाभिमानिनी देवता, **रात्रिः** इति रात्र्यभिमानिनी, **कृष्णः** इति कृष्णपक्षाभिमानिनी **षण्मासा दक्षिणायनम्** इति दक्षिणायनाभिमानिनी लक्ष्यते। एतदप्यन्यासां श्रुत्युक्तानामुपलक्षणार्थम्। तथा हि श्रुतिः 'ते धूममभिसम्भवन्ति। धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड् दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति। मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति। तस्मिन् यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते'[2] इति। **तत्र** पथि प्रयाताः **चान्द्रमसं** ज्योतिफलं **योगी** कर्मयोगीष्टादिकारी **प्राप्य** यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तते। सम्पतत्यनेन सम्पातः कर्म। तस्मादावृत्तिमार्गादनावृत्तिमार्गः श्रेयानिति भावः॥ २५॥

उक्तौ मार्गावुपसंहरति - **शुक्लेति**॥

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः॥ २६॥

शुक्ला अर्चिरादिगतिः, ज्ञानप्रकाशमयत्वात्। **कृष्णा** धूमादिगतिः, ज्ञानहीनत्वेन तमोमयत्वात्। **एते गती हि** प्रसिद्धे ब्रह्मज्ञानिकर्मिणोः[3] **जगतः** सर्वस्यापि शास्त्रज्ञस्य **शाश्वते** अनादी **मते** संसारस्यानादित्वात्। तयोः **एकया** शुक्लया **अनावृत्तिं** कश्चित् **याति** , **अन्यया** कृष्णया **पुनरावर्तते** सर्वोऽपि।

[1] भगवद्गीता ७.२३ [2] छान्दोग्योपनिषत् ५.१०.३-५ [3] सगुणविद्याकर्माधिकारिणोः।इति मधुसूदनसरस्वतीये

यत्तु, "अर्चिरादिमार्गेण सगुणोपासकाः क्रममुक्तिभाजो गच्छन्ति। सद्यो मुक्तिभाजस्त्वित एव मुच्यन्ते न त्वर्चिरादिमार्गं गच्छन्ति"[1] इति तन्न। अर्चिरादिधूमाद्यतिरिक्तप्रकारस्य क्वाप्यनुक्तत्वात्। निर्विशेषवादिनः स्वरूपमात्रस्य सदोपलब्धत्वात्, तद्भिन्नस्य सुखदुःखाभावस्य च लोके पुरुषार्थतया प्रसिद्धस्याभावात्। नच विस्मृतकण्ठस्थमणिलाभवल्लाभोपपत्तिः। तत्र मणिज्ञानजन्यसुखस्य दुःखाभावास्य च पुरुषार्थत्वात्। अज्ञानाद्यधिष्ठानतया सुखादिसाक्षितया स्वरूपमात्रस्य सदाभानेन विस्मरणासम्भवाच्च। स्वरूपमात्राधिकस्य मोक्षेऽप्यभानाच्च। अनेकजीववादे, एकोपाधिनिर्मुक्तस्यापि चैतन्यस्योपाध्यन्तरेणावच्छिन्नत्वेन मुक्त्यसम्भवात्। एकजीववादे, अद्यापि कोऽपि न मुक्त इति बहूनां मुक्तिविरोधिका श्रुतयः स्मृतयश्चासङ्गता एव॥ २६॥

मार्गज्ञानफलं दर्शयन् भक्तियोगमुपसंहरति - **नैत इति॥**

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन॥ २७॥

योगो ब्रह्मसाक्षात्कारः, तद्वान् **योगी। एते सृती** मार्गौ ब्रह्म चापरोक्षतः **जानन्, न मुह्यति** वैचित्यं न प्राप्नोति। सृती ज्ञात्वा तदुपायं चानुष्ठाय च गती प्राप्य परब्रह्म प्राप्नोतीत्यर्थः। यतो भक्तियोगस्यापुनरावृत्तिरूपं फलम्, **तस्मात् सर्वेषु कालेषु** भक्तियोगयुक्तो **भव**। समाहितचित्तो मय्यत्यन्तप्रेमयुक्तो भवेत्यर्थः॥ २७॥

पुनः श्रद्धावृद्ध्यर्थं योगं स्तौति -

वेदेषु यज्ञेषु तपस्सु चैव
दानेषु यत् पुण्यफलं प्रदिष्टम्।
अत्येति तत् सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम्॥ २८॥

[1] देवयानमार्गे प्रयाता गच्छन्ति ब्रह्म कार्योपाधिकम्। 'कार्यं बादरिरस्य गत्युपपत्तेः' इति न्यायात्। निरुपाधिकं तु ब्रह्म तद्वारैव क्रममुक्तिफलत्वात्।**इति मधुसूदनसरस्वतीये**

योगी, इदं ब्रह्मादिकं सप्त प्रश्ननिरूपणद्वारेणोक्तं अनुष्ठानपर्यन्तं **विदित्वा**, **वेदेषु** अध्ययनादिना, **यज्ञेषु** अनुष्ठानादिना, **तपस्सु** कायक्लेशादिना, **दानेषु** सत्यत्यागादिना, **यत् पुण्यफलं** शास्त्रेणोपदिष्टं **तत् सर्वमत्येति** अतिक्रामति। न केवलं तदतिक्रामति, **परं** सर्वोत्कृष्टमप्राकृतं दिव्यं भगवदसाधारणं श्रीवैकुण्ठाख्यं **स्थानं** लोकमपि **उपैति**।

यद्वा, शाश्वतं **स्थानं** सर्वजगदाधारं मां सर्वेश्वरम् **आद्यम्** सर्वकारणं प्रसन्नं सन्तमपरोक्षतया निःशेषाविद्यः सन् प्राप्नोतीत्यर्थः। यद्वा, **परं** सर्वोत्कृष्टं **स्थानं** वैकुण्ठाख्यलोकं **च** पुनः **आद्यं** सर्वकारणं मां प्राप्नोतीत्यर्थः। लोकविशेषस्थं मां प्राप्य, आविर्भूतस्वरूपानन्दः सन् विदेहकैवल्यं प्राप्य, ऐच्छिकविग्रहयुक्तश्च यथाकामं विहरतीति भावः॥ २८॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः॥ ८॥

अध्यायः 9

राजविद्याराजगुह्ययोगः

॥ श्रीकृष्णाय नमः॥

रहस्यं भक्तियोगं च स्वभक्तायातिगोपितम्।
नवमेऽद्भुतमैश्वर्यं ब्रवीति भक्तिवृद्धये॥

तत्र 'अनन्यचेताः सततं यो मां स्मरति नित्यशः। तस्याहं सुलभः'[1] इति भगवत्प्राप्तौ भक्तिरेवासाधारणो हेतुः। सा च सर्वोत्तमधीपूर्वकाविच्छिन्न-प्रेमप्रवाहरूपाऽत्र निरूप्यते। तत्र निविष्टं सर्वोत्तत्मत्वज्ञानं 'ज्ञानं तेऽहं सविज्ञानम्'[2] इति सप्तमे प्रतिज्ञातं सङ्क्षेपान्निरूपितं च प्रसक्तानुप्रसक्तसप्तप्रश्नान् निरूप्य तद्विस्तरेण वक्तुमादौ स्तौति - **इदमिति**॥

श्रीभगवानुवाच
इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १॥

---

[1] भगवद्गीता ८.१४ [2] भगवद्गीता ७.१

इदं 'ज्ञानं तेऽहं सविज्ञानम्' इति सप्तमे प्रतिज्ञातं प्रायेणोक्तमग्रे वक्ष्यमाणमधुनोच्यमानं **ज्ञानं** मम याथात्म्यापरोक्षं **विज्ञानं** बद्धमुक्तजीवजडेभ्यो विविक्ततया सर्वनियामकत्वादिनाऽपरोक्षरूपं ज्ञानं तत्सहितं **ते** तुभ्यं प्रकर्षेण वक्ष्यामि। तुशब्देन ध्यानादिकं रूपं परोक्षं च ज्ञानं व्यावर्तयति। इदमेव सर्वोत्तमत्वेन भगवदपरोक्षरूपं साक्षान्मोक्षहेतुः। नतु ध्यानरूपं परोक्षं वा। तस्यापरोक्षजनकत्वात्। कीदृशं ज्ञानम्? **गुह्यतमम्** अतिगोप्यमतिरहस्यम्। जातमात्रस्य संसारोच्छेदकत्वात्। गोप्यमपि शिष्यगुणाधिक्याद् वक्ष्यामि तुभ्यम् **अनसूयवे**। असूया = गुणेषु दोषाविष्करणादिफला सर्वदाऽयमात्मैश्वर्यख्यापनेनात्मानं प्रशंसति मत्पुरस्तादित्येवंरूपा। तद्रहितायेत्यर्थः। कीदृशं ज्ञानम्? **यज्ज्ञात्वा, अशुभात्** संसारबन्धनादपारदुःखरूपात् सद्य एव **मोक्ष्यसे** सर्वोत्तमत्वेनापरोक्षे स्नेहप्रवाहे च सति प्रारब्धकर्माभावे च तत्क्षणमेव मुक्तिरिति भावः॥ १॥

पुनस्तदाभिमुख्याय तज्ज्ञानं स्तौति - **राजेति**॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥ २॥

राज्ञां = योगीश्वराणां विद्या **राजविद्या**। विद्यानां राजा प्रधानभूतेति वा। राज्ञां = ज्ञानेन देदीप्यमानानां योगीन्द्राणां सनत्कुमारादीनां गुह्यं = गोप्यं **राजगुह्यम्**। गुह्यानां राजेति वा। राजदन्तादित्वादुपसर्जनस्य[1] पूर्वनिपातः **पवित्रमिदमुत्तमं** प्रायश्चित्तैर्हि किञ्चिदेकमेव पापं निवर्तते निवृत्तं च वासनारूपेण तिष्ठत्येव यतः पुनस्तत्पापं करोति, इदं त्वनेकजन्मकृतानामपि पापानां सवासनानां सकारणानां जातमात्रं सदुच्छेदकम्। अतः सर्वोत्तममिति यावत्। इदमेव अक्षेष्विन्द्रियेषु नियामकतया प्रतिस्थित इति प्रत्यक्षो भगवान् 'स प्रत्यक्षः प्रति हि सोऽक्षेषु'[2] इति श्रुतेः। सोऽवगम्यते = प्राप्यते येन तत् **प्रत्यक्षावगमं** प्रथमं शास्त्रजन्यम् अन्तराले यस्य परोक्षज्ञानं ततो निदिध्यासनेनापरोक्षज्ञानं ततो मोक्ष इति भावः। यद्वा, प्रत्यक्षमवगम्यं फलं यस्य तत्।

[1] मधुसूदनीयानुसारेण योजितम्। कोशे तु 'राजदन्तादित्वादुभयत्र' इति। [2] मध्वभाष्योदाहृता सामवेदगतवारुणशाखावचनम्।

ज्योतिष्ठोमादीनामिवैतस्याविच्छिन्नप्रेमप्रवाहपूर्वकसर्वोत्तमत्वापरोक्षस्य कालान्तरे न फलं किन्तु तस्मिन्नेव काले स्वरूपाविर्भारूपो मोक्षो भवतीति भावः।

सर्वजगतो धारकत्वाद्धर्मो हरिः। तद्विषयकं **धर्म्यम्।** [1] धर्मादनपेतं वा **धर्म्यम्।** अनेकजन्मसञ्चितनिष्कामकर्मशोधितमनसा साक्षात्कारः। तर्हि दुस्सम्पाद्यम्। नेत्याह - **सुसुखं कर्तुं** गुरूपदर्शितविचारसहकृतवेदान्तवाक्येन सुखेन परमानन्दघनमूर्तेरनेकजन्मनिष्माकर्मशोधितमनसा साक्षात्कारः कर्तुं शक्यत इत्यर्थः।

भगवद्गुणादिश्रवणकीर्तनध्यानापरोक्षाणां स्वकाल एव परमानन्दकरत्वेन सुखार्थिनस्तु अनायासेन प्रवृत्तिः स्यादिति भावः। मोक्षाख्याव्ययफलत्वात् **अव्ययं।** स्वफलं मोक्षमविद्यानिवृत्तिपूर्वकानन्दाविर्भावरूपं प्रसाध्य स्वयं न व्येति मोक्षेऽपि तिष्ठतीति वा। मुक्तानामपि सर्वोत्तमत्वापरोक्षपूर्वकानुरागस्य स्वाभाविकस्य भगवति सत्वात्॥ २॥

एवमस्य सुकरत्वे सर्वोत्कृष्टत्वे च सर्वे कुतोऽत्र न प्रवर्तन्ते? तत्राह -

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥ ३॥

अस्य भगवदपरोक्षाख्यस्य **धर्मस्य** स्वरूपे साधने फले च शास्त्रप्रतिपादितेऽपि **अश्रद्धधानाः** वेदविरोधिकुतर्कदूषितान्तःकरणतया प्रामाण्यममन्यमानाः पापकारिणोऽसुरसम्पदमारूढाः स्वमतिकल्पितोपायेन विद्यमाना अपि शास्त्रविहितोपायाभावात् **अप्राप्य मां** मत्प्राप्त्युपायमलब्ध्वा, मृत्युयुक्ते **संसारवर्त्मनि निवर्तन्ते** निश्चयेन वर्तन्ते। सदा जननमरणवतीषु क्रिमिकीटादियोनिष्वेव भ्रमन्तीत्यर्थः॥ ३॥

तदेवं वक्रगत्या प्रतिज्ञातं साधारणैश्वर्यज्ञानं स्तुत्वा श्रोतारमभिमुखीकृत्य तदेवाह - **मयेत्यादिना॥**

[1] धर्मो भगवान्। तद्विषयं धर्म्यम्। सर्वं जगद्धत्त इति धर्मः।**इति मध्वभाष्यम्**

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ ४॥

चराचरात्मकमाब्रह्मस्तम्बम् **इदं सर्वं जगत्, मया** अन्तर्यामिणा सर्वाधारेण च **ततं** व्याप्तम्। ननु सर्वनियामकश्चेत्, सर्वैः कुतो नोपलभ्यते? तत्राह - **अव्यक्तमूर्तिना** अव्यक्तमिन्द्रियाद्यगोचरो मूर्तिर्यस्य तेन। 'यः पृथिव्यां तिष्टन् यं पृथिवी न वेद'[1] 'य आत्मनि तिष्टन् यमात्मा न वेद'[2] इति श्रुतेः **मत्स्थानि सर्वभूतानि** अहं स्थानमाधारो येषां तानि। **न चाहं तेष्ववस्थितः** तदाधेयः। 'यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति'[3] 'यस्यात्मा शरीरं य आत्मानमन्तरो यमयति'[4] इति श्रुत्या शरीरवन्नियम्यत्वेन जीवजडयोः प्रतिपादनात्। भूतानामुत्पत्तिस्थितिनियमनादिकर्ताऽहं मदधीनस्थित्यादिकानि तानि। **न चाहं तेष्ववस्थितः** न चाहं तदधीनस्थितिकः, नियम्यैः प्रजादिभिर्नियामकस्य राज्ञ इव सर्वनियामकस्य नियम्यैर्न कश्चिदुपकार इत्यर्थः॥ ४॥

अन्यदप्यद्भुतमैश्वर्यमाह - **नचेति**॥

नच मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममाऽत्मा भूतभावनः॥ ५॥

यथा पृथिव्यां स्थितानि पृथिवीस्पर्शनादिकमिन्द्रियेण ज्ञात्वा, अन्योन्यधर्मसङ्क्रान्तिं चासाद्य स्थितानि, न तथा मयि स्थितानीत्यर्थः। तत्र हेतुः **ऐश्वरम्** ईश्वरस्य भावं **योगं** सामर्थ्यं **पश्य।** युज्यतेऽनेन[5] योगोऽघटनाघटनापटीयस्सामर्थ्यमित्यर्थः। 'आत्मनि चैवं विचित्राश्च हि'[6] इति सूत्रात्। 'विचित्रशक्तिः पुरुषः पुराणः' इति श्रुतेः। 'असङ्गो ह्ययं पुरुषः'[7] इत्यादिश्रुत्या सर्वोदयादिकर्तुर्निर्लेपरूपासङ्गत्वबोधनाच्च। **भूतभृत्** भूतानां वियदादीनां प्राणिनां धारकः पोषकश्चाहं **न भूतस्थः** भूतैः कृतोपकारो न भवामि। कुतः? यतः **ममात्मा** स्वरूपाभिन्नदेहो **भूतभावनः** भूतोत्पादकः। 'नाभ्या आसीदन्तरिक्षम्'[8] इत्यादिश्रुतेः।

---

[1] **बृहदारण्यकोपनिषत्** ५.७.३ [2] **शतपथब्राह्मणम्** ५४.५.३० [3] **बृहदारण्यकोपनिषत्** ५.७.३ [4] **शतपथब्राह्मणम्** ५४.५.३० [5] युज्यतेऽनेनेति इति स्यात्। [6] **ब्रह्मसूत्रम्** २.१.२८ [7] **बृहदारण्यकोपनिषत्** ४.३.१५ [8] **इति ऋक्संहिता** १०.९०.१४

नित्यकर्मादिना चित्तशुद्धिः, श्रवणमनननिदिध्यासनादिना गुह्यतमत्वेन प्रतिज्ञातं वर्णितं च हरेरद्भुतैश्वर्यस्यापरोक्ष्यं ततो मुक्तिरिति भावः॥ ५॥

तत्तत्कृतमललेपशून्यत्वेन सर्वभूताधारत्वं दृष्टान्तेनोपपादयति -

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ६॥

यथा एवासङ्गस्वभाव आकाशे स्थितो **नित्यं** सर्वदोत्पत्तिस्थितिसंहारकालेषु वातीति **वायुः** सर्वदा चलनस्वभावः, अत एव सर्वत्र गच्छतीति **सर्वत्रगः**, **महान्** परिमाणतः। एतादृशोऽपि न कदाऽप्याकाशेन सह संसृज्यते। **तथा** सर्वात्राभिमानशून्येऽसङ्गत्वाद्युपपादकाचिन्त्यानन्तशक्तिमति मयि स्थितानि **भूतानि** मदधीनानि मदाधारकाण्यकृतमदुपकारकाणि **उपधारय** जानीहि। अतिदुर्ज्ञेयसम्भावनाविपरीतभावनादिनाऽऽच्छादितमपि मत्प्रसादाज्ज्ञानीहीत्यभिप्रायः॥ ६॥

असङ्गतया सर्वजगद्धारकत्वेनाद्भुतमैश्वर्यमुक्त्वा, विश्वलयोदयादिकर्तृत्वेनापि तदाह - **सर्वभूतानीति**॥

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥ ७॥

सर्वाणि भूतानि **कल्पक्षये** प्रलये त्रिगुणात्मिकां **प्रकृतिं** जगदुपादानभूतां **यान्ति**। तत्र कारणे सूक्ष्मरूपेण[1] लीयन्ते। स्थूलावस्थां विहाय सूक्ष्मरूपेण तिष्टन्तीत्यर्थः। ननु प्रकृतावेव भूतानां लयेन तव क्वोपयोगः? तत्राह - **मामिकां** मदधीनाम्। यत्र प्रकृतौ भूतानि लीयन्ते सा मदधीना मयि लीना च। अतः सूक्ष्मरूपेण प्रकृतिस्वरूपेण तानि मय्येव लीनानीत्यर्थः।

'प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि॥'[2] इति वैष्णवोक्तेः।

[1] सूक्ष्मेण -पा. [2] **विष्णुपुराणम्** ६.४.३९

अहं सर्वज्ञोऽचिन्त्यानन्ताद्भुतशक्तिः **पुनस्तानि** सर्वाणि भूतानि प्रकृतिरूपेण मयैव स्वस्मिन् स्थापितानि अहरहः प्रातः पण्यं वणिगिव **कल्पादौ** विशेषेण **सृजामि** प्रकटीकरोमि॥ ७॥

स्वस्य कर्तृत्वरूपं प्रधानकारणत्वं प्रकृतेर्जीवादृष्टकालादेर्निमित्तमात्रत्वमित्याशयेनाह - **प्रकृतिमिति॥**

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥ ८॥

स्वां मायां विचित्रपरिणामिनीं **प्रकृतिमवष्टभ्य** अष्टधा परिणमय्य **इमं** स्वेदजोद्भिदण्डजजरायुजादिभेदेन चतुर्विधं भूतसमूहं मदधीनायाः **प्रकृतेः** कार्यत्वात् प्रकृतिपदवाच्यायाः कर्मरूपाविद्यायाः **वशादवशं पुनःपुनः** सृष्टिकाले समागते स्वतन्त्रोऽहं विशेषेण सृजामि॥ ८॥

ननु विषमसृष्टिकर्तृत्वेन वैषम्यनैर्घृण्यादिकं भगवतः स्यात्। तत्राह - **नचेति॥**

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु॥ ९॥

नानाविषमसृष्ट्यादिकर्माणि **माम्** अचिन्त्यानन्तशक्तिं **न निबध्नन्ति** न मम वैषम्यादिकमापादयन्ति। प्रवाहानादिजीवादृष्टानुसारेण विषमसृष्टिकर्तृत्वान्न मम वैषम्यादीति भावः। 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्'[1] इति सूत्रात्। न च कर्माधीनत्वं हरेः शङ्क्यम्। 'स एव साधु कर्म कारयति'[2] इत्यादिश्रुत्या कर्मणामपि तदधीनत्वोक्तेः। न च विषमकर्मकारयितृत्वेन वैषम्याद्यापत्तिः। पूर्वपूर्वकर्मापेक्षयोत्तरोत्तरकर्मकारयितृत्वेन दोषाभावात्। 'न कर्माविभागादिति चेन्न, अनादित्वात्'[3] इति सूत्रात्। ननु विषमकर्मापि तेनैव कारितम्, अतः

[1] **ब्रह्मसूत्रम्** २.१.३४ [2] एष ह्येवैनं साधुकर्म कारयति इति तु **कौषीतक्युपनिषत्** ३.६ [3] **ब्रह्मसूत्रम्** २.१.३५

कर्मणः विभागाद्वैषम्यावारकत्वान्न युक्तं हरेः कर्तृत्वमिति चेन्न। कर्मणां प्रवाहानादित्वात्। पूर्वकर्मापेक्षयैवोत्तरकर्म कारयतीत्यर्थः।

जीवासाधारणनिर्लेपत्वे हेतुमाह - **उदासीनवदिति**॥ यथा कश्चिदुपेक्षको द्वयोर्विवदमानयोर्जयपराजयासङ्गी तत्कृतहर्षविषादाभ्यामसंस्पृष्टो निर्विकार आस्ते, तद्वन्निर्विकारतया **आसीनम्** , अत एव निर्विकारत्वात् **तेषु कर्मस्वसक्तम्** 'इदमहं करोमि' इत्यभिमानशून्यं मां कर्माणि न निबध्नन्ति यथा, तथाऽभिमानशून्यतयाऽन्योऽपि यः कश्चित् कर्माणि करोति तमपि न निबध्नन्तीति भावः॥ ९॥

ननु जगत् प्रकृत्यधीनम्। त्वमुदासीनश्चेत्, प्रकृतेरेव स्वातन्त्र्यं स्यादत आह - **मयेति**॥

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनाऽनेन कौन्तेय जगद्विपरिवर्तते॥ १०॥

मया सर्वेश्वरेण **अध्यक्षेण** स्वामिना **प्रकृतिः** त्रिगुणात्मिका **सचराचरं** चराचरसहितं विश्वं **सूयते** जनयति। न केवलं प्रकृतिस्वामित्वेन, तद्द्रष्टृत्वेन च प्रयोजकत्वम्, किन्तु कर्तृत्वरूपं हेतुत्वमपीत्याह - **हेतुनेति**॥ **अनेन** सर्वचेष्टकेन सर्वान्तर्यामिणा मया **सचराचरं जगत्** चक्रवत् परिवर्तते। पुनरुत्पद्यते, नश्यति चेत्यर्थः।

एतादृशं महदद्भुतैश्वर्यज्ञानमतिगोप्यं येन केनापि दुष्प्रापं निरतिशयानन्दाविर्भावरूपमोक्षकारणं महता प्रयत्नेन सम्पाद्यमिति भावः॥ १०॥

नन्वेतादृशं त्वदैश्वर्यं सर्वे कुतो न जानन्ति? इत्यत आह - **अवजानन्तीति**॥

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानन्तो मम भूतमहेश्वरम्॥ ११॥

अवजानन्ति सर्वेश्वरोऽयमिति नाद्रियन्ते निन्दन्ति च **मूढाः** अविवेकिनो जनाः। तेषां भ्रमे हेतुं सूचयति - **मानुषीं तनुमाश्रितमिति॥** यथाऽन्ये कर्माधीना देहं प्राप्नुवन्ति, तथाऽयमपि कर्मवशाद्वसुदेवगृहमिदानीं प्राप्तवानिति भ्रान्त्याच्छादितमद्यथार्थज्ञानाः सन्तः **परं भावं मम भूतमहेश्वरं।** **भूतं** सर्वदा विद्यमानम् **ईश्वरम्** ऐश्वर्यं सच्चिदानन्दघननित्यदेहाभिन्नोऽस्मच्छक्तिदौर्बल्येन परिच्छिन्नतया प्रतीयमानोऽप्यनन्तपारोऽतिवैरिञ्चिप्रपञ्चवैभवः स्वभक्तानुग्रहायाविर्भूतोऽतीन्द्रियोऽपि परमकृपयाऽस्मदक्षगोचरतां गत इत्यजानन्त इत्यर्थः॥ ११॥

तेषामज्ञानफलमाह - **मोघाशा इति॥**

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥ १२॥

ईश्वरं विनैव कर्माण्येवास्मभ्यं फलं दास्यन्तीत्येवंरूपा मोघा = निष्फलैव, आशा = फलप्रार्थना येषां ते। अत एवेश्वरविमुखत्वात् मोघानि = भ्रममात्ररूपाण्यग्निहोत्रादीनि कर्माणि येषां ते। मोघमीश्वराप्रतिपादककुतर्कशास्त्रजनितं ज्ञानं येषां ते। कुत एवम्? यतो **विचेतसः** भगवदवज्ञानजनितदुरितप्रतिबद्धविवेकविज्ञानाः। किञ्च ते भगवदज्ञानात् **राक्षसीं** तामसीमविहितहिंसाहेतुद्वेषप्रधानाम् **आसुरीं** राजसीं शास्त्रानभ्यनुज्ञातविषयभोगहेतुरागप्रधानां च **मोहिनीं** शास्त्रीयज्ञानभ्रंशहेतुं **प्रकृतिं** स्वभावमाश्रिता एव भवन्ति॥ १२॥

भगवदेकज्ञाना एव भगवन्तं भजन्ते पूर्वोक्तं गुह्यतमं ज्ञानं लभन्ते चेत्याह - **महेति॥**

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥ १३॥

महान् = अनेकजन्मकृतसुकृतैः संस्कृतः क्षुद्रकामाद्यानभिभूत आत्मा = चित्तं येषां ते। 'अभयं सत्त्वसंशुद्धिः'[1] इत्यादिवक्ष्यमाणां **दैवीं** सात्विकीं **प्रकृतिमाश्रिताः।** न विद्यते मदन्यस्मिन् मनो येषां ते। **भूतादिं** सर्वजगत्कारणम्

[1] भगवद्गीता १६.१

अव्ययं सदैकाकारम्। **मां** सर्वेश्वरं सदनन्तगुणालयं **ज्ञात्वा भजन्ते** सेवन्ते। ततस्तादृशं मामपरोक्षीकुर्वन्ति। ततो मत्प्रसादेन संसारान्मुच्यन्त इति भावः॥ १३॥

भजनप्रकारमाह - **सततमिति द्वाभ्याम्॥**

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥ १४॥

ब्रह्मनिष्ठं गुरुमुपसत्य वेदान्तवाक्येनोक्तमनन्तगुणं **मां सततं** निरन्तरं **कीर्तयन्तः** श्रवणव्यापारविषयीकुर्वन्तः गुरूपसदनेतरकाले स्वयं स्तोत्रादिभिः मद्गुणकर्मप्रधाननामचरितैः कीर्तयन्तः **यतन्तः** विजातीयवृत्त्यनन्तरितचेतोवृत्तिप्रवाहं मयि कुर्वन्तः **दृढव्रताः** दृढानि प्रतिपक्षैश्चालयितुमशक्यानि अहिंसासत्यास्तेयब्रह्मचर्यादीनि व्रतानि येषां ते। भक्त्यादिप्रेम्णा **मां नमस्यन्तः** साष्टाङ्गदण्डवन्नमस्कारान् कुर्वन्तः। चकारात्

'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥'[1] इति नवधा भक्तिः सङ्गृह्यते।

तथा **भक्त्या** मद्विषयेण परेण प्रेम्णा **नित्ययुक्ताः** सर्वदा संयुक्ताः।

तदेवं शमदमादिसाधनसम्पन्ना वेदान्तश्रवणमननपरायणाः परमेश्वरे परमगुरौ प्रेम्णा नमस्कारादिना च विगतविघ्नाः परिपूर्णसर्वसाधनाः सन्तो माम् **उपासते** विजातीयप्रत्ययानन्तरितेन सजातीयप्रत्ययप्रवाहेण श्रवणमननोत्तरभाविना सततं चिन्तयन्ति महात्मानः।

अनेन निदिध्यासनं च परमसाधनं दर्शितम्। एतादृशसाधनपौष्कल्ये सति गुह्यतमं यदुक्तं भगवदापरोक्षं तदनायासेन भवतीति भावः॥ १४॥

[1] **भागवतम्** ७.५.२३

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥ १५॥

अन्ये महात्मानः तदुक्तकीर्तनादिभिर्भगवदाकारपरोक्षवृत्तिप्रवाहरूपज्ञाना-ख्ययज्ञेन च मां **यजन्तः** सेवमाना नारायणं सर्वान्तर्यामिणं मत्स्यादिरूपेण बहुधा स्थितं **विश्वतोमुखं** सर्वस्य व्यापकं नानारूपवानचिन्त्यशक्तिर्भगवानेक एवेति **एकत्वेन** , सदनन्तगुणवत्तया सर्वेभ्यो मुक्तामुक्तजीवजडेभ्यः **पृथक्त्वेन** विलक्षणत्वेन **मामुपासते** ॥ १५॥

प्रतिज्ञातं निरतिशयैश्वर्यज्ञानं पुनरप्याह - **अहमिति चतुर्भिः॥**

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम्।
मन्त्रोऽहमहमेवाऽज्यमहमग्निरहं हुतम्॥ १६॥

क्रत्वादिव्यापकत्वात् क्रत्वादिः **अहम्**। 'सर्वं समाप्नोषि ततोऽसि सर्वः'[1] इति वक्ष्यमाणत्वात्। सर्वव्यापकत्वात् सर्वस्वरूपोऽहमिति वक्तव्ये तत्तदेकदे-शकथनमवयुत्त्यानुवादेन(?) वैश्वानरे द्वादशकपालेऽष्टाकपालत्वादिकथनवत्। **क्रतुः** श्रौतो ज्योतिष्टोमादिः। **यज्ञः** स्मार्तो वैश्वदेवस्थालीपाकादिः। **स्वधा** अन्नं पितृभ्यो दीयमानम्। **औषधम्** ओषधिप्रभवमन्नं सर्वप्राणिभिर्भुज्यमानम्, भेषजं वा। **मन्त्रः** याज्यापुरोनुवाक्यादिः, येनोद्दिश्य हविर्देवेभ्यो दीयते। **आज्यं** घृतं सर्वहविरुपलक्षणम्। **अग्निः** आहवनीयादिः, हविःप्रक्षेपाधिकरणम्। **हुतं** हवनम् हविःप्रक्षेपः। एतत्सर्वव्यापकत्वात् सर्वमहम्। एतदेकैकनियामकत्वज्ञानमपि भगवदुपासनमिति बोधयितुं प्रत्येकमहंशब्दः। क्रियाकारकफलजातं सर्वं मन्नि-यम्यत्वात्, मदाधारकत्वात्, मदधीनसत्ताकत्वाच्च मया व्याप्यमिति भावः॥ १६॥

पिताऽहमस्य जगतो माता धाता पितामहः।
वेद्यं पवित्रमोङ्कार ऋक् साम यजुरेव च॥ १७॥

---
[1] भगवद्गीता ११.४०

अस्य जगतः प्राणिजातस्य **पिता** जनयिता **माता** जनयित्री **धाता** पोषयिता तत्तत्कर्मफलविधाता **पितामहः** पितुरपि पिता। **वेद्यं** ज्ञातव्यं। पूयतेऽनेनेति **पवित्रं** पावनं शुद्धिहेतुर्गङ्गास्नानगायत्रीजपादि। वेदितव्ये ब्रह्मणि वेदनसाधनम् **ओङ्कारः** नियताक्षरपादी **ऋक्** , गीतिविशिष्टा सैव **साम**। सामपदेन गीतिमात्रस्यैवाभिधायकमित्यन्यत्। गीतिरहितमनियताक्षरं **यजुः**। एतत् त्रिविधमन्त्रजातं कर्मोपयोगि। चकारादथर्वाङ्गिरसोऽपि गृह्यते॥ १७॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रळयः स्थानं निधानं बीजमव्ययम्॥ १८॥

गम्यत इति **गतिः** फलम्। **भर्ता** पोषको धारकः **प्रभुः** स्वामी 'मदीयोऽयम्' इति स्वीकर्ता। **साक्षी** सर्वप्राणिनां शुभाशुभद्रष्टा। निवसत्यस्मिन्निति **निवासः** आधारः। शीर्यते दुखमस्मिन्निति **शरणं** प्रपन्नानामार्तिहन्। **सुहृत्** प्रत्युपकारानपेक्षः सन्नुपकारी। प्रकर्षेण भवन्त्यनेनेति **प्रभवः** स्रष्टा। प्रकर्षेण लीयन्तेऽनेनेति **प्रलयः** संहर्ता। तिष्ठन्त्यस्मिन्निति **स्थानम्** आधारः। निधीयते निक्षिप्यते तत्काले भोगायोग्यतया कालान्तरोपभोग्यं वस्त्वस्मिन्निति **निधानं** प्रलयस्थानमिति यावत्। **बीजम्** उत्पत्तिकारणम्। **अव्ययं** सदैकाकारम्॥ १८॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥ १९॥

तपाम्यहम् आदित्याद्यन्तर्यामी।[1] **वर्षं** पूर्ववृष्टिरूपरसं पृथिव्याः **निगृह्णामि** आकर्षामि कैश्चिद्रश्मिभिः। अष्टसु मासेषु पुनस्तमेव निगृह्णीतं रसं कैश्चिद्रश्मिभिः **उत्सृजामि** वृष्टिरूपेण प्रक्षिपामि च भूमौ। **अमृतं च** देवानाम्, प्राणिमात्रस्य जीवनं वा। एवकारस्य **अहम्** इत्यनेन सम्बन्धः। **मृत्युश्च** सर्वप्राणिनां विनाशः। **सत्** स्थूलम् **असत्** सूक्ष्मं **च** सर्वम् **अहम्** एव सर्वं मव्द्याप्तमित्यर्थः।

एवं स्वोचितकर्मभिः सर्वव्यापकोऽहमाराध्यः। ततोऽमितगुणस्य ममापरोक्ष्यं ततो मोक्ष इति भावः॥ १९॥

[1] तपाम्यहमादित्यः सन्।**इति मधुसूदनसरस्वतीये**

ये निष्कामकर्मणा हरिं नाराधयन्ति किन्तु स्वर्गाद्यर्थं काम्यकर्माण्येव कुर्वन्ति तेऽतिदुःखप्रवाहे संसारे पुनःपुनः पतन्तीत्याह - **त्रैविद्या मामिति द्वाभ्याम्**॥

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान्॥ २०॥

ऋग्वेदयजुर्वेदसामवेदरूपा हौत्राध्वर्यवौद्गात्रप्रतिपत्तिहेतवस्तिस्रो विद्या येषां ते त्रिविद्या एव **त्रैविद्याः**। तिस्रो विद्या वदन्तीति वेदत्रयविदो याज्ञिका **यज्ञैः** अग्निष्टोमादिभिः **माम्** इन्द्राद्यन्तर्यामिणम् **इष्ट्वा** तत्र मामजानन्तोऽपि वस्तुवृत्तेन पूजयित्वाऽभिष्टुत्य हुत्वा सोमं पिबन्तीति **सोमपाः** सन्तः, तेनैव सोमपानेन **पूतपापाः** निरस्तस्वर्गभोगबन्धकपापाः सकामतया **स्वर्गतिं प्रार्थयन्ते, ते दिवि** स्वर्गलोके **पुण्यं** पुण्यफलं सर्वोत्कृष्टं **सुरेन्द्रलोकं** शतक्रतोः स्थानम् **आसाद्य** प्राप्य **दिव्यान्** मनुष्यैरलभ्यान् **देवभोगान्** देवदेहोपभोग्यान् कामान् **अश्नन्ति** भुञ्जते॥ २०॥

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना[1]
गतागतं कामकामा लभन्ते॥ २१॥

ते सकामाः **तं** काम्येन पुण्येन प्राप्तं **विशालं** विस्तीर्णं स्वर्गलोकं **भुक्त्वा** तद्भोगजनके **पुण्ये क्षीणे** सति देहनाशात् पुनर्देहग्रहणाय **मर्त्यलोकं विशन्ति** पुनर्गर्भवासादियातनामनुभवन्ति। **त्रैधर्म्यं** हौत्राध्वर्यवौद्गात्रधर्मत्रितयार्हं ज्योतिष्टोमादिकं काम्यं कर्म। **त्रयीधर्मम्** इति पाठे त्रय्या वेदत्रयेण प्रतिपादितं धर्ममिति

[1] त्रैधर्म्यमनुप्रपन्नाः - पा.

स एवार्थः। **अनुप्रपन्नाः** अनादौ संसारे, पूर्वप्रतिपत्त्यपेक्षयाऽनुशब्दः, पूर्वप्रतिपत्त्यनन्तरं मनुष्यलोकमागत्य पुनः प्रतिपन्नाः **कामकामाः** दिव्यान् भोगान् कामयमानाः। एवं **गतागतं** कर्म कृत्वा स्वर्गं यान्ति, तत आगत्य पुनः कर्म कुर्वन्तीत्येवं गर्भवासादियातनाप्रवाहमनवरतं **लभन्ते** इति भावः॥ २१॥

निष्कामानां स्वभक्तानां स्वैकशरणीयत्वमाह - **अनन्या इति॥**

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ २२॥

नान्यो मद्व्यतिरिक्तोऽभीष्टया चिन्तनीयो येषां ते **अनन्याः**।[1] भगवान् वासुदेवो सदनन्तगुणालयोऽस्माकं स्वामी गुरुरिष्टदैवता, एतद्भिन्नं देवतादिकमैहिकामुष्मिकभोगप्रदं सर्वं हर्यधीनमिति निश्चित्य **मां चिन्तयन्तः पर्युपासते** विजातीयप्रत्ययानन्तरितसजातीयमदाकारकमनोवृत्तिप्रवाहमनिशं कुर्वन्ति **तेषां** मदर्थं त्यक्तसर्वबाह्येहानां **नित्याभियुक्तानां** नित्यम् = अनवरतं मद्ध्याने व्यापृतानां देहयात्रामात्रार्थमप्यप्रयतमानानां योगं क्षेमं चालब्धस्य लाभत्वं तस्य च रक्षणत्वं देहस्थित्यर्थं योगक्षेममकामयमानानामपि **अहं** सर्वेश्वरो **वहामि** ॥

यद्यपि सर्वेषामपि योगक्षेमं वहति हरिर्विश्वम्भरत्वात्, तथाऽप्यन्येषां प्रयत्नमुत्पाद्य तद्द्वारा, तादृशभक्तस्य तु तदर्थं प्रयत्नमनुत्पाद्य वहतीति विशेषः॥ २२॥

नन्वन्यदेवतास्थोऽन्तर्यामी त्वमेव चेदाराध्यः, तर्हि त्वद्भक्तान्यभक्तयोः को विशेषः? तत्राह - **य इति॥**

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ २३॥

यथा मद्भक्ता मामेव यजन्ति, तथा **ये** अन्यदेवतानाम् = इन्द्रादीनां भक्ता **यजन्ते** ज्योतिष्टोमादिभिः **श्रद्धया** आस्तिक्यबुद्ध्या **अन्विताः** , **तेऽपि** मद्भक्ता इव

[1] अन्यो भेददृष्टिविषयो न विद्यते येषां तेऽनन्यासर्वाद्वैतदर्शिनः।**इति मधुसूदनसरस्वतीये**

तत्तद्देवतायां स्थितं **मामेव यजन्ति**। परन्तु, **अविधिपूर्वकं** तदन्तस्थं मामज्ञात्वा यजन्तीत्यर्थः॥ २३॥

अविधिपूर्वकत्वं विवृण्वन् फलप्रच्युतिं तेषामाह - **अहमिति**॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥ २४॥

अहं सर्वेश्वरः सर्वान्तर्यामी तत्तद्देवतान्तस्थः **सर्वयज्ञानां** श्रौतस्मार्तानां **भोक्ता** अन्तर्यामिरूपेणाधियज्ञत्वात्। **प्रभुश्च** यज्ञानां फलदाता कर्मकारयिता **च**। देवतान्तरयाजिनस्तु भोक्तृत्वेन प्रभुत्वेन **न** जानन्ति, अतस्तथा मत्स्वरूपापरिज्ञानान्महदायासेनेष्ट्वाऽपि मय्यनर्पितकर्माणः, तत्तद्देवलोकं भूम्यादिमार्गेण गत्वा तद्भोगान्ते **च्यवन्ति** प्रच्यवन्ते। तद्भोगजनककर्मक्षयात् तद्देहादिवियुक्ताः पुनर्देहग्रहणाय मनुष्यलोकं प्रत्यावर्तन्ते।

ये तु तत्तद्देवतासु भगवन्तमन्तर्यामिणं जानन्तः, तत्प्रीतये यजन्ते भगवदर्पितकर्माणः, ते सम्यगपरोक्षं प्राप्य, अर्चिरादिमार्गेण प्रयाताः सन्तः, ब्रह्मलोकं प्राप्य, सद्यः क्रमेण वा मुच्यन्त इति विवेकः[1]॥ २४॥

देवतान्तरयाजिनामनावृत्तिफलाभावेऽपि तत्तदेवतायागानुरूपक्षुद्रफलावाप्तिर्भवतीति वदन् भगवद्याजिनां तेभ्यो वैलक्ष्यण्यमाह - **यान्तीति**॥

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्॥ २५॥

सत्वादिगुणभेदेनाविधिपूर्वकयाजिनस्त्रिविधाः। तत्र सात्विकाः **देवव्रताः**। देवाः = इन्द्रादयः, तत्सम्बन्धि व्रतम्। बल्ल्युपहारप्रदक्षिणनमस्कारादिरूपं पूजनं येषां ते। तानेव **देवान् यान्ति** 'तं यथा यथोपासते तदेव भवति'[2] इति

---

[1] ये तु तत्तद्देवतासु भगवन्तमेव सर्वान्तर्यामिणं पश्यन्तो यजन्ते ते भगवदर्पितकर्माणः, तद्विद्यासहितकर्मवशादर्चिरादिमार्गेण ब्रह्मलोकं गत्वा तत्रोत्पन्नसम्यग्दर्शनाः तद्भोगान्ते मुच्यन्त इति विवेकः। **इति मधुसूदनसरस्वतीये** [2] **मुद्गलोपनिषत्** ३

श्रुतेः। राजसास्तु **पितृव्रताः** श्राद्धादिक्रियाभिस्तेषामाराधकाः, तानेव **यान्ति**। तथा तामसाः **भूतेज्याः** यक्षरक्षोविनायकमातृगणादीनां भूतानां पूजकाः। तान्येव **भूतानि यान्ति**।

एवं देवतान्तराराधनस्य तत्तद्देवतारूपत्वमन्तवत्फलमुक्त्वा, भगवदाराधनस्य भगवत्साधर्म्यरूपमनन्तं फलमाह[1] - **मदिति**॥ मां सर्वेश्वरं यष्टुं शीलं येषां ते **मद्याजिनः**। **मां** सर्वेश्वरं सत्यानन्तलोकादिवैभवं कालापरिच्छेद्यानन्तविभूतिं **यान्ति**। समानेऽप्यत्यायासेन[2] भगवन्तमन्तर्यामिणमनन्तगुणं मामनाराध्य देवतान्तरमाराध्य, अन्तवत्फलं यान्तीत्यहो कष्टम्! इति भावः॥ २५॥

अनन्तफलदत्वादतिसुकरत्वाच्च हरेराराधनमेव कार्यमित्याह - **पत्रमिति**॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ २६॥

पत्रादिकं यत्किञ्चिदनायासलब्धं वस्तु **यः** कश्चिदपि नरो **मे** मह्यमनन्तविभूतिपतये सर्वेश्वराय **भक्त्या** 'न वासुदेवात् परं किञ्चिदस्ति' इति स्नेहधारापूर्वकसर्वोत्तमत्वधिया **प्रयच्छति** ईश्वराय भृत्यवदुपकल्पयति मम स्वत्तानास्पदस्य वस्तुनोऽभावात् सर्वस्यापि जगतो मयैवार्जितत्वात्। अतो मदीयमेव सर्वं मह्यं समर्पयति। तेन तस्य प्रीत्या प्रत्यक्षतः **प्रयतात्मनः** शुद्धमनसः **तत्** पत्रपुष्पादिकम् **अहं** सर्वेश्वरो **अश्नामि** श्रीदामब्राह्मणार्पिततण्डुलकणभक्षणवत्[3] प्रीतिविशेषप्रतिबद्धहृदयो भक्ष्याभक्ष्यादिकं जानन्नप्यजानन्निवासबाल इव मात्राद्यर्पितं पत्रपुष्पादिकं **भक्त्या** अर्पितं भक्षयामि। कीदृशं? **भक्त्युपहृतं** भक्त्या = प्रीत्या समर्पितम्। तेन प्रीत्या समर्पणमेव मद्भक्षणे निमित्तमित्यर्थः।

अत्र **भक्त्या प्रयच्छति** इत्युक्त्वा पुनरपि **भक्त्युपहृतम्** इति वदन्नभक्तस्य ब्राह्मणत्वतपस्वित्वादिकं मद्भक्षणे स्वीकारे च निमित्तं न भवतीति सूचयति। अतो भक्तिरेव मत्परितोषनिमित्तम्, नतु देवतान्तरवद्बल्ल्युपहारादिबहुवित्तव्ययायाससाध्यं किञ्चिदिति देवव्रतान्तरमपहाय मामेव भजेतेति भावः॥ २६॥

---

[1] भगवदाराधनस्य भगवद्रूपत्वमनन्तं फलमाह।**इति मधुसूदनसरस्वतीये** [2] समानेऽप्यायासे इति स्यात्। समानेऽप्यभ्यासे इति वा। समानेऽप्यायासे इति मधुसूदनीये। [3] सुदामार्पिततण्डुलकणभक्षणवदित्यर्थः।

कीदृशं ते भजनम्? तदाह - **यदिति॥**

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्॥ २७॥

यत् करोषि शास्त्रं विनाऽपि रागात् प्राप्तं यल्लौकिकगमनादिकम्। **यदश्नासि** स्वयं तृप्त्यर्थं कर्मसिद्ध्यर्थं वा। तथा **यज्जुहोषि** शास्त्रबलान्नित्यमग्निहोत्रादिहोमं निवर्तयसि। श्रौतस्मार्तसर्वहोमोपलक्षणमेतत्। तथा **यद्ददासि** अतिथिब्राह्मणादि-भ्योऽन्नसुवर्णादि। तथा **यत् तपस्यसि** प्रतिसंवत्सरमज्ञातप्रामादिकपापनिवृत्तये चान्द्रायणादिकं चरसि। अन्यच्च यन्नित्यनैमित्तिकादिकं तदपि मयि समर्पयेत्। तव प्राणिस्वभाववशाद्विनाऽपि शास्त्रमवश्यम्भावि गमनाशनादि, यच्च शास्त्रव-शादवश्यम्भावि होमदानादिकं तत् सर्वं लौकिकं वैदिकं च कर्म, अन्येनैव निमित्तेन क्रियमाणं **मदर्पणं** मय्यर्पितं यथा स्यात् तथा **कुरुष्व**। अवश्यम्भाविनां कर्मणामपि परमगुरौ समर्पणमेव मद्भजनम्। न तु तदर्थं पृथग्व्यापारः कश्चित् कर्तव्य इति भावः॥ २७॥

तादृशभजनस्य फलमाह - **शुभेति॥**

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥ २८॥

एवम् अनायाससिद्धेऽपि सर्वकर्मसमर्पणरूपे मद्भजने सति शुभाशुभे इष्टा-निष्टे फले येषां तैः **कर्मबन्धनैः** बन्धनरूपैः कर्मभिः **मोक्ष्यसे**। मयि समर्पितत्वात्, तव तत्सम्बन्धानुपपत्तेः। कर्मभिस्तत्फलैश्च न संस्रक्ष्यसे। ततश्च **सन्न्यासयोग-युक्तात्मा** सन्न्यासः सर्वकर्मणां मदर्पणं स एव योग इव, चित्तशोधकत्वाद्योगः, तेन युक्तः शोधित आत्मा चित्तं यस्य स त्वं त्यक्तसर्वकर्माकर्मबन्धनैर्जीवन्नेव मुक्तः सन् निवृत्तनिःशेषकर्मरूपाविद्यः सन्, आविर्भूतस्वरूपानन्दोऽतिवैरि-ञ्चिप्रपञ्चवैभवं कालापरिच्छेद्यं वैकुण्ठाधिपतिं सर्वेश्वरं ज्ञानानन्दाद्यचिन्त्या-नन्तकल्याणगुणालयं प्रसन्नेन्दुवदनं भक्तवत्सलं सुखैकतानं **मामुपैष्यसि**। नि-त्ययुक्तं निजसुखमर्जुनमुपलक्षीकृत्य कृपया जीवानुपदिशतीति भावः॥ २८॥

ननु यदि भक्तानेवानुगृह्णासि नाभक्तान्, तर्हि वैषम्यात् कथमीश्वरः? इत्यत आह - **सम इति॥**

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥ २९॥

सर्वेषु **भूतेषु** प्राणिषु **समः** तुल्यः **अहम्** , सर्वान्तर्यामित्वात्, उदासीनत्वाच्च।[1] अतो **न** मम द्वेषविषयः प्रीतिविषयो वा कश्चित् **अस्ति**। कथं तर्हि भक्ताभक्तयोः फलवैषम्यम्? तत्राह - **ये भजन्ति तु** ये भजन्ते सेवन्ते **माम्** सर्वकर्मसमर्पणरूपया **भक्त्या**। अभक्तापेक्षया भक्तस्य विशेषद्योतकस्तुशब्दः। कोऽसौ?[2] **मयि ते** मदर्पितैः निष्कामैः कर्मभिः शोधितचित्ता निरस्तसमस्तरजस्तमोमला उद्रिक्तविशुद्धसत्वा अपरोक्षीकृतज्ञानानन्दघनमत्स्वरूपाः 'भगवान् वासुदेव एवास्माकं सर्वस्वम्' इति धीयुक्तेनाविच्छिन्नप्रेमप्रवाहेणानिशं मयि वर्तन्ते। मयि प्रीतिचिन्तनात् क्षणमपि स्वस्वरूपमधारयमानाः सन्तः स्वप्राणादिकं मत्प्रीत्यर्थमेव धारयन्तीत्यर्थः। अहमाकाशवदुदासीनोऽनेकब्रह्माण्डसर्जनपालनादिव्यापारशक्तोऽपि निरधिकप्रेम्णा 'मदीया इमा न कदाचिदिमान् विसृजामि' इति धियाऽनिशं तेषु वर्ते। सुरतरुस्वभावस्य मम न वैषम्यादिकमिति भावः॥ २९॥

किञ्च मद्भक्तेरेवायं महिमा, यत् समे वैषम्यमापादयति। श्रुणु तन्महिमानमित्याह - **अपि चेदिति॥**

अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥ ३०॥

यः कश्चित् **सुदुराचारोऽपि चेत्** , अजामिळादिरिवान्यं देवं मत्तोऽन्यन्मनोभिलाषं च न भजते न याचते च यः सः **अनन्यभाक्**। मदेकशरणस्त्यक्तसमस्तमत्प्राप्तिभिन्नकामः त्यक्तदेवान्तरभानश्च **मां भजते** कुतश्चित् भाग्योदयात्

[1] सर्वेषु प्राणिषु समस्तुल्योऽहं सद्रूपेण स्फुरणरूपेणानन्दरूपेण च स्वाभाविकेनौपाधिकेन चान्तर्यामित्वेन।**इति मधुसूदनसरस्वतीये** [2] कोऽसौ विशेष इत्यर्थः।

सेवते। **सः** प्रागसाधुरपि **साधुरेव मन्तव्यः**, **हि** यतः **सम्यग्व्यवसितः** साधुनिश्चयवान् सः॥ ३०॥

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥ ३१॥

चिरकालमधर्मात्माऽपि मद्भजनमहिम्ना **क्षिप्रं** शीघ्रमेव **धर्मात्मा** धर्मानुगतचित्तो **भवति**। दुराचारं तत्क्षणमेव त्यक्त्वा सदाचारो भवतीत्यर्थः। **शश्वच्छान्तिं** विषयभोगस्पृहानिवृत्तिं नितरां प्राप्नोति।

ननु कश्चित् मद्भक्तः प्रागभ्यस्तदुराचारत्वमत्यजन् न भवेदपि धर्मात्मा। तथा च स नश्येदेवेति शङ्कामपाकर्तुं भक्तानुकम्पापरवशतया कुपित इव भगवानाह- नैतदाश्चर्यं मन्वीथाः हे **कौन्तेय** निश्चितमेवेदृशं मद्भक्तेर्माहात्म्यम्। अतो विप्रतिपन्नानां पुरस्तादपि त्वं **प्रतिजानीहि** सावज्ञं सगर्वं च प्रतिज्ञां कुरु। **न मे** वासुदेवस्य **भक्तः** अतिदुराचारोऽपि **प्रणश्यति**। सङ्कटमापन्नोऽपि सुदुर्लभमयोग्यः सन् प्रार्थयमानोऽप्यतिमूढोऽपि[1] न प्रणश्यति। किन्तु, कृतार्थ एव भवतीति। दृष्टान्ताश्चाजामिळध्रुवगजेन्द्रादयः। 'न वासुदेवभक्तानामशुभम् विद्यते क्वचित्'[2] इति स्मृतेः॥ ३१॥

एवमागन्तुकदोषेण दुष्टानां भगवद्भक्तिप्रभावान्निस्तारमुक्त्वा स्वाभाविकदोषेण दुष्टानामपि तमाह - **मामिति**॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥ ३२॥

हि निश्चितं हे **पार्थ मां व्यपाश्रित्य** शरणमागत्य **ये पापयोनयः** अन्त्यजादयः स्वाभाविकदोषदुष्टाः वेदाध्ययनशून्यतया **स्त्रियः वैश्याः** कृष्यादिमात्ररताः. **तथा शूद्राः** जात्याऽध्ययनाद्यभावतोऽपि परमगत्ययोग्याः स्युः, **तेऽपि यान्ति परां गतिम्।** अपिशब्दात् प्रागुक्ता दुराचारा अपि॥ ३२॥

[1] अतिमूढोऽशरणोऽपि **इति मधुसूदनसरस्वतीये** (विष्णुसहस्रनामफलश्रुतौ)

[2] **महाभारतम्** १३.१३५.१३१

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्॥ ३३॥

पुण्याः सदाचारा उत्तमयोनयश्च **ब्राह्मणास्तथा राजर्षयः** सूक्ष्मदृष्टयः क्षत्रिया मम **भक्ताः** परां गतिं यान्ति **किं पुनः** अत्र वक्तव्यम् ! कस्यचिदत्र सन्देहो नास्तीत्यर्थः।

यतो मद्भक्तेरीदृशो महामहिमा, अतो महाप्रयत्नेन **इमं लोकं** सर्वपुरुषार्थ-साधनयोग्यमतिदुर्लभं च मनुष्यदेहम् **अनित्यम्** आशुविनाशिनम् **असुखं** गर्भ-वासाद्यनेकदुःखबहुलं लब्ध्वा यावदयं न नश्यति, तावदतिशीघ्रमेव **मां भजस्व** शरणमाश्रयस्व। अनित्यत्वादसुखत्वाच्चास्य विलम्बं सुखार्थमुद्यमं च मा का-र्षीः। त्वं च राजर्षिः। अतो मद्भजनेनात्मानं सफलं कुरु। अन्यथा ह्येतादृशं जन्म व्यर्थमेवेति भावः॥ ३३॥

भजनप्रकारं दर्शयन्नुपसंहरति -

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥ ३४॥

राजभक्तस्यापि राजभृत्यस्य पुत्रादौ मनः, पुत्रादौ स तन्मना अपि[1] न तद्भक्त इत्यत उक्तम् - **मन्मना भव मद्भक्त इति॥** तथा **मद्याजी** मत्पूजनशीलः **मां नमस्कुरु** मनोवाक्कायैः। **एवम्** एभिः प्रकारैः **मत्परायणः** मदेकशरणः सन् **आ-त्मानं** चित्तं **युक्त्वा** मयि समाधाय **मामेव** परमानन्दघनम् अप्राकृतालौकिकानन्त-विभूतिवैभवं कालादिनिबन्धनसर्वोपद्रवशून्यं निवृत्ताशेषविघ्नः सन् प्राप्स्यसि। एवकारेण स्वस्मात् पार्थरथस्थात् हस्ताभ्यां गृहीताश्वरज्जुप्रतोदात् पार्थसा-रथ्यतत्परात् वसुदेवतनयात् प्रतिरोमकूपं दोधूयमानानन्तब्रह्माण्डाद्ब्रह्मादि-भिश्चिन्तनेनाप्यशक्यतत्त्वज्ञानात् विचित्राचिन्त्यानन्तशक्तेः सदनन्तगुणालया-दानन्दमूर्तेर्भिन्नं प्राप्यान्तरं व्यावर्तयति। एतादृशाद्भुतैश्वर्यज्ञानमेव 'राजविद्या'[2] इत्यादिना गोप्यमुक्तम्। तन्मत्प्रसादं विना न भवति।

[1] राजभक्तस्यापि राजभृत्यस्य न तत्र तथा मनः, तथा स तन्मना अपि - पा. [2] **भगवद्गीता** ९.१

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैव[1] कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥'[2] इति श्रुतेरिति भावः॥ ३४॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजगुह्ययोगो नाम नवमोऽध्यायः॥ ९॥

[1] तस्यैते इति तु प्रचलितः। [2] **श्वेताश्वतरोपनिषत्** ६.२३

अध्यायः 10

विभूतियोगः

भक्तिविवृद्धयेऽथेशो दशमे करुणानिधिः।
सदनन्तविभूतीनां भेदान् ब्रवीति कांश्चन॥

तत्र षष्ठे 'युञ्जन्नेवम्'[1] इत्यादिनाऽनन्तविभूतिमतो हरेर्ध्यानमुक्तम्। सप्तमेऽपि 'रसोऽहम्'[2] इत्यादिविभूतिविशेषा उक्ताः। नवमेऽपि 'अहं क्रतुः'[3] इत्यादिनोक्ताः। भगवत्तत्त्वस्यातिदुर्बोधत्वात् पुनरपि ध्यानाय ज्ञानाय च विभूतयोऽत्र निरूप्यन्ते।

तत्रादौ परमकृपयाऽपृष्टोऽप्यर्जुनं स्वस्मिन्नतिप्रीतिमन्तं मन्वानः सर्वत्रावाच्यमपि निरतिशयनिरङ्कुशैश्वर्यं वक्तुं स्वस्य तदुपरि प्रसन्नतां प्रकटयन्नर्जुनं प्रोत्साहयति - **भूय इति**॥

श्रीभगवानुवाच
भूय एव महाबाहो श्रृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १॥

---

[1] भगवद्गीता ६.१५ [2] भगवद्गीता ७.८ [3] भगवद्गीता ९.१६

भूयः पुनरपि **मे परमं** सर्वोत्कृष्टममृतसन्दोहं **वचः श्रुणु। यत्** **ते** तुभ्यं **प्रीयमाणाय** मद्वचनादमृतपानादिव प्रीतिं प्राप्नुवते परमाप्तः **अहं** तव **हितकाम्यया** इष्टप्राप्तीच्छया **वक्ष्यामि** ॥ १॥

प्राग् बहुधोक्तमेव किमर्थं पुनर्वक्ष्यसि? इत्यत आह - **न म इति**॥

न मे विदुः सुरगणाः प्रभवं न महर्षयः।
अहमादिर्हि देवानां महर्षीणां च सर्वशः॥ २॥

प्रभवं प्रभावं प्रभुत्वं निरतिशयाद्भुतानन्तनिरङ्कुशैश्वर्यं प्रभवनमुत्पत्तिं निरतिशयानन्तामिताद्भुतविभूतियुक्ततयाऽऽविर्भावं वा **सुरगणाः** इन्द्रादयः **महर्षयः** च भृग्वादयः सर्वज्ञा अपि **न मे विदुः**। तेषां तदज्ञाने हेतुमाह - **अहं हि** यतः सर्वेषां **देवानां महर्षीणां च सर्वशः** सर्वप्रकारैरुत्पादकत्वेन बुद्ध्यादिप्रवर्तकत्वेन च **आदिः** कारणम्। अतो मदधीनदेहेन्द्रियचेतना मद्दत्तज्ञानादिशक्तयश्च मत्प्रभावं न जानन्तीत्यर्थः[1] २॥

मोक्षाख्यमहापुरुषार्थदं मदद्भुतप्रभावज्ञानं मत्प्रसादभाजः कस्यचिदेव भवतीत्याह - **य इति**॥

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥ ३॥

सर्वकारणत्वान्न विद्यत आदिर्कारणं यस्य तम् **अनादिम्**। अनादित्वात् **अजं** जन्मशून्यम्। लोकानां महान्तमीश्वरं **मां यो वेत्ति, स मर्त्येषु** मनुष्येषु मध्ये **असम्मूढः** सम्मोहवर्जितः सर्वैः पापैः मतिपूर्वककृतैरपि मुच्यते।

मम वासुदेवस्य सर्वजगदुदयादिकर्तृत्वेन सदैकाकारत्वेन सर्वनियामकत्वेन शास्त्रीयं ज्ञानम्, ततोऽविच्छिन्नप्रेमप्रवाहरूपा भक्तिः, ततोऽनन्तगुणालयस्य ममापरोक्ष्यम्, ततो मत्प्रसादात् सर्वपापहेतोरविद्याया उच्छेद इति भावः॥ ३॥

[1] सर्वशः सर्वैः प्रकारैरुत्पादकत्वेन बुद्ध्यादिप्रवर्तकत्वेन च निमित्तत्वेनोपादानत्वेन चादिः कारणम्। अतो मद्विकारास्ते मत्प्रभावं न जानन्तीत्यर्थः।**इति मधुसूदनसरस्वतीये** ॥

स्वस्य लोकमहेश्वरत्वं भक्तिविवृद्धये प्रपञ्चयति - **बुद्धिरिति॥**

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवो भावो भयं चाभयमेव च॥ ४॥

बुद्धिः अन्तःकरणस्य सूक्ष्मार्थविवेकसामर्थ्यम्। **ज्ञानम्** आत्मानात्मसर्वपदार्थावबोधः। **असम्मोहः** प्रत्युत्पन्नेषु बोद्धव्येषु कर्तव्येषु वाऽव्याकुलतया विवेकेन प्रवृत्तिः। **क्षमा** आकृष्टस्य ताडितस्य वा निर्विकारचित्तता। **सत्यम्** प्रमाणेनावबुद्धस्यार्थस्य तथैव भाषणम्। **दमः** बाह्येन्द्रियाणां निवृत्तिः। **शमः** अन्तःकरणस्य। **सुखं** धर्मासाधारणहेतुकमनुकूलवेदनीयम्। **दुःखम्** अधर्मासाधारणहेतुकं प्रतिकूलवेदनीयम्। **भवः** उत्पत्तिः। **भावः** सत्ता। **भयं** भाव्यनिष्टधीजन्यं दुखम्। तदभावः **अभयम्।** एते सर्वे मत्त एव भवन्तीत्युत्तरेणान्वयः॥ ४॥

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥ ५॥

अहिंसा कायवाङ्मनोभिः प्राणिपीडानिवृत्तिः। **समता** चित्तस्य रागद्वेषास्पदरहितावस्था। **तुष्टिः** भोग्येऽप्येतावताऽलमिति बुद्धिः। **तपः** शास्त्रीयमार्गेण कायेन्द्रियशोषणम्। **दानं** देशे काले श्रद्धया यथाशक्त्यर्थानां पात्रे समर्पणम्। **यशः** धर्मनिमित्ता लोकश्लाघारूपा प्रसिद्धिः। **अयशः** अधर्मनिमित्ता लोकनिन्दारूपा प्रसिद्धिः। एते बुद्ध्यादयो **भावाः** कार्यविशेषाः सकारणकाः **पृथग्विधाः** नानाधर्माधर्मादिसाधनवैचित्र्येण नानाविधाः **भूतानां** सर्वेषां प्राणिनां **मत्तः** परमेश्वरादेव **भवन्ति** नान्यस्मात्। अतः किं वाच्यं मम लोकमहेश्वरत्वम्! ॥ ५॥

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः॥ ६॥

महर्षयः वेदतदर्थद्रष्टारः सर्वज्ञा विद्यासम्प्रदायप्रवर्तका भृग्वाद्याः **सप्त पूर्वे** सर्गाद्यकालाविर्भूताः। तथा च पुराणम् -

'भृगुं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुम्।
वसिष्टं च महातेजाः सोऽसृजन्मनसा सुतान्।
सप्त ब्रह्माण[1] इत्येते पुराणे निश्चयं गताः॥' इति।

तथा चत्वारो मनवः सावर्ण्याद्याः[2] प्रसिद्धाः। यद्वा, **महर्षयः सप्त** भृग्वाद्याः, तेभ्योऽपि **पूर्वे** प्रथमाः **चत्वारः** सनकाद्याः महर्षयः **मनवस्तथा** स्वायम्भुवाद्याश्चतुर्दश।[3]

मयि = सर्वकारणकारणे सर्वेश्वरे भावो भावना येषां ते **मद्भावाः** मच्चिन्तनपरा मद्भावनाहेतुकमत्प्रसादादाविर्भूतमदीयज्ञानबलैश्वर्यापरोक्षवन्त इत्यर्थः। **मानसाः** मनःसङ्कल्पादेव **जाताः** न योनिजाः। अतो विशुद्धजन्मत्वेन सर्वप्राणिश्रेष्ठाः। हिरण्यगर्भान्तस्थात् मत्त एव[4] जाताः सर्गाद्यकाल आविर्भूताः। **येषां** भृग्वादीनां सनकादीनां मनूनां चास्मिन् **लोके** विद्यया जन्मना च सन्ततिभूताः **इमाः** ब्राह्मणाद्याः सर्वाः **प्रजाः**॥ ६॥

ऐश्वर्यज्ञानस्य फलमाह - **एतामिति**॥

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः॥ ७॥

एतां प्रागुक्तां मद्विभूतिं बुद्ध्यादिरूपाम्। भगवतो बुद्ध्याद्या अनन्ता अघटनघटनापटीयस्यः परमार्थभूता मुमुक्षुज्ञेयाः, न त्विन्द्रजालवन्मृषेति **तत्त्वतो यो वेत्ति, योगं** सर्वजगदुदयादिकर्तृत्वसामर्थ्यं **च** तादृशमेव वेत्ति, **सोऽविकम्पेन** नाशादिशून्येन **योगेन** साधर्माख्यमत्सायुज्येन **युज्यते नात्र संशयः**॥ ७॥

---

[1] ब्राह्मणा इति कोशे। [2] सावर्णाद्याः - पा. [3] पूर्वे सप्तर्षयः - 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। वसिष्ठश्च महातेजाः' (**महाभारतम्** १२.२०१.४) इति मोक्षधर्मोक्ताः। ते हि सर्वे पुराणेषूच्यन्ते(**ब्रह्मपुराणम्** १.४३,४४)। **चत्वारः** प्रथमाः स्वायम्भुवाद्याः। तेषां हि **इमाः प्रजाः**। नहि भविष्यतामिमाः प्रजा इति युक्तम्। विभागः प्राधान्यं च प्राथमिकत्वादेव भवति। तच्चोक्तम् गौतमखिलेषु - 'स्वायम्भुवं स्वारोचिषं रैवतं च तथोत्तमम्। वेद यः स प्रजावान्' इति।**इति मध्वभाष्यम्** महर्षयः सप्त भृग्वादय इति शङ्करः। तदसत्। पूर्व इति विशेषणेन प्रथममन्वन्तरस्थानामेव ग्रहणस्योचितत्वात्, मोक्षधर्मसंवादाच्चेति भावेनाह - **पूर्वे इति**॥ ... ब्रह्मसावर्ण्यो रुद्रसावर्ण्यो दक्षसावर्ण्यो धर्मसावर्ण्य इति भविष्यन्तश्चत्वारो मनव इत्यन्ये। तदसदिति भावेनाह - **चत्वार इति॥ इति प्रमेयदीपिका** [4] मत्त एव हिरण्यगर्भात्मनः **इति मधुसूदनसरस्वतीये**

यादृशेन ज्ञानेन सायुज्याख्ययोगप्राप्तिः, तद्दर्शयति - **अहमिति चतुर्भिः॥**

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥ ८॥

अहं वासुदेवः परं ब्रह्म **सर्वस्य** जगतः **प्रभवः** उत्पत्तिकारणम्, स्थितिनाशादिकं च **सर्वं मत्त एव प्रवर्तते** मयैवान्तर्यामिणा सर्वज्ञेन सर्वशक्तिना प्रेर्यमाणं स्वस्य मर्यादामनतिक्रम्य सर्वं **प्रवर्तते** चेष्टत इति च[1] **इति** एवं **मत्वा**, **बुधाः** विवेकिनोऽवगततत्त्वाः, भावेन = अविच्छिन्नप्रेमप्रवाहेण समन्विताः **मां भजन्ते।** प्रेमप्रवाहपूर्वकोत्कैश्वर्यज्ञानमेवोत्कृष्टं भजनमिति भावः॥ ८॥

प्रेमपूर्वकं भजनमेव विवृणोति - **मदिति॥**

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ ९॥

मय्यनन्तगुणालये वासुदेवे चित्तं येषां ते **मच्चिताः**। तथा मद्गता मां प्राप्ताः प्राणाश्चक्षुरादयो येषां ते **मद्गतप्राणाः** मद्भजननिमित्तचक्षुरादिव्यापाराः, मय्युपसंहृतसर्वकरणा वा। यद्वा, **मद्गतप्राणाः** मद्भजनार्थं जीवना मद्भजनातिरिक्तप्रयोजनशून्यजीवना इति यावत्। विद्वद्गोष्ठीषु **परस्परम्** अन्योन्यं श्रुतिभिर्युक्तिभिश्च मामेव **बोधयन्तः** तत्त्वबुभुत्सुकथया ज्ञापयन्तः। तथा स्वशिष्येभ्यश्च मामेव **कथयन्तः** उपदिशन्तश्च। मयि चित्तार्पणं तथा बाह्यकरणार्पणं तथा जीवनार्पणम् एवं समानामन्योन्यं मद्बोधनं न्यूनेभ्यश्च मदुपदेशनमित्येवंरूपं यन्मद्भजनं तेनैव **तुष्यन्ति च** 'एतावतैव लब्धसर्वार्था वयम्, अलमन्येन लब्धव्येन' इत्येवं प्रत्ययरूपं सन्तोषं प्राप्नुवन्ति। तेन सन्तोषेण **रमन्ति च** रमन्ते च। प्रियसङ्गमेनेवोत्तमं सुखमनुभवन्ति॥ ९॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ १०॥

---

[1] इति वा इति स्यात्॥

सततं = सर्वदा युक्तानां = मय्येकाग्रबुद्धीनाम्, अत एव लाभपूजाख्यात्याद्यनभिसन्धाय **प्रीतिपूर्वकम्** एव **भजतां** तेषां **बुद्धियोगम्** अनन्तगुणालयस्य मम साक्षात्कारम्। **येन** निर्मुक्ताविद्याबन्धनाः सन्तः **मां** श्रीवैकुण्ठाधिपतिं सुखैकतानं प्राप्य पूर्णानन्दाविर्भावरूपमोक्षभाजो भवन्तीति भावः[1] १०॥

दीयमानस्य स्वापरोक्षज्ञानस्य मोक्षरूपे फले मध्यवर्तिनं व्यापारमाह - **तेषामिति**॥

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥ ११॥

तेषामेव कथम् ? मोक्षः स्यादित्यनुग्रहार्थम्। **आत्मभावस्थः** आत्मनश्चित्तस्य भावे अपरोक्षवृत्तौ विषयतया स्थितः। मया प्रसन्नेन प्रकाशितेन स्वविषयापरोक्षज्ञानाख्यदीपेन **भास्वता** अनादिकालसञ्चिताविद्यानिवर्तने क्षमेण वातादिस्थानीयासम्भावनाविपरीतभावनाशून्येन **अज्ञानजम्** अनाद्यविद्याहेतुकं देहगेहादावहंममेति मिथ्याज्ञानरूपं **तमः** तत्क्षणमेव **नाशयामि**॥ ११॥

भगवतोऽद्भुतविभूतियोगं श्रुत्वाऽत्युत्कण्ठितः पृच्छति - **परमिति**॥

अर्जुन उवाच
परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥ १२॥

परं ब्रह्म सर्वोत्कृष्टानन्तबृहद्गुणकं **परं धाम** सर्वजगदाश्रयं तेजो वा। **पवित्रं** कटाक्षामात्रेणानादिकालप्रवृत्तातिदुर्निवार्याविद्यारूपमलशोधकम्। पूर्णगुणत्वात् **पुरुषं** पुरूणि बहूनि पापानि स्यति द्यतीति वा। पुरूणि स्यतीति 'षोऽन्तकर्मणि' अन्तं प्रापयतीति वा। पुराणि ओषति पुरुकालेऽस्तीति वा पुरुषः, तम्। **शाश्वतं** सदैकाकारम्। **दिव्यं** लोकविलक्षणं प्रकाशरूपम्। **अजं** जन्मशून्यम्, नित्यदेहमित्यर्थः। **विभुम्** अघटनघटनापटीयोऽचिन्त्यानन्तसामर्थ्यम्॥ १२॥

[1] येन बुद्धियोगेन मामीश्वरमात्मत्वेनोपयान्ति।**इति मधुसूदनसरस्वतीये** ॥

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे॥ १३॥

सर्वे परावरतत्त्वविदः **ऋषयस्त्वाम्** एव 'शाश्वतं दिव्यं पुरुषमादिदेवमजं विभुम्' आहुः। **तथा देवर्षिर्नारदः, असितो देवलश्च व्यासः** भगवान् बादरायणः।

'एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः।
नागपर्यङ्कमुत्सृज्येहागतो मथुरां पुरीम्॥'

'पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः।
साक्षाद्देवः[1] पुराणोऽसौ स हि धर्मः सनातनः॥'[2]

'यत्र नारायणो देवः परमात्मा सनातनः।
तत्र कृत्स्नं जगत् पार्थ तीर्थान्यायतनानि च॥

तत् पुण्यं तत् परं ब्रह्म तत् तीर्थं तत् तपोधनम्।
तत्र देवर्षयः सिद्धाः सर्वे चैव तपोधनाः॥

आदिदेवो महायोगी यत्रास्ते मधुसूदनः।
पुण्यानामपि तत् पुण्यं मा भूदङ्गात्र संशयः॥'[3]

'कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः[4]
कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम्॥'[5]

इत्यादीनि[6] भूयांसि महर्षिवचनानि श्रूयन्ते। 'भूमिरापः'[7] इत्यादि 'अहं सर्वस्य प्रभवः'[8] इत्यन्तेन **स्वयं च ब्रवीषि**॥ १३॥

सर्वमेतदृतं मन्ये यन्मां वदसि केशव।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः॥ १४॥

---

[1] साक्षाद्देवदेवः इति कोशे। [2] **महाभारतम्** ३.८६.२१ [3] **महाभारतम्** ३.८८.२५-२७ [4] चाव्ययः - पा.॥ [5] **महाभारतम्** २.३५.२२ 'विश्वं समर्पितम्' इति मुद्रितपाठः। [6] समस्तानीमानि वचनान्युदाहृतानि रामानुजभाष्ये। [7] **भगवद्गीता** ७.४ [8] **भगवद्गीता** १०.८

सर्वमेतत् उक्तमृषिभिश्च त्वया च तत् **ऋतं** सत्यमेवाहं **मन्ये यन्मां** प्रति **वदसि केशव**। न हि त्वदीयाचिन्त्यमहिमबोधके त्वदीयेऽन्यदीये वा वचसि ममाप्रामाण्यशङ्काऽस्ति। तच्च सर्वज्ञत्वात् त्वं जानासीति केशौ ब्रह्मरुद्रौ सर्वेशावप्यनुकम्प्यतया नियम्यतया विद्येते यस्य स इति निरतिशयैश्वर्यप्रतिपादककेशवपदेन सूचितम्।[1] अतो यदुक्तं 'न मे विदुः सुरगणाः'[2] इत्यादि तत् तथैव **हि** यतः हे **भगवन्** समग्रैश्वर्यादिसम्पन्न **ते** तव **व्यक्तिं** प्रभावं ज्ञानातिशयशालिनोऽपि **देवा न विदुः, न** अपि **दानवाः**। न महर्षय इत्यपि द्रष्टव्यम्॥ १४॥

स्वयमेवाऽत्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम।
भूतभावन भूतेश देवदेव जगत्पते॥ १५॥

स्वयमेव अन्योपदेशं विनैव **आत्मना** स्वरूपभूतनित्यज्ञानेन निरतिशयानन्तज्ञानबलैश्वर्यादिशक्तिमत्त्वेन **वेत्थ**। अन्यैर्ज्ञातुमशक्यमनन्तैश्वर्यमहं कथं जानीयाम् ? इति शङ्कामपाकर्तुं प्रेमौत्कण्ठ्येन बहुधा सम्बोधयति - हे **पुरुषोत्तम** त्वदपेक्षया सर्वे बद्धा मुक्ताश्च पुरुषा अपकृष्टा एव। अतस्तेषामशक्यमपि पुरुषोत्तमस्य तव शक्यमिति भावः। पुरुषोत्तमत्वमेव चतुर्भिः सम्बोधनैर्विवृणोति - भूतानि सर्वाणि भावयति = उत्पादयतीति हे **भूतभावन** सर्वभूतपितः। पिताऽपि कश्चिन्नेष्टे, तत्राह - हे **भूतेश** सर्वभूतनियन्तः। नियन्ताऽपि कश्चिन्नाराध्यः, तत्राह - हे **देवदेव** देवानां = सर्वाराध्यानामप्याराध्य। आराध्योऽपि कश्चिन्न पालयितृत्वेन पतिः। तत्राह - हे **जगत्पते** हिताहितोपदेशकवेदप्रणेतृत्वेन सर्वस्य जगतः पालयितः॥

एतादृशविशेषणविशिष्टस्त्वं सर्वेषां पिता गुरुः राजा, अतः सर्वप्रकारैः सर्वेषामाराध्यः इति किं वाच्यं पुरुषोत्तमत्वं तव! इति भावः॥ १५॥

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥ १६॥

[1] तच्च सर्वज्ञत्वात् त्वं जानासीति केशौ ब्रह्मरुद्रौ सर्वेशावप्यनुकम्प्यतया वात्यवगच्छतीति व्युत्पत्तिमाश्रित्य निरतिशयैश्वर्यप्रतिपादकेन केशवपदेन सूचितम्।**इति मधुसूदनसरस्वतीये**

[2] **भगवद्गीता** १०.२

याभिर्विभूतिभिरिमान् सर्वान् **लोकान् व्याप्य** त्वं **तिष्ठसि**, तास्तवासाधारणविभूतयः **दिव्याः** सर्वज्ञैर्ज्ञातुमशक्याः **हि** यस्मात् सर्वज्ञस्त्वमेव ताः **अशेषेण वक्तुमर्हसि**॥ १६॥

किं प्रयोजनं तत्कथनस्य? तदाह - **कथमिति द्वाभ्याम्**॥

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया॥ १७॥

योगः = निरतिशयैश्वर्यादिशक्तिः, सोऽस्यास्तीति हे **योगिन्** निरतिशयैश्वर्यादिशक्तिशालिन्। ननु मद्विभूतिषु मां ध्यायन् ज्ञास्यसि। तत्राह - **केषु केषु भावेषु** चेतनाचेतनात्मकेषु वस्तुषु त्वद्विभूतिभूतेषु **मया चिन्त्योऽसि** हे **भगवन्**॥ १७॥

विस्तरेणात्मनो योगं विभूतिं च जनार्दन।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्॥ १८॥

आत्मनः तव **योगं** सर्वशक्तित्वादिलक्षणैश्वर्यातिशयं **विभूतिं** सङ्क्षेपेण सप्तमे नवमे चोक्तमपि **भूयः** पुनः **कथय** सर्वैर्जनैरभ्युदयनिःश्रेयसप्रयोजनं याच्यस[1] इति हे **जनार्दन** अतो ममापि याञ्चा त्वयुचितैव। उक्तस्य पुनः कथनं कुतो याचसे? तत्राह - **तृप्तिः** अलम्प्रत्ययः **नास्ति हि** यतः **शृण्वतः** श्रवणेन पिबतः त्वद्वाक्यम् **अमृतम्**। अत्र त्वद्वाक्यमित्यपरूपातिशयोक्तिरूपसङ्करोऽयं माधुर्यातिशयानुभवेनोत्कण्ठातिशयं व्यनक्ति॥ १८॥

उत्तरमाह - **हन्तेति**॥

श्रीभगवानुवाच
हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥ १९॥

[1] याञ्चते - पा.

हन्त इत्यनुमतौ। 'यत् त्वया प्रार्थितं तत् करिष्यामि मा व्याकुलो भूः' इत्यर्जुनं समाश्वास्य, तदेव कर्तुमारभते। **कथयिष्यामि प्राधान्यतः** ता विभूतयः, याः **दिव्या हि** प्रसिद्धाः, आत्मनो ममासाधारणा विभूतयः। हे **कुरुश्रेष्ठ** विस्तरेण कथनमशक्यम्। यतो **नास्त्यन्तो विस्तरस्य मे** विभूतीनाम्। अतः प्रधानभूताः काश्चिदेव विभूतीर्वक्ष्यामीत्यर्थः॥ १९॥

तत्र तावदुत्तमाधिकारिणां मुख्यं चिन्तनीयं शृणु - **अहमिति**॥ [1]

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च॥ २०॥

सर्वभूतानामाशये हृद्देशेऽन्तर्यामिरूपेण स्थितः **अहं** सर्वेश्वरो वासुदेवश्चिन्त्यः[2] **अहमेवादिश्च** उत्पत्तिहेतुः **भूतानामन्तश्च** नाशकः। सर्वचेतनवर्गाणामुत्पत्तिस्थितिनाशकर्तृत्वेनाहमेव मध्ये स्थित इत्यर्थः॥ २०॥

एतादृशसर्वान्तर्यामित्वव्यापकत्वादिना ध्यानासामर्थ्ये क्वचित् किञ्चिदेव बाह्यध्यानानि कार्याणीत्याह यावदध्यायसमाप्ति।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥ २१॥

आदित्यानां द्वादशानां मध्ये **विष्णुः** वामनः **अहम्**। **ज्योतिषां** प्रकाशकानां मध्ये **अंशुमान्** अहम्। **मरुतां** सप्तसप्तकानां मध्ये **मरीचिः** अहम्। **नक्षत्राणां** मध्ये **अहं शशी**। निर्धारणे षष्ठी। क्वचित् सम्बन्धे यथा 'भूतानामस्मि चेतना'[3] इत्यादौ। वामनादयश्चावताराः सर्वैश्वर्यशालिनोऽप्यनेन रूपेण ध्यानविवक्षया विभूतिषु पठ्यन्ते। 'वृष्णीनां वासुदेवोऽस्मि'[4] इति तेन रूपेण ध्यानविवक्षया स्वस्यापि स्वविभूतिमध्ये पाठवत्॥ २१॥

---

[1] तत्र प्रथमं तावन्मुख्यं चिन्तनीयं शृणु - **अहमिति॥ इति मधुसूदनसरस्वतीये**

[2] सर्वभूतानामाशये हृद्देशेऽन्तर्यामिरूपेण प्रत्यगात्मरूपेण च स्थिता आत्मा चैतन्यानन्दघ्नस्त्वयाऽहं वासुदेव एवेति ध्येयः।**इति मधुसूदनसरस्वतीये** ।

[3] **भगवद्गीता** १०.२२

[4] **भगवद्गीता** १०.३७

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥ २२॥

वेदानां मध्ये गानमाधुर्येण रमणीयः **सामवेदः** अहम्। **इन्द्रियाणाम्** एकादशानां **मनः** अहम्। **भूतानां** प्राणिनां सम्बन्धिनी **चेतना** बुद्धेर्वृत्तिरहम्॥ २२॥

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥ २३॥

रुद्राणाम् एकादशानाम्। **वित्तेशः** कुबेरः। **वसूनाम्** अष्टानां **पावकः** अग्निः। **मेरुः** सुमेरुः। **शिखरिणां** पर्वतानाम्॥ २३॥

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः॥ २४॥

पुरोधसां राजपुरोहितानाम्। **सेनानीनां** सेनापतीनाम्। **स्कन्दः** गुहः। **सरसां** देवखातजलाशयानां **सागरः** सगरपुत्रैः खातः॥ २४॥

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥ २५॥

महर्षीणां सप्तानाम्। **गिरां** वाचाम् **एकमक्षरम्** ॐकारोऽहम्। **जपयज्ञः** हिंसादिदोषशून्यत्वेन सत्वशोधकोऽहम्। **स्थावराणां** स्थितिमताम्। स्थावरत्व-शिखरत्वयोर्भेदात् 'मेरुः शिखरिणाम्' इत्युक्तेऽप्यदोषः॥ २५॥

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥ २६॥

सर्वेषां वृक्षाणां वनस्पतीनामन्येषां च। देवा एव सन्तो ये मन्त्रदर्शित्वेनर्षित्वं प्राप्तास्ते देवर्षयः, तेषाम्। **गन्धर्वाणां** देवगायकानाम्। **सिद्धानां** जन्मनैव, विना प्रयत्नं धर्मज्ञानवैराग्याश्वर्यातिशयप्राप्तानामधिगतात्मतत्त्वानां **कपिलः** अहमेव, न त्वर्थान्तरम्॥ २६॥

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम्॥ २७॥

उच्चैःश्रवसम् अमृतमथनोद्भवम्। **ऐरावतम्** अमृतमथनोद्भवम्। **नराधिपं** राजानम्॥ २७॥

आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥ २८॥

आयुधानाम् अस्त्राणां मध्ये दधीचेरस्थिसम्भवमस्त्रमहमस्मि। **धेनूनां** दोग्ध्रीणां कामं दोग्ध्रीति **कामधुक्** समुद्रमथनोद्भवा धेनुरहम्। कामानां मध्ये **प्रजनः** पुत्रोत्पत्त्यर्थो यः **कन्दर्पः** कामः सोऽहम्। सर्पाश्च नागाश्चैकफणानेकफणभेदेनावान्तरजातिभेदेन च भिद्यन्ते। **सर्पाणां** मध्ये **वासुकिः** अहम्॥ २८॥

अनन्तश्चास्मि नागानां वरुणो यादसामहम्।
पितॄणामर्यमा चास्मि यमः संयमतामहम्॥ २९॥

नागानामनन्तः शेषाख्योऽहम्। **यादसां** जलचराणां मध्ये तेषां **वरुणोऽहम्।** **पितॄणामर्यमा** पितृराजोऽहम्। **संयमतां** संयमं धर्माधर्मफलदानेनानुग्रहं निग्रहं च कुर्वतां मध्ये **यमोऽहम्॥** २९॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥ ३०॥

दैत्यानां दितिवंश्यानां मध्ये प्रकर्षेणाह्लादयत्यानन्दयति परमसात्त्विकत्वेन सर्वानिति **प्रह्लादः** अहम्। **कलयतां** सङ्ख्यानं गणनं कुर्वतां मध्ये **कालोऽहम्। मृगेन्द्रः** सिंहः। **मृगाणां** पशूनाम्। **वैनतेयः** विनतापुत्रो गरुडः॥ ३०॥

पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥ ३१॥

पवतां पावयितॄणां वेगवतां वा **पवनः** वायुरहम्। **शस्त्रभृतां** शस्त्रकारिणां युद्धकारिणां मध्ये **रामः** दाशरथिः **अहम्।** साक्षात् स्वरूपस्याप्यनेन रूपेण चिन्तनार्थं 'वृष्णीनां वासुदेवोऽस्मि' इतिवदत्र पाठः। **झषाणां** मत्स्यानाम्। **मकरः** नाम तज्जातिविशेषः, सः **अहम्। स्रोतसां** वेगेन चलज्जलानां नदीनां मध्ये **जाह्नवी** गङ्गाऽहम्॥ ३१॥

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥ ३२॥

सर्गाणाम् अचेतनसृष्टीणाम् **आदिरन्तश्च मध्यं च** उत्पत्तिस्थितिलयस्थानम् **अहम्** इत्यर्थः। **भूतानां** जीवाविष्टानां चेतनत्वेन प्रसिद्धानामेव 'आदिरन्तश्च मध्यं च' इत्युक्तमुपक्रमे। इह त्वचेतनवर्गाणामिति न पौनरुक्त्यम्। **विद्यानां** मध्ये **अध्यात्मविद्या** मोक्षहेतुरात्मतत्त्वविद्याऽहम्। प्रवदत्सम्बन्धिनां कथाभेदानां वादजल्पवितण्डात्मकानां मध्ये **वादोऽहम्।** यद्वा, **प्रवदतां** सम्बन्धी **वादोऽहम्** इत्यर्थः। सम्बन्धे षष्ठी नतु निर्धारणेऽतो यथाश्रुतमेव साधु।

तत्र तत्त्वबुभुत्सोर्वीतरागयो सतीर्थयोर्गुरुशिष्ययोर्वा प्रमाणेन तर्केण च साधनदूषणात्मा पक्षप्रतिपक्षपरिग्रहस्तत्त्वनिर्णयपर्यन्तो वादः[1] वादफलस्य तत्त्वनिर्णयस्य दुर्दुरूढवादिनिराकरणेन संरक्षणार्थं विजिगीषुकथे जल्पवितण्डे जयपराजयपर्यन्ते। तदुक्तम् - 'तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखाप्रावरणात्' इति। छलजातिनिग्रहस्थानैः परपक्षो

[1] "तदुक्तं - 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः'(गौतमसूत्रम् १.४१) इति।" इत्यधिकं मधुसूदनीये॥

दूष्यत इति जल्पवितण्डयोः समानम्। तत्र वितण्डायामेकेन स्वपक्षः स्थाप्यः, अन्येन दूष्यः। जल्पे तूभाभ्यां स्वपक्ष स्थाप्यः, उभाभ्यां च परपक्षो दूष्य इति विशेषः। तदुक्तम् - 'छलजातिनिग्रहस्थानसाधनोपालम्भो[1] जल्पः'[2] 'स प्रतिपक्षस्थापनाहीनो वितण्डा'[3] इति॥ ३२॥

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः॥ ३३॥

अक्षराणामकारः अहम्। 'अकारो वै सर्वा वाक्' इति श्रुतेः। **सामासिकस्य** समाससमूहस्य मध्ये **द्वन्द्वः** उभयपदप्रधानोऽहम्। क्षयी कालाभिमानिनी। **अक्षयः** परमेश्वराख्यः ... [4] सर्वविद्यः' इत्यादिश्रुतिप्रसिद्धोऽहम्। 'कालः कलयताम्' इत्यत्र क्षयी काल उक्तः। कर्मफलविधातृणां मध्ये **विश्वतोमुखः** सर्वतोमुखो **धाता** सर्वकर्मफलदातेश्वरः **अहम्**॥ ३३॥

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥ ३४॥

संहर्तृणां मध्ये **मृत्युः** अहम्। भाविकल्याणानां यः **उद्भवः** उत्कर्षः, सोऽहम्। **नारीणां** मध्ये कीर्त्याद्याः सप्त धर्मपत्न्योऽहम्[5]३४ ॥

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः॥ ३५॥

---

[1] यथोक्तोपपन्नश्छलजाति... इति तु सूत्रपाठः। [2] गौतमसूत्रम् १.४२ [3] गौतमसूत्रम् १.४३

[4] 'परमेश्वराख्यः कालो ज्ञः कालो सगुणी सर्वविद्यः' इत्यस्पष्टं कोशे। मधुसूदनीये तु "परमेश्वराख्यः कालस्यापि कालः ज्ञः कालकालो गुणी सर्वविद्यः" इति। [5] तत्र कीर्तिर्धार्मिकत्वनिमित्ता प्रशस्तत्वेन नानादिग्देशीयसर्वलोकज्ञानविषयतारूपा ख्यातिः। श्रीर्धर्मार्थकामसम्पत् शरीरशोभा कान्तिर्वा। वाक् सरस्वती सर्वस्यार्थस्य प्रकाशिका संस्कृता वाणी। चकारान्मूर्त्यादयोऽपि धर्मपत्न्यो गृह्यन्ते। स्मृतिश्चिरानुभूतार्थस्मरणशक्तिः। अनेकग्रन्थार्थधारणाशक्तिर्मेधा। धृतिरवघातेऽपि शरीरेन्द्रियसङ्घातोत्तम्भनशक्तिः, उच्छृङ्खलप्रवृत्तिकारणेन चापलप्राप्तौ तन्निवर्तनशक्तिर्वा। क्षमा हर्षविषादयोरविकृतचित्तता। **इति मधुसूदनसरस्वतीये** ॥

'वेदानां सामवेदोऽस्मि' इत्युक्तम्। तत्रायमन्यो विशेषः। **साम्नाम्** ऋगक्षररूढानां गीतिविशेषाणां मध्ये 'त्वामिद्धि हवामहे' इत्यस्यामृचि गीतिविशेषो **बृहत्साम**। तच्चातिरात्रे पृष्टस्तोत्रे सर्वेश्वरत्वेनेन्द्रस्तुतिरूपमन्यतः श्रेष्ठत्वादहमेव। **छन्दसां** नियताक्षरपादत्वरूपछन्दोविष्टानामृचां मध्ये त्रिपदा द्विजातीनां जन्महेतुः **गायत्र्यहम्**। द्वादशमासानां मध्येऽभिनवशालिवास्तुकशाकादिशाली शीतातपशून्यत्वेन सुखहेतुः श्रीव्रजकुमारिकाणां कात्यायन्यर्चनव्याजमत्प्रेमभजनहेतुमत्प्राप्तियशोभरप्रसिद्धः **मार्गशीर्षोऽहम्**। षण्णाम् **ऋतूनां** मध्ये **कुसुमाकरः** सर्वसुगन्धिकुसुमानामाकरोऽतिरमणीयो वसन्तोऽहम्॥ ३५॥

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्॥ ३६॥

छलयतां परवञ्चकानां सम्बन्धि **द्यूतम्** अक्षदेवनादिरूपं सर्वस्वापहारकमहम्। **तेजस्विनाम्** अत्युग्रप्रभावानां सम्बन्धि **तेजोऽहम्**। जेतॄणां पराजितापेक्षयोत्कर्षरूपो **जयः** अहम्। व्यवसायिनां व्यवसायफलोद्यमोऽहम्। **सत्त्ववतां** सात्विकानां धर्मज्ञानवैराग्यैश्वर्यरूपं सत्त्वकार्यमेवात्र **सत्त्वमहम्**॥ ३६॥

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः॥ ३७॥

साक्षादीश्वरस्यापि विभूतिमध्ये पाठस्तेन रूपेण चिन्तनार्थः। **वृष्णीनां** मध्ये **वासुदेवः** वसुदेवपुत्रोऽहम्। **पाण्डवानां धनञ्जयः** त्वमहम्। **मुनीनां** मननशीलानां मध्ये **व्यासोऽहम्**। **कवीनां** क्रान्तदर्शिनां सूक्ष्मार्थविवेकिनां मध्ये **उशना कविः** इति व्याख्यातः शुक्रोऽहम्॥ ३७॥

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्॥ ३८॥

दमयताम् अदान्तानुत्पथान्यपि प्रवर्तयतामुत्पथप्रवृत्तौ हेतुः **दण्डः** अहम्। **जिगीषतां** जेतुमिच्छताम्। **नीतिः** न्यायोऽहम्। **गुह्यानां** गोप्यानां गोपनहेतुः **मौनम्** अहम्। न हि तूष्णीं स्थितस्याशयो ज्ञायते। गोप्यानां मध्ये श्रवणमनन-निदिध्यासनपूर्वकमात्मनो निदिध्यासनरूपं **मौनं** चाहम्। **ज्ञानवतां** श्रवणमनननिदिध्यासनपरिपाकप्रभवं सर्वेश्वरस्य मम साक्षात्काररूपमविद्यानिवर्तकम् **अहम्**॥ ३८॥

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत् स्यान्मया भूतं चराचरम्॥ ३९॥

यदपि सर्वभूतानां प्ररोहकारणं **बीजं** सर्वज्ञत्वाद्यलौकिकानन्तगुणविशिष्टम् **अहम्** एव। चरमचरं च यद्भूतं जातं **तन्मया** सर्वेश्वरेण **विना नास्ति**। किन्तु, मया सर्वेश्वरेणाचिन्त्यशक्तिना सर्वान्तर्बहिश्च व्याप्तमिति भावः[1] ३९॥

प्रकरणार्थमुपसंहरन् विभूतिं सङ्क्षेपेणाह -

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥ ४०॥

मम दिव्यानां विभूतीनामन्तः इयत्ता **नास्ति**। यतः सर्वज्ञेनापि न शक्यते ज्ञातुं वक्तुं वा। सन्मात्रविषयत्वात् सर्वज्ञतायाः। **एष तु** त्वां प्रति **उद्देशतः** एकदेशेन **प्रोक्तो विभूतेर्विस्तरः** विस्तारः **मया**॥ ४०॥

अनुक्ता अपि भगवतो विभूतीः सङ्गृहीतुमुपलक्षणमिदमुच्यते -

यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोऽंशसम्भवम्॥ ४१॥

---

[1] यदपि च सर्वभूतानां प्ररोहकारणं बीजं तन्मायोपाधिकं चैतन्यमहमेव। हे अर्जुन मया विना यत् स्यात् भवेत् चरमचरं वा भूतं वस्तु तन्नास्त्येव। यतः सर्वं मत्कार्यमेवेत्यर्थः।**इति मधुसूदनसरस्वतीये** ॥

यद्यत् सत्वं प्राणि **विभूतिमत्** ऐश्वर्ययुक्तं तथा **श्रीमत्** श्रीर्लक्ष्मीः सम्पत् शोभा कीर्तिर्वा, तया युक्तम्। तथा **ऊर्जितम्** बलातिशयेन युक्तम्। **तत्तदेव मम** तेजसः शक्तेरंशेन सम्भूतं **त्वमवगच्छ** जानीहि॥ ४१॥

एवमवयवशो विभूतीरुक्त्वाऽधिकं विभूतेर्विस्तारमाह -

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥ ४२॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः॥ १०॥

अथवा इति पक्षान्तरे। **बहुनैतेन** सावशेषेण **ज्ञातेन किं तव** स्यात्। **इदं कृत्स्नं जगदेकांशेन** ममानन्ताशेषसामर्थ्यविशेषेष्वेकेनेदं सर्वं जगत् **विष्टभ्य** व्याप्य, **अहं स्थितः** परिच्छिन्नज्ञानादपरिच्छिन्नज्ञानं प्रधानमिति ज्ञापयितुं **किम्** इत्याक्षेपः। न तु तस्य निष्फलत्वज्ञापनाय। तदुक्तवैय्यर्थ्यापत्तेः।[1] त्वं तूत्तमाधिकारी व्यापकमनन्तगुणालयं मां ज्ञातुं योग्य इति ज्ञापयितुं **तव** इति **किम्** इति चोक्तम्। 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि'[2] इति श्रुतेः।[3] तस्मात् त्वमुत्तमाधिकारी सर्वभूतेषु मां द्रष्टुमर्हसीत्यभिप्रायः॥ ४२॥

॥ इति श्रीवैष्णवागमपारङ्गमवनमालिब्रह्मचारिविरचितटीकायां दशमः॥

---

[1] किमिति वक्ष्यमाणप्राधान्यज्ञापनार्थम्। नतूक्तनिष्फलत्वज्ञापनाय। तथा सति नोच्येत।**इति मध्वभाष्यम्** [2] **इति ऋक्संहिता** १०.९०.३ [3] इदं कृत्स्नं सर्वं जगदेकांशेन एकदेशमात्रेण विष्टभ्य विधृत्य व्याप्य वाहमेव स्थितो न मद्व्यतिरिक्तं किञ्चिदस्ति। 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इति श्रुतेः। तस्मात् किमनेन परिच्छिन्नदर्शनेन सर्वत्र मद्दृष्टिमेव कुर्वित्यभिप्रायः।**इति मधुसूदनसरस्वतीये**

अध्यायः 11

विश्वरूपयोगः

॥ श्रीकृष्णो विजयते॥

यदवदद्धरी रूपमैश्वरं भक्तवत्सलः।
कृपया दर्शयामासेह पार्थायेति वर्ण्यते॥

पूर्वाध्याये नानाविभूतीरुक्त्वा 'विष्टभ्याहमिदं कृत्स्नम्'[1] इत्यादिना सर्वव्यापकमैश्वररूपमुक्तं श्रुत्वा परमोत्कण्ठितस्तत्साक्षात्कर्तुकामोऽर्जुनः पृच्छति -

अर्जुन उवाच
मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥ १॥

पूर्वषट्के मामनुगृहीतुमात्मज्ञानं तदुपायकर्मसमाधियोगप्रतिपादकं **परमं** गोप्यम् आत्मपरमात्मविषयत्वात् **अध्यात्मसञ्ज्ञितम् यद्वचस्त्वयोक्तं** तेन बान्धवादिविषयः **मोहः** विनष्टः॥ १॥

[1] **भगवद्गीता** १०.४२

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्॥ २॥

भूतानां भवाप्ययौ उत्पत्तिप्रलयौ **त्वत्तः** एव भवन्तौ **त्वत्तः** एव **विस्तरशो मया श्रुतौ** न तु सङ्क्षेपेण। असकृदित्यर्थः। कमलस्य पत्रे इव दीर्घे रक्तान्ते परमे अक्षिणी यस्य स त्वं हे **कमलपत्राक्ष** सौन्दर्यातिशयेनोल्लेखोऽयं प्रेमातिशयात्। न केवलं भवाप्ययौ त्वत्तः श्रुतौ, **माहात्म्यं** निरतिशयैश्वर्यं सृष्ट्यादिकर्तृत्वेऽप्यविकारित्वं शुभाशुभकर्मकारयितृत्वेऽप्यवैषम्यं बन्धमोक्षादिविचित्रफलदातृत्वेऽप्यौदासीन्यम्, अन्यत् **अपि** महत्त्वाणुत्त्वादिप्रयुक्तकार्यकर्तृत्वादिकम्[1] **अव्ययं** सदैकाकारं त्वत्तः श्रुतम्॥ २॥

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम॥ ३॥

हे **परमेश्वर यथा** येन प्रकारेणाघटनाघटनपटीयो निरतिशयानन्तैश्वर्येण **आत्मानं त्वमात्थ** कथयसि। **एवमेतत्** नान्यथा। त्वद्वचसि कुत्रापि ममाविश्वासशङ्का नास्त्येव। यद्यपि शब्दात् त्वद्रूपं ज्ञातं, तथाऽपि चक्षुषा **द्रष्टुमिच्छामि**। **ते** तव **रूपमैश्वरं** ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सम्पन्नमद्भुतम्। हे **पुरुषोत्तम**। सम्बोधनेन सर्वान्तर्यामिन् त्वद्वचस्यविश्वासो नास्ति मम दिदृक्षा चास्ति महतीति सर्वज्ञत्वात् त्वं जानासीति सूचयति॥ ३॥

द्रष्टुमयोग्ये कुतस्ते दिदृक्षा? इत्याशङ्क्याह - **मन्यस इति**॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्॥ ४॥

प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनेष्विति प्रभुः। हे **प्रभो** सर्वस्वामिन् **तत्** तवैश्वरं रूपं **मया द्रष्टुं शक्यमिति मन्यसे** जानासि, इच्छसि वा। हे **योगेश्वर** सर्वेषाम् अणिमादिसिद्धिशालिनां योगानां योगिनाम् ईश्वर। **ततः** तदिच्छावशादेव

[1] **भगवद्गीता** अन्यदपि सर्वात्मत्वादि सोपाधिकं निरुपाधिकमपि च।**इति मधुसूदनसरस्वतीये**

मे मह्यमत्यर्थिने त्वं परमकारुणिको **दर्शय** चाक्षुषज्ञानविषयीकारय। **आत्मानम्** ऐश्वररूपविशिष्टम् **अव्ययम्** अक्षरं सदैकाकारम्॥ ४॥

स्वभक्तेनैवं प्रार्थितस्तत्राह - **पश्येति॥**

श्रीभगवानुवाच
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥ ५॥

अत्र क्रमेण श्लोकचतुष्टयेऽपि 'पश्य' इत्याद्यावृत्त्या 'अद्भुतरूपाणि दर्शयिष्यामि त्वं सावधानो भव' इत्यर्जुनमभिमुखीकरोति भगवान्। **शतशोऽथ सहस्रश इति॥** अमितानि। तानि च **नानाविधानि** अनेकप्रकाराणि **दिव्यानि** अद्भुतानि नाना विलक्षणा वर्णा नीलपीतादिप्रकारा तथा कृतयश्चावयवसंस्थानविशेषा येषां तानि **नानावर्णाकृतीनि च** मम **रूपाणि पश्य**। अर्हे लोट्। द्रष्टुमर्हो भवेत्यर्थः। यथा षोडशसहस्रादीनां विवाहे स्वस्य वसुदेवादेश्चैकस्मिन्नेव काले तावद्रूपत्वम्, अन्येषां तावद्रूपाज्ञानमघटनाघटनपटीयस्याचिन्त्यशक्त्योपपन्नम्, तथैकस्य वास्तवानेकरूपत्वमुपपद्यत इति भावः॥ ५॥

दिव्यानि रूपाणि पश्येत्युक्त्वा तान्येवानुक्रामति - **पश्येति॥**

पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत॥ ६॥

पश्यादित्यान् द्वादश, **वसून्** अष्टौ, **रुद्रान्** एकादश, **अश्विनौ** द्वौ, **मरुतः** एकोनपञ्चाशत्, **तथा** अन्यानपि देवानित्यर्थः। **बहूनि** अन्यानि **अदृष्टपूर्वाणि** पूर्वमदृष्टानि मनुष्यलोकेऽन्यत्र वा त्वयाऽन्येन वा कदाचिन्न दृष्टानीत्यर्थः। **पश्याश्चर्याणि** अद्भुतानि आश्चर्यमयानि रूपाणि तत्र स्थितानिन्द्रादिलोकपालांश्च पश्येति भावः॥ ६॥

इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि॥ ७॥

इह अस्मिन् **मम देहे एकस्थम्** एकस्मिन्नेव यत्र कुत्रचिदवयवे स्थितं **कृत्स्नं** समस्तं **जगत् सचराचरं** जङ्गमस्थावरसहितं तत्र तत्र परिभ्रमता वर्षकोटिसहस्रैरपि द्रष्टुमशक्यम् **अद्य** अधुनैव **पश्य**। हे **गुडाकेश** आलस्यशून्य। **यच्चान्यत्** जयपराजयादिकं **द्रष्टुमिच्छसि** तदपि सन्देहोच्छेदाय पश्य॥ ७॥

इन्द्रियप्रवर्तकस्य मनसाऽप्यगम्यस्य ममापरोक्ष्यं मत्कृपां विना न भवति। मत्कृपया चानायासेन भवतीत्याह - **नत्विति**॥

न तु मां शक्यसे[1] द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥ ८॥

अनेनैव प्राकृतेन मत्प्रसादशून्येन च **चक्षुषा मां** दिव्यालौकिकानन्तैश्वर्यविशिष्टं **द्रष्टुं न शक्यसे** न शक्नोषि। अतो **दिव्यम्** अप्राकृतं मम दिव्यरूपदर्शनक्षमं **ददामि ते** तुभ्यं **चक्षुः**। तेन चक्षुषा **पश्य मे योगम्** अघटनाघटनसामर्थ्यम् **ऐश्वरम्** ईश्वरस्य ममासाधारणम्।

यद्यपि यावद्धर्मविशिष्टं भगवद्रूपं स्वस्वोपास्यं यज्ज्ञानाच्च मोक्षः, तावद्धर्मविशिष्टं रूपमर्जुनः सर्वदा साक्षात्करोति। तथाऽप्यमितगुणालयस्य हरेस्ततोऽधिकमैश्वर्यमर्जुनेन भगवन्मुखाच्छ्रुतम्। तदेवापरोक्षतो ज्ञातुं पृष्टम्। तच्चानेन चक्षुषा द्रष्टुमशक्यम्। तादृगैश्वर्यदर्शनयोग्यभगवत्प्रसादस्याभावात्। यथायथा हि भगवत्प्रसादाधिक्यं तथातथा तादृगधिकैश्वर्यस्य ज्ञानम्।

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यः'[2] इति श्रुतेरिति भावः॥ ८॥

भगवानर्जुनाय दिव्यं रूपं दर्शितवान्। स च तद्दृष्ट्वा विस्मयाविष्टो भगवन्तं विज्ञापितवानितीमं वृत्तान्तम् 'एवमुक्त्वा' इत्यादिभिः षड्भिः श्लोकैर्धृतराष्ट्रं प्रत्याह सञ्जयः।

---

[1] शक्ष्यसे - पा. [2] **कठोपनिषत्** २.२३

सञ्जय उवाच
एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्॥ ९॥

एवं 'न तु मां शक्यसे द्रष्टुम्' इत्याद्युक्त्वा दिव्यचक्षुःप्रदानानन्तरं हे **राजन्** महान् जगदुदयादिकर्तृत्वेन सर्वान्तर्यामित्वेन सर्वोत्कृष्टश्चासौ योगेश्वरश्चेति **महायोगेश्वरः**। योगानामघटनाघटनापटीयोऽनन्तशक्तीनामीश्वरो भक्तानां सर्वक्लेशापहारी। दर्शनायोग्यमपि कृपया **दर्शयामास पार्थाय** एकान्तभक्ताय **परमं** दिव्यं **रूपमैश्वरम्** ॥ ९॥

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्॥ १०॥

अनेकवक्त्राणि नयनानि च यस्मिन् रूपे। अनेकानामद्भुतानां विस्मयहेतूनां दर्शनं यस्मिन्। अनेकानि दिव्यान्याभरणानि भूषणानि यस्मिन्। दिव्यान्यनेकान्युद्यतान्यायुधान्यस्त्राणि यस्मिन्। तत् तथा रूपम्॥ १०॥

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्॥ ११॥

दिव्यानि माल्यानि पुष्पमयानि रत्नमयानि च। तथा दिव्यान्यम्बरानि वस्त्राणि च ध्रियन्ते येन तत् **दिव्यमाल्याम्बरधरम्**। दिव्यो गन्धोऽस्येति दिव्यगन्धः। तदनुलेपनं यस्य तत्। **सर्वाश्चर्यमयम्** अनेकाद्भुतप्रचुरं **देवं** द्योतनात्मकम् **अनन्तं** देशकालाद्यपरिच्छिन्नम्। विश्वतः सर्वतो मुखानि यस्मिन्। तद्रूपम् दर्शयामासेति पूर्वेण सम्बन्धः। 'ददर्श' इत्यध्याहारो वा॥ ११॥

'देवम्' इत्युक्तं विवृणोति -

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः॥ १२॥

दिवि अन्तरिक्षे **सूर्याणां सहस्रस्या**परिमितसूर्यसमूहस्य युगपदुदितस्य **युगपदुत्थिता भाः यदि** भवेत्, तदा **सा तस्य महात्मनः** विश्वरूपस्य **भासः** दीप्तेः **सदृशी** तुल्या यदि स्याद्यदि वा न स्यात्। ततोऽपि नूनं विश्वरूपस्यैव भा अतिरिच्यत इत्यहं मन्ये। अन्या तूपमा नास्त्येवेत्यर्थः॥ १२॥

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥ १३॥

एकस्थम् एकत्र स्थितं **जगत् कृत्स्नं प्रविभक्तं** सावकाशम् **अनेकधा** देवमानुषादिप्रकारैः **अपश्यद्देवदेवस्य** भगवतः **तत्र** विश्वरूपे **शरीरे पाण्डवस्तदा** विश्वरूपाश्चर्यदर्शनावस्थायाम्॥ १३॥

एवमद्भुतदर्शनेऽप्यर्जुनो न बिभयाञ्चकार, नापि नेत्रे संववार, नापि सम्भ्रमात् कर्तव्यं विसस्मार, नापि तस्माद्देशादपससार। किन्तु भगवद्दत्तधैर्यातिधीरत्वात् तत्कालोचितमेव व्यवजहार महति चित्तक्षोभेऽपीत्याह - **तत इति**॥

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत॥ १४॥

ततः तद्दर्शनानन्तरं **विस्मये**नाद्भुतदर्शनप्रभवेनालौकिकचित्तचमत्कारविशेषेणा**विष्टो** व्याप्तः। अत एव **हृष्टरोमाः** पुलकितः सन् अप्रख्यातमहादेवादिसङ्गामादिप्रभावो **धनञ्जयो देवं** तमेवाद्भुतानन्तैश्वर्यविशिष्टं नारायणं **शिरसा** भूलग्नेन **प्रणम्य** भक्तिश्रद्धातिशयेन नत्वा **कृताञ्जलिरभाषत** ॥ १४॥

यद्भगवता दर्शितमनन्तैश्वर्यं तद्भगवद्दत्तेनैव दिव्येन चक्षुषा सर्वजनादृश्यमपि पश्यामि। अहो मम भाग्यप्रकर्ष इति स्वानुभवमाविष्कुर्वन्नर्जुन आह - **पश्यामीति**॥

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्।
ब्रह्माणमीशं कमलासनस्थं ऋषींश्च सर्वानुरगांश्च दिव्यान्॥ १५॥

पश्यामि चक्षुषा विषयीकरोमि। हे **देव तव देहे देवान्** इन्द्रादीन् **सर्वान्, तथा भूतविशेषसङ्घान्** स्थावरजङ्गमानां जरायुजस्वेदजोद्भिदण्डजानां सङ्घान् समूहान्। तथा **ब्रह्माणं** चतुर्मुखम् **ईशम्** रुद्रम्। कीदृशम्? **कमलासनस्थं** कमलमासनं यस्य स कमलासनः, चतुर्मुखः। तदङ्कस्थमित्यर्थः।[1] **ऋषींश्च सर्वान्** वसिष्ठादीन् ब्रह्मपुत्रान् **उरगांश्च दिव्यान्** वासुकिप्रभृतीन्। 'पश्यामि' इति सर्वत्रान्वयः॥ १५॥

यत्र भगवद्देहे सर्वमिदं दृष्टवान् तमेव विशिनष्टि - **अनेकेति॥**

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम्।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप॥ १६॥

बहव उदराणि वक्त्राणि नेत्राणि वाऽनेकानि यस्य तम् **अनेकबाहूदरवक्त्रनेत्रम्। पश्यामि त्वां सर्वतः** सर्वत्रानन्तानि रूपाण्यस्येति तम्। **तव** तु **पुनः नान्तम्** अवसानम् **न मध्यं नाप्यादिं पश्यामि।** सर्वगतत्वात्। **विश्वेश्वर** हे **विश्वरूप।** सम्बोधनद्वयमतिसम्भ्रमात्। रथस्थस्य परिच्छिन्नत्वेन दृश्यमानस्याचिन्त्यशक्तेर्व्यापकत्वं स्पष्टमुक्तमिति भावः॥ १६॥

तमेवाचिन्त्यशक्तिमन्तं भगवन्तं प्रकारान्तरेण विशिनष्टि - **किरीटिनमिति॥**

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।
पश्यामि त्वां दुर्निरीक्षं[2] समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम्॥ १७॥

किरीटगदाचक्रधारिणं च। **सर्वतो दीप्तिमन्तम्** तेजोराशिं च। अत एव **दुर्निरीक्षं** भगवत्प्रसादसहकृतेन दिव्येन चक्षुषा विना निरीक्षितुमशक्यम्। सयकारपाठे[3] दुःशब्दोऽपह्नववचनः। अनिरीक्ष्यमिति यावत्। दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिर्यस्य तम्। **अप्रमेयमिति॥** परिच्छेत्तुमशक्यम्, इयत्ताशून्यत्वात्।

[1] कमलासने ब्रह्मणि स्थितं रुद्रम्। 'विष्णुं समाश्रितो ब्रह्मा ब्रह्मणोऽङ्कगतो हरः। हरस्याङ्गविशेषेषु देवाः सर्वेऽपि संस्थिथाः॥' इति पाद्मे। **इति गीतातात्पर्ये** [2] दुर्निरीक्ष्यं - पा.
[3] दुर्निरीक्ष्यमिति पाठ इत्यर्थः।

समन्तात् सर्वतः **पश्यामि**। दिव्येन चक्षुषा भगवत्प्रसादसद्भावासद्भावाभ्यां सुनिरीक्षत्वदुर्निरीक्षत्वं चैकस्यैव न विरुद्धमिति भावः॥ १७॥

सकलश्रुतिसर्वस्वं त्वमेवेत्याह - **त्वमिति**॥

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे॥ १८॥

त्वमेवाक्षरं न क्षरति स्वरूपतो धर्मतो देहतश्च नाशादिविकाररहितं **परमं वेदितव्यं** मुमुक्षुभिर्वेदान्तश्रवणादिना। **त्वमेवास्य विश्वस्य परम्** उत्कृष्टं निधीयतेऽस्मिन्निति **निधानम्** आश्रयः। **त्वमव्ययः** सदैकाकारः। शाश्वतस्य नित्यवेदप्रतिपाद्यतया स्वधर्मस्य गोप्ता पालयिता। अत एव **सनातनः** चिरन्तनः **पुरुषः** अन्तर्यामी पूर्णानन्तगुणो यः परमात्मा स एव **त्वं** वसुदेवतनयः। एवम्भूतो **मे** मया **मतो** विदितोऽसि॥ १८॥

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्।
पश्यामि त्वा दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्॥ १९॥

आदिः = उत्पत्तिः, मध्यं = स्थितिः, अन्तः= नाशः, तद्रहितं **अनादिमध्यान्तम्।** अनन्तं वीर्यं शक्तिः प्रभावो बलमोजो दाक्ष्यं प्रागल्भ्यं प्राचुर्यम् ऐश्वर्यं च यस्य तम्। अनन्ता बाहवो यस्य तम्। उपलक्षणमेतत् मुखादीनाम्। शशिसूर्याः नेत्रेषु यस्य तम्[1] यद्वा, शशिवच्च सूर्यवच्च प्रसादप्रतापयुक्तानि नेत्राणि यस्य तम्। देवादीन् भक्तान् नमस्कारादिकं कुर्वतः प्रसादम्, तद्विपरीतान् राक्षसादीन् प्रति प्रतापं 'रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः'[2] इति वक्ष्यति। दीप्तो हुताशोऽग्निर्वक्त्रे यस्य, दीप्तहुताशवद्वा वक्त्रं यस्य तम्। **स्वतेजसा विश्वमिदं तपन्तं** सन्तापयन्तं **त्वा** त्वां **पश्यामि** ॥ १९॥

रथस्थस्यापि भगवद्विग्रहस्य व्याप्तिमाह - **द्यावेति**॥

[1] शशिसूर्यौ नेत्रे यस्य तम्।**इति मधुसूदनसरस्वतीये** । [2] **भगवद्गीता** ११.३६

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्॥ २०॥

द्यावापृथिव्योरिदमन्तरम् अन्तरिक्षं हि एव **त्वयैकेन व्याप्तं दिशाश्च सर्वाः** व्याप्ताः। **दृष्ट्वाऽद्भुतम्** अत्यन्तविस्मयकरम् **इदमुग्रं** दुरधिगमं महातेजस्वित्वात् **तव रूपम्** उपलभ्य **लोकत्रयं प्रव्यथितम्** अत्यन्तभीतं जातम्। हे **महात्मन्।** साधूनामभयप्रदायक।

अणुत्वमहत्वाद्यनन्तपरिमाणानां समावेश एकत्र लोके विरुद्धोऽपि भगवत्यचिन्त्यशक्त्या न विरुद्धः। 'विचित्रशक्तिः पुरुषः पुराणः' इति श्रुत्या 'आत्मनि चैवं विचित्राश्च हि'[1] इति सूत्रेण च भगवत्यचिन्त्यशक्तेरुक्तत्वात्। न चाज्ञत्वसंसारित्वादिकप्यचिन्त्यशक्त्या समावेश्यतामिति वाच्यम्। अविरोधोपपादकैश्वर्याद्यविरोधिनामेव समावेशाङ्गीकारात्। अज्ञत्वादीनामैश्वर्यविरोधित्वात्॥ २०॥

अधुना भूभारावतारणमात्मनः प्रकटयन्तं भगवन्तं पश्यन्नाह - **अमी हीति॥**

अमी हि त्वा(ऽ)सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥ २१॥

अमी हि सुरसङ्घाः वस्वादिदेवगणा भूभारावतारार्थं मनुष्यरूपेणावतीर्णा युध्यमाना सन्तः **त्वा** त्वां **विशन्ति** प्रविशन्तो दृश्यन्ते। एवम् **असुरसङ्घाः** इति पदच्छेदेन भूभारभूता दुर्योधनादयस्त्वां विशन्तीत्यपि बोध्यम्। एवमुभयोरपि सेनयोः **केचिद्भीताः** पलायनेऽप्यशक्ताः सन्तः **प्राञ्जलयो गृणन्ति** स्तुवन्ति त्वाम्। एवं प्रत्युपस्थिते युद्धे उत्पातादिनिमित्तान्युपलक्ष्य 'स्वस्त्यस्तु सर्वस्य जगतः' इत्युक्त्वा **महर्षिसिद्धसङ्घाः** नारदाद्या युद्धदर्शनार्थमागता विश्वविनाशपरिहाराय **स्तुवन्ति त्वां स्तुतिभिः** गुणोत्कर्षप्रतिपादकवाग्भिः **पुष्कलाभिः** परिपूर्णाभिः॥ २१॥

[1] **ब्रह्मसूत्रम्** २.१.२८

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वा विस्मिताश्चैव सर्वे॥ २२॥

रुद्राश्चादित्याश्च **वसवो ये च साध्याः** नाम देवगणाः। **विश्वे** तुल्यविभक्तिकविश्वदेवशब्दाभ्यामुच्यमाना देवगणाः। **अश्विनौ** द्वौ। **मरुतः** एकोनपञ्चाशद्देवगणाः। **उष्मपाश्च** पितरः। गन्धर्वाणां यक्षाणामसुराणां सिद्धानां सङ्घाः **वीक्ष्यन्ते** पश्यन्ति **त्वा** त्वाम्। तादृशाद्भुतदर्शनात् ते **सर्वे एव विस्मिताश्च** विस्मयमलौकिकचमत्कारविशेषमापद्यन्ते च॥ २२॥

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम्॥ २३॥

हे **महाबाहो ते** तव **रूपं दृष्ट्वा लोकाः** सर्वे प्राणिनः **प्रव्यथिताः, तथाऽहं** प्रव्यथितो भयेन। कीदृशं रूपम्? **महत्** अतिप्रमाणम्। बहूनि वक्त्राणि नेत्राणि च यस्मिन् तत्। बहवो बाहव उरवः पादाश्च यस्मिन् तत्। बहून्युदराणि यस्मिन् तत्। बहुदंष्ट्राभिः करालम् = अतिभयानकम्। दृष्ट्वैव मत्सहिताः सर्वे लोका भयपीडिता इत्यर्थः॥ २३॥

भयानकत्वं विवृणोति - **नभ इति॥**

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वा प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो॥ २४॥

न केवलं प्रव्यथित एवाहं त्वां दृष्ट्वा, किन्तु प्रथितोऽन्तरात्मा मनो यस्य सोऽहं। **धृतिं** धैर्यं देहेन्द्रियादिधारणसामर्थ्यं **शमं च** मनःप्रसादं **न विन्दामि** न लभे। हे **विष्णो** त्वां कीदृशम्? **नभःस्पृशम्** अन्तरिक्षव्यापिनः **दीप्तम्** प्रज्वलितम् **अनेकवर्णं** भयङ्करनानासंस्थानयुक्तं **व्याप्ताननं** विवृतमुखं **दीप्तविशालनेत्रं** प्रज्वलितविस्तीर्णचक्षुषम्। त्वां **दृष्ट्वा हि** एव प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामीत्यन्वयः॥ २४॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास॥ २५॥

दंष्ट्राभिः करालानि = विकृतत्वेन भयङ्कराणि प्रलयकालानलसदृशानि **च ते मुखानि दृष्ट्वैव** नतु तानि प्राप्य। भयवशेन **दिशः** पूर्वापरादिविवेकेन **न जाने**। अतः **न लभे च शर्म** सुखं त्वद्रूपदर्शनेऽपि। अतो हे **देवेश** हे **जगन्निवास प्रसीद** प्रसन्नो भव मां प्रति 'यथा भयाभावेन त्वद्दर्शनजं सुखं प्राप्नुयाम्' इति शेषः॥ २५॥

'पाण्डवानां जयम्, अन्येषां पराजयं सर्वदा द्रष्टुमिष्टं पश्य मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि' इति भगवदादिष्टमधुना पश्यामीत्याह - **अमी चेति पञ्चभिः॥**

अमी च त्वा धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः॥ २६॥

अमी च धृतराष्ट्रस्य पुत्राः दुर्योधनादयः शतं युयुत्सुं विना **सर्वे** त्वां 'त्वरमाणा विशन्ति' इत्यग्रिमेणान्वयः। अतिशयसूचकत्वेन क्रियापदशून्यत्वं गुण एव। **सहैव** अवनिपालादीनां = शल्यादीनां सङ्घैः त्वां विशन्ति। न केवलं दुर्योधनादय एव विशन्ति, किन्तु जेयत्वेन सर्वसम्भावितः **भीष्मः द्रोणः सूतपत्रः** कर्णः **तथाऽसौ सहास्मदीयैः** परकीयैरिवास्मदीयैः धृतराष्ट्रादिभिः **योधमुख्यैः** सह त्वां विशन्तीति सम्बन्धः॥ २६॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।
केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः॥ २७॥

अमी च त्वा धृतराष्ट्रस्य पुत्राद्याः सर्वे **ते** तव **दंष्ट्राकरालानि** भयानकानि वक्त्राणि **त्वरमाणा विशन्ति**। तत्र **केचित् चूर्णितैरुत्तमाङ्गैः** शिरोभिः विशिष्टाः **दशनान्तरेषु विलग्नाः** विशेषेण संलग्नाः दृश्यन्ते मया सम्यक् = असन्देहेन॥ २७॥

राज्ञां भगवन्मुखप्रवेशने निदर्शनमाह - **यथेति॥**

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति॥ २८॥

यथा नदीनाम् अनेकमार्गप्रवृत्तानां **बहवः** अम्बुनां = जलानाम्, वेगाः = वेगवन्तः प्रवाहाः समुद्राभिमुखाः सन्तः **समुद्रमेव द्रवन्ति** विशन्ति **तथा तवामी नरलोकवीराः विशन्ति** तव **वक्त्राणि** अभितः = सर्वतः विज्वलन्ति॥ २८॥

अबुद्धिपूर्वकप्रवेशे नदीवेगं दृष्टान्तमुक्त्वा, बुद्धिपूर्वकप्रवेशे दृष्टान्तमाह - **यथेति॥**

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोकाः तवापि वक्त्राणि समृद्धवेगाः॥ २९॥

यथा पतङ्गाः शलभाः **समृद्धवेगाः** सन्तः बुद्धिपूर्वकं **प्रदीप्तं ज्वलनं विशन्ति नाशाय** मरणायैव, **तथैव** एते **लोकाः** दुर्योधनादयः नाशाय **विशन्ति।** सर्वे **अपि** नाशाय **तव वक्त्राणि समृद्धवेगाः** बुद्धिपूर्वकप्रवाहेण विशन्ति॥ २९॥

भगवतस्तद्ग्रासां च प्रवृत्तिप्रकारमाह - **लेलिह्यस इति॥**

लेलिह्यसे ग्रसमानः समन्तात्
लोकान् समग्रान् वदनैर्ज्वलद्भिः।
तेजोभिरापूर्य जगत् समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो॥ ३०॥

एवं वेगेन प्रविशतो **लोकान्** दुर्योधनादीन् **समग्रान्** सर्वान् **ग्रसमानः** अन्तःप्रवेशयन् **ज्वलद्भिर्वदनैः समन्तात्** सर्वतः त्वं **लेलिह्यसे** आस्वादयसि। तेजोभिः भाभिः **आपूर्य जगत् समग्रं** यस्मात् त्वं भाभिर्जगदापूरयसि तस्मात् **तवोग्राः** तीव्राः **भासः** दीप्तयः प्रज्वलतो ज्वलनस्येव **प्रतपन्ति** सन्तापं जनयन्ति। हे **विष्णो** सर्वव्यापक॥ ३०॥

अतिभीतः सम्भ्रमादाह - **आख्याहीति॥**

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम्॥ ३१॥

एवम् **उग्ररूपः** अतिक्रूराकारः **कः भवान्** ? वासुदेवं सर्वेश्वरं जगदुदयादिकर्तारं चतुर्भुजं सर्वदा जानाम्ययमैश्वर्यविशेषस्त्वयाऽऽविष्कृतो मया न कदाचिदपि दृष्टः, तम् **आख्याहि** कथय **मे** मह्यमत्यन्तानुग्रहाय। अत एव **नमोऽस्तु ते** तुभ्यं सर्वगुरवे हे **देवदेव प्रसीद। विज्ञातुं** विशेषेण ज्ञातुम् **इच्छामि भवन्तमाद्यं** सर्वकारणं **हि** यतः **तव प्रवृत्तिम्** अभिप्रायं **न जानामि**। मयाऽद्भुतैश्वर्यं द्रष्टुं प्रार्थितम्, भवता तु सर्वलोकसंहारकमिति तीव्राननं धर्मविशिष्टं प्रकटितम्। प्रलयकालस्येदानीमभावात् किमर्थं प्रकटितम् ? इति भावः॥ ३१॥

श्रीभगवानुवाच
कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वा न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥ ३२॥

कलयतीति **कालः**। जगत्कलयनस्य संस्थानस्योत्पत्तिलयादेश्च कर्ता प्रकर्षेण वृद्धः = परिपूर्णः, अनादिनित्यो वा। लोकानां क्षयकृत् सदा क्षयकर्ताऽपीदानीं युगपद्बहून् दुर्योधनादीन् प्रत्यक्षेण **संहर्तुमिह प्रवृत्तः**।

उग्ररूपं किमर्थम् ? इति प्रश्नपरिहारायोक्तम् - **लोकक्षयकृदिति**॥ उक्तमुपपादयति - **ऋतेऽपीति**॥ अपिपदात् ते भ्रात्रादीनपि विनेत्यर्थः[1] अष्टादशाक्षोहिणीरूपेषु **प्रत्यनीकेषु** प्रतिपक्षभूतेष्वनीकेषु सैन्येषु **येऽवस्थिताः** ते **सर्वे** अपि **न भविष्यन्ति** न स्थास्यन्ति, किन्तु मरिष्यन्तीत्यर्थः॥ ३२॥

भीष्मद्रोणादयो ये योद्धुमनर्हत्वेन त्वयोक्ताः, ते मयैव निहताः। तत्र विषादं मा कार्षीरित्याह - **तस्मादिति**॥

तस्मात् त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥ ३३॥

[1] भ्रात्रादींश्चार्त इत्यपिशब्दः।**इति मध्वभाष्यम्** ।

यस्मात् त्वद्व्यापारं विनाऽप्येते विनक्ष्यन्त्येव **तस्मात् त्वमुत्तिष्ठ** उद्युक्तो भव युद्धाय 'देवैरपि दुर्जया भीष्मद्रोणादयोऽतिरथा झटित्येवार्जुनेन निर्जिताः' इत्येवम्भूतं **यशो लभस्व**। महद्भिः पुण्यैरेव हि यशो लभ्यते। अयत्नतश्च[1] **जित्वा शत्रून्** दुर्योधनादीन् **भुङ्क्ष्व समृद्धं** निष्कण्टकं **राज्यम्। एते** च शत्रवो **मयैव** कालात्मना **निहताः** संहता हतायुषः त्वदीययुद्धात् **पूर्वमेव** केवलं तव यशोलाभाय रथात् प्रागेव न पातिताः, अतस्त्वं निमित्तमात्रः 'अर्जुनेनैते निर्जिताः' इति सार्वलौकिकव्यपदेशास्पदं **भव** हे **सव्यसाचिन्** सव्येन वामेन हस्तेनापि शरान् सचितुं सन्धातुं शीलं यस्य तादृशस्य तव भीष्मद्रोणादिजयो नासम्भावितः। तस्मात् त्वद्व्यापारानन्तरं मया रथात् पात्यमानेष्वेतेषु तवैव च कर्तृत्वं लोकाः कल्पयिष्यन्तीत्यभिप्रायः॥ ३३॥

ननु द्रोणो धनुर्वेदाचार्यो विद्यासम्पन्नः। तथा भीष्मः स्वच्छन्दमृत्युर्दिव्यास्त्रसम्पन्नः परशुरामेण द्वन्द्वयुद्धमुपगम्यापि न पराजितः। तथा यस्य पिता वृद्धक्षत्रस्तपश्चरति मम पुत्रस्य शिरो यो भूमौ पातयिष्यतीति तस्यापि शिरस्तत्काले भूमौ पातयिष्यतीति स जयद्रथोऽपि जेतुमशक्यः स्वयमपि महादेवाराधनपरो दिव्यास्त्रसम्पन्नश्च। कर्णोऽपि सूर्यसमस्तदाराधनेन दिव्यास्त्रसम्पन्नश्च शक्रदत्तानेकवीरघातिन्या[2] शक्त्या युक्तश्च। तथाऽन्ये भगदत्तादयोऽतिदुर्जया एव। तेषु सत्सु कथं जित्वा शत्रून् राज्यं भोक्ष्ये? कथं वा यशो लब्धव्यम्? इति शङ्कामपाकरोति - **द्रोणमिति॥**

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्॥ ३४॥

द्रोणादींस्त्वदाशङ्काविषयभूतान् सर्वानेव **योधवीरान्** कालशक्तिना **मया हतान्** एव **त्वं जहि**। हतानां हनने को वा परिश्रमः? अतो **मा व्यथिष्ठाः** 'कथमेव शक्ष्यामि' इति व्यथां भयनिमित्तां पीडां मा गाः। भयं त्यक्त्वा **युध्यस्व। जेतासि** जेष्यस्यचिरेणैव **रणे** सङ्ग्रामे **सपत्नान्** सर्वानपि शत्रून्। अत्र **द्रोणं च भीष्मं च**

[1] अथ ततश्च इति मधुसूदनीये मुद्रितपाठः प्रामादिक इति भाति। [2] शक्रदत्तकवीरघान्या इति कोशे। 'वासवदत्तया चैकपुरुषघातिन्याऽमोघीकर्तुमशक्यया' इति तु मधुसूदनीये।

जयद्रथं च इति चकारत्रयेण पूर्वोक्ताजेयत्वजेयत्वशङ्काऽनूद्यते[1] तथाशब्देन कर्णमपि। **अन्यानपि योधवीरान्** इत्यत्रापिशब्देन तस्मात् कुतोऽपि स्वस्य पराजयं वधनिमित्तं पापं मा शङ्किष्टा इत्यभिप्रायः।

भीष्मादिषु जयाशाविषयेषु हतेषु निराश्रयो दुर्योधन हत एवेत्यनुसन्धाय जयाशां परित्यज्य यदि धृतराष्ट्रः सन्धिं कुर्यात् तदा शान्तिरुभयेषां भवेदित्यभिप्रायवान् 'ततः किं वृत्तम् ?' इत्यपेक्षायां सञ्जय आह - **एतदिति**॥

सञ्जय उवाच
एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥ ३५॥

एतत् पूर्वोक्तं **केशवस्य वचनं श्रुत्वा कृताञ्जलिर्किरीटी** शक्रदत्तकिरीटः **वेपमानः** परमाश्चर्यदर्शनजनितेन सम्भ्रमेण कम्पमानोऽर्जुनः **कृष्णं** भक्तपापकर्षणं भगवन्तं **नमस्कृत्वा** नमस्कृत्य **भूयः** पुनरपि **आह** उक्तवान् **सगद्गदं** भयेन हर्षेण चाश्रुपूर्णनेत्रत्वे सति कफरुद्धकण्ठतया यो वाचो मन्दत्वसकम्पत्वादिर्विकारः स गद्गदः, तद्युक्तं यथा स्यात्। **भीतभीतः** सन् पूर्वं नमस्कृत्य पुनरपि **प्रणम्य** अत्यन्तनम्रो भूत्वा, 'आह' इति सम्बन्धः॥ ३५॥

अर्जुन उवाच
स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः॥ ३६॥

स्थाने इत्यव्ययम्, युक्तमित्यर्थे। हे **हृषीकेश** सर्वेन्द्रियप्रवर्तक ! अन्तर्यामिन् ! यतस्त्वमेवाद्भुतप्रभावो भक्तवत्सलश्च, ततः **तव प्रकीर्त्या** प्रकृष्टया कीर्त्या निरतिशयप्रशस्ताद्भुतत्वाद्यशःकीर्तनेन श्रवणेन च न केवलमहमेव प्रहृष्यामि, किन्तु सर्वमेव **जगत्** चेतनमात्रं रक्षोविरोधि **प्रहृष्यति** प्रकृष्टहर्षमाप्नोतीति यत्, तत् **स्थाने** युक्तमेवेत्यर्थः। तथा सर्वं जगत् **अनुरज्यते च**

---
[1] 'न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः'(२.६) इत्यत्रोक्तशङ्केत्यर्थः॥

त्वद्विषयकमनुरागमुपैतीति च यत्, तदपि युक्तमेव। तथा **रक्षांसि भीतानि** सन्ति **दिशो द्रवन्ति** सर्वासु दिक्षु पलायन्त इति यत्, तदपि युक्तमेव। तथा सर्वे सिद्धानां सङ्घा नमस्यन्ति चेति यत्, तदपि युक्तमेव। सर्वत्र 'तव प्रकीर्त्या' इत्यस्यान्वयः। 'स्थाने' इत्यस्य च। अयं श्लोको रक्षोघ्नमन्त्रत्वेन मन्त्रशास्त्रे प्रसिद्धः[1]॥ ३६॥

हर्षादिविषयत्वे हेतुमाह - **कस्मादिति॥**

कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत् तत्परं यत् [2]॥ ३७॥

कस्माच्च हेतोः **ते** तुभ्यं **न नमेरन्** न नमस्कुर्युः सिद्धसङ्घाः सर्वेऽपि। हे **महात्मन्** अनन्तकल्याणगुणपरिपूर्ण हे **अनन्त** देशकालाद्यपरिच्छिन्न **देवेश** ब्रह्मरुद्रादीनां देवानां नियन्तः हे **जगन्निवास** सर्वाश्रय तुभ्यम्। कीदृशाय? **ब्रह्मणोऽपि गरीयसे** गुरुतराय **आदिकर्त्रे** ब्रह्मणो जनकाय। **त्वमक्षरं** स्वरूपतो धर्मतश्चोत्पत्तिनाशादिशून्यम्। **सदसत्** भावाभावात्मकं कार्यकारणात्मकं वा मूर्तामुर्तात्मकं वा। तद्व्यापकत्वात् तदात्मकत्वमित्यर्थः। **तत्परं** ताभ्यां कारणादिभ्यां परं मूलकारणम्। **यदक्षरं** ब्रह्म तदपि च **त्वम्** एव। एतैर्हेतुभिस्त्वां वसुदेवपुत्रं सर्वे नमन्तीति किमपि न चित्रमित्यर्थः॥ ३७॥

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप॥ ३८॥

त्वमादिदेवः जगतः कारणत्वात्। **पुरुषः** पूर्णः पूरयिताऽन्तर्यामी च। **पुराणः** चिरन्तनः। **त्वमस्य विश्वस्य परं निधानं** विश्वस्योत्पत्तिस्थितिलयाधार इत्यर्थः। जगदुदयादिकर्तृत्वेन प्रधानाल्पज्ञजीवव्यावृत्त्यर्थं सर्वज्ञत्वमाह - **वेत्तासि** वेदिता। सर्वस्यापि **वेद्यं च** सर्ववेदवेद्यं च सर्वश्रुतयश्च त्वामेव बोधयन्तीत्यर्थः। 'वेदैश्च

---

[1] अयं श्लोको रक्षोघ्नमन्त्रत्वेन मन्त्रशास्त्रे प्रसिद्धः। स च नारायणाष्टाक्षरसुदर्शनास्त्रमन्त्राभ्यां सम्पुटितो ज्ञेय इति रहस्यम्। - इति नीलकण्ठीये। [2] सदसत् तत्परं च यत् - पा.। 'तत्परं यदित्यत्र यच्छब्दात् प्राक् चकारमपि केचित् पठन्ति' **इति मधुसूदनसरस्वतीये**

सर्वैरहमेव वेद्यः'[1] इति वक्ष्यमाणत्वात्। सर्वज्ञो मुख्यवृत्त्या सर्वश्रुतिबोध्यानन्तगुणो मुमुक्षुज्ञेयो मुक्तप्राप्यस्त्वमेवेत्यर्थः। **परं धाम** प्रकाशरूपं भूतानामप्याश्रयरूपं वा त्वमेव। इदं सर्वं जगत् **त्वया** अनन्तशक्तिनाऽऽधारत्वेनोत्पादकत्वेन पालकत्वेन नियामकत्वेन च **ततं** व्याप्तम्। बद्धमुक्तजीवजडानां पालकादिस्त्वमेवेत्यर्थः। **अनन्तरूप** अनन्तरूपेष्वपि देशकालगुणैरियत्ताहीनैकरूपाय। 'तदेकमव्ययमनन्तरूपम्' इति श्रुतेः॥ ३८॥

वैदिकसर्वशब्दवाच्यस्त्वमेवेत्याह - **वायुरिति**॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते॥ ३९॥

वाययति सर्वान् गमयति प्रेरयतीति **वायुः**। यच्छत्यन्तःस्थ इति **यमः**। अङ्गयति चेष्टयतीति **अग्निः**। मुमुक्षुभिः सेव्यत्वेन स्वाश्रितान् वृणु। धर्माणां पौष्कल्यस्य भगवत्वेव सत्त्वेन समन्वयाध्यायोक्तरीत्या सर्वशब्दवाच्यः स एवेति भावः। प्रजानां पतिः। जगत्पितुरपि चतुर्मुखस्यापि पिता त्वमेव। यतः सर्वदेवानां नियामकः पिता च त्वमतो मम तुभ्यं **नमोऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि** पुनरपि **नमस्ते** भक्तिश्रद्धातिशयेन नमस्कारेष्वलंप्रत्ययाभावो नमस्कारावृत्त्या सूच्यते॥ ३९॥

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः॥ ४०॥

तुभ्यं पुरोऽग्रतो **नमः**। अथशब्दः समुच्चये। **पृष्ठतः** तुभ्यं नमस्तात्। **नमोऽस्तु ते** तुभ्यं **सर्वत एव** सर्वासु दिक्षु स्थिताय। हे **सर्व** सर्वव्यापी। वीर्यं शारीरबलं विक्रमः शिक्षा शस्त्रप्रयोगकौशलम्। समस्तमेकपदम्। **अनन्तवीर्य** इति सम्बोधनं वा। यतः **सर्वं** जगदुत्पादकत्वाधारकत्वनियामकत्वसत्ताप्रदत्वादिना **समाप्नोषि** अतः **सर्वः** सर्वशब्दवाच्यस्त्वम्। एतेन 'सर्वं खल्विदं ब्रह्म'[2] इत्याद्याः श्रुतयो व्याख्याताः॥ ४०॥

[1] **भगवद्गीता** १५.१५ [2] **छान्दोग्योपनिषत्** ३.१४.१

यतोऽहं त्वन्माहात्म्यापरिज्ञानादपराधमजस्रमकार्षम्, अतः परमकारुणिकं त्वां प्रणम्यापराधक्षमां कारयामीत्याह - **सखेति द्वाभ्याम्॥**

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वाऽपि॥ ४१॥

त्वं मम **सखा** समानवयः **इति मत्वा प्रसभं** स्वोत्कर्षख्यापनरूपेणाभिभवेन मया **यदुक्तम्** , **तवेदं** विश्वरूपं तथा **महिमानम्** ऐश्वर्यातिशयम् **अजानता प्रमादात्** चित्तविक्षेपात् **प्रणयेन** स्नेहेन **वाऽपि**। किमुक्तमित्याह - **हे कृष्ण हे यादव हे सखेति॥४१ ॥**

यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु।
एकोऽथवाऽप्यच्युत तत् समक्षं तत् क्षामये त्वामहमप्रमेयम्॥ ४२॥

यच्चापहासार्थं परिहासार्थं **विहारशय्यासनभोजनेषु** विषयभूतेषु मया **असत्कृतोऽसि**। **एकः** सखीन् विहाय रहसि स्थितो वा त्वम्, **अथवा तत्समक्षं** तेषां सखीनां परिहासतां समक्षं हे **अच्युत** सदैकाकारविकारशून्य **तत्** सर्वं वचनरूपमसत्करणरूपं वा ममापराधजातं **क्षामहे** क्षमापयामि **त्वामप्रमेयम्** अचिन्त्यप्रभावम्। अचिन्त्यप्रभावेन निर्विकारेण च परमकारुणिकेन भवता त्वन्माहात्म्यानभिज्ञस्य ममापराधाः क्षन्तव्या इति भावः॥ ४२॥

अचिन्त्यप्रभावत्वमेव प्रपञ्चयति - **पितेति॥**

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव॥ ४३॥

अस्य चराचरस्य लोकस्य पिता जनकः **त्वमसि**। **पूज्यश्च** असि, सर्वेश्वरत्वात्। **गुरुः** चासि शास्त्रोपदेष्टा। अतः सर्वप्रकारैः **गरीयान्** गुरुतमोऽसि। अत एव **न त्वत्समोऽस्त्यभ्यधिकः कुतो लोकत्रयेऽपि** हे **अप्रतिमप्रभाव** नास्ति प्रतिमा तुल्योऽन्यः

प्रभावो यस्य सोऽप्रतिमः, प्रभावो[1] यस्य स त्वम्। तव समोऽन्यः द्वितीयपरमेश्वराभावात्। तस्याधिकः **अन्यः कुतः** स्यात्? सर्वथा न सम्भाव्यत एवेत्यर्थः॥ ४३॥

तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्॥ ४४॥

तस्मात् प्रणम्य प्रणिधाय प्रकर्षेण नीचैः **कायं** कृत्वा दण्डवद्भूमौ पतित्वा **प्रसादये त्वामीशमीड्यं** सर्वस्तुत्यम् **अहम्** अपराधी। अतो हे **देव पितेव पुत्रस्य** अपराधं **सखेव सख्युः** अपराधं **प्रियः प्रियायाः** पतिव्रताया अपराधं ममापराधं त्वं **सोढुं** क्षन्तुम् **अर्हसि** अनन्यशरणत्वान्मम। **प्रियायार्हसि** इत्यत्र 'इव'शब्दलोपः सन्धिश्च छान्दसः॥ ४४॥

एवमन्यापराधान् क्षमापयित्वा सर्वदा स्वानुभूतरूपदर्शनं प्रार्थयते - **अदृष्टेति द्वाभ्याम्॥**

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास॥ ४५॥

कदाऽपि **अदृष्टपूर्वं** पूर्वमदृष्टं विश्वरूपं **दृष्ट्वा हृषितः** हृष्टः **अस्मि**। तद्रूपदर्शनजेन **भयेन मे मनः** व्यथितं = व्याकुलीकृतम्। अतः **तदेव** सदा मयाऽभ्यस्तं मम प्राणसहस्रापेक्षयाऽपि प्रियं त्वत्प्रसादं विना योगीश्वराणामपि मनसाऽप्यगम्यं **रूपं** मम **दर्शय** चक्षुर्गोचरं कुरु। हे **देवेश** हे **जगन्निवास प्रसीद** सदतिवल्लभरूपदर्शनरूपं प्रसादं मे कुरु॥ ४५॥

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वा[2] द्रष्टुमहं तथैव।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते॥ ४६॥

[1] अप्रतिमः प्रभावः इति स्यात्। [2] त्वां - प्रचलितपाठः।

किरीटवन्तं **चक्रहस्तं** च **त्वा** त्वां **द्रष्टुमिच्छामि। तथैव तेनैव** मदभ्यस्तरूपेणैव **चतुर्भुजेन सहस्रबाहो हे विश्वमूर्ते।** यद्यपि भवाननन्तरूपः। तथाऽपि मम चित्तं तस्मिन्नेव रूपेऽनुरक्तम्। अतो मम तदेव दर्शय। अचिन्त्यानन्तगुणालये वासुदेवे एकस्मिन्नेवानन्तरूपगुणाकृतिशक्तयः सन्ति। यस्मै स्वभक्ताय कृपया रूपगुणादिकं यावद्दर्शयति, तावदेव स पश्यति। नतु रूपान्तरप्रतीतौ सत्यां विश्वरूपादित्यागः। 'पञ्चाननं नित्यमचिन्त्यरूपं पद्मासनं गोपितविश्वरूपम्'[1] इति नृसिंहरूपेऽपि गूहितविश्वरूपत्वोक्तेः। तथा च रूपान्तरस्य गोपनमेव, नतु त्याग इति भावः। एवं चानन्तरूपस्यापि हरेरर्जुनेन चतुर्भुजमेव रूपं सदा दृश्यत इत्युक्तम्॥ ४६॥

एवं प्रार्थितो भगवान् भक्तिविवृद्धये विश्वरूपदर्शनस्य दुर्लभत्वं दर्शयन्नर्जुनमाश्वासयन्नाह - **मयेति॥**

श्रीभगवानुवाच
मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्॥ ४७॥

हे **अर्जुन** किमिति बिभेति? **मया प्रसन्नेन** कृपया च तदेव **परम्** उत्कृष्टमत्यगम्यं विश्वरूपं **आत्मयोगात्** अदृश्यमपि स्वसामर्थ्यात् **दर्शितम्। तेजोमयं** प्रकाशात्मकं **विश्वं** व्यापकम् अनन्तगुणपूर्णं च **अनन्तं** देशकालादिपरिच्छेदशून्यं **यत्** इदं रूपम्, एतादृशप्रसादहीनेन **त्वदन्येन न दृष्टपूर्वम्।**

यद्यपि श्रीव्यासप्रसादात् सञ्जयेन, अन्यैरपि भीष्मादिभिः, अन्यैरपि कैश्चिद्रूपं दृष्टम्। तथाऽपि यथाऽर्जुनेन दृष्टं तथाऽन्यैर्न दृष्टम्। अर्जुन इवान्यत्र भगवत्प्रसादस्यासत्वात्[2]॥ ४७॥

एतद्रूपदर्शनात्मकमतिदुर्लभं मत्प्रसादं लब्ध्वा कृतकृत्य एवासि त्वमित्याह - **नेति॥**

[1] गीतातात्पर्योदाहृतं वैहायससंहितावचनम्। [2] 'त्वदन्येन न दृष्टपूर्वम्' इत्यनेन तेनैवेन्द्रशरीरेण दृष्टमिति ज्ञायते। त्वदन्येनेति तदवरापेक्षया। तैरपि तद्वन्न दृष्टमित्येव।**इति गीतातात्पर्ये**

न वेदयज्ञाध्ययनैर्न दानैः न च क्रियाभिर्न तपोभिरुग्रैः।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥ ४८॥

वेदानाम् **अध्ययनैः** अक्षरग्रहणरूपैः तथा मीमांसाकल्पसूत्रादिद्वारा यज्ञानां वेदबोधितकर्मणाम् **अध्ययनैः** अर्थविचाररूपैः **दानैः** तुलापुरुषादिभिः **क्रियाभिः** अग्निहोत्रादिश्रौतकर्मभिः **तपोभिः** कृच्छ्रचान्द्रायणादिभिः **उग्रैः** कायेन्द्रियशोषकत्वेन दुष्करैः। **एवंरूपोऽहं न शक्यः नृलोके** मनुष्यलोके **द्रष्टुं त्वदन्येन** एवम्भूतमत्प्रसादहीनेन हे **कुरुप्रवीर**। 'शक्योऽहम्' इति वक्तव्ये विसर्गलोपश्छान्दसः। प्रत्येकं नकाराभ्यासो निषेधदार्ढ्याय॥ ४८॥

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम्।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य॥ ४९॥

इदं घोरमीदृक् अनेकबाह्वादियुक्तत्वेनातिभयङ्करं मम **रूपं दृष्ट्वा** स्थितस्य **ते** तव **व्यथा** भयनिमित्ता पीडा **मा** मा भूत्। तथा मद्रूपदर्शनेऽपि यो **विमूढभावः** व्याकुलचित्तत्वम् अपरितोषाख्यः क्षोभः, सोऽपि मा भूत्। किन्तु, **व्यपेथभीः** अपगतभयः **प्रीतमनाः** च सन् **पुनस्त्वं तदेव** चतुर्भुजं वासुदेवाख्यं त्वया सदाऽनुभूतं **रूपं प्रपश्य** भयराहित्येन सन्तोषेण च पश्य॥ ४९॥

सञ्जय उवाच
इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा॥ ५०॥

वासुदेवोऽर्जुनं तथेत्युक्त्वा स्ववत् क्रियते = प्रकाशयत इति **स्वकं** कृष्णरूपम्। विश्वरूपं जानतां स्ववत् प्रकाशयति, एतद्रूपं जानतां विश्वरूपं स्ववत् प्रकाशयति। रूपेण परावरत्वं चाधिकारिणमपेक्ष्य। भगवद्रूपेषु तारतम्याभावात्[1]

[1] स्ववत् क्रियत इति स्वकं रूपम्। विश्वरूपमज्ञानां स्वरूपवन्न दर्शयति। एतदज्ञानामपि तथैव दर्शयतीति विशेषः। अन्यथा द्रष्टुमिच्छामि ते रूपमिति विरुद्धं स्यात्।**इति गीतातात्पर्ये** ।

यद्वा, **स्वकं** स्वकीयम् = अर्जुनीयम् = सदाऽर्जुनसेव्यं शङ्खचक्रगदादियुक्तं **दर्शयामास भूयः। आश्वसयामास च भीतमेनम्** अर्जुनं **भूत्वा पुनः** पूर्ववत् **सौम्यवपुः** अनुग्रहशरीरः **महात्मा** परमकारुणिकः सर्वेश्वरः सर्वज्ञ इत्यादिकल्याणगुणाकरः॥ ५०॥

अर्जुन उवाच
दृष्ट्वेदं मानुषं रूपं तव सोयं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥ ५१॥

इदानीं सचेताः भयकृतव्यामोहाभावेनाव्याकुलचित्तः **संवृत्तोऽस्मि** तथा **प्रकृतिं** भयकृतव्यथाराहित्येन स्वास्थ्यं **गतः** अस्मि। स्पष्टमन्यत्॥ ५१॥

स्वकृतस्यानुग्रहस्यातिदुर्लभत्वं दर्शयति चतुर्भिः।

श्रीभगवानुवाच
सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥ ५२॥

मम यद्रूपम् इदानीं **दृष्टवानसि, इदं** विश्वरूपं **सुदुर्दर्शम्** अत्यन्तं द्रष्टुमशक्यम्। यतः **देवा अप्यस्य रूपस्य नित्यं** सर्वदा **दर्शनकाङ्क्षिणः** नतु त्वमिव पूर्वं दृष्टवन्तः। न वाऽग्रे द्रक्ष्यन्तीत्यभिप्रायः। दर्शनकाङ्क्षाया सत्वोक्तेः॥ ५२॥

कस्माद्देवा एतद्रूपं न दृष्टवन्तः? न वा द्रक्ष्यन्ति? मदीयतादृशानुग्रहशून्यत्वादित्याह -

नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥ ५३॥

'न वेदयज्ञाध्ययनैः'[1] इत्यादिना गतार्थः श्लोकः। परमदुर्लभत्वख्यापनायाभ्यस्तः॥ ५३॥

---
[1] **भगवद्गीता** ११.४८

वेदतपोदानेज्यादिभिर्द्रष्टुमशक्यस्त्वम्, तर्हि केनोपायेन द्रष्टुं शक्योऽसि? इत्यत आह - **भक्त्येति**॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परन्तप॥ ५४॥

साधनान्तरव्यावृत्त्यर्थस्तुशब्दः। **भक्त्या** एव **अनन्यया** मदेकनिष्ठया सर्वोत्तमत्वज्ञानपूर्वकाविच्छिन्नप्रेमप्रवाहरूपया। **एवंविधः** दिव्यानन्तनिरतिशयैश्वर्यविशिष्टविश्वरूपवान् **अहं** शास्त्रतो **ज्ञातुं शक्यः**। **अहम्** इति छान्दसो विसर्गलोपः। न केवलं परोक्षतो ज्ञातुं शक्यः, अपि तु **तत्त्वेन द्रष्टुं च** एतादृशभक्तिपूर्वकवेदान्तश्रवणमननिदिध्यासनादिभिरनन्तगुणालयोऽद्भुतैश्वर्यविश्वरूपाद्यनन्तरूपवान् स्वयोग्यतानुसारेणाशेषतया साक्षात्कर्तुं शक्यः। **प्रवेष्टुं** मत्साक्षात्कारानन्तरं मत्प्रसादेन निवृत्तनिश्शेषाविद्यतया मुक्तेन प्राप्तुं शक्यः[1] प्रवेशो हि भगवत्सायुज्यादिकं तल्लोकप्रवेशः। सायुज्यादिरूपसंश्लेषविशेष एव वा प्रवेशः॥ ५४॥

अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थिनामनुष्ठानाय पुङ्खीकृत्योच्यते - **मदिति**॥

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥ ५५॥

मत्कर्मकृत् मत्प्रेरणया मत्प्रीत्यर्थं कर्मकारी। स्वर्गादिकामनायां सत्यां कथमेवमिति? नेत्याह - **मत्परमः** अहमेव परमः = प्राप्यत्वेन निश्चितः, नतु स्वर्गादिर्यस्य सः। अत एव प्राप्तीच्छया **मद्भक्तः** सर्वोत्तमत्वधीपूर्वकमत्प्रेमयुक्तः। पुत्रादिषु स्नेहे सति कथं त्वय्येवं प्रेमः स्यात्? नेत्याह - **सङ्गवर्जितः** बाह्यवस्तुस्पृहाशून्यः। शत्रुषु द्वेषे सति कथमेवं स्यात्? नेत्याह - **निर्वैरः सर्वभूतेषु** अपकारिष्वपि द्वेषशून्यो **यः स माम्** आनन्दघनं सदनन्तगुणालयं वसुदेवतनयम् **एति**[2] निर्मुक्ताविद्यः सन् मत्साम्यं प्राप्नोतीत्यर्थः। 'निरञ्जनः परमं साम्यमुपैति'[3] इति श्रुतेः। 'मम साधर्म्यमागताः'[4] इति वक्ष्यमाणत्वाच्च।

---

[1] वेदान्तवाक्यश्रवणमननिदिध्यासनपरिपाकेण ततश्च स्वरूपसाक्षात्कारादविद्यातत्कार्यनिवृत्तौ तत्त्वेन प्रवेष्टुं च मद्रूपतयैवाप्तुं चाहं शक्यः।**इति मधुसूदनसरस्वतीये** । [2] मामेत्यभेदेन **इति मधुसूदनसरस्वतीये** [3] **मुण्डकोपनिषत्** ३.१.३ [4] **भगवद्गीता** १४.२

अयमर्थस्त्वया ज्ञातुमिष्टो मयोपदिष्टो नातः परं किञ्चित् कर्तव्यमस्तीत्यर्थः॥ ५५॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रेश्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनं नामैकादशोऽध्यायः॥ ११॥

अध्यायः 12

भक्तियोगः

द्वादशे कथ्यते भक्तिर्भवार्णवं तितीर्षताम्।
दृढा नौः श्रीरमेशेन तारतम्यं च योगिनाम्॥ १॥

विश्वोदयादिकर्तारमानन्दघनविग्रहम्।
मुक्तास्वाद्यपदाम्भोजं वन्दे श्रीहयकन्धरम्॥ २॥

श्रीसच्चिदानन्दघनमनन्ताद्भुतवैभवम्।
क्रीडन्तं राधया सार्धं वन्दे श्रीनन्दनन्दनम्॥ ३॥

'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥'[1] इति षष्टान्ते,

'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते'[2] इति सप्तमे,

'अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥'[3] इत्यष्टमे,

'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।

---

[1] **भगवद्गीता** ६.४७ [2] **भगवद्गीता** ७.१४ [3] **भगवद्गीता** ८.१४

मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥'[1] इति नवमान्ते,

'मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥'[2]

इति पूर्वाध्यायान्ते च भक्तियोगस्य निरपेक्षस्य मुक्तिहेतुत्वमुक्तम्।

'स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥'[3] इति पञ्चमे,

'युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥'[4] इत्यादिकं षष्ठे,

'यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये॥

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायाऽत्मनः प्राणमास्थितो योगधारणाम्॥

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥' [5]

इत्यष्टमे चाष्टाङ्गयोगस्यापि मोक्षहेतुत्वम्।

तत्र निर्विघ्नतया शीघ्रं सुसाध्यं कः साधयति? इत्यर्जुनः पृच्छति - **एवमिति॥**

अर्जुन उवाच
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥ १॥

---

[1] **भगवद्गीता** ९.३४ [2] **भगवद्गीता** ११.५५ [3] **भगवद्गीता** ५.२७,२८ [4] **भगवद्गीता** ६.१५ [5] **भगवद्गीता** ८.११-१३

एवम् उक्तप्रकारेण **भक्ताः** श्रवणकीर्तनार्चनवन्दनदास्यादिनवविधां भक्तिं कुर्वाणास्त्वव्यतिस्नेहवन्तः त्वामेव कर्मादिकारयितारं प्राप्यं च सर्वोत्तमं मन्वाना न क्षरतीति **अक्षरं** विनाशशून्यं सदैकाकारम् **अव्यक्तम्** इन्द्रियाद्यगोचरं **त्वां पर्युपासते** त्वत्प्राप्तिमेव परमप्रयोजनं मन्वानाः सेवन्ते, **ये चापि** अन्येऽष्टाङ्गयोगिनश्चेतसः प्रशस्तं विषयं त्वां मन्वानाश्चित्तैकाग्र्यपरमप्रयोजनाः यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयो योगस्याष्टाङ्गानि, तत्पराः।

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधाना नियमाः। पद्मासनं वीरासनं भद्रासनं स्वस्तिकमित्यादिकं यथासुखम् आसनम्। प्राणायामलक्षणमुक्तम् चतुर्थाध्याये[1] इन्द्रियाणां बाह्यविषयेभ्यो निवर्तनपूर्वकं स्वरूपे स्थापनं प्रत्याहारः, स्वविषयासम्प्रयोगः। चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः। स्वविषयसम्प्रयोगाभावे चित्तस्य स्वरूपानुकार इवेति चित्तनिरोधे चित्तवत् रुद्धानीन्द्रियाणि नेन्द्रियान्तरजयवदुपायान्तरमपेक्षन्ते। यथा मधुकरराजं मक्षिका उत्पतन्तमनुत्पतन्ति निविशमानमनुविशन्ते, तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहार इति योगसूत्रभाष्याभ्यामयमर्थः[2] स्पष्ट उक्तः।

देशबन्धश्चित्तस्य धारणा। नाभिचक्रे पुण्डरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्यविषये वा चित्तस्य। तत्र प्रत्ययैकतानता ध्यानम्। तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्य एकतानता सदृशप्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात् तदा समाधिरित्युच्यते। भगवति संयोजनाच्चितं शुद्धं सच्छीघ्रमवृत्तिकं भवतीति मन्वानास्त्वयि चेतो धारयन्त्यष्टाङ्गेन। **तेषां** भक्तानां योगिनां च मध्ये **के योगवित्तमाः** उपायविदां श्रेष्ठाः? अनायासं शीघ्रं च फलं के प्राप्नुवन्ति? इत्यर्थः।

महान्तस्तु[3] "**एवं** दृष्टश्रुतस्वरूपं त्वां 'मत्कर्मकृत्' इत्याद्युक्तप्रकारेणोपासते, **ये चाप्यक्षरमव्यक्तं** लक्ष्मीतत्त्वमुपासते **तेषाम्** उभयेषां मध्ये **के योगवित्तमाः** अतिशयेनोपायविदः?। 'अक्षरात् परतः परः' इत्यादौ चित्प्रकृतिरेवाक्ष-

[1] **भगवद्गीता** ४.२९। [2] पातञ्जलयोगसूत्रभाष्ययोः द्वितीयपादे। [3] श्रीमदानन्दतीर्थास्त्वित्यर्थः।

रपदवाच्या। अक्षरादुत्तमस्य हरेरभिधानात्" इति व्याचक्षते।[1]

केचित्तु "**अक्षरः** अव्यक्तपदार्थो जीवः इदानीमविद्यावृतं मुक्तावाविर्भूतज्ञानानन्दैकतानं देहादिविलक्षणतया स्वरूपं सदा चिन्तयन्ति, **ये च** त्वद्भक्ताः **तेषां के योगवित्तमाः**" इत्याहुः॥ १॥

एवं पृष्टो भगवान् भक्तिमार्गेणोपासकानां श्रेष्ठत्वमाह - **मयीति॥**

श्रीभगवानुवाच
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेताः ते मे युक्ततमा मताः॥ २॥

मयि भगवति वासुदेवे परमेश्वरे परब्रह्मणि सकलश्रुतिसारभूतार्थे मुमुक्षुज्ञेये मुक्तप्राप्ये **मन आवेश्य** अनन्यशरणतया निरतिशयप्रियतया च प्रवेश्य हिङ्गुलरङ्ग इव जतु तन्मयं कृत्वा **ये माम्** अनन्तकल्याणनिलयं सर्वज्ञमीश्वराणामपि महेश्वरं **नित्ययुक्ताः** अनन्यव्यापारेण सततमुद्युक्ताः **श्रद्धया परया** प्रकृष्टया वासुदेवप्रसादाद्वासुदेव एव प्राप्यत इत्याद्यर्थकशास्त्रगुरूपदेशादौ दृढविश्वासरूपया **उपेताः** सन्तः **उपासते** श्रवणादिरूपभक्त्या मत्प्रीत्यर्थमेव मां सेवन्ते मत्प्रीत्यतिरिक्तप्रयोजनहीना मद्भक्ताः **ते युक्ततमाः, मे** मम **मताः** अभिमताः॥ २॥

भक्तानामतिशयेन युक्तत्वं वक्तुमष्टाङ्गयोगेनोपासकान् प्रस्तौति - **य इति द्वाभ्याम्॥**

ये त्वक्षरमनिर्देश्यं अव्यक्तं पर्युपासते।
सर्वत्रगमतर्क्यं[2] च कूटस्थमचलं ध्रुवम्॥ ३॥

---

[1] अव्यक्तोपासनाद् भगवदुपासनस्योत्तमत्वं प्रदर्श्य तदुपायं प्रदर्शयत्यस्मिन्नध्याये। तदुपासनमपि मोक्षसाधनं प्रतीयते। 'श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिधा मितद्रौ' इति। ... इति शङ्का कस्यचिद् भवति। अतो जानन्नपि सूक्ष्मयुक्तिज्ञानार्थं पृच्छति - **एवमिति॥** एवंशब्देन दृष्टश्रुतरूपं 'मत्कर्मकृत्' इत्यादिप्रकारश्च परामृश्यते। अव्यक्तं प्रकृतिः। 'महतः परमव्यक्तम्' इति प्रयोगात्। 'यत् तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्। प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्॥' इति भागवते। अक्षरं च तत्। 'अक्षरात् परतः परः' इति श्रुतेः।**इति मध्वभाष्यम्**

[2] सर्वत्रगमचिन्त्यं - प्रचलितपाठः।

'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घम्'[1] इत्यादिश्रुत्युक्तं प्राकृतस्थौल्यादिस्वभावरहितम् **अक्षरम्** , साकल्येन निर्देशानर्हत्वात् **अनिर्देश्यम्** , प्रसादं विना चक्षुराद्यगोचरत्वात् **अव्यक्तम्** , **सर्वत्रगं** सर्वव्यापकम् **अतर्क्यं** तर्काविषयानन्ताघटनघटनापटीयस्सामर्थ्यम्, **कूटस्थं** कूटवन्निर्विकारम्, **अचलं** परिणामशून्यम्, अत एव सदैकाकाररूपं **ध्रुवम्** इत्येवमादिस्वाभीष्टगुणालयं मामुपासतेऽष्टाङ्गयोगिनः **'ते प्राप्नुवन्ति मामेव'** इत्युत्तरेणान्वयः।

भक्तिमार्गानुवर्तिनां जगदुदयादिकर्तृत्वादयोऽनन्तगुणा भक्तिवर्धकत्वादुपास्या ज्ञेयाश्च। ते प्रागसकृदुक्तत्वाद्भगवतेह नोक्ताः। अष्टाङ्गयोगिनामवृत्तिकं कर्तुं चित्तं प्रकृतितः पुरुषं विवेक्तुं च प्रवृत्तानामक्षरत्वानिर्देश्यत्वादयो गुणा मुख्यतया ध्येयाः। भक्तिवर्धका अपि चिन्त्या एव, नतु मुख्यतया। अतोऽक्षरत्वादय एव योगिनां भगवतोक्ताः। 'यथाभिमतध्यानाद्वा'[2] 'यदेवाभिमतं तदेव ध्यायेत्। तत्र लब्धस्थितिकमन्यत्रापि स्थितिपदं लभते'[3] इति योगसूत्रभाष्योक्तेरिति भावः॥ ३॥

एतेषां यमनियमादिप्राधान्यमेव दर्शयति - **सन्नियम्येति**॥

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ ४॥

इन्द्रियग्रामम् इन्द्रियसमूहं विषयेभ्यो निवर्त्य **सर्वत्र समबुद्धयः** सर्वभूतेषु रागद्वेषरहिताः। इन्द्रियपदानां बाह्येन्द्रियाणामिवान्तरेन्द्रियस्य मनसोऽपि ग्रहणम्। तन्नियमनं च सामाध्यं तेन योगेन भवतीति **सन्नियम्य** इत्यनेन समाध्यन्तो योगोऽभिप्रेत इति सूचितम्। **सर्वभूतहिते रताः** सर्वभूतानां निरुपाधिकोपकारे रताः। **ते मां प्राप्नुवन्ते।**

व्याख्यान्तरे चाक्षरत्वादयो धर्माश्चित्प्रकृतौ, जीपेऽपि च सन्ति। ततस्तदुपासका अपि मां प्राप्नुवन्त्येवेत्यर्थः॥ ४॥

[1] **बृहदारण्यकोपनिषत्** ५.८.८ [2] पातञ्जलयोगसूत्रम् १.३९ [3] पातञ्जलयोगसूत्रभाष्यम् १.३९

अध्यायः 14

गुणत्रयविभागयोगः

गुणत्रयकृतोऽनर्थो जीवस्य न स्वतः क्वचित्।
तन्नाशो हरिभक्त्यैवेति चतुर्दश उच्यते॥

'यावत् सञ्जायते किञ्चित् सत्वं स्थावरजङ्गमम्। क्षेत्रक्षेत्रसंयोगात् तद्विद्धि'[1] इत्युक्तम्। तत्र निरीश्वरसाङ्ख्यनिराकरणेनेश्वराधिष्ठितप्रकृतेरेव विश्वमुत्पद्यत इति वक्तव्यम्। एवं 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु'[2] इत्युक्तम्। तत्र कस्मिन् गुणे? कथं सङ्गः? के वा गुणाः? कथं वा ते बध्नन्ति? इति वक्तव्यम्। तथा 'भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्'[3] इत्युक्तम्। तत्र भूतप्रकृतिशब्दितेभ्यो गुणेभ्यः कथं मोक्षणं स्यात्? मुक्तस्य च किं लक्षणम्? इति वाच्यम्। तदेतत् सर्वं विस्तरेण वक्तुं चतुर्दशोऽध्याय आरभ्यते।

तत्र श्रोतुराभिमुख्याय वक्ष्यमाणमर्थं स्तौति - **परमिति द्वाभ्याम्॥**

श्रीभगवानुवाच

---

[1] **भगवद्गीता** १३.२७ [2] **भगवद्गीता** १३.२१ [3] **भगवद्गीता** १३.३५

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः॥ १॥

ज्ञायतेऽनेनेति **ज्ञानं** परमात्मज्ञानसाधनं **परं** श्रेष्ठं श्रेष्ठज्ञेयविषयकत्वात्। कीदृशम्? **ज्ञानानां** भगवदपरोक्षसाधनानां यज्ञादीनां मध्ये **उत्तमं** उत्तमफल-कत्वात्। नत्वमानित्वादीनाम्। तेषामन्तरङ्गत्वेनोत्तमफलकत्वात्। **परम्** इ-त्यनेनोत्कृष्टविषयकत्वमुक्तम्। **उत्तमम्** इत्यनेन तूत्कृष्टफलकत्वमिति भेदः। ईदृशं ज्ञानमहं **प्रवक्ष्यामि भूयः** पुनः पूर्वमसकृदुक्तमपि **यत्** ज्ञानं **ज्ञात्वा** अनुष्ठाय **मुनयः** मननशीलाः **सर्वे परां** मुक्तिरूपां **सिद्धिम् इतः** देहबन्धात् **गताः** प्राप्ताः॥ १॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥ २॥

इदं यथोक्तं वक्ष्यमाणं च **ज्ञानमुपाश्रित्य** अनुष्ठाय **मम** नित्यमुक्तस्य पूर्णान-न्दस्य निर्मुक्तपूर्णानन्दत्वादिना **साधर्म्यं** समानधर्मत्वरूपं[1] मुक्तिं गताः। मम समानधर्मत्वमेव सायुज्यरूपा मुक्तिः, तां गताः।

'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं (पुरुषं ब्रह्मयोनिम्)।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥'[2] इति श्रुतेः।

भोगमात्रसाम्यलिङ्गाच्च। 'जगद्व्यापरवर्जम्'[3] इत्यादिसूत्राच्च। **सर्गे** चतुर्मुखाद्यु-त्पत्तिकाले **न जायन्ते** न नवीनदेहान् प्राप्नुवन्ति **प्रलये** ब्रह्मणो विनाशकाले **न व्यथन्ति** न व्यथन्ते च, न देहादिवियोगरूपं प्राप्नुवन्तीत्यर्थः॥ २॥

तदेवं श्रोतारमभिमुखीकृत्य परमेश्वराधीनजीवप्रकृतिसम्बन्धात् सृष्टिः। नतु निरीश्वरसाङ्ख्यानामिव स्वतन्त्रप्रकृतिपुरुषयोगादेवेतीमं विवक्षितमर्थमाह - **ममेति द्वाभ्याम्**॥

---

[1] साधर्म्यं मद्रूपतामत्यन्ताभेदेनागताः।**इति मधुसूदनसरस्वतीये**

[2] **मुण्डकोपनिषत्** ३.१.३

[3] **ब्रह्मसूत्रम्** ४.४.१७

मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत॥ ३॥

सर्वकार्यापेक्षयाऽधिकत्वात् कारणं **महत्** सर्वकार्याणां वृद्धिहेतुत्वरूपाद्बृंहणात् **ब्रह्म** प्रधानम्। तच्च **मम** ईश्वरस्य **योनिः** गर्भाधानस्थानम्। **तस्मिन्** महति ब्रह्मणि योनौ **गर्भं** सर्वभूतजन्मकारणम् 'अहं बहु स्यां प्रजायेय'[1] इतीक्षणरूपं सङ्कल्पं **दधामि**। यथा 'अहं गुरुः स्याम्' इति सङ्कल्प्य शिष्यान् सम्पाद्य च गुरुर्भवति, तथा 'अन्तर्यामितयाऽहं बहु स्याम्' इति सङ्कल्प्य प्रकृतिं क्षोभयित्वा नियम्यानुत्पाद्य बहु भवतीत्यर्थः। ईक्षणाधानं नामेक्षणविषयत्वम्। यथा हि पिता पुत्रं व्रीह्याद्याहाररूपेण स्वस्मिन् लीनं देहेन योजयितुं रेतःसेकपूर्वकं गर्भमाधत्ते। ततो गर्भाधानात् पुत्रो देहेन युज्यते। तदर्थं च कललाद्यवस्था भवन्ति। तथा प्रलये मयि लीनमविद्याकामकर्माशयवन्तं जीवं सृष्टिकाले भोग्येन क्षेत्रेण कार्यकारणसङ्घातेन योजयितुमीक्षणपूर्वकं गर्भं प्रकृतावादधामि। तदर्थं च मध्ये आकाशवायुतेजोपृथिव्याद्यवस्थाः। **ततः** गर्भाधानात् **सम्भवः** उत्पत्तिः **सर्वभूतानां** हिरण्यगर्भादीनां **भवति**।

'प्रकृतिं पुरुषं चैव[2] प्रविश्यात्मेच्छया हरिः।
क्षोभयामास सम्प्राप्ते सर्गकाले व्ययावयौ॥'[3] इति वैष्णवोक्तेः॥ ३॥

तदेव विवृणोति -

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता॥ ४॥

देवमनुष्यादिसर्वयोनिषु **याः मूर्तयः** जरायुजोद्भिजादिभेदेन विलक्षणदेहाः **सम्भवन्ति**, **तासां** मूर्तीनां तत्तत्कारणभावापन्नं **महद्ब्रह्म** एव **योनिः** मातृस्थानीयम्। **अहं** सर्वेश्वरः **जीवप्रदः** गर्भाधानस्य कर्ता **पिता**। प्रदृश्यमाना मात्रादयो महतो

[1] **छान्दोग्योपनिषत्** ६.२.६ [2] प्रधानपुरुषौ चापि इति प्रचलितपाठः [3] **विष्णुपुराणम्** १.२.२९

ब्रह्मण एव परिणामा अवस्थाविशेषाः। तत्तद्रूपेण महद्ब्रह्मैव सर्वमूर्तीनां कारणमिति भावः॥ ४॥

तदेवं निरीश्वरसाङ्ख्यं निराकृत्य, ईश्वराधीनप्रकृतिहेतुकां भूतोत्पत्तिमुक्त्वा कस्मिन् गुणे? कथं सङ्गः? के वा गुणाः? कथं वा बध्नन्तीत्युच्यन्ते - **सत्वमित्यादिनाऽन्यमित्यतः प्राक् चतुर्दशभिः॥**

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥ ५॥

सत्त्वं रजस्तम इति एवं नामानो **गुणाः** नित्यपरतन्त्राः। अचेतनानां सर्वेषां चेतनार्थत्वात्। नच वैशेषिकाणां रूपादिवद् द्रव्याश्रिताः। नच गुणगुणिनोरन्यत्वमत्र विवक्षितम्। गुणत्रयात्मकत्वात् प्रकृतेः। तर्हि कथं **प्रकृतिसम्भवाः** इत्युच्यन्ते? त्रयाणां गुणानां साम्यावस्था प्रकृतिर्भगवतः। तस्याः सकाशात् परस्पराङ्गाङ्गिभावेन वैषम्येण परिणताः **प्रकृतिसम्भवाः** इत्युच्यन्ते। ते च **देहे** प्रकृतिकार्ये देहेन्द्रियसङ्घाते **देहिनं** देहे 'मम' इत्याद्यभिमानिनं जीवं स्वभावतः **अव्ययं** निर्विकारं सन्तं **निबध्नन्ति** स्वकार्यभूतैः सुखादिभिः संयोजयन्ति। यद्वा, सत्वादिगुणाः स्वतोऽव्ययं जीवं देहिनं ततोऽपि स्थूलदेहिनं कृत्वा तत्रापि देहस्य कार्यैर्निबध्नन्तीत्यर्थः॥ ५॥

तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥ ६॥

तत्र तेषु गुणेषु मध्ये **सत्त्वं प्रकाशकं** स्फटिकमणिरिव भास्वरं। **निर्मलत्वात्** स्वच्छत्वात्। **अनामयम्** आमयो दुःखं, तद्विरोधि। सुखैकहेतुरित्यर्थः। शान्तत्वात् स्वकार्येण सुखेन मनोवृत्तिरूपेण, तथा प्रकाशकत्वात् स्वकार्येण तादृशेन च ज्ञानेन यो जीवस्य सङ्गः, तेन **बध्नन्ति।** ज्ञानसुखादीन् मनोधर्मान् सत्वगुणः 'अहं ज्ञानी सुखी' इत्याद्यभिमानोत्पादकद्वारा जीवं संयोजयतीत्यर्थः॥ ६॥

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥ ७॥

रज्यते विषयेषु पुरुषोऽनेनेति रागः = कामः। स एवात्मा स्वरूपं यस्य, धर्मधर्मिणोरभेदात्, तत् **रागात्मकं रजो विद्धि**। अप्राप्ताभिलाषः तृष्णा। प्राप्तस्योपस्थितेऽपि विनाशे संरक्षणाभिलाषः आसङ्गः। तयोः सम्भवो यस्मात् **तृष्णासङ्गसमुद्भवं तत्** रजो **निबध्नाति कर्मसङ्गेन** कर्मसु दृष्टादृष्टार्थेषु 'अहमिदं करोमि' 'एतत्फलं भोक्ष्ये' इत्यभिनिवेशविशेषेण **देहिनम्** अभिनिवेशमुत्पाद्य बध्नातीत्यर्थः॥ ७॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥ ८॥

अज्ञानं यथार्थज्ञानविरोधि मिथ्याज्ञानं ज्ञानसामान्यविरोधिजाड्यं वा। तज्जायते यस्मात् तत् **अज्ञानजं तमो विद्धि**। सर्वदेहिनां विपरीतधीजनकं **प्रमादालस्यनिद्राभिः** स्वकार्यैः **तं** देहिनं नितरां बध्नाति। प्रमादः अनवधानम्, वस्तुविवेकासामर्थ्यं वा। आलस्यम् अनुद्यमो रजोवृत्तिविरोधि। तमोगुणालम्बना वृत्तिर्निद्रा॥ ८॥

उक्तानां मध्ये कस्मिन् कार्ये कस्य गुणस्योत्कर्षः? तत्राह - **सत्त्वमिति**॥

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥ ९॥

सत्त्वम् उत्कृष्टं सत् **सुखे सञ्जयति** दुःखहेतुमभिभूय सुखे संश्लेषयति। सर्वत्र 'देहिनम्' इत्यनुषज्यते। एवं **रजः** उत्कृष्टं सत् सुखकारणमभिभूय **कर्मणि** 'सञ्जयति' इत्यनुषज्यते। **तमः** सत्त्वकार्यं **ज्ञानमावृत्य** आच्छाद्य तदुत्पत्तिं प्रतिबद्ध्य **प्रमादे** वस्त्वविवेके ज्ञातव्यवस्तुनोऽज्ञाने वा सञ्जयति। **उत** अवश्यकप्राप्तकर्तव्यताकस्याकरणे आलस्ये निद्रायां च सञ्जयतीत्यर्थः॥ ९॥

रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥ १०॥

रजस्तमश्च अपि उभावपि गुणौ **अभिभूय सत्त्वं भवति** उद्भवति वर्धते यदा, तदा स्वकार्यं प्रागुक्तमसाधारण्येन करोतीति शेषः। एवं **रजः** अपि **सत्त्वं तमश्च** इति गुणद्वयमभिभूयोद्भवति यदा, तदा प्रागुक्तस्वकार्यं करोति। **तथा** तद्वदेव **तमः** अपि **सत्त्वं रजश्च** इत्युभावपि गुणावभिभूयोद्भवति यदा, तदा स्वकार्यं प्रागुक्तं करोतीत्यर्थः॥ १०॥

उद्भूतानां तेषां लिङ्गान्याह त्रिभिः -

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत॥ ११॥

अस्मिन् आत्मनो भोगायतने **देहे** सर्वेष्वपि द्वारेषु ज्ञानसाधनेषु श्रोत्रादिषु **यदा प्रकाशः** शब्दादिज्ञानात्मकः नैर्मल्यरूपः प्रसादो वा जायते, **तदा** अनेन शब्दादिज्ञानाख्यप्रकाशेन लिङ्गेन प्रकाशात्मकं **सत्त्वं विवृद्धम्** उद्भूतम् **इति विद्यात्**। **उत** अपि सुखादिलिङ्गेनापि जानीयादित्यर्थः॥ ११॥

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ॥ १२॥

महति धनागमे जायमानेऽप्यनुक्षणं वर्धमानस्तदभिमानो **लोभः** , स्वविषयकप्राप्त्यनिवर्त्येच्छाविशेष इति यावत्। **प्रवृत्तिः** निरन्तरं यतमानता। **आरम्भः कर्मणां** बहुचित्तव्ययायासकराणां काम्यनिषिद्धलौकिकमहागृहादिविषयाणामुद्यमः। **अशमः** इदं कृत्वेदं करिष्यामीति सङ्कल्पप्रवाहानुपरमः। **स्पृहा** उच्चावचेषु परधनेषु दृष्टमात्रेषु येन केनाप्युपायेनोपादित्सा। **रजसि** रागात्मके **विवृद्धे, एतानि** रागात्मकानि लिङ्गानि **जायन्ते**। एतैर्विवृद्धं रजो जानीयादित्यर्थः॥ १२॥

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन॥ १३॥

अप्रकाशः सत्यप्युपदेशादौ बोधकारणे सर्वबोधायोग्यत्वम्। **अप्रवृत्तिश्च** सत्यपि 'अग्निहोत्रं जुहुयात्' इत्यादौ प्रवृत्तिहेतौ जनितबोधेऽपि शास्त्रे सर्वथा तत्प्रवृत्त्ययोग्यत्वम्[1] **प्रमादः** तत्कालकर्तव्यत्वेन प्राप्तस्यार्थस्यानुसन्धानाभावः। **मोह एव च। मोहः** निद्रा विपर्ययो वा। **तमसि** एव **विवृद्धे एतानि जायन्ते।** अत एव तैर्लिङ्गैर्विवृद्धं तमो जानीयादित्यर्थः॥ १३॥

मरणसमये विवृद्धानां सत्त्वादीनां फलमाह द्वाभ्याम् -

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते॥ १४॥

सत्त्वे प्रवृद्धे सति **प्रलयं** मृत्युं **याति** प्राप्नोति **देहभृत्** देहाभिमानी जीवः। उत्तमो हरिः, तद्विदां हिरण्यगर्भादीनां **लोकान्** तत्स्वामिकान्[2] **अमलान्** रजस्तमोमलरहितान् **प्रतिपद्यते** प्राप्नोति॥ १४॥

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।
तथा प्रलीनस्तमसि मूढयोनिषु जायते॥ १५॥

रजसि प्रवृद्धे सति **प्रलयं गत्वा** मृत्युं प्राप्य, **कर्मसङ्गिषु** श्रुत्यादिविहितप्रतिषिद्धकर्मफलाधिकारिषु मनुष्येषु **जायते। तथा** तद्वदेव **तमसि** प्रवृद्धे **प्रलीनः** मृतः **मूढयोनिषु** पश्वादिषु **जायते** ॥ १५॥

इदानीं स्वानुरूपकर्मद्वारा सत्त्वादीनां विचित्रफलतां सङ्क्षिप्याह - **कर्मण इति॥**

---

[1] वाक्यमिदं अ कोशे न पठ्यते। [2] उत्तमा ये हिरण्यगर्भादयस्तद्विदां तदुपासकानां लोकान् देवसुखोपभोगस्थानविशेषान्।**इति मधुसूदनसरस्वतीये**

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम्॥ १६॥

सुकृतस्य सात्त्विकस्य **कर्मणः** धर्मस्य **सात्त्विकं** सत्त्वेन निवृत्तं **निर्मलं** रजस्तमोमलामिश्रितं सुखं **फलमाहुः** महर्षयः। **रजसः** राजसस्य कर्मणः पापमिश्रस्य पुण्यस्य **फलं** राजसं **दुःखं** दुःखबहुलमल्पसुखम्। कारणानुरूपत्वात् कार्यस्य। **अज्ञानम्** अविवेकप्रायं दुःखं तामसं **तमसः** तामसस्य 'कर्मणो = धर्मस्य फलमाहुः' इत्यनुषङ्गः। सात्त्विकादिधर्मलक्षणमष्टादशे वक्ष्यते। अत्र रजस्तमःशब्दौ तत्कार्ये कर्मणि प्रयुक्तौ। कार्यकारणयोरभेदोपचारात्। 'गोभिः श्रोणीत मत्सरम्' इत्यत्र यथा गोशब्दस्तत्प्रभवे पयसि, यथा वा 'धान्यमसि धिनुहि देवान्' इत्यत्र धान्यशब्दस्तत्प्रभवे तण्डुले॥ १६॥

सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥ १७॥

सर्वकारणद्वारकं प्रकाशरूपं **ज्ञानं सत्त्वात् सञ्जायते**। अतस्तदनुरूपसात्त्विकस्य कर्मणः प्रकाशबहुफलं सुखं फलं भवति। **रजसो लोभः** विषयकोटिप्राप्त्याऽपि निवर्तयितुमशक्याभिलाषविशेषो जायते। तस्य च निरन्तरमुपचीयमानस्य पूरयितुमशक्यस्य सर्वदा दुःखहेतुत्वात् तत्पूर्वकराजसस्य कर्मणो दुःखं फलं भवति। एवं **प्रमादमोहौ** प्राग्व्याख्यातौ **तमसः** सकाशात् **भवतः** जायेते। अतस्तामसस्य कर्मणस्तामसमज्ञानादिप्रायमेव फलं भवतीत्यर्थः॥ १७॥

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तस्था[1] अधो गच्छन्ति तामसाः॥ १८॥

अत्र तृतीये गुणे वृत्तशब्दप्रयोगादाद्ययोरपि वृत्तमेव विवक्षितम्। तेन **सत्त्वस्थाः** सत्त्ववृत्ते शास्त्रीये ज्ञाने कर्मणि च निरताः **ऊर्ध्वं** सत्यलोकपर्यन्तं देवलोकं

[1] जघन्यगुणवृत्तिस्थाः - पा.।

गच्छन्ति। देवलोकेषूत्पद्यन्ते ज्ञानकर्मतारतम्येन। तथा **मध्ये** मनुष्यलोके पुण्यपापमिश्रे **तिष्ठन्ति।** नतूर्ध्वं गच्छन्ति, अधो वा। मनुष्येषूत्पद्यन्ते। **राजसाः** रजोगुणवृत्ते लोभादिपूर्वके राजसे कर्मणि निरताः। **अधो गच्छन्ति** पश्वादिषूत्पद्यन्ते। कदाचिज्जघन्यगुणवृत्तस्थाः सात्त्विका राजसाश्च[1] भवन्ति। तत्राह - **तामसाः** सर्वदा तमःप्रधानाः। इतरेषां कदाचिद्वृत्तस्थत्वेऽपि न तत्प्रधानतेति भावः॥ १८॥

गुणैर्बन्धनप्रकारमुक्त्वा तेषां मोक्षणप्रकारमाह - **नान्यमिति॥**

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥ १९॥

यदा द्रष्टा विवेकी **गुणेभ्यः** कार्यकारणविषयाकारपरिणतेभ्यः **अन्यं कर्तारं** कृत्यादिमन्तं **न** वेत्ति। **गुणेभ्यः परं** गुणतत्कार्यास्पृष्टं गुणनियन्तारं सदनन्तगुणालयं सर्वेश्वरम्, चशब्दात् कदाचिद्गुणस्पृष्टं स्वभावतो गुणादिविविक्तं चिदानन्दस्वरूपं जीवम्। **स मद्भावम्** आविर्भूतज्ञानानन्दत्वनिर्मुक्तत्वादिरूपां साधर्म्याख्यां मुक्तिम् **अधिगच्छति।**

ननु 'कर्ता शास्त्रार्थवत्त्वात्'[2] इत्यादिशास्त्रोक्तं जीवस्यापि कर्तृत्वमस्तीति कथमुच्यते **नान्यं गुणेभ्यः कर्तारम्** इति? इति चेत्। जीवस्य प्रवाहानादिः कर्मादृष्टादौ मदीयमित्यभिनिवेशः। स्वस्वामित्वसम्बन्धेन कर्मादृष्टादिकं जीवे सम्बद्धम्। तादृशस्वजनकादृष्टवत्त्वेन सम्बन्धेन बुद्धावुत्पन्नमपि कृतिसुखदुःखादिकं वास्तवं जीवे वर्तते। कर्मादौ ममेत्यभिमाननिवृत्तौ चान्तःकरण उत्पन्नमपि सम्बन्धाभावाज्जीवे न वर्तते। अतोऽभिनिवेशराहित्येन जीवस्य स्वतोऽकर्तृत्वमित्यभिप्रायेणोक्तम् **गुणेभ्योऽन्यम्** इत्यादिकम्। अभिमानस्य वास्तवकर्तृत्वाभिप्रायेण 'कर्ता शास्त्रार्थवत्त्वात्' इत्यादिकमिति भावः॥ १९॥

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते॥ २०॥

---

[1] राजसास्तामसाश्च इति कोशे प्रामादिकः। [2] **ब्रह्मसूत्रम्** २.२.३३

देही देहे 'अहं मम' इत्यभिमानी **एतान्** सत्त्वादीन् **त्रीन्** **अतीत्य** अतिक्रम्य। देहस्य समुद्भवो येभ्यस्तान् **देहसमुद्भवान्** देहोत्पत्तिबीजभूतान्। जीवन्नेव गुणेभ्यः परं हरिमाराध्य तत्प्रसादलब्धविवेकेन गुणानतिक्रम्य जन्ममृत्युजराभिर्यान्याध्यात्मिकादीनि दुःखानि तैर्मुक्तो जीवन्नेव तत्सम्बन्धशून्यः सन् **अमृतम्** मत्साम्याख्यं मोक्षम् **अश्नुते** प्राप्नोति॥ २०॥

गुणानेतानतीत्यामृतत्वमश्नुत इत्येतच्छ्रुत्वा गुणातीतस्य लक्षणं तदाचारं गुणात्ययोपायं च सम्यग्बुभुत्सया पृच्छति -

अर्जुन उवाच
कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो।
किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते॥ २१॥

एतान् गुणानतीतः कैर्लिङ्गैः विशिष्टो भवति, यैर्ज्ञातुं शक्यः। किमाचारोऽस्य स **किमाचारः**। किं यथेष्टः? किं वा नियन्त्रितः? इति। **कथं च** केन चोपायेन **एतांस्त्रीन् गुणानतिवर्तते** अतिक्रामति॥ २१॥

'स्थितप्रज्ञस्य'[1] इत्यादिना पृष्टमपि 'प्रजहाति'[2] इत्यादिनोत्तरितमपि पुनः प्रकारान्तरेण बुभुत्समानः पृच्छतीत्यवधार्य तस्य लक्षणादिकमाह - **प्रकाशमिति पञ्चभिः॥**

श्रीभगवानुवाच
प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति॥ २२॥

प्रकाशं सत्त्वकार्यं **प्रवृत्तिं** रजःकार्यं **मोहं** तमःकार्यम्। उपलक्षणमेतत्। सर्वाणि गुणकार्याणि यथायथं **सम्प्रवृत्तानि** स्वसामग्रीवशादुद्भूतानि सन्ति। दुःखस्वरूपाण्यपि दुःखबुद्ध्या यो **न द्वेष्टि**। तथा विनाशसामग्रीवशात् **निवृत्तानि** सुखरूपाण्यपि सन्ति। सुखबुद्ध्या **न काङ्क्षति** न वाञ्छति। गुणानां गुणकार्याणां

---
[1] भगवद्गीता २.५४ [2] भगवद्गीता २.५५

चानात्म्यत्वात् अनात्मधर्मत्वाच्च। अन्तःकरणोत्पन्नसुखादेरुक्तरीत्याऽऽत्मनि स्वाभाविकसम्बन्धाभावात्। सुखदुःखादीनामात्मनि सम्बन्धघटकस्याभिमानस्यात्मतत्त्वविदो निवृत्तत्वादिति भावः। एतादृशरागद्वेषशून्यो यः स गुणातीत उच्यते इति चतुर्थश्लोकेनान्वयः[1] इदं च स्वसंवेद्यलक्षणमुक्तम्। नह्यन्यदीयरागद्वेषादिकमन्यस्य प्रत्यक्षमस्ति॥ २२॥

लक्षणमुक्त्वाऽऽचारमाह - **उदासीनवदिति त्रिभिः॥**

उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते॥ २३॥

यथा उदासीनो द्वयोर्विवदमानयोः कस्यचित् प्रत्यक्षमभजमानो न रज्जति न वा द्वेष्टि, तथाऽयमात्मतत्त्ववित् रागद्वेषशून्यतया **आसीनः** जातभगवदपरोक्षः **गुणैः** सुखदुःखाद्याकारपरिणतैः **यो न विचाल्यते** निष्ठातो न प्रच्याव्यते। किन्तु, '**गुणाः** एवैतैरीश्वरप्रेरिता देहेन्द्रियविषयाकारपरिणताः परस्परस्मिन् **वर्तन्ते**। अहं तु चिदानन्दघनस्वरूप एभ्योऽत्यन्तविलक्षणः सदैकाकारः। एते जडस्वरूपा विकारिणश्च' इति निश्चित्य, आत्मतत्त्वे **अवतिष्ठति** अवतिष्ठते। **नेङ्गते** नतु रागादियुक्तः सन् गुणाद्यनुसारेण चेष्टते व्यापारं करोति। 'गुणातीतः स उच्यते' इति तृतीयेनान्वयः॥ २३॥

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः॥ २४॥

सः **समदुःखसुखः**। कस्मादेवम् ? यतः **स्वस्थः** स्वीये परमानन्दरूपेऽपरोक्षीकृते भगवति स्थितः भगवत्प्रसादेनाविर्भूतपूर्णानन्दस्वस्वरूपे वा स्थितः[2] अत एव समानि हेयोपादेयभावरहितानि लोष्टाश्मकाञ्चनानि यस्य स तथा। लोष्टः = मृत्पिण्डः। अत एव तुल्ये प्रियाप्रिये सुखदुःखसाधने यस्य हितसाधनत्वाहितसाधनत्वबुद्धिविषयत्वाभावेनोपेक्षणीयत्वात्। **धीरः** धीमान्, धृतिमान् वा। अत एव तुल्ये निन्दात्मसंस्तुती दोषकीर्तनगुणकीर्तने यस्य सः, 'गुणातीतः स उच्यते' इति द्वितीयेनान्वयः॥ २४॥

[1] **भगवद्गीता** १४.२५। [2] स्वस्मिन्नात्मन्येव स्थितो द्वैतदर्शनशून्यत्वात्।**इति मधुसूदनसरस्वतीये** ।

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते॥ २५॥

मानः = सत्कारः, अपमानः = असत्कारः, आदरानादरौ तयोः **तुल्यः** हर्षविशादशून्यः। निन्दास्तुती शब्दरूपे। मानापमानौ तु शब्दं विनाऽपि कायमनोव्यापारविशेषाविति भेदः। **तुल्यो मित्रारिपक्षयोः** मित्रपक्षस्येवारिपक्षस्यापि द्वेषाविषयः। मोक्षानुपयुक्तसर्वारम्भान् त्यक्तुं शीलमस्य सः **सर्वारम्भपरित्यागी।**

'उदासीनवदासीनः' इत्याद्युक्तानि लक्षणानि साधकेन यत्नादनुष्ठेयानि जीवन्मुक्तस्यायत्नसिद्धानि लक्षणत्वेन तिष्ठन्तीति विवेकः॥ २५॥

गुणातिक्रमोपायमाह - **मामिति॥**

मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥ २६॥

माम् एवेश्वरं सर्वभूतान्तर्यामिणं जगदुदयादिकर्तारं वासुदेवम्[1] **अव्यभिचारेण** अन्तरायसहस्रेणाप्यप्रतिबद्धेन सर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपेण **भक्तियोगेन सेवते, सः** मद्भक्तः **एतान्** प्रागुक्तान् **गुणान् समतीत्य** सम्यगतिक्रम्य तिरस्कृत्य **ब्रह्मभूयाय** आविर्भूतब्रह्मगुणत्वाय पूर्णानन्दस्वरूपमोक्षाय **कल्पते** योग्यो भवति।[2]

सर्वदा भगवतोऽनन्तगुणालयस्य भक्तवत्सलस्य सर्वेश्वरस्य श्रीवासुदेवस्य भक्तिरेव गुणातिक्रमोपाय इति भावः[3]॥ २६॥

ननु 'मद्भक्ता यान्ति माम्' इत्यादिना त्वद्भक्तानां त्वत्प्राप्तिरेवोक्ता। कथमिदानीं त्वद्भक्तानां ब्रह्मप्राप्तिरुच्यते? इति मन्दाशङ्कामपाकरोति - **ब्रह्मण इति॥**

[1] मामेश्वरं नारायणं सर्वभूतान्तर्यामिणं मायया क्षेत्रज्ञतामागतं परमानन्दघनं भगवन्तं वासुदेवम् **इति मधुसूदनसरस्वतीये** [2] एतान् प्रागुक्तान् गुणान् समतीत्य सम्यगतिक्रम्याद्वैतदर्शनेन बाधित्वा ब्रह्मभूयाय ब्रह्मभवनाय मोक्षाय कल्पते समर्थो भवति।**इति मधुसूदनसरस्वतीये**
[3] सर्वदा भगवच्चिन्तनमेव गुणातीतत्वोपाय इत्यर्थः।**इति मधुसूदनसरस्वतीये**

ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥ २७॥

ब्रह्मणः पूर्णगुणस्य **प्रतिष्ठा** पर्याप्तिः **अहम्** एव। नतु मद्भिन्नं ब्रह्मास्ति। अतः मद्भक्ता मां ब्रह्म प्राप्नुवन्तीति युक्तमेव। यथा **अमृतस्य** अमृतत्वस्य मोक्षस्य वा **अव्ययस्य** सर्वथाऽनुच्छेद्यस्य प्रतिष्ठाऽहमेव। मय्येव मोक्षः पर्यवसितः, मत्प्राप्तिरेव मोक्ष इत्यर्थः। तथा **शाश्वतस्य** नित्यमोक्षफलकस्य **धर्मस्य** सर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपभक्तिनिष्ठालक्षणस्य प्राप्तिरहमेव। स धर्मो मय्येव पर्यवसितः, न मद्भिन्नं किञ्चित् प्राप्तम्। किन्तु, अहमेवेत्यर्थः। तथा **ऐकान्तिकस्य सुखस्य च** पर्याप्तिरहमेव। परमानन्दरूपत्वात्। न मद्भिन्नमुत्कृष्टं किञ्चित् सुखमस्तीत्यर्थः। जीवसुखानां मत्स्वरूपसुखापेक्षयाऽपकृष्टत्वात्। अतो युक्तमेवोक्तम् - 'मद्भक्तो ब्रह्मभूयाय कल्पते' इति।

महान्तस्तु,[1] "यो मामव्यभिचारेण भक्तियोगेन सेवते स ब्रह्मभूयाय कल्पते। 'तासां ब्रह्म महद्योनिः' इत्यादिना प्रागुक्ता चित्प्रकृतिर्लक्ष्मीपदेनोच्यते। ब्रह्मवद्भूयं ब्रह्मभूयं तस्मै **ब्रह्मभूयाय** लक्ष्मीवत् मम प्रियो भवतीत्यर्थः। ननु त्वद्भक्तानां लक्ष्मीतुल्यता कथम्? लक्ष्म्युपासकानामेव लक्ष्मीतुल्यता युज्यते। त्वद्भक्तानां त्वत्तुल्यता। तत्राह - **ब्रह्मणः** लक्ष्म्याः **अहं प्रतिष्ठा** आश्रयः। सा मदाश्रिता मदविनाभूता। तां प्राप्तो मामेव प्राप्तः। तत्तुल्यतां प्राप्तेन मत्तुल्यता प्राप्तेवेति भावः। शेषं प्रागिव" इति व्याचक्षते।[2]

यत्तु, "**ब्रह्मणः** तत्पदवाच्यसोपाधिकस्य जगदुदयादिहेतोः **प्रतिष्ठा** पारमार्थिकं निर्विकल्पसच्चिदात्मकनिरुपाधिकं तत्पदलक्ष्यम् **अहम्** निर्विकल्पको वासुदेवः प्रतितिष्ठत्यत्रेति **प्रतिष्ठा** कल्पितरूपरहितमकल्पितम्। **यो मां** निरुपाधिकं ब्रह्म **सेवते स ब्रह्मभूयाय कल्पते** " इत्याह[3], तदतितुच्छम्। षड्गुणयुक्तस्यैव वासुदेवपदार्थत्वात्। सदनन्तगुणालयो विश्वोदयादिकर्ता सर्वनियामकः सर्वाधारोऽचिन्त्यशक्तिः पार्थसारथ्ये धृताश्वरज्जुप्रतोदोऽस्मच्छब्देन

---

[1] आनन्दतीर्थभगवत्पादास्त्वित्यर्थः। [2] ब्रह्मवत् प्रकृतिवत् भगवत्प्रियत्वं ब्रह्मभूयम्। नतु तावत्प्रियत्वम्। किन्तु प्रियत्वमात्रम्। 'बद्धो वाऽपि तु मुक्तो वा न रमावत् प्रियो हरेः' इति पाद्मे। भूयाय भावाय। ब्रह्मणो मायायाः।**इति मध्वभाष्यम्** नात्र ब्रह्मशब्दं परं ब्रह्म किन्तु 'मम योनिर्महद्ब्रह्म' इति प्रकृता प्रकृतिरेव। ... मायेति प्रकृता महालक्ष्मीः।**इति प्रमेयदीपिका**
[3] मधुसूदन इत्यर्थः।

कृपया स्वस्वरूपं शृङ्गग्राहकतया ह्युपदिशति। 'परं ब्रह्म परं धाम'[1] इत्यादिवक्ता पार्थस्तु जानात्येव तन्माहात्म्यम्। मध्यस्थानां शङ्कैव भगवता निराकृता॥

'शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्दिते।
मैत्रेय भगवच्छब्दः सर्वकारणकारणे॥
संभर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः।
नेता गमयता स्रष्टा गकारार्थस्तथा मुने॥
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः॥
एवमेष महाञ्छब्दो भगवानिति सत्तम।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥[2]'

इति श्रीवैष्णवे वासुदेवशब्दस्य परमैश्वर्यवाचकत्वमुक्तम्। त्वन्मते त्वस्मच्छब्दस्य चिदचित्संवलितपरत्वाच्च। तत्पदवाच्यादधिकार्थस्य लाक्षणिकबोधेऽभाने लक्षणवैय्यर्थ्यम्। भाने लक्ष्यार्थस्य निर्विकल्पकत्वासिद्धेः॥ २७॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे प्रकृतिगुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥ १४॥

[1] **भगवद्गीता** १०.१२ [2] **विष्णुपुराणम्** ६.५.७२-७६

अध्यायः 15

पुरुषोत्तमयोगः

संसारपादपोऽनादिर्दुर्ज्ञेयश्चाकृतात्मनाम्।
तच्छेदनं स्वमाहात्म्यं च पञ्चदश उच्यते॥

पूर्वाध्याये संसारबीजरूपं गुणत्रयमुक्तम्। अत्र समग्रं सारमुक्त्वा तदत्ययेच्छं प्रति प्रागुक्तं तदत्ययसाधनं सुखबोधाय प्रपञ्चयति पञ्चदशे।

'मां च योऽव्यभिचारेण'[1] इत्यनेन स्वभजनस्य गुणातिक्रमहेतुतोक्ता। तत् कथं मनुष्यसाम्यतया दृश्यमानस्यैतादृशमाहात्म्यम्? इति मन्दाशङ्कानिराकरणायानन्यसाधारणं स्वमाहात्म्यं च वदति। तत्रादौ जगतो वृक्षसाम्यमाह -ऊर्ध्वेति॥

श्रीभगवानुवाच
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥ १॥

---

[1] भगवद्गीता १४.२६

ऊर्ध्वानि विष्णुचिदचित्प्रकृतित्रिगुणमूलानि[1] यस्य तम् **ऊर्ध्वमूलम्**। **अधःशाखं** विष्णवाद्यपेक्षयाऽधो निकृष्टं ब्रह्मादिचेतनं महदाद्यचेतने च शाखा यस्य तम्। श्वोऽप्येकप्रकारेण न स्थास्यतीति **अश्वत्थम्** [2] अश्ववच्चाञ्चल्येन स्थितं वा **अश्वत्थम्** [3] सदा जन्मादिविकारोपेतमित्यर्थः। तथाऽपि प्रवाहरूपेण तत्तत्कालानुसारेण कालत्रयेऽप्यस्तीत्याह -**अव्ययमिति**॥ 'ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थः सनातनः'[4] इत्याद्याः श्रुतयः **प्राहुः** ,

'अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः।
बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः॥

महाभूतानि शाखाश्च विषयैः पल्लवांस्तथा।
धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः॥

आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः।
एतद्ब्रह्मवने[5] चैव ब्रह्माचरति साक्षिवत्॥

एतच्छित्वा च भित्वा च ज्ञानेन परमासिना।
तत आत्मगतिं प्राप्य तस्मान्नावर्तते पुनः[6]॥'[7]

इत्याद्याः स्मृतयश्च।

अव्यक्तः = हरिः, मूलं यस्य सः। तस्याव्यक्तस्यानुग्रहादतिदृढादुत्थितः संवर्धितः। वृक्षस्य हि शाखाः स्कन्धादुद्भवन्ति। संसारस्य च बुद्धेः सकाशान्नानाविधाः परिणामा विभवन्ति। तेन साधर्म्येण बुद्धिरेव स्कन्धः। तत्प्रचुरोऽयं बुद्धिरत्र महत्तत्वम्। इन्द्रियाणाम् अन्तराणि = छिद्राण्येव कोटराणि यस्य सः। महान्ति भूतान्याकाशादीनि। विविधाः शाखा यस्य विशाखा स्तम्भा यस्येति वा। आजीव्यः = उपजीव्यः। परब्रह्मणाऽधिष्ठितो वृक्षो ब्रह्मवृक्षः। भगवज्ज्ञानं विना छेत्तुमशक्यतया। एतद्ब्रह्मवनं जीवरूपब्रह्मणो भोग्यं ब्रह्मणोऽधीनं च। परं ब्रह्म साक्षिवदाचरति। तत् त्वेतत्कृते न लिप्यते। एतद्ब्रह्मवनं

[1] 'पृथङ्मूलं हरिस्तस्य जगद्वृक्षस्य भूमिवत्। सत्त्वादियुक्ते चिदचित्प्रकृती मूलभागवत्॥' इति गीतातात्पर्योदाहृतानारायणश्रुतिः। [2] श्वोऽप्येकप्रकारेण न तिष्ठतीत्यश्वत्थः।**इति मध्वभाष्यम्** । [3] 'जगद्वृक्षोऽयमश्वत्थो ह्यश्ववच्चञ्चलात्मकः' इति गीतातात्पर्योदाहृतानारायणश्रुतिः॥ [4] **कठोपनिषत्** ६.१ [5] एतद्ब्रह्मवनं - शाङ्करपाठः। [6] ततश्चात्मरतिं प्राप्य यस्मान्नावर्तते पुनः- शाङ्करपाठः। [7] **महाभारतम्** १४.४७.११-१४

छित्वा भित्वा वैराग्याख्येन खड्गेण निःशेषं छित्वेत्यर्थः। ब्रह्मगतिं = ब्रह्मज्ञानं प्राप्य पुनर्नावर्तन्त इत्यर्तः।

अत्र च गङ्गातरङ्गतुद्यमानोत्तुङ्गतीरतिर्यङ्गिपतितमर्धोन्मूलितं मारुतेन महान्तमश्वत्थमुपमानीकृत्य जीवन्तमियं रूपककल्पनेति द्रष्टव्यम्। तेन नोर्ध्वमूलाधःशाखाद्यनुपपत्तिः।

यस्य वृक्षस्य **छन्दांसि** छादनात् तत्त्ववस्तुप्रावरणात् संसारवृक्षरक्षणाद्वा कर्मकाण्डानि ऋग्यजुःसामानि धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् तेषां **यस्तं** व्याख्यानं **वेद स वेदवित्**। संसारवृक्षं ज्ञात्वा वैराग्यपूर्वकभगवदाराधनेनोत्पन्नभगवदपरोक्षेण वृक्षं छित्वा मुक्तिं प्राप्नुयादिति हि सर्ववेदार्थः। तं यो वेद स एव सर्ववेदार्थविदिति भावः॥ १॥

तस्यैव वृक्षस्यावयवसम्बन्धिन्यपरा कल्पनोच्यते -**अध इति**॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः।
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके॥ २॥

तस्य जगद्वृक्षस्य **शाखाः** शाखात्वक्शाखास्थानीयानि पञ्चभूतानि **अधः** निकृष्टम् **ऊर्ध्वम्** उत्कृष्टं **च प्रसृताः** तदुभयत्र स्थिताः। जगद्वृक्षस्य शाखारूपाणि भूतानि स्वकार्यशरीरादौ स्वकारणे प्रकृत्यादौ च सूक्ष्मरूपेण सन्तीति भावः[1] कीदृश्यः शाखाः? गुणैः सत्त्वादिभिरर्वाचीनमूलरूपैः प्रवृद्धाः। लोकेऽप्यवान्तरमूलैः शाखानां वृद्धिः भवति। विषयाः = शब्दाद्याः प्रवालाः = पल्लवरूपा यासां ताः। प्रतीतिसुखहेतुत्वाद्विषयाणां पल्लवसाम्यम्। **अधश्चानुसन्ततानि** व्याप्तानि **मूलानि**। तानि च **कर्मानुबन्धीनि** कर्म चानुबन्धश्चरमं कारणम्। तेन युक्तानि। सर्वस्य कर्मापेक्षया प्रवृत्तत्वात्। ईश्वरस्यापि कर्मापेक्षया फलदातृत्वात्। अस्य वृक्षस्य स्वरूपं मनुष्ये तथा नोपलभ्यत इत्युत्तरेणान्वयः।

[1] अव्यक्तेऽपि सूक्ष्मरूपेण सन्ति शरीरादौ च भूतानीत्यधश्चोर्ध्वं च प्रसृताः।**इति मध्वभाष्यम्**
।

यद्वा जीवाः सानुशयाः शाखाः। तत्र दुष्कृतिनः **अधः** पश्वादियोनिषु **प्रसृताः** विस्तारं गताः। सुकृतिनः **ऊर्ध्वं** देवादियोनिषु **प्रसृताः** अधो मनुष्यत्वादारभ्यार्वाक्पर्यन्तमूर्ध्वं मनुष्यत्वादारभ्य सत्यलोकपर्यन्तं प्रसृताः जगद्वृक्षस्य शाखाः[1] कीदृशाः? गुणैः सत्त्वादिभिर्देहादिरूपेण परिणतैर्जलसेचनैरिव प्रवृद्धाः। किञ्च, विषयाः = शब्दाद्याः प्रवालाः = शाखाग्रस्थानीयाभिरिन्द्रियवृत्तिभिः सह सम्बन्धाद्रागाधिष्ठानत्वाच्च पल्लवा इव पल्लवा यासां संसारवृक्षशाखानां तथा। **अधश्च मूलानि** अवान्तराणि तत्तद्भोगजनितरागद्वेषादिवासनादिमूलानीव धर्माधर्मप्रवृत्तिकारणानि तस्य जगद्वृक्षस्य **अनुसन्ततानि** अनुस्यूतानि। मुख्यं मूलं विष्णुचित्प्रकृत्यादिकमेवेति न दोषः। कीदृशा अवान्तरमूलानि कर्म = धर्माधर्मलक्षणम् अनु = बन्धं पश्चाज्जनयितुं शीलं येषां तानि **कर्मानुबन्धीनि**। कुत्र? **मनुष्यलोके** मनुष्याणां हि कर्माधिकारः प्रसिद्धः॥ २॥

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूल-
मसङ्गशस्त्रेण दृढेन छित्त्वा॥ ३॥

अस्य जगद्वृक्षस्य स्वरूपं सविकारित्वादिकं क्षणभङ्गुरमापातरम्यं यथा स्थितं प्राग्वर्णितं **तथा नोपलभ्यते**। किञ्च, **आदिः** उत्पत्तिः, **अन्तः** विनाशः, **प्रतिष्ठा** स्थितिः, इत आरभ्योऽन्यदिति नोपलभ्यते, अनादित्वात्। एतावता कालतोऽनुसमाप्तिर्भविष्यतीत्यन्तो नोपलभ्यते, अपर्यन्तत्वात्। **प्रतिष्ठा** अन्तम् अस्य नोपलभ्यते। आद्यन्तयोर्दुर्निरूपत्वेन तत्प्रतियोगिकमध्यस्यापि दुर्निरूपत्वात्। अनाद्यनुरागादिना **सुविरूढमूलम्** अत्यन्तबद्धमूलं प्रागुक्तम् **अश्वत्थमेनम्, असङ्गशस्त्रेण**। सङ्गः = स्पृहा, असङ्गः = सङ्गविरोधि वैराग्यम्, पुत्रवित्तलोकैषणात्यागरूपम्, तदेव शस्त्रं रागद्वेषभयसंसारविरोधित्वात् तेन **असङ्गशस्त्रेण। दृढेन** भगवज्ज्ञानौत्कण्ठीकृतेन पुनःपुनर्विवेकाभ्यासितेन **छित्त्वा** निःशेषमुत्कृत्य, 'ततः पदं तत् परिमार्गितव्यम्' इत्युत्तरेणान्वयः॥ ३॥

ततः पदं[2] तत्परिमार्गितव्यं

---

[1] अधःशाखाः पुनरपि मनुष्यपश्वादिरूपेण प्रसृता भवन्ति। ऊर्ध्वं च गन्धर्वयक्षदेवादिरूपेण प्रसृता भवन्ति।**इति रामानुजभाष्ये** । [2] परं - पा.

यस्मिन्गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी॥ ४॥

ततः गुरुमुपसृत्य, **ततः** अश्वत्थवृक्षादूर्ध्वं व्यवस्थितं **तत्** वैष्णवं **पदं** पद्यत इति पदं = स्वरूपम्, वेदान्तवाक्यैः **परिमार्गितव्यं** श्रवणादिनाऽन्वेष्टव्यम्। 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः'[1] इति श्रुतेः। **यस्मिन्** पदे **गताः** साक्षात्कारेण प्रविष्टाः साधर्म्यरूपसायुज्यं प्राप्ता इत्यर्थः। **न निवर्तन्ति** न निवर्तन्ते **भूयः** पुनः, संसारे न पतन्तीत्यर्थः।

परिमार्गणप्रकारमाह - '**तमेव चाद्यं** सर्वादौ विद्यमानं **पुरुषं** येनेदं पूर्णं तं पुरुषु पूर्षु वा शयानं सर्वान्तर्यामिणं **प्रपद्ये** शरणागतोऽस्मि' इत्येवं तदेकशरणतया तदन्वेष्टव्यमित्यर्थः। तं कं पुरुषम्? **यतः** यस्मात् पुरुषात् **प्रवृत्तिः** संसारवृक्षप्रवृत्तिः **पुराणी** चिरन्तन्यनादिः **प्रसृता** तं जगद्वृक्षकारणं पुरुषं प्रपद्य इत्यन्वयः॥ ५॥

परिमार्गणे साधनान्तराण्याह - **निर्मानेति॥**

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत्॥ ५॥

मानः = अहङ्कारः, गर्वः। मोहस्त्वविवेको विपर्ययो वा। ताभ्यां निर्गताः **निर्मानमोहाः**। तौ निर्गतौ येभ्यस्ते वा। तथा **जितसङ्गदोषाः** प्रियाप्रियसन्निधावपि रागद्वेषवर्जिताः। **अध्यात्मनित्याः** परमात्मस्वरूपालोचनतत्पराः। **विनिवृत्तकामाः** विशेषतो निवृत्ताः कामा भोगाभिलाषा येषां ते। **द्वन्द्वैः** शीतोष्णक्षुत्पिपासादिभिः **सुखदुःखसञ्ज्ञैः** सुखदुःखहेतुत्वात् सुखदुःखनामकैः **विमुक्ताः** इति। **अमूढाः** रजस्तमोजन्याज्ञानशून्याः वैचित्यरहिता इत्यर्थः। एतादृशाः **तदव्ययं पदं गच्छन्ति** ॥ ५॥

---

[1] छान्दोग्योपनिषत् ८.७.१

तदेव पदं विशिनष्टि - **न तदिति॥**

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥ ६॥

यत् वैष्णवं पदं **गत्वा** योगिनः **न निवर्तन्ते, तत्** पदं सर्वावभासनशक्तिमानपि **सूर्यो न भासयते, न शशाङ्कः** च, **न पावकः** अग्निर्भासयते। कुतः सूर्यादीनां प्रकाशनासामर्थ्यम्? तत्राह - **तद्धाम** ज्योतिः स्वयम्प्रकाशम् आदित्यादिसकलज्योतिःप्रकाशकं **परमं** प्रकृष्टं **मम** वासुदेवस्य स्वरूपात्मकम्। 'राहोः शिरः' इतिवदभेदे षष्ठी।

'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥'[1] इति श्रुतेः॥ ६॥

ननु यद्गत्वा न निवर्तन्त इत्ययुक्तम्। यदि हि गच्छन्ति तर्ह्यावर्तन्त एव स्वर्गिवत्। अथ नावर्तन्ते तर्हि न गच्छन्त्येव। अतो गत्वेति न निवर्तते चेति विरुद्धम्।

'सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्॥'[2]

इति शास्त्रे लोके च प्रसिद्धमिति शङ्कां निवारयति - **ममेति॥**

ममैवांशो जीवलोके जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥ ७॥

---

[1] **कठोपनिषत्** २.५.१५ [2] रामायणे २.९८.१६, ७.५१.१०, **महाभारतम्** ११.२.३, १२.२७.२९, १२.३१७.२०, १४.४४.१८, नारदपुराणे १.६१.३६

जीवलोके संसारे विद्यमानः **जीवभूतः** जीवस्वरूपः प्राणभर्ता कर्मकर्ता स्वर्गनरकादिभोक्ता चेतनः **मम** नित्यनिर्मुक्तस्य सर्वज्ञस्य पूर्णानन्दस्य नित्याचिन्त्यानन्ताद्भुतशक्तेरंश एव। तद्भिन्नत्वे सति तत्सदृशत्वे सति तदधीनत्वं प्रकृते तदंशत्वम्। अत एवोक्तम् **सनातनः** इति। मत्सदृशस्य जीवस्य प्रागविद्ययाऽऽच्छादितस्य मां प्राप्य मत्प्रसादेनाविर्भूतपूर्णानन्दस्याच्छादिकाया अविद्याया निःशेषतया नाशान्न पुनरावृत्तिः। तादृशानन्दाविर्भावस्तु लोकविशेषस्य विग्रहविशेषविशिष्टं मां प्राप्यैव 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'[1] इति श्रुतेः। यथोपदेष्टारं प्राप्याविर्भूतकौन्तेयत्वं राधेयस्य पुनर्नाच्छाद्यते तन्न निवतते, तथा मां प्राप्याविर्भूतपूर्णानन्दत्वं प्राप्य पुनर्नाच्छाद्यतेऽविद्याया नष्टत्वात्। नच निवर्तते स्वरूपभूतत्वादिति भावः।

ननु सुषुप्तावपि नाडीस्थभगवन्मूर्तिं प्राप्नोत्येव। ततः कथं पुनरावृत्तिः? तत्राह - **मन इति॥** मनः षष्ठं येषां तानि श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानि पञ्चेन्द्रियाणि। इन्द्रस्यात्मनो[2] विषयभोगोपलब्धिकरणतया लिङ्गानि जाग्रत्स्वप्नभोगजनककर्मक्षये **प्रकृतिस्थानि** प्रकृतौ स्वकारणे सूक्ष्मरूपेण स्थितानि। पुनर्जाग्रद्भोगजनककर्मोदये भोगार्थं **कर्षति** विषयग्रहणयोग्यतयाऽऽविर्भायतीत्यर्थः। सर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमसन्ततिरूपभक्त्या निवृत्ताशेषानुशया ये हरिं प्राप्ताः, तेषां न पुनरावृत्तिः। सुषुप्तौ तु सानुशया एव हरिं प्राप्नुवन्तीति पुनरावर्तत इति भावः॥ ७॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥ ८॥

यत् यदा **उत्क्रामति** मरणादौ बहिर्निर्गच्छति **ईश्वरः** देहेन्द्रियादिस्वामी जीवः **तदा** यतो देहादुत्क्रामति ततो मनःषष्ठानीन्द्रियाणि कर्षतीति पूर्वेणान्वयः। उत्क्रमणोत्तरभावित्वाद्गमनस्य। न केवलं कर्षत्येव, किन्तु **यत्** यदा पूर्वस्माच्छरीराच्छरीरान्तरम् **अवाप्नोति** तदा **एतानि** मनःषष्ठानीन्द्रियाणि **गृहीत्वा संयाति** अपि, सम्यक् पुनरागमनराहित्येन गच्छत्यपि। शरीरे सत्येवेन्द्रियग्रहणे दृष्टान्तः **आशयात्** कुसुमादेः स्थानात् **गन्धान्** गन्धात्मकान् सूक्ष्मानंशान् गृहीत्वा यथा वायुर्याति तद्वत्॥ ८॥

[1] **छान्दोग्योपनिषत्** ८.३.४ [2] इन्द्रियस्थात्मनो ?

तान्येवेन्द्रियाणि दर्शयन् यदर्थं गृहीत्वा गच्छति तदाह - **श्रोत्रमिति॥**

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते॥ ९॥

श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च, चकारात् कर्मेन्द्रियाणि प्राणं **च मनश्च** षष्ठम् **अधिष्ठायैव** आश्रित्यैव **विषयान्** शब्दादीन् **अयं** जीवः **उपसेवते** भुङ्क्ते॥ ९॥

उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः॥ १०॥

उत्क्रामन्तं देहान्तरं गच्छन्तं पूर्वस्मात् **स्थितं वाऽपि** तस्मिन्नेव देहे भुञ्जानं वा शब्दादीन् विषयान् **गुणान्वितं** सुखदुःखमोहात्मकैः सत्वादिगुणकार्यैर-न्वितम्। एवं सर्वास्ववस्थासु दर्शनयोग्यं सच्चिदानन्दघनं **विमूढाः** दृष्टादृष्टभो-गवासनात् कष्टचेतसा आत्मतत्त्वविवेकायोग्या **नानुपश्यन्ति**, ये तु **ज्ञानचक्षुषः** विवेकिनस्ते **पश्यन्ति** एव॥ १०॥

तदेव विवृणोति -

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः॥ ११॥

आत्मनि देहे **अवस्थितं** ज्ञानानदघनं **योगिनः** एकाग्रचित्ताः **यतन्तः** विषयेभ्य इन्द्रियप्रत्याहारं कुर्वन्तः **पश्यन्ति, एनं** जीवस्वरूपं **अकृतात्मनः** अशोधितान्तः-करणाः, अत एव **अचेतसः** विवेकशून्याः **नैनं पश्यन्ति**।

महान्तस्तु **शरीरं यदवाप्नोति** इत्यारभ्य **यतन्तोऽप्यकृतात्मनः** इत्यन्तमीश्वर-परतया व्याचक्षते[1] तत् सम्यगेवाज्ञेयत्वस्य मुख्यस्य भगवत्येव सम्भवात्।

[1] 'शब्दादीन् प्रत्यथ यदा जीवमादाय यात्यतः। गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥' इति गीतातात्पर्योदाहृता नारायणश्रुतिः॥

परन्तु **यदवाप्नोति** इति **उत्क्रामति** इत्यादौ सर्वत्रान्तर्भावितणिजर्थो बोध्यः। जीवं शरीरमापयति, उत्क्रामयतीत्यादि॥ ११॥

उक्तदुर्ज्ञेयस्वरूपज्ञानमुत्कृष्टं हरिभक्तितो भवति। सा तु माहात्म्यज्ञानादेव भवतीति स्वमाहात्म्यमाह - **यदिति चतुर्भिः॥**

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥ १२॥

यदादित्ये गतं = स्थितम्, **यच्चन्द्रमसि यच्चाग्नौ** स्थितमनेकप्रकारं भास्वरं रूपं परप्रकाशकं **तेजः** विश्वं प्रकाशयति **तत्** सर्वं **मामकं** मदीयां **विद्धि**। अहमेवादित्यादिषु सर्वं प्रकाशयामीत्यर्थः। यदादित्यादिषु परप्रकाशनरूपतेजस्तत् मदीयं मद्दत्तं मदधीनं च[1] विद्धीत्यर्थः। 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति'[2] इति श्रुतेः॥ १२॥

गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥ १३॥

गां भूमिम् **ओजसा** अचिन्त्यशक्त्या **आविश्य** प्रविश्य चराचरभूतानि **धारयामि**। भुवि यद्भूतादिधारणसामर्थ्यं तन्मदीयमित्यर्थः। अमृतप्रचुरः **सोमो भूत्वा** तत्र स्थित्वा व्रीह्याद्यौषधीः **पुष्णामि** वर्धयामि। चन्द्रे यदौषधीपोषणसामर्थ्यं तन्मदीयमित्यर्थः॥ १३॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥ १४॥

जठराग्नौ वैश्वानररूपेण स्थित्वा **प्राणिनां देहमाश्रितः** अग्न्युद्दीपकाभ्यां प्राणापानाभ्यां तन्नामकरूपाभ्यां प्रसिद्धाभ्यां वा सहितः प्राणिभिर्भुक्तं भक्ष्यं भोज्यं

[1] 'मामकं मदधीनं मदीयं च' इत्यनुकृत्यधिकरणतत्त्वप्रकाशिका। [2] **कठोपनिषत्** २.५.१५

लेह्यं चोष्यं चेति **चतुर्विधं** भुज्यमानम् पञ्चाग्निपक्वं च देहाद्युपचयकारणं करोति यद्दन्तैरवखण्ड्य भक्ष्यतेऽपूपादि तद्भक्ष्यम्। यत् केवलं जिह्वया विलोड्य निगीर्यते पायसादि तद्भोज्यम्। यज्जिह्वायां विनिक्षिप्य रसास्वादनेन निगीर्यते शर्करादि तल्लेह्यम्। यद्दंष्ट्राभिर्निष्पीष्य तत्सारांशं निगीर्यावशिष्टं त्यज्यते यथेक्षुदण्डादि तच्चोष्यमिति भेदः॥ १४॥

सर्वोत्तमाधिकारिभिर्ज्ञेयं निरतिशयमाहात्म्यमाह - **सर्वस्येति**॥

सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम्॥ १५॥

सर्वस्य चतुर्विधप्राणिसमूहस्य **हृदि** नियामकत्वेन स्थितः सर्वान्तर्यामीत्यर्थः। ततश्च **मत्तः** एव हेतोः **स्मृतिः** एतज्जन्मनि पूर्वानुभूतार्थविषयका वृत्तिः, योगिनां च जन्मान्तरानुभूतार्थविषयकाऽपि। तथा **ज्ञानं** विषयेन्द्रियसंयोगजं भवति। योगिनां च देशकालविप्रकृष्टविषयकमपि। एवं कामक्रोधशोकादिव्याकुलचेतसाम् **अपोहनं** स्मृतिज्ञानयोरपायश्च मत्त एव भवति। कार्यमात्रजनकत्वात् सर्वान्तर्यामित्वाच्चाहमेव सर्वोत्तम इत्युक्त्वा, सर्ववेदवेद्योऽप्यहमेवेत्याह - **वेदैश्च सर्वैः** इन्द्रचन्द्ररुद्रादिपरतया प्रतीयमानैः **अहमेव वेद्यः** सकलप्रवृत्तिनिमित्तानां परमैश्वर्यादीनां मयि सत्वात्। **वेदान्तकृत्** वेदान्तः फलं तत्कृत् फलदाता। व्यासरूपेण वेदान्तार्थनिर्णायकब्रह्ममीमांसाशास्त्रकर्ताऽप्यहमेवेति वा[1] **वेदविच्चाहमेव**। अन्यपरतया प्रतीयमानोऽपि यो वेदः स मुख्यवृत्त्या मामेव वदतीति निगूढं वेदार्थमहमेव जानामि। मत्प्रसादादन्योऽपि जानातीत्यर्थः॥ १५॥

पुरुषोत्तमत्वं मुमुक्षुज्ञेयमाह - **द्वाविति**॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ १६॥

[1] 'स एव व्यासरूपेण वेदान्तकृदुदाहृतः' इति गीतातात्पर्योदाहृता नारायणश्रुतिः॥

इमौ द्वौ प्रमितौ चेतने पुरिशयत्वात् **पुरुषौ लोके** अवलोकने सतीति यावत्। यद्वा परमपुरुषं व्यावर्तयितुं **लोके** इत्युक्तम्। ईशितव्यवर्ग इत्यर्थः। ब्रह्माद्या जीवाः प्राकृतदेहवन्तः **क्षरः** पुरुष उच्यते शरीरक्षरणात्। कूटलोहाद्यातायाधस्तत्(?) लोहस्तद्वत् पर्वतवद्वा निर्विकारतया तिष्ठतीति **कूटस्थः** रमादिमुक्तसमूहोऽक्षर उच्यते। देहादितोऽपि क्षरणाभावात्[1]॥[2]१६॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ १७॥

उत्तमः पुरुषः उत्तमोऽन्तर्यामी। स्वदेहेन्द्रियाणां नियन्तारो जीवा अपि भवन्ति। अयं तु सर्वेषामिन्द्रियाणां तन्नियामकानां च नियन्ता क्षराक्षाभ्याम् **अन्यः** भिन्नो विलक्षणश्च। तुशब्दोऽत्यन्तवैलक्षण्यद्योतकः। तस्योत्तमत्वं सर्वनियामकत्वनित्यानन्ताप्रच्युतैश्वर्यादीना। श्रुत्यादिसम्मतिमाह - **परमात्मेत्युदाहृतः** 'आत्मा नारायणः परः'[3] इत्यादिश्रुत्या

'स हि नारायणो ज्ञेयः परमात्मा सनातनः'[4]
'पूतात्मा परमात्मा च'[5] इत्यादिस्मृत्या च **उदाहृतः**।

युक्तिमप्याह - **य इति॥ लोकत्रयं** चेतनात्मकं बद्धमुक्तजीवजातं तत्स्थानं च **आविश्य** अचिन्त्यशक्त्या प्रविश्य **बिभर्ति** धारयति पालयति च। ननु नश्वरान्तर्गतत्वान्नाशादिविकारः स्यात्, तत्राह - **अव्ययः** सदैकाकारः। 'सदैकरूपरूपाय विष्णवे प्रभविष्णवे'[6] इति वैष्णवोक्तेः। ननु सर्वगतस्य परममहतः कथं प्रवेशः? प्रविष्टस्य च कथं निर्लेपत्वम्? तत्राह - **ईश्वर इति॥** 'महतो महीयान्'[7] इति श्रुतिसिद्धपरममहतः 'अणोरणीयान्'[8] इति श्रुत्युक्ताणुत्वेन

---

[1] 'ब्रह्मरुद्रादयः सर्वे शरीरक्षरणात् क्षराः। श्रीरक्षरात्मेत्युदिता नित्यचिद्देहका यतः॥' इति गीतातात्पर्योदाहृता नारायणश्रुतिः। [2] तत्र क्षरशब्दऽः पुरुषो जीवशब्दाभिलपनीयब्रह्मादिस्तम्बपर्यन्तक्षरणस्वभावाचित्संसृष्टसर्वभूतानि। अत्राचित्संसर्गरूपैकोपाधिना पुरुष इत्येकत्वनिर्देशः। अक्षरशब्दनिर्दिष्टः कूटस्थः अचित्संसर्गवियुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा। ... उत्तमः पुरुषस्तु ताभ्यां क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः।**इति रामानुजभाष्ये**
[3] **महानारायणोपनिषत्** १३.४ [4] 'स हि नारायणे देवः परआत्मा सनातनः' इति तु **कूर्मपुराणम्** २.३७.७२ [5] **महाभारतम्** १३.१३५.१५ (विष्णुसहस्रनामसु) [6] **विष्णुपुराणम्** १.२.१
[7] **कठोपनिषत्** २.२० [8] **कठोपनिषत्** २.२०

प्रवेशोपपत्तिः। लोक एकत्र विरुद्धयोरप्यणुत्वमहत्वयोस्तत्रैश्वर्यादविरोधेन समावेशः।

नचाज्ञत्वादिकमैश्वर्यात् समावेश्यताम्। अविरोधापादकैश्वर्याविरोधिनामेव हि समावेशः। अज्ञत्वादेरैश्वर्यविरोधित्वात्। अत एव प्रविष्टस्यापि निर्लेपत्वम्। 'असङ्गो ह्ययं पुरुषः'[1] इति श्रुतेः॥ १७॥

उदासीनतया व्याख्यातस्येश्वरस्य क्षराक्षरविलक्षणस्य पुरुषोत्तम इत्येतत् प्रसिद्धनामनिर्वचनेन परमेश्वरोऽहमेवेत्यात्मानं दर्शयति 'ब्रह्मणो हि प्रतिष्ठाऽहम्'[2] 'तद्धाम परमं मम'[3] इत्याद्युक्तस्वमहिमनिर्धारणाय - **यस्मादिति॥**

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ १८॥

यस्मात् क्षरं प्राकृतदेहवज्जीवसमूहम् **अतीतः** अतिक्रान्तः **अहं** सर्वेश्वरः **अक्षरादपि** रमादिमुक्तसमूहादपि **उत्तमः**। प्राकृतदेहवतां संसारे वर्तमानानां जीवानां मत्साम्यताऽपि नास्तीति ततोऽत्यन्तविलक्षणोऽहम्। मुक्तानां तु मत्साम्यमस्ति। परन्तु तन्नियामकत्वात् तेषामसम्भावितस्य विश्वोदयादेः कर्तृत्वाच्च तेभ्य उत्तम इति भावः। **अतो लोके**

'प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि॥
परमात्मा च सर्वेषामाधारः पुरुषोत्तमः।
स विष्णुनामा वेदेषु वेदान्तेषु च गीयते॥'[4]

इत्यादिऋषिवाक्ये 'स उत्तमः पुरुषः'[5] इत्यादिवेदे **च प्रथितः** प्रसिद्धोऽहं वासुदेवः **पुरुषोत्तमः** ॥ १८॥

पुरुषोत्तमत्वज्ञानमेव मुख्यं मद्भजनमित्याह - **य इति॥**

[1] **बृहदारण्यकोपनिषत्** ४.३.१५,१६ [2] **भगवद्गीता** १४.२७ [3] **भगवद्गीता** १५.६ [4] **विष्णुपुराणम्** ६.४.३९-४० [5] **छान्दोग्योपनिषत्** ८.१२.३

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत॥ १९॥

योऽसम्मूढः अयं कश्चित् मनुष्योत्तमः कश्चिद्देवश्रेष्ठो वेति सम्मोहवर्जितः **मां** पुरुषोत्तमं बद्धमुक्तनियन्तारं विश्वोदयादिकर्तारं वासुदेवं **जानाति**, **सः** कृताक्षय-पुण्यपुञ्जः प्राप्तमत्पूर्णप्रसादः **सर्ववित्** सर्वशास्त्रार्थज्ञः। एतावानेव सर्वशास्त्रार्थः। **सर्वभावेन** सर्वप्रकारेण **मां भजति** पुरुषोत्तम एव सर्वशास्त्रार्थः, तज्ज्ञानात् स सर्वज्ञः पुरुषोत्तमत्वज्ञानमेवोत्तमं मद्भजनम्, अतस्तज्ज्ञानी मां सर्वप्रकारेण भजतीति भावः॥ १९॥

पुरुषोत्तमत्वज्ञानमात्रमेवेतरसाधननिरपेक्षं मुक्तिसाधनम्। यस्मै कस्मैचिन्न तद्देयम्। अनधिकारिणोऽपि सानुशया एतत्प्राप्य मुक्ता भवेयुः। तथा च सृष्टेरुच्छेदः स्यादित्याशयवानाह - **इतीति**॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत॥ २०॥

इति उक्तप्रकारेण **गुह्यतमं** गोप्यतमं सम्पूर्णं शास्त्रमेवं सङ्क्षेपेण **इदं** पुरुषोत्तमत्वप्रतिपादकं **मयोक्तं** कुलेन शीलेन मद्भक्त्या चात्यन्तशुद्धाय तुभ्यं मयोपदिष्टम्, त्वया त्वादृशायैवोपदेष्टव्यम्, न यस्मै कस्मैचिदित्याशयेन सम्बोधयति - हे **अनघ**। **एतद्बुद्ध्वा** अन्योऽपि यः कश्चित् **बुद्धिमान्** मद्विषयकापरोक्षवान् **स्यात्**। कृतं सर्वं कृत्यं कर्तव्यं येन, न पुनः कृत्यान्तरं यस्यास्ति स **कृतकृत्यश्च** स्यात्। यद्विशिष्टजन्मप्रभूतेन ब्राह्मणादिनाऽनेकोपायैः कर्तव्यं तद्भगवतः पुरुषोत्तमत्वज्ञानमात्राद्भवतीति भावः॥ २०॥

॥ ॐ तत्सदिति श्रीमद् भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥ १५॥

अध्यायः 16

देवासुरसम्पद्विभागयोगः

माहात्म्यं नन्दपुत्रस्य प्रमाणैः प्रतिपादितम्।
शक्नुवन्ति न ये सोढुं तेऽक्षयं नरकं गताः॥

देवासुरस्वभावौ द्वौ निमित्ते बन्धमोक्षयोः।
अपृष्टः कृपया ब्रूते षोडशे तु रमापतिः॥

पूर्वाध्याये 'अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके' इत्यत्र मनुष्यदेहे प्राचीनकर्मानुसारेण व्यज्यमाना वासनाः संसारस्यावान्तरमूलत्वेनोक्तास्ताश्च[1] दैव्यासुरी राक्षसी चेति प्राणिनां प्रकृतयो नवमे सूचिताः। ज्ञानसाधनानुष्ठानार्थं 'निर्मान..'[2] इत्यनेन देवस्वभावोऽर्थत उक्तः। 'यतन्तोऽप्यकृतात्मानः'[3] इत्यासुरश्च। तत्र वेदबोधितकर्मात्मज्ञानोपायानुष्ठानप्रवृत्तिहेतुः सात्त्विकी शुभवासना दैवी प्रकृतिरित्युच्यते। एवं वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिसर्वानर्थहेतुप्रवृत्तिहेतुभूता राजसी तामसी चासुरवासनाऽऽसुरी राक्षसी च प्रकृतिरुच्यते। तत्र च विषयभोगप्राधान्ये रागप्राबल्यादासुरीत्वम्, हिंसाप्राधान्येन द्वेषप्राबल्याद्राक्षसीत्वमिति विवेकः।

---

[1] मधुसूदनीयानुसारेण योजितम्। संसारस्य वर्धकान्ताश्च इति तु कोशे। [2] **भगवद्गीता** १५.३
[3] **भगवद्गीता** १५.११

सम्प्रति तु शास्त्रानुसारेण तद्विहितप्रवृत्तिहेतुभूता सात्त्विकी शुभवासना दैवी सम्पत्। शास्त्रातिक्रमेण तन्निषिद्धप्रवृत्तिहेतुभूता राजसी तामसी चाशुभवासना राक्षस्यासुरयोरेकीकरणेनासुरी सम्पदिति द्वैराश्येन प्रतिपादयितुं षोडशाध्याय आरभ्यते।

तत्रादौ ज्ञानसाधनत्वेनाभ्यर्हिततत्वाद्दैवीसम्पदाह -**अभयमित्यादि**॥

श्रीभगवानुवाच
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥ १॥

आगाम्यनिष्टधीजन्यं दुःखं भयम्, तदभावः **अभयम्**। सत्त्वस्य = चित्तस्य, संशुद्धिः = कामक्रोधलोभदम्भकपटादिराहित्यम्। ज्ञानं शास्त्रादात्मतत्त्वस्यावगमः, चित्तैकाग्र्यतया तस्य स्वानुभवारूढत्वं योगः, तयोर्व्यवस्थितिः सर्वदा तन्निष्ठता **ज्ञानयोगव्यवस्थितिः**। भगवद्भक्तिं विनाऽन्तःकरणसंशुद्धेरयोगादर्थात् साऽपि कथिता।

'महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥'[1]

इति नवमे दैव्यां सम्पदि हरिभक्तेरुक्तत्वाच्च। हरिभक्तेरतिश्रेष्ठत्वादभयादिभिः सह पाठो न कृत इति द्रष्टव्यम्। **दानं** स्वस्वत्वपरित्यागपूर्वकं परस्वत्वस्यापादनम्, अन्नादीनां यथाशक्ति शास्त्रोक्तसंविभागः। **दमः** बाह्येन्द्रियसंयमः, ऋतुकालाद्यतिरिक्तकाले मैथुनाद्यभावः। **यज्ञश्च** अग्निहोत्रादिः। **स्वाध्यायः** ब्रह्मयज्ञो दृष्टार्थमृग्वेदाद्यध्ययनरूपः। **तपः** त्रिविधं शारीरादिभेदेन वक्ष्यमाणम्। **आर्जवम्** अवक्रत्वम्, श्रद्धधानेषु श्रोतृषु स्वज्ञातार्थासङ्गोपनम्॥ १॥

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥ २॥

[1] भगवद्गीता ९.१३

कायवाङ्मनोभिः प्राणिपीडनं हिंसा, तद्राहित्यम् (अहिंसा)। **सत्यं** भूतादुःखे हेतुः यथार्थभाषणम्। परैराक्रोशे ताडने वा सति व्याप्तो यः क्रोधः, तस्य तत्कालमुपशमनम् **अक्रोधः**। **त्यागः** सन्न्यासः। **शान्तिः** अन्तःकरणस्योपशमः। परस्मै परदोषप्रकाशनं पैशुनम्, तदभावः **अपैशुनम्**। **दया भूतेषु** अनुकम्पा। **अलोलुत्वं** इन्द्रियाणां विषयसन्निधावप्यक्रियत्त्वम्। **मार्दवम्** अक्रूरत्वम्। **ह्रीः** अकार्यप्रवृत्त्यारम्भे तत्प्रतिबन्धिका लोकलज्जा। **अचापलं** प्रयोजनं विनाऽपि वाक्पाण्यादिव्यापरयितृत्वं चापलत्वम्, तदभावः॥ २॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभिजातस्य भारत॥ ३॥

तेजः प्रागल्भ्यम्। स्त्रीबालकादिमूढैरनभिभाव्यत्वम्। **क्षमा** सत्यपि सामर्थ्येऽपराधसहनम्। **धृतिः** देहेन्द्रियेष्ववसादं प्राप्तेष्वपि तदुपस्तम्भकः प्रयत्नविशेषः। **शौचं** दम्भादिराहित्यमान्तरम्, ऋजुत्वादिना बाह्यम्। द्रोहः परजिघांसया शस्त्रग्रहणादि, तदभावः **अद्रोहः**। अतिमानिता = आत्मनि पूज्यत्वातिशयधीः, तदभावः **नातिमानिता**। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन'[1] इत्यादिश्रुत्या विविदिषौपाधीकृतया विनियुक्ता असाधारणा साधारणाश्च धर्मा इहोपलक्ष्यन्ते। एते धर्माः **भवन्ति** निष्पद्यन्ते **दैवीं सम्पदं** वासनासन्ततिं देहारम्भकाले पुण्यकर्मभिरभिव्यक्ताम् अभिलक्ष्य जातस्य पुरुषस्य 'तं विद्याकर्मणी समन्वारम्भेते पूर्वप्रज्ञा च'[2] 'पुण्यः पुण्येन कर्मणा भवति पापः पापेन'[3] इत्यादिश्रुतिभ्यः॥ ३॥

उपादेयत्वेन दैवीं सम्पदमुक्त्वा, इदानीं हेयत्वेनासुरीं सम्पदमेकेन श्लोकेन सङ्क्षिप्याह - **दम्भ इति**॥

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्॥ ४॥

[1] **बृहदारण्यकोपनिषत्** ६.४.२२ [2] **बृहदारण्यकोपनिषत्** ६.४.२ [3] **बृहदारण्यकोपनिषत्** ६.४.५

दम्भः धार्मिकतयाऽऽत्मनः ख्यापनम्, तदेव धर्मध्वजित्वम्। **दर्पः** धन-स्वजनादिनिमित्तो महदवधीरणाहेतुर्गर्वविशेषः। **अभिमानः** आत्मन्यत्यन्तपूज्य-त्वबुद्धिः। 'देवाश्च वासुराश्चोभये प्राजापत्याः पस्पृधिरे। ततोऽसुरा अतिमा-नेनैव कस्मिन्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्तेऽतिमानेनैव पराब-भूवुः। तस्मान्नातिमन्येत। पराभवस्य ह्येतन्मुखं यदतिमानः'[1] इति शतपथश्रु-त्युक्तः। **क्रोधः** स्वपरापकारप्रवृत्तिहेतुरतिज्वलनात्मकोऽन्तःकरणवृत्तिविशेषः। **पारुष्यं** प्रत्यक्षरूक्षवदनशीलत्वम्। **अज्ञानं** कार्याकार्यविवेकाभावः। **आसुरीं** रज-स्तमोमयीं **सम्पदम्** अशुभवासनां देहारम्भकाले पापैरभिव्यक्ताम् अभिलक्ष्य जातस्य पुरुषस्य दम्भाद्या अज्ञानान्ता दोषा एव भवन्तीति। नत्वभयाद्या गुणा इत्यर्थः॥ ४॥

अनयोः सम्पदोः फलविभागमाह -

दैवी संपद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव॥ ५॥

यस्य वर्णाश्रमादेर्विहिता सात्त्विकी या फलाभिसन्धिरहिता क्रिया सा तस्य **दैवी सम्पत्** सत्त्वशुद्धिभक्तिज्ञानपर्यन्ता सती संसारविमोक्षाय मुक्तये भवति। अतो मुमुक्षुभिः सैवोपादेया। या तु यस्य शास्त्रनिषिद्धा फलाभि-सन्धिपूर्वा साहङ्कारा च राक्षसी तामसी क्रिया तस्य सा **आसुरी** सम्पत् सा **निबन्धाय** संसारबन्धाय **मता** सम्मता। अतः श्रेयोऽर्थिभिः सा हेयैव। तत्रैवं सति, 'अहं कया सम्पदा युक्तः?' इति सन्दिहानमर्जुनमाश्वासयति - **मा शुचः** 'अहमासुर्या सम्पदा युक्तः' इति शङ्कया शोकमनुतापं मा कार्षीः। **दैवीं** स-म्पदमभिलक्ष्य **जातोऽसि** प्रागर्जितकल्याणो भाविकल्याणश्च त्वमसीति भावः॥ ५॥

देवासुरमनुष्यगन्धर्वस्वभावानां बाहुल्येऽपि शुभाशुभफलत्वादिकौ दै-वासुरौ द्वौ। मनुष्यगन्धर्वादीनां यथायोगं दैवे आसुरे चान्तर्भावमभिप्रेत्याह **-द्वाविति॥**

---

[1] **शतपथब्राह्मणम्** ११.१.८

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु॥ ६॥

भूतानां = प्राणिनां सर्गौ = स्वभावौ अतिशयेनेष्टानिष्टकारिणौ स्वभावौ **द्वौ** एव। **अस्मिन् लोके** सर्वस्मिन् संसारमार्गे। कौ तौ? **दैव आसुरश्च**। यो यदा मनुष्यः शास्त्रसंस्कारप्राबल्येन स्वभावसिद्धौ रागद्वेषावभिभूय धर्मपरायणो भवति, तदा स देवः। यदा तु स्वभावसिद्धरागद्वेषप्राबल्येन शास्त्रसंस्कारमभिभूयाधर्मपरायणो भवति, तदा सोऽसुर इति द्वैविध्योपपत्तिः। 'द्वया ह प्राजापत्या देवाश्चासुराश्च तत्र कनीयसा एव देवा ज्यायसो असुराः' इति श्रुतेः। तत्र **दैवः** सर्गः स्वभावस्त्वां प्रति मया **विस्तरशः** विस्तरेण **प्रोक्तः** स्थितप्रज्ञलक्षणो द्वितीये, भक्तलक्षणो द्वादशे, ज्ञानलक्षणो त्रयोदशे, गुणातीतलक्षणो चतुर्दशे, इहापि 'अभयम्' इत्यादिना। इदानीमासुरभूतसर्गं **मे** मद्वचनैर्विस्तरशः प्रतिपाद्यमानं **श्रुणु** ॥ ६॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाऽचारो न सत्यं तेषु विद्यते॥ ७॥

विहिते **प्रवृत्तिम्**। यद्वा, **प्रवृत्तिं** प्रवृत्तिविषयं धर्मम्। चकारात् तत्प्रतिपादकं विधिवाक्यम्। एवं **निवृत्तिं** निवृत्तिविषयमधर्मम्। चकारात् तत्प्रतिपादकं निषेधवाक्यं च। असुरस्वभावाः **जनाः न** जानन्ति। पुनः **शौचं** द्विविधं **नापि** आचारम् = मन्वादिभिरुक्तम्। **सत्यं** विष्णुः, साधुगुणत्वात्। सत् सत्यं यापयतीति वा। सत्पदार्थं यमयतीति वा[1] भूतसृष्ट्यादिकर्तृत्वात् 'सत्यं ज्ञानमनन्तं ब्रह्म'[2] इति श्रुत्युक्तो विष्णुः सत्यम्। तत् पूज्यतया **तेषु न विद्यते**। हरेर्माहात्म्यं श्रुत्यादिप्रतिपादितं श्रुत्वाऽपि नाद्रियन्ते[3] किन्तु, मिथ्याभूतं तर्कहतत्वादित्यपलपन्त एवासुरा इति भावः॥ ७॥

ननु विश्वोद्यादिकर्तारं सर्वेश्वरं कथमपलपन्ति? तद्बोधकवेदस्य विद्यमानत्वादित्यत आह - **असत्यमिति॥**

---

[1] अत्र "अश्मयादित्व्त" इत्यधिकं कोशे॥ [2] **तैत्तिरीयोपनिषत्** २.२.१ [3] न सत्यं च प्रियहितयथार्थभाषणं विद्यते।**इति मधुसूदनसरस्वतीये** ।

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम्॥ ८॥

'सत्यं ज्ञानमनन्तं ब्रह्म'[1] इत्यादिश्रुतिप्रतिपादितं विष्णुः स न विद्यते कर्तृत्वादिना यस्य तत् **असत्यं** जगत्। प्रतितिष्ठत्यस्मिन्निति **प्रतिष्ठा** विष्णुः। स न विद्यते यस्य तत् **अप्रतिष्ठम्।** नास्तीश्वरो नियामको यस्य तत् **अनीश्वरम्** जगत् **आहुः।** सत्त्वेनासत्त्वेन सदसत्त्वेन सदसद्भिन्नत्वेन च विचारासहत्वात् जगदसत्यं शुक्ते रूप्यमिव। अत एव **अप्रतिष्ठम्** आश्रयशून्यम्। नहि त्रैकालिकनिषेधप्रतियोगिनः शुक्तिरूप्यादेः खपुष्पादेर्वा कश्चिदाश्रयोऽस्ति। अत एव **अनीश्वरम्।** नहि शुक्तिरूप्यखपुष्पादेरीक्षणपूर्वककर्ता पालयिता संहर्ता चास्ति। विश्वमिथ्यात्वनिरीश्वरत्वादिमतमेव मुख्यमासुरमिति भावः।

ननु यदि विश्वं मिथ्येति तत्कर्ता न कश्चित्, तर्हि कथमुत्पद्यते? 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी'[2] इति श्रुत्याऽपि विश्वस्य सकारणकत्वमुक्तम्। तथा च यतो जगदुत्पन्नं स एवेश्वरः। तत्राह - **अपरस्परसम्भूतं** न भवत्येकस्मादेकस्योत्पत्तिरिति क्रमेण नोत्पन्नं येन कर्ताऽपेक्षेत। नहि मरुमरीचिकोदकोत्पत्त्यर्थं कर्तादिकारकं क्रम अपेक्षते।

ननु पितुः सकाशात् पुत्रोत्पत्तिदर्शनात् पुत्रे पिता कारणम्। एवं विश्वस्मिन्नीशवरो हेतुः। किञ्च, सत्यं न चेत्, किं तर्हि शशशृङ्गतुल्यम्? परस्परसम्भूतं न चेत्, किं तर्ह्यनादि? तत्राह - **अन्यत्** सदसदादितोऽन्यत्। सत्त्वासत्त्वादिना वक्तुमशक्यम्। शशशृङ्गस्यासत्त्वात् ततो विलक्षणमित्यर्थः। तर्कहतत्वात् परमार्थसच्च न भवति। किन्तु, व्यावहारिकं मृषाभूतं परमार्थतस्तु शून्यमेव।

'द्वे सत्त्वे समुपाश्रित्य बुद्धानां धर्मदेशना।
लोके सांवृतसत्त्वं[3] स्यात् सत्त्वं च परमार्थतः।
सांवृतं[4] व्यावहार्यं स्यान्निवृत्तौ पारमार्थिकम्॥' इति।

---
[1] **तैत्तिरीयोपनिषत्** २.२.१ [2] **तैत्तिरीयोपनिषत्** २.१.१ [3] संवृतसत्त्वमिति कोशे। [4] संवृतमिति कोशे।

काम इच्छा हेतुर्यस्य तत् कामहैतुकम्। यदिच्छया यत्र पुरुषोऽवलोकते तत्रैव तस्योत्पत्तिः। दृष्टिसमकालीना दृष्टिरेव वा सृष्टिः। विज्ञानासमकालीनाया विज्ञानभिन्नाया सृष्टेरभावात्। पितृपुत्रादिक्रमश्च स्वाप्निकक्रमवदुपपद्यते। स्वाप्निकश्रुतिवदुक्तक्रमबोधकश्रुतिरप्युपपद्यते।

अत्र नव्या दृष्टिभिन्ना दृष्टिसमकालीना सृष्टिरस्तु। अथापि विश्वं मिथ्यैव दृश्यत्वादितः, तर्कहतत्वाच्च। ईश्वरकर्तृत्वादिबोधकश्रुतिस्तु स्वाप्निकश्रुतिवदुपपद्यते। तदधिष्ठानत्वेन स्वप्रकाशं सर्वप्रमाणागम्यं चैतन्यं परमार्थसदित्याहुः। अत्र चैतन्यस्याप्रामाणिकस्य खपुष्पादितुल्यत्वेन प्राचीनापेक्षयोक्तिमात्रस्यैव भेदः। श्रुतिभिन्नमानवेद्यं तेन मृषा स्वीक्रियते। 'यतो वाचो निवर्तन्ते'[1] इत्यादिश्रुतिं विवृण्वता शब्दागम्यत्वं च स्वीकृतम्। नच शब्दलक्ष्यं तत्। शब्दावाच्यस्य लक्ष्यत्वासम्भवात्। स्वप्रकाशत्वहानेः। विश्वमिथ्यात्वमङ्गीकुर्वतो निरीश्वरादित्वं तु स्फुटमेव।

'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते।
मयैव कथितं देवि कलौ ब्राह्मणरूपिणा॥'[2]
इति पाद्मे रुद्रेणैव तन्मतस्य बौद्धान्तर्गतत्वोक्तेः॥ ८॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥ ९॥

एतां जगन्मिथ्यात्वनिरीश्वरत्वादिदृष्टिं ज्ञानमाश्रित्य भुव्यवतीर्य तादृशशास्त्रं कृत्वा **नष्टात्मानः** परलोकसाधनभ्रष्टाः। दृष्टिसृष्ट्यादिमते परलोकस्येदानीं दृष्टेरभावात् परलोको नास्त्येव, किमर्थं धर्माद्यनुष्ठानम्? देहभिन्नः स्थिर आत्मैव नास्तीति वा किमर्थं धर्मानुष्ठानम्? **जगतोऽहिताः** शत्रवः सन्तः **क्षयाय** भवन्ति। इदानीमागमोपदेशेन भवान्तरे व्याघ्रसर्पादिरूपेण जगतो नाशाय भवन्तीत्यर्थः।

[1] **तैत्तिरीयोपनिषत्** २.४.१, २.९.१ [2] **पद्मपुराणम्** उत्तरखण्ड.२३६.७

ननु किमर्थं लोकान् नाशयति? तत्राह - **उग्रकर्माण इति॥** तेषां स्वभाव एव तादृशः। स्वयं नष्टाः परान् नाशयतीति लोकप्रसिद्धेः। अतो निरीश्वरमतिरत्यन्ताधोगतिरिति सा हेयेति भावः॥ ९॥

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः॥ १०॥

कामं तत्तद्दृष्टविषयाभिलाषं **दुष्पूरं** पूरयितुमशक्यम्। दम्भेन = अधार्मिकत्वेऽपि धार्मिकत्वख्यापनेन, अपूज्यत्वेऽपि पूज्यत्वख्यापनेन, मदेन = उत्कर्षाभावेऽप्युत्कर्षख्यापनेन महदवज्ञाहेतुनाऽन्विताः। **असद्ग्राहान्** अशुभनिश्चयान् 'अनेन मन्त्रेणेमं देवतामाराध्य स्त्रीणामाकर्षणं करिष्यामि' 'अनेन मन्त्रेण निधीन् साधयिष्यामि, शत्रून् मारयिष्यामि' इत्यादिरूपान्। **मोहात्** अविवेकात् **गृहीत्वा** , नतु शास्त्रात्। **अशुचिव्रताः** अशुचीनि स्मशानादिदेशोच्छिष्टत्वाद्यवस्थाद्यशौचसापेक्षाणि वामागमाद्युपदिष्टानि व्रतानि येषां ते। एतादृशाः 'पतन्ति नरकेऽशुचौ' इत्यग्रिमेणान्वयः॥ १०॥

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः॥ ११॥

किञ्च, अन्ये प्रलयः = मरणम्, अन्तः = अवसानम्, यस्यास्ताम् **अपरिमेयां** विषयचापल्येन परिमातुमशक्यां **चिन्तामुपाश्रिताः**। यावज्जीवं बहुधनादिचिन्तापरा इत्यर्थः। कामोपभोगः स्त्रीव्यवायादिरेव परमं मुख्यतयोद्देश्यो येषां ते। **एतावदिति** ऐहिकविषयभोग एव पुरुषार्थो नामुष्मिकः कश्चिदस्तीति कृतनिश्चयाः॥ ११॥

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥ १२॥

नानाविषयका आशा एव पाशास्तेषां शतैः **बद्धाः**। इतस्तत आकृष्यमाणाः। कामक्रोधावेव परमयनं येषां ते कामभोगार्थं स्त्रीव्यवायादिभोगार्थम् **अन्यायेन** वेदविरुद्धदुष्प्रतिग्रहचौर्यादिवृत्त्या द्रव्याद्यर्थसञ्चयान् **ईहन्ते** वाञ्छन्ति, उत्पादयन्ति च। अदृष्टपरलोकादेरभावात् सर्वस्य स्वप्नवन्मिथ्यात्वाच्च 'भस्मीभूतस्य देहस्य पुनरागमनं कुतः' इति निश्चयवतोऽधर्मेणैवार्थानुत्पाद्य व्यवायादिविषयान् भुक्त्वा 'पतन्ति नरकेऽशुचौ' इत्यग्रिमेणान्वयः॥ १२॥

तेषामीदृशी धनतृष्णयाऽनुवृत्तिरिति मनोराज्यकथनेन विवृणोति -

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥ १३॥

इदं धनम् **अद्य** अनेनोपायेन **मया लब्धम्**। **इदं** तदन्यत् **मनोरथं** मनस्तुष्टिकरं शीघ्रमेव **प्राप्स्ये**। **इदं** पुरैव सञ्चितं मम गृहे **अस्ति**। **इदमपि** बहुतरं **भविष्यति** अग्रे **पुनर्धनम्**। एवं धनतृष्णाकुला 'पतन्ति नरकेऽशुचौ' इत्यग्रिमेणान्वयः॥ १३॥

तेषां लोभं प्रपञ्च्य क्रोधं प्रपञ्चयति -

असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी॥ १४॥

असौ चैत्रनामा **मया हतः शत्रुः** अतिदुर्जयः। अत इदानीमनायासेन **अपरानपि** शत्रून् **हनिष्ये च** हनिष्यामि। चकाराद्धनम्। तेषां धनमपि ग्रहीष्यामीत्यर्थः। ननु सर्वेषामीश्वराधीनत्वात् कथं त्वया सर्वे हन्तव्या पराः? तत्राह -**ईश्वरोऽहम्** एव। अतो मत्समोऽधिको वा कश्चिन्नास्ति। किमेते करिष्यन्ति वराका इत्यभिप्रायेणेश्वरत्वं विवृणोति -**अहं भोगी** सर्वैर्भोगोपकरणैरुपेतः। **सिद्धोऽहं** पुत्रभृत्यादिभिः सहायैः सम्पन्नः। स्वतोऽपि **बलवान्** अत्यन्ततेजस्वी **सुखी** सर्वथा नीरोगः॥ १४॥

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥ १५॥

आढ्यः धनवान्। **अभिजनवान्** कुलीनोऽप्यहमेव **अस्मि**। अतः **कोऽन्योऽस्ति सदृशो मया** न कोऽपीत्यर्थः। **यक्ष्ये** यागेनाप्यन्यानभिभविष्यामि **दास्यामि** धनं स्तावकेभ्यो नटादिभ्यश्च। ततश्च **मोदिष्ये** मोदं हर्षं प्राप्स्ये नर्तक्यादिभिः सहेत्येवम् अज्ञानेन = अविवेकेन विमोहिताः॥ १५॥

अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥ १६॥

उक्तप्रकारैरनेकैश्चित्तैस्तत्तद्दुष्टसङ्कल्पैर्विविधभ्रान्ताः यतो **मोहजालसमावृताः**। मोहः हिताहितवस्तुविवेकासामर्थ्यम्, तदेव जालमावरणात्मत्वेन बन्धुस्नेहत्वात्[1], तेन सम्यगावृताः सर्वतोऽपि वृताः। मत्स्या इव सूत्रमयेन जालेन परवशीकृता इत्यर्थः। अत एव स्वानिष्टसाधनेष्वपि **कामभोगेषु प्रसक्ताः** सर्वथा तदेकपराः, प्रतिक्षणमुपचीयमानकल्मषाः **पतन्ति नरके** कुम्भीपाकवैतरण्यादौ **अशुचौ** विण्मूत्रश्लेष्मादिपूर्णे॥ १६॥

ननु तेषामपि क्वचिद्यागदानादौ प्रवृत्तिदर्शनात् कथं सर्वथा नरकपातः? तत्राह- **आत्मेति॥**

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्॥ १७॥

'सर्वगुणविशिष्टा वयम्' इत्यात्मनैव सम्भाविताः पूज्यताप्रापिताः, नतु साधुभिः। **स्तब्धाः** अनम्राः। यतो **धनमानमदान्विताः** धननिमित्तो यो मान आत्मन्यतिशयपूज्यत्वधीरूपः, तन्निमित्तश्च यो मदः परस्मिन् गुर्वादावप्यपूज्यत्वाभिमानः, ताभ्यामन्वितास्ते। **नामयज्ञैः** नाममात्रयज्ञैः, न तात्त्विकैः। 'दीक्षितः' 'सोमयाजी' इत्यादिनामसम्पादकैर्वा यज्ञैः। **अविधिपूर्वकं** विहितकर्तव्यतारहितैः[2] **दम्भेन** धर्मध्वजितया नतु श्रद्धया **यजन्ते**। अतस्तत्फलभाजो न भवन्तीत्यर्थः॥ १७॥

[1] बन्धुस्नेहहेतुत्वादिति स्यात्। [2] विहिताङ्गेतिकर्तव्यतारहितैः **इति मधुसूदनसरस्वतीये**

यक्ष्ये दास्यामीत्यादिसङ्कल्पेन दम्भाहङ्कारादिप्राधान्येन प्रवृत्तानामसुराणां बहिरङ्गसाधनमपि यागदानादिकं कर्म न सिद्ध्यति। अन्तरङ्गसाधनं तु ज्ञान-वैराग्यभगवद्भजनादिकं तेषां दूरापास्तमित्याह -

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः॥ १८॥

अहमित्यभिमानरूपो योऽहङ्कारः स सर्वसाधारणः। स्वस्य महत्वाभि-मानम् **अहङ्कारम्** , तया **बलं** परपरिभवनिमित्तदेहसामर्थ्यं **दर्पं** परावज्ञारूपं गुर्वाद्यतिक्रमहेतुं चित्तदोषविशेषं **कामम्** इष्टविषयाभिलाषम्, **क्रोधम्** अनिष्टवि-षयद्वेषम्[1], एवमन्यांश्च महतो दोषान् **संश्रिताः**। एतादृशा अपि पतितास्तव भक्ता पूता भविष्यन्तीति चेत्, तत्राह - **माम्** ईश्वरम्, आत्मनः स्वस्य देहे परेषां भार्यापुत्रादीनां देहेऽन्तर्यामितया स्थितं प्रकर्षेण द्विषन्ति[2]

'यदीश्वरः सर्वप्रेरकः सर्वं कारयति च तर्हीदानीं क्रियामकुर्वाणं मामपि कारयतु कुर्वाणं मां निवारयतु। यदि फलं प्रयच्छति तर्हि कर्म विना प्रयच्छतु। प्रत्युत स्थितं नतु कारयति, कुर्वन्तं च न निवारयति, कर्म विना च फलं न प्रयच्छतीति नास्त्येवेश्वरः'[3] अतः श्रुतिस्मृतिरूपमदनुशासनातिप्रवर्तनं च महाद्वेषः[4] नृपाज्ञालङ्घनमेव हि तत्प्रद्वेष इति प्रसिद्धं लोके।

ननु गुर्वादयस्तान् कुतो नानुशासन्ति? तत्राह - **अभ्यसूयकाः** गुर्वादीनां मन्मार्गानुवर्तिनां कारुण्यादिगुणेषु प्रतारणादिदोषार्पकाः। अतस्ते मदवज्ञानात् सर्वसाधनशून्यत्वाच्च नरक एव पतन्तीत्यर्थः। अतो भजनीये द्वेषात् न भक्त्या पूतता तेषामिति भावः॥ १८॥

ननु त्वत्कृपया कदाचित् तेषां निस्तारः स्यात्। नेत्याह - **तानिति॥**

तानहं द्विषतः क्रुरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥ १९॥

[1] चकारात् परगुणासहिष्णुत्वरूपं मात्सर्यम्।**इति मधुसूदनसरस्वतीये** [2] द्विषः द्वेषप्रकारास्तिष्ठन्ति इति कोशे॥ [3] न कस्यचिद् विष्णुः कारयिता। यदि स्यान्ममापीदानीं कारयत्वित्यादि।**इति मध्वभाष्यम्** । [4] ईश्वरस्य मम शासनं श्रुतिस्मृतिरूपं तदुक्तार्थानुष्ठानपराङ्मुखतया तदतिवर्तनं मे प्रद्वेषः, तं कुर्वन्तः। **इति मधुसूदनसरस्वतीये** ।

तान् मम मार्गप्रतिपक्षभूतान्। **द्विषतः** साधून्, मां च। **क्रूरान्** हिंसापरान्। अतो **नराधमान्** अतिनिन्दितान्। **अजस्रं** सततम्। **अशुभान्** अशुभं कर्म कृत्वा पुनरप्यशुभकर्मकारिणः। **अहं** सर्वकर्मफलदातेश्वरः पूर्वपूर्वजन्मकृतपापसमूहेन **संसारेषु** एव नरसंसरणमार्गेषु[1] **क्षिपामि** पातयामि। नरकान् गताश्च **आसुरीष्वेव** अतिक्रूरासु व्याघ्रसर्पादियोनिषु सदा मद्द्वेषादिपरासु दैत्ययोनिषु वा। तत्तत्कर्मवासनानुसारेण 'क्षिपामि' इत्यनुषज्यते।

पूर्वपूर्वकर्मानुसारित्वान्नेश्वरस्य वैषम्यादिकम्। 'वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति'[2] इति सूत्रात्। कारुणिकत्वेऽपि तेषां पापं न नाशयति। तन्नाशकपुण्योपचयाभावात्। पुण्योपचयं च न कारयति। तेषामयोग्यत्वात्। नहीश्वरः पाषाणादिषु यवाङ्कुरान् करोति। नन्वीश्वरत्वादयोग्यस्यापि योग्यतां सम्पादयितुं शक्नोतीति चेत्, शक्नोत्येव सत्यसङ्कल्पत्वात् यदि सङ्कल्पयेत्। नतु सङ्कल्पयति। स्वाज्ञालङ्घिषु स्वभक्तद्रोहिषु दुरात्मस्वप्रसन्नत्वात्। 'एष ह्येव साधु कर्म कारयति तं यमुन्निनीषते। एष एवासाधु कर्म कारयति तं यमधो निनीषते' इति श्रुत्युक्तसाध्वादिकर्मकारयितृत्वमपि पूर्वकर्मापेक्ष्यैव। येषु प्रसादकारणमस्त्याज्ञापालनादि तेषु प्रसीदति साधु कर्म च कारयति। येषु तु तद्वैपरीत्यं तेषु न प्रसीदति प्रत्युत कृद्ध्यति, असाधु कर्म च कारयतीति न वैषम्यादिदोषः॥ १९॥

ननु तेषामपि बहूनां जन्मनामन्ते श्रेयो भविष्यति। नेत्याह-

आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्॥ २०॥

ते **मूढाः** तमःस्वभावाः **जन्मनिजन्मनि** प्रतिजन्म **आसुरीं योनिम्** अज्ञजनस्वरूपयोग्यतां **आपन्नाः** सन्तः **मां** मात्प्राप्त्युपायम् **अप्राप्यैव, ततो** असुरयोनिजन्मान्तरम् **अधमां यान्ति** नित्यनरकरूपां यान्ति। यतोऽन्धतामिस्रादिनरकात् पुनरुत्थितिर्न भवति तादृशं नरकं प्राप्नुवन्तीत्यर्थः।

अत्रेदं तत्त्वम्। 'प्रवृत्तिं च' इत्यादिनोक्तेषु बहुष्वासुरलक्षणेषु वेदविरुद्धवक्तृत्वं तद्विरुद्धानुष्ठातृत्वं च मुख्यमासुरलक्षणम्। अन्यानि लक्षणानि

[1] नरकसंसरणमार्गेषु **इति मधुसूदनसरस्वतीये** [2] **ब्रह्मसूत्रम्** २.१.३४

च न सर्वाणि सर्वत्र सम्भवन्ति। यथायोग्यमक्षपादकणादनिरीश्वरसाङ्ख्ययोगबौद्धजैनचार्वाकपाशुपतशाक्तसौरगाणपत्यप्रच्छन्नबौद्धमतानुसारिणां पुरुषाणां केषाञ्चित् सर्वाणि केषाञ्चित् कतिपयानि लक्षणानि सन्ति। नन्वक्षपादादिमहर्षिमतस्य कथमासुरत्वम्? यावानंशो भगवता व्यासेन समयपादे दूष्यते तावदंशस्यासुरत्वात्। वेदविरुद्धांशस्य महर्ष्युक्तस्याप्यासुरत्वाच्चेति॥ २०॥

आसुरलक्षणत्वेनोक्तानां दोषाणां मध्ये कामादित्रयमवश्यं त्याज्यम्। पुमर्थस्यातिविरोधित्वादित्याह - **त्रिविधमिति॥**

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥ २१॥

इदं त्रिविधं त्रिप्रकारं **नरकस्य द्वारं** तत्प्राप्तौ साधनम्। सर्वस्या आसुर्याः सम्पदो मूलम्। **आत्मनो नाशनं** सर्वपुरुषार्थायोग्यतासम्पादनेनात्यन्ताधोगतिप्रापकम्। किं तत्? इत्यत आह - **काम क्रोधस्तथा लोभ इति॥** प्राग्व्याख्यातम्। यस्मादेतत् त्रयमेव सर्वानर्थमूलं **तस्मादेतत् त्रयं त्यजेत्।** एतत्त्रयत्यागेनैव सर्वाऽप्यासुरसम्पत् त्यक्ता भवति। एतत्त्रयत्यागश्च उत्पन्नस्य विवेकेन कार्यप्रतिबन्धः, ततः परं चानुत्पत्तिरिति॥ २१॥

एतत् त्रयं त्यजतः किं स्यात्? तत्राह - **एतैरिति॥**

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्॥ २२॥

एतैः कामक्रोधलोभैः **त्रिभिस्तमोद्वारैः** नरकसाधनैः **विमुक्तः** रहितः पुरुषः **आचरत्यात्मनः श्रेयः** यद्धितं वेदबोधितम्। पूर्वं हि कामादिना प्रतिबन्धाच्छ्रेयो नाचरति येन पुरुषार्थः सिद्ध्येत्। अश्रेयश्चाचरति येन निरयपातः स्यात्। अधुना तत्प्रतिबन्धरहितः सन्नश्रेयो नाचरति, श्रेयश्चाचरति। तत ऐहिकं सुखमनुभूय सम्यज्ज्ञानभक्तिद्वारा **याति परां गतिं** मुक्तिम्॥ २२॥

कामादित्यागश्च स्वधर्माचरणं विना न भवतीत्याह - **य इति॥**

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥ २३॥

यः शास्त्रविधिं श्रुतिस्मृत्यादिविहितं स्वधर्मम् **उत्सृज्य** अज्ञानादिना त्यक्त्वा **कामकारतः** कामाद्यनुसारान्यायाचारेण वर्तते **स सिद्धिं** पुरुषार्थप्राप्तियोग्यताम् अन्तःकरणशुद्धिं कुर्वन्नपि **नावाप्नोति। न सुखम्** ऐहिकं **न** अपि प्रकृष्टां **गतिं** स्वर्गं मोक्षं वा॥ २३॥

यस्माच्छास्त्रविमुखतया केवलकामाधीनप्रवृत्त ऐहिकपारत्रिकसर्वपुरुषार्थायोग्यः, ततः कुर्वित्याह[1] भगवान् -

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥ २४॥

यस्माच्छास्त्रविमुखतया केवलकामाधीनप्रवृत्त ऐहिकपारत्रिकसर्वपुरुषार्थायोग्यः, **तस्मात् ते** तव श्रेयोऽर्थिनः **कार्याकार्यव्यवस्थितौ** किं कार्यं किमकार्यमिति विषये **शास्त्रं** वेदः, तदुपजीविस्मृतिपुराणादिकमेव बोधकं **प्रमाणं** नान्यत् स्वोत्प्रेक्षितबुद्धजगन्निन्द्यजैनचार्वाकवाक्यादिकमिति भावः।

एवं च **इह** कर्माधिकारभूमौ शास्त्रविधानेन कुर्यान्न कुर्यादित्येवं प्रवर्तनानिवर्तनारूपेण वैदिकलिङादिपदेनोक्तं कर्म विहितं प्रतिषिद्धं च ज्ञात्वा निषिद्धं वर्जयन् विहितं क्षत्रियस्य युद्धादिकं **कर्म कर्तुमर्हसि** सत्त्वशुद्धिपर्यन्तमित्यर्थः।

तदेवमस्मिन्नध्याये सर्वस्या आसुर्याः सम्पदो मूलभूतान् सर्वाश्रेयःप्रापकान् श्रेयःप्रतिबन्धकान् महादोषान् कामक्रोधलोभान् श्रेयोऽर्थिना श्रद्धधानतया शास्त्रप्रमाणेन तदुपदिष्टार्थानुष्ठानपरेण भवितव्यमिति सम्पद्द्वयविभागप्रदर्शनमुखेन निर्धारितम्।

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः॥ १६॥

[1] शास्त्रं प्रमाणीकुर्विति स्यात्।

अध्यायः 17

श्रद्धात्रयविभागयोगः

सत्त्वादिगुणभेदादिश्रद्धादीनां तदात्मनाम्।
त्रैविध्यं माधवो ब्रूते कृपया भक्तवत्सलः॥

द्विविधा कर्मानुष्ठातारो भवन्ति। केचिच्छास्त्रविधिं ज्ञात्वाऽप्यश्रद्धया तमुत्सृज्य कामकारमात्रेण यत्किञ्चिदनुतिष्ठन्ति, ते सर्वे पुरुषार्थायोग्यत्वादसुराः। केचित्तु शास्त्रविधिं ज्ञात्वा श्रद्धधानतया तदनुसारेणैव निषिद्धं वर्जयन्तो विहितमनुतिष्ठन्ति, ते सर्वपुरुषार्थयोग्यत्वाद्देवा इति पूर्वाध्यायान्ते सिद्धम्। ये तु शास्त्रीयं विधिमालस्यादिवशादुपेक्ष्य श्रद्धया वृद्धव्यवहारमात्रेण निषिद्धं वर्जयन्ति विहितमनुतिष्ठन्ति ते शास्त्रीयविध्युपेक्ष्यालक्षणेनासुरधर्मेण श्रद्धापूर्वकानुष्ठानलक्षणेन च देवसाधर्म्येणान्विताः किमसुरेष्वन्तर्भवन्ति? किं वा देवेषु? इत्युभयधर्मदर्शनादेककोटिकनिश्चायकादर्शनाच्च सन्दिहानोऽर्जुनः पृच्छति - **य इति**॥

अर्जुन उवाच
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः॥ १॥

ये पूर्वाध्यायेऽनिर्णीताः न दैववच्छास्त्रानुसारिणः **शास्त्रविधिं** श्रुतिस्मृतिविधानम् **उत्सृज्य** आलस्यादिवशादनादृत्य नासुरवदश्रद्धधानाः, किन्तु वृद्धव्यवहारानुसारेण **श्रद्धयाऽन्विता यजन्ते** देवपूजादिकं कुर्वते। **तेषां तु** शास्त्रविध्युपेक्षाश्रद्धाभ्यां पूर्वनिश्चितदेवासुरविलक्षणानां **निष्ठा का** कीदृशी तेषां शास्त्रविध्यनपेक्षा श्रद्धापूर्विका च सा यजनादिक्रियाव्यवस्थितिः। हे **कृष्ण** भक्ताघकर्षण। किं **सत्त्वं** सात्त्विकी। तथा सति सात्त्विकत्वात् ते देवाः। **आहो** इति पक्षान्तरे। किं **रजस्तमः** राजसी तामसी चेति। तथा सति राजसतामसत्वादसुरास्ते। **सत्त्वम्** इत्येका कोटिः, **रजस्तमः** इत्यपरा कोटिरिति विभागज्ञापनायाहोशब्दः॥ १॥

ये शास्त्रविधिमुत्सृज्य श्रद्धया यजन्ते श्रद्धाभेदाद् भिद्यन्ते, तत्र ये सात्त्विक्या श्रद्धयाऽन्वितास्ते देवाः शास्त्रोक्तसाधनेऽधिक्रियन्ते तत्फलेन च युज्यन्ते। ये तु राजस्या तामस्या च श्रद्धयाऽन्वितास्त असुराः न शास्त्रीयसाधनेऽधिक्रियन्ते न वा तत्फलेन युज्यन्त इति विवेकेनार्जुनस्य सन्देहमपाकर्तुमाह श्रीकृष्णः - **त्रिविधेति**॥

श्रीभगवानुवाच
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥ २॥

यया श्रद्धयाऽन्विताः शास्त्रविधिमुत्सृज्य यजन्ते, **सा देहिनां स्वभावजा।** जन्मान्तरकृतधर्मादिशुभाशुभसंस्कार इदानीन्तनजन्मारम्भकः स्वभावः। स त्रिविधः। सात्त्विको राजसस्तामसश्चेति। तेन जनिता श्रद्धा त्रिविधा भवति। सात्त्विकी राजसी तामसी च। कारणानुरूपत्वात् कार्यस्य। या त्वारब्धजन्मनि शास्त्रसंस्कारमात्रजा विदुषां सा कारणैकरूपत्वादेकरूपा सात्त्विक्येव। न राजसी तामसी चेति प्रथमचकारार्थः। शास्त्रनिरपेक्षा प्राणिमात्रसाधारणी स्वभावजा सैव स्वभावत्रैविध्यात् त्रिविधेत्येवकारार्थः। उक्तविधात्रयसमुच्चयार्थश्चरमश्चकारः। यतः प्राग्भवीयवासनाख्यस्वभावाभिभावकशास्त्रीयविवेकविज्ञानजा देहिनां नास्ति, अतस्तेषां स्वभाववशात् त्रिधा भवन्तीं **तां** श्रद्धां **शृणु।** श्रुत्वा च दैवासुरस्वभावं स्वयमेवावधारयेति भावः॥ २॥

प्राग्भवीयान्तःकरणगतवासनारूपनिमित्तकारणवैचित्र्येण श्रद्धावैचित्र्यमुक्त्वा तदुपादानान्तःकरणवैचित्र्येणापि तद्वैचित्र्यमाह - **सत्त्वेति**॥

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥ ३॥

सत्त्वं प्रकाशशीलत्वात् सत्त्वप्रधानं त्रिगुणपञ्चीकृतपञ्चमहाभूतारब्धमन्तःकरणम्। तच्च क्वचिदुद्रिक्तसत्त्वमेव यथा देवानाम्, क्वचिद्रजसाऽभिभूतसत्त्वं यथा यक्षादीनाम्, क्वचित् तमसाऽभिभूतसत्त्वं यथा प्रेतभूतादीनाम्। मनुष्याणां तु प्रायेण व्यामिश्रमेव। तच्च शास्त्रीयविवेकज्ञानेनोद्भूतसत्त्वं रजस्तमसी अभिभूय क्रियते। शास्त्रीयविवेकज्ञानशून्यस्य सर्वप्राणिजातस्य **सत्त्वानुरूपा श्रद्धा** सत्त्ववैचित्र्याद् विचित्रा **भवति**। सत्त्वप्रधानेऽन्तःकरणे सात्त्विकी, रजःप्रधाने तस्मिन् राजसी, तमःप्रधाने तस्मिन् तामसीति। हे **भारत** यत् त्वया पृष्टं 'तेषां निष्ठा का?' इति, तत्रोत्तरं श्रुणु। **अयं** शास्त्रीयज्ञानशून्यः कर्माधिकृतपुरुषः त्रिगुणान्तःकरणयुक्तः **श्रद्धामयः** प्राचुर्येणास्मिन् श्रद्धा प्रस्तुतेति तत्प्रस्तुतवचने मयट्। अतो **यो यच्छ्रद्धः** या सात्त्विकी राजसी तामसी वा श्रद्धा यस्य **स एव** श्रद्धानुरूप एव **सः** सात्त्विको राजसो तामसो वा। श्रद्धयैव निष्ठा व्याख्यातेत्यभिप्रायः॥ ३॥

श्रद्धा ज्ञाता सती निष्ठां ज्ञापयिष्यति। केनोपायेन स ज्ञायताम्? इत्यपेक्षायां देवपूजादिकार्यलिङ्गेनानुमेयेत्याह - **यजन्त इति**॥

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥ ४॥

जनाः शास्त्रीयविवेकहीनाः ये स्वाभाविक्या श्रद्धया **देवान्** इन्द्रादीन् सात्त्विकान् यजन्ते, ते **सात्त्विकाः** ज्ञेयाः। ये च यक्षान् = कुबेरादीन्, रक्षांसि च = राक्षसान् निर्ऋतिप्रभृतीन् राजसान् यजन्ते ते **अन्ये राजसाः** ज्ञेयाः। ये च **प्रेतान्** विप्रादयः स्वधर्मात् प्रच्युता देहपातादूर्ध्वं वायवीयं देहमापन्ना

उल्कामुखकटपूतनादिसञ्ज्ञाः प्रेता भवन्तीति मनूक्तान् पिशाचविशेषान् वा **भूतगणांश्च** सप्तमातृकादींश्च तामसान् ये **यजन्ते** ते **अन्ये तामसाः** ज्ञेयाः। **अन्ये** इति पदं त्रिष्वपि वैलक्षण्यद्योतनाय सम्बद्ध्यते॥ ४॥

एवमनादृतशास्त्राणां सत्त्वादिनिष्ठा कार्यतो निर्णीता। तत्र केचिद्राजसा तामसा अपि प्राग्भवीयपुण्यपरिपाकात् सात्त्विका भूत्वा शास्त्रीयसाधनेऽधिक्रियन्ते। ये तु दुराग्रहेण दुर्दैवपरिपाकप्राप्तदुर्जनसङ्गादिदोषेण प्रबलस्वभाववशेन च राजसतां न मुञ्चन्ति ते शास्त्रीयमार्गाद् भ्रष्टा असन्मार्गानुसरणेनेह लोके परत्र च दुःखभागिन एवेत्याह - **अशास्त्रेति द्वाभ्याम्॥**

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः॥ ५॥

अशास्त्रविहितं शास्त्रेण वेदेन न विहितम्। अशास्त्रेण बुद्धादिपाषण्डागमेन बोधितं वा। **घोरं** परस्यात्मनः पीडाकरं पञ्चाग्न्यूर्ध्वबाह्वादिना **तप्यन्ते ये जनाः** तादृशतपस्यनधिकारिणः शूद्रादयो वर्णाश्रमादिधर्महीना भगवद्धर्महीनाश्च केवलं कायक्लेशमात्रतत्पराः। दम्भो धर्मित्वख्यापनम्, अहङ्कारः 'अहमेव श्रेष्ठः' इति दुरभिमानः, ताभ्यां संयुक्ताः। कामे काम्ये काम्यमानविषये यो रागः, तन्निमित्तं बलम् अत्युग्रदुःखसहनसामर्थ्यम्, तेनान्विताः। कामो विषयाभिलाषः। रागः सदा तदभिनिविष्टरूपोऽभिष्वङ्गः। बलम् 'अवश्यमिदं साधयिष्यामि' इत्याग्रहः। तैरन्विता इति वा॥ ५॥

कर्षयन्तः शरीरस्थं भूतग्राममचेतसः।
मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्॥ ६॥

अत एव बलवद्दुःखदर्शनेऽप्यनिवर्तमानाः **कर्षयन्तः** कृषीकुर्वन्ति। वृथोपवासादिना शरीरस्य **भूतग्रामं** देहेन्द्रियसङ्घाताकारेण परिणतं पृथिव्यादिसमुदायं **अचेतसः** विवेकशून्याः **माम्** अन्तर्यामित्वेन शरीरान्तःस्थं साक्षिभूतमीश्वरमाज्ञालङ्घनेन कर्षयन्त इत्यर्थः। **तान्** ऐहिकसर्वभोगविमुखान् परत्र चाधोग-

तिभागिनः सर्वपुरुषार्थभ्रष्टान् **आसुरनिश्चयान्** आसुरो विपर्यासरूपो वेदार्थविरोधी निश्चयो येषां तान्। मनुष्यत्वेन प्रतीयमानानप्यसुरकार्यकारित्वादासुरान् **विद्धि**। असुरत्वजातिरहितानां मनुष्याणां कर्मणैवासुरत्वात् तानासुरान् विद्धीति साक्षादुक्तम्। द्विजातीनां तपस्विनां दम्भादियोगादसुरत्वम्, शूद्रादीनां तादृशतपोनधिकारिणां दम्भाद्यभावेऽपि तादृशतपोयोगादसुरत्वमिति भावः॥ ६॥

सात्त्विकानामादानाय राजसतामासानां हानाय च, आहारयज्ञतपोदानानां त्रैविध्यमाह - **आहार इति॥**

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥ ७॥

न केवलं श्रद्धैव त्रिविधा, **आहारोऽपि सर्वस्य त्रिविधः** एव **प्रियो भवति**। सर्वस्य त्रिगुणात्मकत्वेन चतुर्थविधाया असम्भवात्। दृष्टार्थाहारवत् अदृष्टार्थयज्ञदानतपोदानान्यपि त्रिविधानि। तत्र देवतोद्देशेन द्रव्यत्यागो **यज्ञः**। यजतिना जुहोतिना च चोदितत्वेन यागो होमश्चेति द्विविधः। उत्तिष्ठद्धोमा वषङ्कारप्रयोगान्ता याज्यापुरोनुवाक्यावन्तो[1] यजतयः उपविष्टहोमाः, स्वाहाकारप्रयोगान्ता याज्यापुरोनुवाक्यारहिता[2] जुहोतय इति कल्पकारैर्व्याख्यातो यज्ञपदेनोक्तः। **तपः** कृच्छ्रादि। **दानं** परस्वत्वापत्तिफलकः स्वत्वत्यागः। **तेषां** यज्ञादीनां राजसतामसभेदं मयोच्यमानम् **इमं शृणु** ॥ ७॥

तत्राहारभेदमाह - **आयुरिति॥**

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥ ८॥

आयुः = चिरजीवनम्। सत्त्वम् = चित्तस्थैर्यम्, बलवति दुःखेऽपि निर्विकारत्वापादकम्। बलम् = देहसामर्थ्यम्, स्वोचिते कार्ये श्रमाभावप्रयोजकम्।

[1] याज्यानुवाक्यावन्तो इति कोशे। [2] याज्यानुवाक्यरहिता इति कोशे।

आरोग्यम् = व्याध्यभावः। सुखम् = भोजनानन्तराह्लादस्तृप्तिः। प्रीतिः = भोजनकालेऽनभिरुचिराहित्यम्। तेषां विवर्धनाः = वृद्धिहेतवः। **रस्याः** आस्वाद्या मधुररसप्रधानाः। **स्निग्धाः** सहजेनागन्तुकेन वा स्नेहेन युक्ताः। **स्थिराः** बहुकालं विपाकं विना देहे स्थित्वा बहुगुणप्रदाः। **हृद्याः** हृदयङ्गमाः, दुर्गन्धाशुचित्वादिदृष्टादृष्टदोषशून्याः। **आहाराः** भक्ष्यभोज्याद्याः सात्त्विकानां प्रियाः। एतैर्लिङ्गैः सात्त्विका ज्ञेयाः। सात्त्विकत्वमभिलषद्भिश्चैते सेव्या इत्यर्थः॥ ८॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥ ९॥

अतिशब्दः कट्वादिषु सप्तस्वपि योज्यः। कटुः = तिक्तः। कटुरसस्य तीक्ष्णशब्देनोक्तत्वात्। तत्रातिकटुः निम्बादिः। अत्यम्ल-अतिलवण-अत्युष्णाः प्रसिद्धाः। अतितीक्ष्णो मरिचादिः। अतिरूक्षः स्नेहशून्यः कङ्गुकोद्रवादिः। अतिविदाही सन्तापको राजिकादिः। दुःखं तत्कालिकीं पीडां, शोकं पश्चाद्भावि दौर्मनस्यम्, आमयं रोगं च धातुवैषम्यद्वारा प्रददतीति तथाविधाः **आहारा राजसस्येष्टाः**। एतैर्लिङ्गैः राजसा ज्ञेयाः॥ ९॥

यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥ १०॥

यातयामं पक्कं सत् प्रहरादिव्यवहितं मोदनादिकं शैत्यं प्राप्तं घृतपक्कादिभिन्नम्। **गतरसं** विरसतां प्राप्तं उद्धृतसारं वा मथितदुग्धादिकम्[1] **पूति** दुर्गन्धं स्वतः परिणामतो वा। **पर्युषितं** गतदिने पक्कं घृतपक्कादिभिन्नम्। चशब्देन तत्तत्कालोन्मादकरं धत्तूरादिकं समुच्चीयते। **उच्छिष्टम्** अविहितभुक्तावशिष्टम्[2] अविहितेति विशेषणादृत्विगुच्छिष्टसोमादेः श्रीजगन्नाथमहाप्रसादादेरन्यभुक्तस्यापि गुर्वादिभुक्तावशेषस्य न तामसत्वम्। **अमेध्यम्** अयज्ञार्हम् अशुचि मांसादि।

[1] यातयामम् अर्धपक्कं निर्वीर्यस्य गतरसपदेनोक्तत्वादिति भाष्यम्। गतरसं विरसतां प्राप्तं शुष्कम्। यातयामं पक्कं सत् प्रहरादिव्यवहितमोदनादि शैत्यं प्राप्तम्। गतरसम् उद्धृतसारं मथितदुग्धादीत्यन्ये।**इति मधुसूदनसरस्वतीये** । [2] उच्छिष्टं भुक्तावशिष्टम्।**इति मधुसूदनसरस्वतीये** ।

अपिचेति शब्देन वैद्यकशास्त्रोक्तमपथ्यं समुच्चीयते। एतादृशं **भोजनं** भोज्यं **तामसप्रियम्**। एतैर्लिङ्गैस्तामसो ज्ञेयः। सात्त्विकैरिदं भोजनं त्याज्यमित्यर्थः।

अत्र रस्यादिवर्गः सात्त्विकः, कट्वादिवर्गो राजसः, यातयामादिस्तामस इत्युक्तम्। तत्र सात्त्विकवर्गविरोधित्वमितरवर्गद्वये द्रष्टव्यम्। तथा हि। अतिकट्वादिकं रस्यत्वस्य विरोधि। तादृशस्यानास्वाद्यत्वात्। रूक्षत्वं स्निग्धत्वविरोधि। तीक्ष्णत्वविदाहित्वे धातुपोषणविरोधित्वात् स्थिरत्वस्निग्धत्वविरोधिनी। अत्युष्णत्वादिकं हृद्यत्वविरोधि। आमयप्रदत्वम् आयुःसत्त्वबलारोग्यविरोधि। दुःखशोकप्रदत्वं सुखप्रीतिविरोधि। एवं सात्त्विकवर्गविरोधित्वं राजसे। एवं च सात्त्विकवर्गविरोधित्वं तामसेऽपि। गतरसत्वयातयामत्वपर्युषितत्वानि यथासम्भवं रस्यत्वस्निग्धत्वस्थिरत्वविरोधीनि। पूतित्वोच्छिष्टत्वामेध्यत्वादीनि हृद्यत्वविरोधीनि। आयुःसत्त्वादिविरोधित्वं तु स्पष्टमेव। राजसवर्गे दृष्टविरोधमात्रम्, तामसवर्गे तु दृष्टादृष्टविरोध इत्यभिप्रायः॥ १०॥

यज्ञभेदमाह - **अफलेति**॥

अफलाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥ ११॥

अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिः **यज्ञः** काम्यो नित्यश्च फलसंयोगेन विहितः सर्वाङ्गोपसंहारेणैव मुख्यकल्पेनानुष्ठेयः। यावज्जीवननिमित्तसंयोगेन फलसंयोगं विनैव विहितः सर्वाङ्गोपसंहारासम्भवे यथाशक्त्यनुकल्पादिनाऽप्यनुष्ठेयो नित्यः, तत्र सर्वाङ्गोपसंहारासम्भवेऽपि प्रतिनिधिमुपादायावश्ययष्टव्यमेव प्रत्यवायावश्यकजीवनादिनिमित्तेन चोदितत्वात् **इति मनः समाधाय** निश्चित्य **यः** यज्ञः **इज्यते** अनुष्ठीयते **सः** यथाशास्त्रमन्तःकरणशुद्ध्यर्थमनुष्ठीयमानः **सात्त्विकः** ज्ञेयः॥ ११॥

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ १२॥

फलं स्वर्गादि **अभिसन्धाय** उद्दिश्य, नतु चित्तशुद्धिम्। **दम्भार्थमपि च। अपि चैव** इत्यनेन विकल्पसमुच्चयौ सूचितौ। पारलौकिकफलमभिसन्धायैव दम्भार्थत्वेऽपि, पारलौकिकफलानभिसन्धानेऽपि दम्भार्थमेवेति विकल्पेन द्वौ पक्षौ। पारलौकिकफलार्थमप्यैहिकलौकिकदम्भार्थमपीति समुच्चयेनैकः पक्षः। एवं दृष्टादृष्टफलाभिसन्धिनाऽन्तःकरणशुद्धिमनुद्धिश्य **यदिज्यते** यथाशास्त्रं यो यज्ञोऽनुष्ठीयते **तं यज्ञं राजसं विद्धि** ॥ १२॥

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥ १३॥

यथाशास्त्रबोधितविपरीतम् अन्नदानहीनं स्वरतो वर्णतश्च **मन्त्रहीनं** रागद्वेषादिना श्रद्धारहितं **तामसं यज्ञं परिचक्षते** शिष्टाः। विधिहीनाद्येकैकविशेषणः पञ्चविधः। सर्वविशेषणसमुच्चयेन वैकल्पिक इति षट्। द्वित्रिचतुर्विशेषणसमुच्चयेन च बहवो भेदाः तामसयज्ञस्य ज्ञेयाः। राजसे यज्ञे चित्तशुद्ध्यभावेऽपि फलोत्पादकमपूर्वमस्ति, यथाशास्त्रमनुष्ठानात्। तामसे त्वयथाशास्त्रानुष्ठानान्नात्र किमप्यपूर्वमस्तीत्यभिप्रायः॥ १३॥

क्रमप्राप्तस्य तपसः सात्त्विकादिभेदं कथयितुं शारीरवाचिमानसभेदेन तस्य त्रैविध्यमाह - **देवेति त्रिभिः॥**

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ १४॥

देवाः = ब्रह्मेन्द्रादयः। द्विजाः = ब्राह्मणा गुरवः पितृमात्राचार्यादयः। प्राज्ञाः = पण्डिता विदितवेदतदुपकरणार्थाः। तेषां पूजनं = प्रणामशुश्रूषादि। यथाशास्त्रं **शौचं** मृज्जलाभ्यां शरीरशोधनम्। **आर्जवम्** अकौटिल्यं भावशुद्धिशब्देन मानसे तपसि वक्ष्यति। शारीरं त्वार्जवं विहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिशालित्वम्। **ब्रह्मचर्यं** निषिद्धमैथुन्यनिवृतिः। **अहिंसा** अशास्त्रीयप्राणिपीडाभावः। चकारादस्तेयापरिग्रहावपि। शारीरं प्रधानककर्त्रादिभिः[1] साध्यम्।

[1] शारीरं शरीरप्रधानैः कर्त्रादिभिः **इति मधुसूदनसरस्वतीये**

नतु केवलेन शरीरेण। 'पञ्चैते तस्य हेतवः'[1] इति वक्ष्यति। इदं **शारीरं तप उच्यते** ॥ १४॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ १५॥

अनुद्वेगकरं न कस्यचिद्दुःखकरम्। **सत्यं** प्रमाणमूलमवधारितार्थम्। **प्रियं** श्रोतुस्तत्कालश्रुतिसुखं **हितं** परिणामे सुखकरम्। चकारो विशेषाणानां समुच्चयार्थः। अनुद्वेगकरादिविशेषणचतुष्टयेन विशिष्टम्। नत्वेकेनापि विशेषणेन हीनं यत् **वाक्यम्। स्वाध्यायाभ्यसनं** वेदाद्यभ्यसनं **वाङ्मयं तप उच्यते** ॥ १५॥

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥ १६॥

मनसः प्रसादः स्वच्छता विषयचिन्ताव्याकुलत्वराहित्यम्। **सौम्यत्वं** सौमनस्यं सर्वलोकहितैषित्वं प्रतिषिद्धाचिन्तनं च। **मौनं** मुनिभाव एकाग्रतयाऽऽत्मचिन्तनं निदिध्यासनाख्यम्। **आत्मविनिग्रहः** आत्मनो मनसो विशेषेण निग्रहः। भावस्य हृदयस्य शुद्धिः कामक्रोधलोभादिमलनिवृत्तिः **इत्येतत् तपो मानसमुच्यते** ॥ १६॥

शारीरादिभेदेन त्रिविधस्य तपसः सात्त्विकादिभेदेन त्रैविध्यमाह - **श्रद्धयेति त्रिभिः** ॥

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥ १७॥

तत् पूर्वोक्तं शारीरादिकं **श्रद्धया** आस्तिक्यबुद्ध्या **परया** उत्कृष्टया, अप्रामाण्यशङ्काकलङ्कशून्यया फलाभिसन्धिशून्यैः **युक्तैः** समाहितैः सिद्ध्यसिद्ध्योर्निर्विकारैः **नरैः** अधिकारिभिः **तप्तम्** अनुष्ठितं **सात्त्विकं परिचक्षते** शिष्टाः॥ १७॥

[1] भगवद्गीता १८.१५

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥ १८॥

सत्कारः = 'साधुरयं तपस्वी' इत्येवमविवेकिभिः क्रियमाणा स्तुतिः। मानः = प्रत्युत्थानाभिवादनादिभिः। पूजा = पादप्रक्षालनार्चनधनदानादिः। तदर्थं **दम्भेनैव** च केवलधर्मध्वजित्वेनैव च नास्तिक्यबुद्ध्या **यत् तपः क्रियते तद्राजसं प्रोक्तम्। इह** अस्मिन्नेव लोके फलदं पारलौकिकं **चलम्** अल्पकाल-स्थायिफलम्। **अध्रुवम्** फलजनकतानियमशून्यम्॥ १८॥

मूढग्राहेणाऽत्मनो यत् पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत् तामसमुदाहृतम्॥ १९॥

मूढग्राहेण अविवेकातिशयकृतेन दुराग्रहेण **आत्मनः** देहेन्द्रियसङ्घातस्य **पीडया यत् तपः क्रियते, परस्योत्सादनार्थं वा** अन्यस्य विनाशार्थमभिचाररूपं वा **तत् ता-मसमुदाहृतम्** शिष्टैः॥ १९॥

दानस्य त्रैविध्यमाह - **दातव्यमिति त्रिभिः॥**

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥ २०॥

'दातव्यम् एव शास्त्राज्ञावशात्' इत्येवं निश्चयेन, नतु फलेच्छया **यद्दानं** तुलापुरुषादि **दीयतेऽनुपकारिणे** प्रत्युपकाराजनकाय **देशे** पुण्ये कुरुक्षेत्रादौ **काले** च पुण्ये सूर्योपरागादौ। **पात्रे चेति॥** चतुर्थ्यर्थे सप्तमी। कीदृशायानुपकारिणे दीयते? पात्राय विद्यासदाचारयुक्ताय **पात्रे** पातृभूताय रक्षकायेति। 'विद्यात-पोभ्यामात्मनो दातुश्च पालनक्षम एव प्रतिगृह्णीयात्' इति शास्त्रात्। एतादृशं **दानं सात्त्विकं स्मृतम्** ॥ २०॥

यत्तु प्रत्त्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥ २१॥

प्रत्युपकारार्थं 'कालान्तरे मामयमुपकरिष्यति' इत्येवं दृष्टार्थं **फलं** स्वर्गादिकम् **उद्दिश्य** सात्त्विकविलक्षणं **दीयते**, **परिक्लिष्टं च** 'कथमेतावव्द्ययितम् ?' इति पश्चात्तापयुक्तं यथा भवत्येवं च यद्दीयते **तद्दानं राजसं स्मृतम्** ॥ २१॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम्॥ २२॥

अदेशे = स्वतो दुष्टजनसंसर्गात् पापहेतावशुचिस्थाने। अकाले = पुण्यहेतुत्वेनाप्रसिद्धे यस्मिन् कस्मिंश्चित्, अशौचौ च काले वा। **अपात्रेभ्यश्च** विद्यातपोरहितेभ्यो नटादिभ्यश्च **यद्दानं दीयते** देशकालपात्रसम्पत्तावपि **असत्कृतं** प्रियभाषणपादप्रक्षालनपूजादिसत्कारशून्यम् **अवज्ञातं** पात्रपरिभवयुक्तं **तत्** दानं **तामसमुदाहृतम्** ॥ २२॥

तदेवमाहारादीनां त्रिविध्यकथनेन सात्त्विकान्येवादेयानि राजसतामसानि परिहर्तव्यानीत्युक्तम्। तत्राहारस्य दृष्टार्थत्वेन नास्त्यङ्गवैगुण्येन फलाभावशङ्का। यज्ञतपोदानानां त्वदृष्टार्थानामङ्गवैगुण्यादपूर्वानुत्पत्तौ फलाभावः स्यादिति सात्त्विकानामपि तेषामानर्थक्यं प्राप्तं प्रमादबहुलत्वादनुष्ठातॄणाम्। अतस्तद्वैगुण्यपरिहाराय 'ॐ तत्सत्' इति भगवन्नामोच्चारणरूपं सामान्यप्रायश्चित्तं परमकारुणिकतयोपदिशति - **ओमिति॥**

ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥ २३॥

ॐतत्सत् इति एवंरूपः **ब्रह्मणः** परमेश्वरस्य **निर्देशः** निर्दिश्यतेऽनेनेति निर्देशः प्रतिपादकः शब्दः, नामेति यावत्। ओतं प्रविष्टम् आश्रितं वा जगद्यत्र स ॐ। 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इत्युक्त एवार्थः। **त्रिविधः** तिस्रो विधा यस्य सः। ओमित्योतत्वादिवाचकः। तदिति ब्रह्मणः परोक्षत्वनिर्देशेन वेदान्तैकगम्यत्वं बोधयति। सदिति सद्गुणत्वस्वातन्त्र्यादिकं बोधयति[1] नामत्रयमिदमेकवचनं समूहाभिप्रायेण। एकवचनानुसारात् प्रणववदेकमेव वा नाम।

[1] 'ओतं जगद् यत्र स्वयं च पूर्णो वेदोक्तरूपोऽनुपचारतश्च। सर्वैः शुभैश्चाभियुतो न चान्यैरोन्तत्सदित्येनमथो वदन्ति॥' इति गीताभाष्योदाहृतं ऋग्वेदखिलवचनम्॥

यस्मात् प्राचीनैर्महर्षिभिरयं ब्रह्मणो निर्देशः, तस्मादिदानीन्तनैरपि स्मर्तव्य इति विधिरत्र कल्पते 'वषट्कर्तुः प्रथमभक्षः' इत्यादिष्विव। यज्ञदानतपःक्रियासंयोगाच्चास्य तदवैगुण्यमेव फलम्। नष्टाश्वदग्धरथवत् परस्पराकाङ्क्षया कल्पते।

'प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥'[1]

इति स्मृतेस्तथैव शिष्टाचाराच्च ब्रह्मणो निर्देशः स्तूयते वैगुण्यपरिहारसामर्थ्यकथनाय।

ब्राह्मणाः इति त्रैवर्णिकोपलक्षणम्। ब्राह्मणाद्याः कर्तारः, **वेदाः** करणानि, **यज्ञाः** कर्माणि **तेन** ब्रह्मणो निर्देशेन करणभूतेन **पुरा विहिताः** प्रजापतिना। अतो विघ्ननिरासायादौ वैगुण्यपरिहाराय चान्ते ब्रह्मणः श्रीविष्णोर्नामोच्चारणं कर्तव्यमिति भावः।

वैदिककर्माभिप्रायेण **ब्राह्मणाः** इत्युक्तम्। स्मार्तकर्मणि श्राद्धादौ प्रणवादिकं विहाय विष्णोर्नामान्तरं शूद्रादिभिरप्युच्चारणीयमिति तत्त्वम्॥ २३॥

इदानीमकारोकारमकारव्याख्यानेन तत्समुदायोङ्कारव्याख्यानवत्, ओङ्कारसच्छब्दतच्छब्दव्याख्यानेन तत्समुदायरूपब्रह्मणो निर्देशस्तुत्यतिशयाय व्याख्याति चतुर्भिः। तत्र प्रथममोङ्कारं व्याचष्टे - **तम्सादोमोति॥**

**तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥ २४॥**

यस्मात् 'ओमिति ब्रह्म'[2] इत्यादिश्रुतिष्वोमिति ब्रह्मणो नाम प्रसिद्धम्, **तस्मादोमित्युदाहृत्य** ओङ्कारोच्चारणानन्तरं **विधानोक्ताः** विविधशास्त्रबोधिताः **ब्रह्मवादिनां** वेदवादिनां **यज्ञदानतपःक्रियाः सततं प्रवर्तन्ते** प्रकृष्टतया वैगुण्यराहित्येन

[1] **गरुडपुराणम्** १.२३०.१३ [2] **तैत्तिरीयोपनिषत्** १.८.१

वर्तन्ते। यस्यैकावयवोच्चारणादप्यवैगुण्यम्, किम्पुनस्तस्य सर्वस्योच्चारणादिति स्तुत्यतिशयः॥ २४॥

तच्छब्दं व्याचष्टे - **तदिति**॥

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥ २५॥

तदिति ब्रह्मनाम उदाहृत्य = उच्चार्य स्वर्गादिफलम् **अनभिसन्धाय** चित्त-शुद्ध्यर्थं यज्ञतपःक्रियाश्च **विविधा मोक्षकाङ्क्षिभिः क्रियन्ते**। तस्मादतिप्रशस्तमेतत्॥ २५॥

सच्छब्दं व्याचष्टे - **सदिति**॥

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥ २६॥

सद्गुणत्वात् सदैकाकारत्वाच्च **सत्** ब्रह्मणो नाम **सद्भावे** अस्तित्वे **साधुभावे** साधुत्वे शिष्टैः **प्रयुज्यते**। तस्माद्वैगुण्यपरिहारेण यज्ञादेः साधुत्वं तत्फलस्य च विद्यमानत्वं कर्तुं क्षममेतदित्यर्थः। **तथा** सद्भावसाधुभावयोरिव **प्रशस्ते** अप्रति-बन्धेनाशु सुखजनके माङ्गलिके **कर्मणि** विवाहादौ सच्छब्दो हे **पार्थ युज्यते**। तस्मादप्रतिबन्धेनाशु फलजनकत्वं वैगुण्यपरिहारेण यज्ञादेः समर्थमेतन्नामेति प्रशस्तमेतदित्यर्थः॥ २६॥

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥ २७॥

यज्ञे तपसि दाने च या **स्थितिः** तत्परतयाऽवस्थितिर्निष्ठा साऽपि **सदित्युच्यते** शिष्टैः। **कर्म चैव तदर्थीयं** तेषु यज्ञदानतपोरूपेष्वर्थेषु भवं तदनुकूलमेव च **कर्म**।

यद्वा, यस्य ब्रह्मणो नामेदं प्रस्तुतं तदेवार्थो विषयो यस्य तत् तथा परब्रह्मज्ञानं तदनुकूलं **कर्म तदर्थीयं** विष्ण्वर्पणबुद्ध्या क्रियमाणं **कर्म** वा **तदर्थीयं सदित्येवाभिधीयते।** तस्मात् सदिति नाम कर्मवैगुण्यापनोदक्षमं प्रशस्ततरम्॥ २७॥

यद्वा, आलस्यादिना श्रद्धधानतया शास्त्रीयं विधिमुत्सृज्य कामकारेण यत्किञ्चिद्यज्ञादिकं कुर्वतामसुराणामपि तेनैव वैगुण्यपरिहारः स्यात्। तर्हि कृतं श्रद्धया सात्त्विकत्वहेतुभूतयेत्यत आह - **अश्रद्धयेति॥**

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेप्य नो इह॥ २८॥

अश्रद्धया यद्धुतं हवनं **कृतम्** अग्नौ **दत्तं** यद् ब्राह्मणेभ्यः **यत् तपस्तप्तं** यच्चान्यत् कर्म कृतं स्तुतिनमस्कारादि तत् सर्वमश्रद्धया कृतम् **असत्** असाधु। अत ॐतत्सदिति निर्देशेन न तस्य साधुत्वं शक्यते कर्तुम्। सर्वथा तदयोग्यत्वात्। शिलाया इवाङ्कुरः। तस्मात् **असदित्युच्यते।** हे **पार्थ, अश्रद्धया कृतं न प्रेत्य** परलोके फलति विगुणत्वेनापूर्वाजनकत्वात्। **नो इह** नापीह लोके यशः, साधुभिर्निन्दितत्वात्। अत ऐहिकामुष्मिकफलविकलत्वादश्रद्धाकृतस्येति सात्त्विक्या श्रद्धयैव सात्त्विकं यज्ञादि कुर्यादन्तःकरणशुद्धये। तादृशस्यैव श्रद्धापूर्वकृतस्य सात्त्विकस्य यज्ञादेर्वैगुण्यशङ्कायां ब्रह्मनामनिर्देशेन साद्गुण्यं सम्पादनीयमिति भावः।

तदेवमस्मिन्नध्याये आलस्यादिनाऽनादृतशास्त्राणां श्रद्धापूर्वकं वृद्धव्यवहारमात्रेण प्रवर्तमानानां शास्त्रानादरेणासुरसाधर्म्येण श्रद्धापूर्वकानुष्ठानेन च देवसाधर्म्येण किमसुरा देवा वेत्यर्जुनसंशयविषयाणां राजसतामसश्रद्धापूर्वकं राजसतामसयज्ञादिकारिणोऽसुराः शास्त्रीयज्ञानसाधनानधिकारिणः, सात्त्विकश्रद्धापूर्वकं सात्त्विकयज्ञादिकारिणो देवाः शास्त्रीयज्ञानसाधनाधिकारिण इति श्रद्धात्रैविध्यप्रदर्शनमुखेनाहारत्रैविध्यप्रदर्शनेन भगवता निर्णयः कृत इति सिद्धम्॥ २८॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥ १७॥

अध्यायः 18

मोक्षसन्न्यासयोगः

पूर्वाध्यायैः प्रकीर्णानि ज्ञानादीन्यब्रवीद्धरिः।
कृपयाऽष्टादशे तानि सङ्गृहादिह मुक्तये॥

पूर्वाध्याये श्रद्धादित्रैविध्यात् कर्मिणां त्रैविध्यमुक्तम्। इदानीं तु सन्न्यासत्रैविध्यकथनेन सन्न्यासिनामपि त्रैविध्यं वाच्यम्। तत्र तत्त्वबोधानन्तरं यः फलभूतः सर्वकर्मसन्न्यासः स चतुर्दशे गुणातीतत्वेन व्याख्यातत्वान्न सात्त्विकराजसतामभेदमर्हति। योऽपि तत्त्वबोधात् प्राक् तदर्थं सर्वकर्मसन्न्यासः तत्त्वबुभुत्सया वेदान्तवाक्यविचाराय भवति सोऽपि 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन'[1] इत्यादिना गुणातीतत्वेन व्याख्यातः। यस्त्वनुत्पन्नतत्त्वबोधानामनुत्पन्नतत्त्वबुभुत्सानां च कर्मसन्न्यासः 'स सन्न्यासी च योगी च'[2] इत्यादिना गौणो व्याख्यातः, तस्य त्रैविध्यसम्भवात् तद्विशेषजिज्ञासुः पृच्छति - **सन्न्यासस्येति**॥

अर्जुन उवाच
संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन॥ १॥

---

[1] भगवद्गीता २.४५ [2] भगवद्गीता ६.१

अविदुषामनुपजातविविदिषाणां च कर्माधिकृतानामेव किञ्चित्कर्मपरिग्रहेण किञ्चित्कर्मपरित्यागो यः स त्यागांशगुणयोगात् सन्न्यासशब्देनोच्यते। एतादृशस्यान्तःकरणशुद्ध्यर्थमविद्वत्कर्माधिकारिकर्तृकस्य **सन्न्यासस्य** केनचिद्रूपेण कर्मत्यागस्य **तत्त्वं** स्वरूपं **पृथक्** सात्त्विकराजसतामसभेदेन **वेदितुमिच्छामि। त्यागस्य च** तत्त्वं वेदितुमिच्छामि। किं त्यागसन्न्यासशब्दौ घटपटशब्दाविव भिन्नजातीयार्थौ? किं वा ब्राह्मणपारिव्राजकशब्दाविवैकजातीयार्थौ?

यद्याद्यः, तर्हि त्यागस्य तत्त्वं सन्न्यासात् पृथग्वेदितुमिच्छामि। यदि द्वितीयः, तर्ह्यवान्तरोपाधिभेदमात्रं वक्तव्यम्। एकव्याख्यानेनैवोभयं व्याख्यातं भविष्यति। हे **महाबाहो केशिनिषूदन** इति सम्बोधनाभ्यां बाह्योपद्रवनिवारणस्वरूपयोग्यताफलोपधाने प्रदर्शिते **हृषीकेश** इत्यन्तरुपद्रवनिवारणसामर्थ्यमिति भेदः। अत्यनुरागात् सम्बोधनत्रयम्।

अत्रार्जुनस्य द्वौ प्रश्नौ। धर्माधिकारिकर्तृकत्वेन पूर्वोक्तयज्ञादिसाधर्म्येण सन्न्यासशब्दप्रतिपाद्यत्वेन च गुणातीतसन्न्यासद्वयसाधर्म्येण त्रैगुण्यसम्भवासम्भवाभ्यां संशयः प्रश्नस्य बीजम्। द्वितीयस्य तु सन्न्यासत्यागशब्दयोः पर्यायत्वात् कर्मतत्फलत्यागरूपेण च वैलक्षण्योक्तेः संशयः॥ १॥

तत्रान्तिमस्य सूचीकटाहन्यायेन निराकरणायोत्तरमाह - **काम्यानामिति॥**

श्रीभगवानुवाच
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥ २॥

काम्यानां फलकामनया विहितानां चित्तशुद्धावनुपयुक्तानां **कर्मणाम्** इष्टिपशुसोमादीनां **न्यासं** त्यागं **सन्न्यासं विदुः** जानन्ति **कवयः**। सत्त्वशुद्धिविविदिषोत्पत्तिपूर्वकवेदनार्थिना नित्यान्येव कर्माणि भगवदर्पणबुद्ध्याऽनुष्ठेयानि। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति। यज्ञेन दानेन तपसा नाशकेन'[1] इति श्रुतेः। 'वेदानुवचनेन' इत्यनेन ब्रह्मचारिधर्मा उक्ताः। 'यज्ञेन' इत्यनेन गृहस्थधर्मा उक्ताः। 'तपसा' इत्यनेन वानप्रस्थधर्मा उक्ताः। 'नाशकेन' इत्यनेन

[1] **बृहदारण्यकोपनिषत्** ६.४.२२

सन्न्यासधर्मा उक्ताः। यानि वैकल्पिककाम्यानि ज्योतिष्टोमादीनि यानि च केवलकाम्यानि पुत्रकामेष्ट्यादीनि तानि सर्वाणि सफलानि त्याज्यानीत्येकं मतम्। अपरं च सर्वेषां वैकल्पिककाम्यानां केवलकाम्यानां नित्यानां च प्रतिपदोक्तफलत्यागं सत्त्वशुद्ध्यर्थितया विविदिषासंयोगेनानुष्ठानं **विचक्षणाः** विचारकुशलाः **त्यागं प्राहुः**।

'खादिरो यूपो भवति' 'खादिरं वीर्यकामस्य यूपं करोति' इत्यत्र यथैकस्य खादिरत्वस्य क्रतुप्रकरणपाठात् फलसंयोगाच्च क्रत्वर्थत्वं पुरुषार्थत्वं च प्रमाणभेदात्, तथाऽग्निहोत्रेष्टिपशुसोमानां सर्वेषामपि स्वोत्पत्तिविधिसिद्धानां तत्तत्फलसंयोगः प्रत्येकवाक्येन विविदिषासंयोगश्च यज्ञादिवाक्येन क्रियत इत्युपपन्नम्। 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति न्यायात्[1]

तदेवं सर्वकाम्यकर्मत्यागः सन्न्यासशब्दार्थः, सर्वेषामपि कर्मणां फलाभिसन्धिस्त्यागशब्दार्थ इति न घटपटयोरिव सन्न्यासत्यागशब्दयोर्भिन्नजातीयार्थत्वम्। किन्तु चित्तशुद्ध्यर्थकर्मानुष्ठाने फलाभिसन्धित्याग इत्येक एवार्थ उभयोरिति निर्णीत एकः प्रश्नोऽर्जुनस्य॥ २॥

इदानीं द्वितीयप्रश्नप्रतिवचनाय सन्न्यासत्यागशब्दार्थस्य त्रैविध्यं निरूपयितुं तत्र विप्रतिपत्तिमाह - **त्याज्यमिति**॥

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥ ३॥

एके मनीषिणः कपिलानुयायिनः[2] कर्म **दोषवत्** हिंसादियुक्तं दुष्टं बन्धकं च सर्वं **कर्म** कर्माधिकरिभिरपि **त्याज्यमिति** प्राहुः। यद्वा, **दोषवत्** दोष इव। यथा दोषो रागादिस्त्यज्यते, तद्वत् कर्म त्याज्यमनुत्पन्नविविदिषैः कर्माधिकारिभिरपीत्यर्थः। **अपरे** जैमिन्यानुयायिनः कर्माधिकारिभिश्चित्तशुद्धिद्वारा विविदिषोत्पत्त्यर्थं **यज्ञदानतपःकर्म न त्याज्यमिति** प्राहुः[3]॥ ३॥

---

[1] अत्राधिकं मधुसूदनीये - "तदुक्तं सङ्क्षेपशारीरके - 'यज्ञेनेत्यादिवाक्यं शतपथविहितं कर्मवृन्दं गृहीत्वा स्वोत्पत्त्याम्नानसिद्धं पुरुषविविदिषामात्रसाध्ये युनक्ति' इति।" इति॥ [2] एके मनीषिणः कापिलाः **इति रामानुजभाष्ये** [3] मनीषिण इत्युक्तत्वात् पूर्वपक्षोऽपि ग्राह्य एव। फलत्यागेन त्यागो विवक्षितः यज्ञादेस्तत्पक्षे।**इति मध्वभाष्यम्**

निश्चयं श्रृणु मे तत्र त्यागे भरतसत्तम।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः॥ ४॥

तत्र त्वया पृष्टे कर्माधिकारिकर्तृके सन्न्यासत्यागशब्दाभ्यां प्रतिपादिते **त्यागे** फलाभिसन्धिपूर्वककर्मत्यागे **मे** मम वचनात् **निश्चयं** पूर्वाचार्यैः कृतं **शृणु**। किं तत्र दुर्ज्ञेयम्? अत आह - हे **पुरुषव्याघ्र** पुरुषश्रेष्ट **हि** यतः **त्यागः** कर्माधिकारिकर्तृकः फलाभिसन्धिपूर्वककर्मत्यागः **त्रिविधः** त्रिप्रकारः तामसादिभेदेन **सम्प्रकीर्तितः**।

यद्वा विशिष्टाभावरूपः **त्यागः** विशेषणाभावात्, विशेष्याभावात्, उभयाभावाच्च **त्रिविधः सम्प्रकीर्तितः**। तथा हि। फलाभिसन्धिपूर्वककर्मत्यागः सत्यपि कर्मणि फलाभिसन्धित्यागादेकः, सत्यपि फलाभिसन्धौ कर्मत्यागाद् द्वितीयः, फलाभिसन्धेः कर्मणश्च त्यागात् तृतीयः। तत्र प्रथमः सात्विक उपादेयः। द्वितीयस्तु हेयो द्विविधः। दुःखबुद्ध्या कृतो राजसः, विपर्यासेन कृतस्तामसः।

एतावान् कर्माधिकारिकर्तृकस्त्यागोऽर्जुनप्रश्नविषयः। तृतीयस्तु कर्मानधिकारिकर्तृको त्रैगुण्यरूपो नार्जुनप्रश्नविषयः। सोऽपि साधनफलभेदेन द्विविधः। तत्र सात्विकेन फलाभिसन्धिपूर्वककर्मानुष्ठानरूपेण त्यागेन शुद्धचित्तस्योत्पन्नविदिषस्यात्मज्ञानसाधनवेदान्तविचाराय फलेच्छारहितस्य चित्तशुद्धौ सत्यां तत्साधनस्य कर्मणो वैतुष्ये[1] जातावहननस्येव परित्यागः। स एकः साधनभूतो विविदिषासन्न्यासः। 'नैष्कर्म्यसिद्धिं परमाम्'[2] इति वक्ष्यति। द्वितीयस्तु जन्मान्तरसाधनाभ्यां सपरिपाकादस्मिन् जन्मन्यादावेवोत्पन्नात्मतत्त्वबोधस्य स्वत एव फलेच्छाया कर्मणश्च त्यागः। स विद्वत्सन्न्यासः। स तु 'यस्त्वात्मरतिरेव'[3] इत्युक्तः॥ ४॥

कोऽसौ निश्चयः? विप्रतिपत्तिकोटिभूतयोः पक्षयोर्द्वितीय इत्याह - **यज्ञ इति द्वाभ्याम्॥**

यज्ञो दानं तपः कर्म[4] न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ ५॥

[1] वैधात्यानातुष्येत् इति कोशे। [2] **भगवद्गीता** १८.४९ [3] **भगवद्गीता** ३.१७ [4] यज्ञदानतपःकर्म - प्रचलितपाठः

चो हेतौ। यस्माद् यज्ञदानतपांसि **मनीषिणाम्** अकृतफलाभिसन्धीनां **पावनानि** चित्तस्य भगवदपरोक्षयोग्यतासम्पादकानि। अकृतफलाभिसन्धीनां यज्ञदानतपांसि चित्तशोधकानि भवन्त्येव[1] तस्माच्चित्तशुद्ध्यर्थिभिः कर्माधिकृतैः **यज्ञो दानं तपः** इति यत् फलाभिसन्धिरहितं **कर्म** तत् **न त्याज्यं** किन्तु **कार्यमेव तत्**। अत्याज्यत्वेन कार्यत्वे लब्धेऽपि, आदरार्थं पुनः **कार्यमेव** इत्युक्तम्॥ ५॥

ननु यदि यज्ञादीनां चित्तशोधनसामर्थ्यमस्ति, तर्हि फलेच्छया कृतान्यपि शोधकानि स्युरेव। कृतं फलेच्छात्यागेनेत्यत आह[2] - **एतानीति॥**

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ ६॥

काम्यान्यपि कर्माणि शोधकानि भवन्त्येव। परन्तु, सा शुद्धिस्तत्फलभोगायैव भवति, नतु मुक्तये[3] **एतानि** यज्ञादीनि यानि फलेच्छया कृतानि बन्धहेतुभूतान्यपि मुमुक्षुभिः **सङ्गम्** 'अहमिदं करोमि, मदीयमिदं कर्म' इति कर्मसङ्गम्, 'एतत्कर्मण इमानि फलानि भविष्यन्ति' इत्यभिसन्धायमानानि **फलानि च** त्यक्त्वा शुद्धये[4] **कर्तव्यानीति मे** मतं **निश्चितम्**।

यद्वा, केवलकाम्यानां फलानपेक्षया करणे फलान्तराभावाद् वैय्यर्थ्यं स्यादित्यतो येन प्रकारेण कृतानि पावनानि तमाह - **एतानीति॥ सङ्गं** स्वस्य कर्तृत्वाभिनिवेशम्, ईश्वराराधनतया **फलानि** त्यक्त्वा, कर्तव्यानीति **निश्चितं मतम्**
[5] अतस्त्यक्तफलेच्छानां कर्मणां चित्तशुद्धिरेव फलमित्यर्थः॥ ६॥

---

[1] उपाधिशुद्धैवोपहितशुद्धिरत्राभिप्रेतेत्यधिकं मधुसूदनीये॥ [2] फलेच्छात्यागेन किञ्चिदप्यधिकं फलं नास्तीत्यत आहेत्यर्थः। [3] यद्यपि काम्यान्यपि शुद्धिमादधति धर्मस्वाभाव्यात्। तथाऽपि सा तत्फलभोगोपयोगिन्येव न ज्ञानोपयोगिनी। तदुक्तं वार्तिककृद्भिः 'काम्येऽपि शुद्धिरस्त्येव भोगसिद्ध्यर्थमेव सा। विड्वराहादिदेहेन न ह्यैन्द्रं भुज्यते फलम्॥' इति। **इति मधुसूदनसरस्वतीये** । [4] चित्तशुद्धये इत्यर्थः। [5] येन प्रकारेण कृतान्येतानि पावनानि भवन्ति तं प्रकारं दर्शयन्नाह - **एतानीति॥** यानि यज्ञादिकर्माणि मया पावनानीत्युक्तम्, एतान्येव कर्तव्यानि। कथम्? सङ्गं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराराधनतया कर्तव्यानीति फलानि च त्यक्त्वा कर्तव्यानीति च निश्चितं मे मतम्। - इति श्रीधरीये। ननु मोक्ष्यसे कर्मबन्धनैरिति कर्मणां बन्धनत्वाभिधानात् कथमेषां पावनत्वम्? इत्यत आह - **एतानीति॥** यानि यज्ञादीनि कर्माणि पावनान्युक्तानि एतान्यपि सङ्गम् 'अहमेवं करिष्यामि' इत्यभिनिवेशं त्यक्त्वा, फलानि च ममैतत्फलसाधनानीति फलोद्देशं विहाय केवलमीश्वराज्ञापालनात्मकतया कर्तव्यानि हे पार्थ, इति मे मम निश्चितमुत्तमं श्रेष्ठं मतम्। - इति केशवकाश्मीरिभट्टाचार्याः निम्बादित्यमतावलम्बिनः॥

तदेवं 'यज्ञदानतपःकर्म न त्याज्यमिति चापरे' इति स्वपक्षं स्थापयित्वा, 'त्याज्यं दोषवदित्येके' इति परपक्षस्य त्रैविध्यव्याख्यानेन निराकरणमारभते - **नियतस्येति**॥

नियतस्य तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥ ७॥

काम्यस्य कर्मणः फलेच्छया कृतस्य शुद्धिहेतुत्वाभावेन बन्धहेतुत्वेन च दोषत्वान्मुमुक्षुणा क्रियमाणस्त्याग उपपद्यत एव। **नियतस्य** नित्यतया स्ववर्णाश्रमोचितस्य **कर्मणः** चित्तशुद्धिहेतुत्वेनादोषस्य **सन्न्यासः** त्यागः **नोपपद्यते**।

ननु काम्यस्येव नियतस्यापि दर्शपूर्णमासज्योतिष्टोमादेः पश्वादिहिंसामिश्रितत्वेन सदोषत्वम्। न च 'अग्नीषोमीयं पशुमालभेत' इत्यादिविशेषविधिगोचरत्वात् क्रत्वङ्गहिंसायाः 'न हिंस्यात् सर्वभूतानि' इति सामान्यनिषेधस्य तदितरपरत्वमिति वाच्यम्। भिन्नविषयत्वेन विधिनिषेधयोरबाधेनैव समावेशात्। निषेधेन हि पुरुषस्यानर्थहेतुर्हिंसेत्यभिहितः[1] विधिना च क्रत्वर्था सेत्युक्तः। न त्वनर्थहेतुर्नेति। तथा च क्रतूपकारकत्वपुरुषानर्थहेतुत्वयोरेकत्र सम्भवात् क्रत्वर्थाऽपि हिंसा निषिद्धेति हिंसायुक्तं दर्शपूर्णमासज्योतिष्टोमादि सर्वं दुष्टमेव। विहितस्यापि निषिद्धत्वं निषिद्धस्यापि च विहितत्वं श्येनादिवदुपपन्नमेव। यथा हि 'श्येनेनाभिचरन् यजेत' इत्याद्यभिचारिविधिना विहितोऽपि श्येनादिः 'न हिंस्यात् सर्वभूतानि' इति निषेधविषयत्वादनर्थहेतुरेव। तद्दोषादिसहिष्णोरेव रागद्वेषादिवशीकृतस्य[2] तत्राधिकारः, एवं ज्योतिष्टोमादावपि। तथा चोक्तं महाभारते[3] -

'जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते।
अहिंसया हि भूतानां जपयज्ञः प्रवर्तते॥' इति।

मनुनाऽपि[4] -

[1] न त्वक्रत्वर्था सेत्यधिकं मधुसूदनीये॥ [2] तद्दोषादिवशीकृतस्येति कोशे। [3] **महाभारतम्** ?? [4] **मनुस्मृतिः** २.८७

'जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥'

इति वदता मैत्रीमहिंसां प्रशंसता हिंसाया दुष्टत्वमेव प्रतिपादितम्। अतस्त्याज्यमेव ज्योतिष्टोमादिकमिति प्राप्ते,

न क्रत्वर्था हिंसाऽनर्थहेतुः। विधिविहिते निषेधानवकाशात्। लिङाद्यर्थो विधिवाक्ये प्रवर्तनाप्रेरणाविध्यपरपर्यायः। निषेधवाक्ये तु निवर्तनानिवारणानिषेधापरपर्यायः। शाब्दीभावना भाव्यं। तस्या यथायोगं प्रवृत्तिनिवृत्ती। शाब्दभावनाज्ञानं करणम्। करणत्वं च शाब्दभाव्यार्थभावनानिष्पादकत्वमिति कर्तव्यतास्वयथायोगं स्तुतिनिन्दे शाब्दभावनाभाव्यार्थभावनायोस्तिङर्थरूपाया प्रवृत्तेर्निवृत्तेश्च ज्योतिष्टोमकलञ्जभक्षणाविष्टसाधनत्वानिष्टसाधनत्वज्ञानं विनाऽनुपपत्तेः। तत्रेष्टसाधनत्वानिष्टसाधनत्वेऽनुमीयेते। ज्योतिष्टोमादेरनिष्टहेतुत्वे विधिवाक्यात् तत्र पुरुषप्रवृत्तिर्न स्यात्। अनिष्टसाधनत्वज्ञानस्य प्रवृत्तिविरोधिनिवृत्तिजनकत्वेन प्रवृत्तिप्रतिबन्धकत्वात्। लिङाद्यर्थप्रवर्तनान्यप्रवृत्तिविषयं धात्वर्थकरणं प्रवर्तनावलम्बते। सा त्वनर्थहेतुं न विषयीकरोतीति यागीयहिंसाविधिबाधितं सामान्यनिषेधवाक्यं रागद्वेषादिमूलकं क्रत्वर्थभिन्नलौकिकहिंसाविषयकं श्येने चेष्टसाधनताया विधिबोधितत्वात् तस्य धर्मत्वमेव। अनिष्टजनकत्वं तु श्येनफलस्य वैरिमरणानुकूलशस्त्रवातादिरूपहिंसात्मकाभिचारस्यैव वेदबोधितत्वात् तस्य धर्मत्वमेव। अनिष्टजनकत्वं तु श्येनानिष्टसाधनताकत्वादधर्मत्वं फलस्य विधिजन्यप्रवृत्तिविषयताभावेन तत्रानिष्टसाधनत्वज्ञानेन प्रवृत्तिप्रतिबन्धकम्। तत्र तु वैरिवधकामो यजेतेति श्रुतं तत्र वैरिमरणानुकूलकर्तृलौकिकव्यापाराभावेऽतिवैरिमरणरूपपरानिष्टचिन्तनादेव पापम्। अभिचारार्थकर्मणस्तामसत्वाच्च न शिष्टानां तत्र प्रवृत्तिः। 'परस्योत्सादनार्थम्' इति विहितस्यापि निषेधविषयत्वे षोडशिग्रहणस्यापि कलञ्जभक्षणवदनर्थहेतुत्वापत्तेः। तस्यापि 'नातिरात्रे षोडशिनं गृह्णाति' इति निषेधात्। उक्तं हि श्रीबादरायणेन 'अशुद्धमिति चेन्न शब्दात्'[1] इति ज्योतिष्टोमादिकर्माग्निषोमीयादि हिंसायुक्तत्वेन दुष्टमिति चेन्न। 'अग्नीषोमीयं पशुमालभेत' इत्यादिविधिशब्दादित्यक्षरार्थः।

[1] ब्रह्मसूत्रम् ३.१.२७

जपप्रशंसावाक्यं तु न यागीयहिंसाया अधर्मत्वबोधकम्, तत्रातात्पर्यात्। तथा च साङ्ख्यानां विहिते निषिद्धत्वज्ञानम्, अर्थहेतावनर्थहेतुत्वज्ञानम्, धर्मे चाधर्मत्वज्ञानम्, अनुष्ठेये त्वज्ञानविपर्यासरूपो मोहः, तस्मान्नित्यकर्मणो यः **परित्यागः** सः **तामसः परिकीर्तितः** [1]॥ ७॥

दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥ ८॥

अनुत्पन्नचित्तशुद्धितया कर्माधिकृतोऽपि **दुःखमेवेति** मत्वा, **कायक्लेशभयात्** नित्यं **कर्म त्यजेत्** सः त्यागः राजसः दुःखं हि रजः। अतः **सः** मोहरहितोऽपि राजसः पुरुषस्तादृशं **राजसं** त्यागं **कृत्वा नैव त्यागफलं** सात्त्विकत्यागफलं भगवज्ज्ञानं[2] **नैव लभेत्** न तु लभेत[3]॥ ८॥

कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥ ९॥

नियतं नित्यं **कर्म** विधिवाक्ये फलाश्रवणेऽपि **कार्यं** कर्तव्यम् **एवेति** बुद्ध्या **नियतं** नित्यं कर्म **सङ्गं** कर्तृत्वाद्यभिनिवेशं **फलं च त्यक्त्वैव यत् क्रियते स त्यागः सात्विकः** सत्वनिर्वृतः **मतः**।

ननु नित्यानां फलमेव नास्तीति कथं 'फलं त्यक्त्वा' इति? चेत्, उच्यते। एतद्भगवद्वाक्यादेव नित्यानां फलमस्तीति गम्यते। निष्फलस्यानुष्टानासम्भवात्। तथा चापस्तम्भः 'तद्यथाऽऽम्रे फलार्थे निर्मिते च्छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते' इत्यानुषङ्गिकं फलं नित्यानां दर्शयति॥ ९॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥ १०॥

[1] सोऽयं दीर्घप्रबन्धः प्रायो मधुसूदनीयानुसारी परिहारांशे प्रथमभागं विहाय। [2] सात्त्विकत्यागस्य फलं ज्ञाननिष्ठालक्षणम्।**इति मधुसूदनसरस्वतीये** [3] न तु लभते - पा.

त्यागी सात्विकत्यागयुक्तः सङ्गं फलेच्छां च त्यक्त्वा चित्तशुद्ध्यर्थं यदा समाविष्टः सत्वेन = आत्मानात्मविवेकज्ञानहेतुना चित्तगतेनातिशयेन ज्ञानप्रतिबन्धकरजस्तमोमलराहित्येन, आ = समन्तात् फलाव्यभिचारेण विष्टः = व्याप्तो भवति, भगवदर्पितकर्मानुष्ठानान्निरस्तसमस्तज्ञानोत्पत्तिप्रतिबन्धक इत्यर्थः। तदा **मेधावी** श्रवणमनननिदिध्यासनादिजन्या भगवद्विषयकापरोक्षधीः मेधा[1], तया नित्यं युक्तो भवति। तदा भगवत्तत्वे **च्छिन्नसंशयः** तदा क्षीणकर्मत्वात् **न द्वेष्ट्यकुशलं कर्म** अशोभनं काम्यं निषिद्धं वा न प्रतिकूलतया मन्यते। **कुशले** शोभने नित्ये **नानुषज्जते** न प्रीतिं करोति।

यद्वा, **अकुशलं** दृष्टदुःखं शीते प्रातःस्नानादिकं **कुशले** पूर्वजन्मकृतपुण्यफले **न** सज्जते[2] शेषं प्राग्वत्॥ १०॥

नन्वेवम्भूतात् कर्मफलत्यागाद्वरं सर्वकर्मपरित्यागः विहितकर्मपरित्यागो वा त्यागशब्दार्थः। कर्ममात्रस्य मनोविक्षेपकत्वादित्यत आह - **नहीति**॥

नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥ ११॥

देहभृता देहधारणपोषणाद्यर्थं चेष्टां कुर्वता **अशेषतः** अशेषाणि **कर्माणि त्यक्तुं नहि शक्यं** न शक्यानि। देहपोषणाद्यर्थं लौकिककर्मणामवश्यकत्वात्। स्वोचितकर्मणो देहाभिमानिनाऽकरणे प्रत्यवायापत्तिः। अतो यावद्देहादावहंममेत्यभिमानः, तावल्लौकिकवैदिकादिकं कर्म दुस्त्यजमित्यर्थः। तस्मात् **यस्तु** अधिकारी सत्त्वशुद्ध्यर्थं कर्माणि कुर्वन्नपि भगवदर्पणतया तत्फलत्यागी, तुशब्दस्तस्य दुर्लभत्वद्योतनार्थः, **स त्यागीत्यभिधीयते** त्यागफलस्य तेन सम्यक् प्राप्यत्वाद् गौण्या वृत्त्या स त्यागीति कथ्यते। अशेषकर्मत्यागस्तु निवृत्तदेहाभिमानेनैव पुरुषेण। स एव मुख्यः सन्न्यास इति भावः॥ ११॥

---

[1] शमदमसर्वकर्मोपरमगुरूपसदनादिसामवायिकाङ्गयुक्तेन मनननिदिध्यासनाख्यफलोपकार्यङ्गयुक्तेन च श्रवणाख्यवेदान्तवाक्यविचारेण परिनिष्पन्नं वेदान्तमहावाक्यकरणकं निरस्तसमस्ताप्रामाण्याशङ्कं चिदन्याविषयकम् अहं ब्रह्मास्मीति ब्रह्मात्मैक्यज्ञानमेव मेधा।**इति मधुसूदनसरस्वतीये**

[2] अकुशलं शरीरदुःखावहं शिशिरे प्रातःस्नानमेकादश्युपवासजागरणादिकं कर्म न द्वेष्टि प्रतिकूलबुद्ध्या न त्यजति। कुशले सर्वकनसामान्यप्रियत्वेनाभिमते ग्रीष्मेऽसकृत्स्नानजनक्रीडादिवास्वापारामाटनादौ नानुषज्जते प्रीत्यतिशयं न करोति। - इति केशवकाश्मीरिभट्टाचार्याः॥

एतादृशकर्मफलत्यागं स्तौति -

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥ १२॥

अनिष्टं नरकदुःखादि। **इष्टं** स्वर्गसुखादि। **मिश्रम्** इष्टानिष्टसंयुक्तं मानुष्यलक्षणमित्येवं **त्रिविधम्** इत्यनुवादो हेयत्वार्थः। **अत्यागिनां** सकामानां फलासक्तानां **प्रेत्य** परलोके देहान्तरे वा **भवति। नतु सन्नासिनां क्वचित्** फलेच्छाशून्यानां कर्म कुर्वताम्।

यद्वा, **अत्यागिनां** कर्मफलत्यागित्वेऽपि[1] कर्मानुष्ठायिनामज्ञानां गौणसन्न्यासिनां **प्रेत्य** विविदिषापर्यन्तशुद्धेः प्रागेव मृतानां पूर्वकृतस्य कर्मणः फलं देहग्रहणं भवति। तच्च फलं कर्मणस्त्रिविधत्वात् त्रिविधम्। पापस्य **अनिष्टं** प्रतिकूलवेदनीयं नरकतिर्यगादिरूपम्। पुण्यस्य **इष्टम्** अनुकूलवेदनीयं सुखम्। मिश्रस्य पापपुण्ययुगलस्य **मिश्रं** मानुषादि।

एवं गौणसन्न्यासिनां देहान्तरादूर्ध्वं देहान्तरग्रहणमावश्यकमित्युक्त्वा, मुख्यसन्न्यासिनां परमात्मसाक्षात्कारेणाविद्यायां निवृत्तौ कैवल्यमेवेत्याह - **नतु सन्न्यासिनां क्वचित्॥** परमात्मज्ञानवतां मुख्यसन्न्यासिनां प्रेत्य कर्मणः फलं देहग्रहणम् **अनिष्टमिष्टं मिश्रं च क्वचित्** देशे काले वा न भवत्येवेत्यवधारणार्थस्तुशब्दः।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥' इति श्रुतेः[2]॥ १२॥

न केवलं कर्मत्यागः सन्न्यासः। किन्तु, 'अन्तर्यामिप्रेरितदेहेन्द्रियादौ कर्मोत्पद्यते, नाहं कर्मकर्ता' इत्याद्यभिमानत्यागश्च सन्न्यास इति प्रागुक्तं सन्न्यासं

[1] कर्मफलात्यागित्वेऽपि इति स्यात्। [2] **मुण्डकोपनिषत्** २.२.८

प्रपञ्चयितुमात्मनोऽकर्तृत्वे कथं क्रियानिष्पत्तिः? कर्तृत्वे च कथमभिमानत्यागः? इति शङ्कानिराकरणायाह - **पञ्चेति॥** [1]

पञ्चैतानि महाबाहो कारणानि निबोध मे।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥ १३॥

एतानि वक्ष्यमाणानि **पञ्च सर्वकर्मणां सिद्धये** निष्पत्तये **कारणानि**। हे **महाबाहो** मम परमाप्तस्य वचनात् **निबोध** बोधाय सावधानो भव[2] किमेतान्यप्रमाणकान्येव त्वद्वचनाज्ज्ञेयानि? नेत्याह - **साङ्ख्ये कृतान्ते प्रोक्तानि** निरतिशयपुरुषार्थप्राप्त्यर्थं ज्ञातव्यानि जीवेश्वरप्रधानानि श्रवणादयश्च पदार्थाः सङ्ख्यायन्ते प्रतिपाद्यन्तेऽस्मिन्निति **साङ्ख्ये** वेदान्तशास्त्रे। नन्वात्मप्रतिपादके तस्मिन् किमर्थं लोकसिद्धानि कर्मकारणानि पञ्च प्रतिपाद्यन्ते? इत्यतः शास्त्रविशेषणम् - **कृतान्त इति॥** कृतमिति कर्मोच्यते। तस्यान्तः परिसमाप्तिस्तत्त्वज्ञानोत्पत्त्या यत्र तस्मिन् **कृतान्ते** शास्त्र आत्मनो कर्तृत्वज्ञानाय **प्रोक्तानि**।

यद्वा, **साङ्ख्ये** कपिलप्रोक्ते सेश्वरे **कृतान्ते** सिद्धान्ते **प्रोक्तानि** इत्यर्थः[3]॥ १३॥

प्रामाणिककर्मकारणानि पञ्चात्मनो कर्तृत्वज्ञानार्थं ज्ञातव्यानि कानि? इत्यपेक्षायामाह - **अधिष्ठानमिति॥**

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥ १४॥

इन्द्रियाद्याश्रयः **अधिष्ठानं** देहः। तथा **कर्ता** परमेश्वरः। **करणं च** इन्द्रियवृन्दं **पृथग्विधं** ज्ञानेन्द्रियकर्मेन्द्रियादिभेदेन नानाप्रकारं करणम्। **विविधाः** नानाप्रकाराः पञ्चधा दशधा वा प्रसिद्धाः **पृथक्** असङ्कीर्णाः। **चेष्टाः** प्राणापानव्यानोदानसमानाः नागकूर्मकृकलदेवदत्तधनञ्जयाख्याश्चान्तर्भूता वायवः। **दैवम्**

---

[1] तत्रात्मज्ञानरहितस्य संसारित्वे हेतुः कर्मत्यागासम्भव उक्तः 'नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः' इति। तत्राज्ञस्य कर्मत्यागासम्भवे को हेतुः? कर्महेतावधिष्ठानादिपञ्चके तादात्म्याभिमान इतीममर्थं चतुर्भिः श्लोकैः प्रपञ्चयति। तत्र प्रथमेनाधिष्ठानादीति पञ्च वेदान्तप्रमाणमूलानि हेयत्वार्थमवश्यं ज्ञातव्यानीत्याह - **पञ्चेति॥ इति मधुसूदनसरस्वतीये** [2] बोद्धुं सावधानो भव **इति मधुसूदनसरस्वतीये** । [3] 'कथितं परमं साङ्ख्यं कपिलाख्येन विष्णुना। सेश्वरं वैदिकं साक्षाज्ज्ञेयमन्यदवैदिकम्॥' इति गीतातात्पर्योदाहृतं प्रमाणवचनम्।

अदृष्टम्[1] । 'देहो ब्रह्माथेन्द्रियाद्याः क्रियाश्च तथाऽदृष्टं पञ्चमं कर्महेतुः' इति श्रुतेः[2]

यद्वा, कर्ता शास्त्रार्थवत्त्वाद्यनुसारात् **कर्ता** जीवः। **दैवम्** ईश्वरः। अदृष्टस्य करणादावन्तर्भावः। यथा चत्वारः क्रियायां हेतवः **तथा** जीवोऽपि, नतु केवलो जीव एव कर्तेति भावः[3]॥ १४॥

तेषां कारणत्वमुपपादयति - **शरीरेति॥**

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥ १५॥

शारीरं वाचिकं मानसं च विधिनिषेधरूपं त्रिविधं कर्म धर्मशास्त्रेषु प्रसिद्धम्। शरीरेण वाचा मनसा वा **यत् कर्म प्रारभते नरः** मनुष्याधिकारत्वाच्छास्त्रस्य। कीदृशम् ? **न्याय्यं** शास्त्रीयं धर्मं **विपरीतं वा** अशास्त्रीयमधर्मम्। यच्च निमिषितचेष्टितादि जीवनहेतुरन्यद्वा विहितप्रतिषिद्धसमं तत् सर्वं पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेवान्तर्भूतम्। **पञ्चैते** यथोक्ता अधिष्ठानादयः **तस्य** सर्वस्यैव कर्मणो **हेतवः** ॥ १५॥

केवलं स्वस्यैव कर्तृत्वाभिमानिनं निन्दति - **तत्रेति॥**

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ १६॥

---

[1] अधिष्ठानं देहादिः। कर्ता विष्णुः। स हि सर्वकर्तेत्युक्तम्। जीवस्य चाकर्तृत्वे प्रमाणमुक्तम्। करणम् इन्द्रियादि। चेष्टाः क्रियाः। हस्तादिक्रियाभिर्हि होमादिकर्माणि जायन्ते। ध्यानादेरपि मानसी चेष्टा कारणम्। पूर्वतनीचेष्टाऽपि संस्कारकारणत्वेन भवति। दैवम् अदृष्टम्।**इति मध्वभाष्यम्** वायवीयाः प्राणापानाद्याः चेष्टा इत्यसत्। द्रव्याभिधाने चेष्टत्वानुपपत्तेः। प्राणनाद्यभिधाने साध्यत्वात् कारकत्वानुपपत्तेरित्याशयवानाह - **चेष्टा इति॥ इति प्रमेयदीपिका**

[2] आयास्यश्रुतिर्मध्वभाष्योदाहृता॥ [3] यद्वा कर्तृपदेन पराधीनकर्ता जीवः। दैवपदेन विष्णुः। कर्मणां कर्त्रादिकारकषट्कसाध्यत्वेऽपि इह कर्मापादानादेरनुक्तिरसार्वत्रिकत्वात् तस्येति ज्ञेयम्।**इति राघवेन्द्रतीर्थीये गीतार्थसङ्ग्रहे**

तत्र कर्मणि **एवं सति** पञ्चानां कारणत्वे **य आत्मानं केवलं** निष्क्रियमपि[1] स्वातन्त्र्येण **कर्तारं पश्यति, सः** गुरूपदेशेनासंस्कृतबुद्धित्वात् **दुर्मतिर्न पश्यति** सम्यङ्ग जानातीत्यर्थः। **केवलम्** इति हेतुगर्भविशेषणम्।

अयं भावः। ज्ञानानन्दस्वरूपस्य स्वतोऽक्रियस्य जीवस्यानाद्यविद्यया देहादावहंममेत्यभिमानसम्बन्धेन कर्म तज्जन्यादृष्टं च जीवे सम्बद्ध्यते। तादृशादृष्टजन्यकृत्यादिमत्त्वरूपकर्तृत्वादिकं स्वजनकादृष्टवत्त्वेन सम्बन्धेन जीवे वास्तवमेव सम्बद्ध्यते। यथा पुत्रे सकले विकले 'अहमेव सकलो विकलः'। तत्र च स्वपुत्रयोर्भेदज्ञानेन बाधान्नाभेदारोपः। तथा 'मम देहः' इत्यादिभेदज्ञानेन बाधान्न देहात्मनोरभेदारोपः। किन्तु, औपचारिकोऽयं व्यवहारः। आभिमानिकं वास्तवं कर्तृत्वं यदभिमानादिकं विहाय केवलात्मन एव पश्यति स दुर्मतिः। मुक्तौ पर्यटनादिकर्तृत्वं स्वरूपभूतम् इदानीमविद्यावृतं भगवन्महाप्रसादादाविर्भूतं न तन्निराक्रियते। किन्तु, अन्यसम्बन्धादस्वाभाविकं यत् कर्तृत्वं तदेवानार्थहेतुः। तदेव च शास्त्रेण निवार्यत इति॥ १६॥

अविद्यादेहेन्द्रियादिसम्बन्धविमुक्तं केवलमात्मानं यो कर्तारं पश्यति तं स्तौति - **यस्येति॥**

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वाऽपि स इमांल्लोकान्न हन्ति न निबध्यते॥ १७॥

यस्य जातेश्वरापरोक्षज्ञानस्य निवृत्ताशेषाविद्यस्य जीवन्मुक्तस्य देहादौ निवृत्ताहंममेत्यभिमानस्य 'अहम्' इति कृतो जातो **भावः** अभिप्रायो यस्य देहादौ नास्ति। अहं स्वतः कर्तैवेत्यभिमानो नास्तीत्यर्थः। अत एव **बुद्धिर्यस्य न लिप्यते** इष्टानिष्टबुद्ध्या कर्मसु न सज्जते। **स लोकानिमान्** प्राणिनो **हत्वाऽपि न हन्ति।** लोकदृष्ट्या हननकर्ताऽपि विवेकदृष्ट्या 'हन्मि' इति भावाभावान्न हन्ति[2] न वा हननफलपापादिना बद्ध्यते। यद्यपि जीवन्मुक्तस्य प्राक्सम्पादिताहिंसादिधर्मस्य संस्कारवशात् प्रेक्षापूर्वकं वा न हिंसादिदुष्टकर्तृत्वम्। तथाऽपि **हत्वाऽपि** इत्यपिना कैमुत्यन्यायेन जीवन्मुक्तोऽकर्तृत्वज्ञानवान् स्तूयते।

[1] केवलं निष्क्रियम्।**इति मध्वभाष्यम्**

[2] अस्वातन्त्र्यज्ञानाद्धन्मीति भावोऽप्यस्य नास्तीति न हन्ति।**इति गीतातात्पर्ये** ।

यद्वा, आत्मनोऽकर्तृत्वमनुसन्दधानः स्वोचितं कर्म कुर्वन्नपि तत्फलेन न लिप्यते। क्षत्रियधर्माभिप्रायेण **हत्वाऽपि** इत्युक्तम्। आत्मनोऽकर्तृत्वं जानन् क्षत्रियः धर्मयुद्धे सर्वलोकान् हत्वाऽपि न तत्फलेन पुण्यादिजन्यस्वर्गादिना न लिप्यत इत्यर्थः। **न** वा **निबध्यते** तत्फलभोगपरम्परार्थं संसारी न भवतीत्यर्थः[1]

ननु यदि जीवो न कर्ता, तर्हि तं प्रति प्रवृत्तस्य विधिनिषेधशास्त्रस्य वैय्यर्थ्यं स्यात्। तत्राह - **ज्ञानमिति॥**

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः॥ १८॥

ज्ञानं विधिविषयं **ज्ञेयं** इच्छाप्रयत्नलक्षणम् अधिष्ठानादिलक्षणं पुरुषार्थलक्षणं च **परिज्ञाता** सर्वज्ञ ईश्वरः सर्वप्रेरक इति **त्रिविधा कर्मचोदना** कर्मविधिः। निमित्तनिमित्तिनोरभेदोपचारात् **त्रिविधा** इत्युक्तम्। एतत् त्रिविधं निमित्तमपेक्ष्य कर्मविधिः प्रवर्तत इत्यर्थः।

एतदुक्तं भवति। न स्वतन्त्रकर्तृत्वं विधिविषयत्वे प्रयोजकम्। येन जीवं प्रति कर्मविधिवैय्यर्थ्यं स्यात्। तथा सतीश्वरस्य विधिविषयत्वं स्यात्। किन्तु यस्य स्वसम्बन्धितया विधिज्ञानं कर्म तत्फलं चोद्दिश्य, इच्छा तदनुगुणश्च प्रयत्नोऽधिष्ठानादिसन्निधानं कर्मसम्बन्धः फलभाक्त्वं चास्ति, तं प्रति कर्मविधयः प्रवर्तन्ते। अस्ति चेदं समस्तं परमेश्वराधीनं जीव इति कथं न तं प्रति कर्मविधयः स्युः? इति। स्वतन्त्रोऽपीश्वरो जीवे विधिज्ञानमुत्पाद्यैवेच्छाप्रयत्नौ कारयित्वा, उक्तशरीरादिपञ्चकरणैः कर्म कारयित्वा, फलं ददातीति।

यद्वा, जडापेक्षया स्वातन्त्र्यमीश्वराधीनं जीवेऽस्तीत्यतोऽपि न विधिवैय्यर्थ्यम्।

स्यादिदं प्रवृत्तविधिवैय्यर्थ्यं यदि जीवस्य क्रियास्वातन्त्र्यलक्षणं कर्तृत्वं सर्वथा न स्यात्। नचैवम्। ईश्वरायत्तस्य तस्याङ्गीकारात्। अपराधीनापेक्षया तदभावोक्तेः। नचैवं जडतौल्यम्। जडं हि तदा परकृतेन तोदनादिना

[1] स इमान् लोकान् युद्धे हत्वाऽपि तान्न निहन्ति। न केवलं भीष्मादीनित्यर्थः। तत्स्तेन युद्धाख्येन कर्मणा न निबध्यते तत्फलं नानुभवतीत्यर्थः।**इति रामानुजभाष्ये** ।

क्रियावद्भवति। नत्वागन्तुककारणमन्तरेण स्वेच्छया। जीवस्त्वनादिसिद्धपरमेश्वरप्रसादायत्तया सत्तातुल्यक्रियाशक्त्या कर्तेति युक्तस्तं प्रति कर्मविधिरिति। विधिज्ञाने सतीच्छाप्रयत्नादीत्येतदनुभवसिद्धम्। ईश्वराधीनत्वं 'यथा नियुक्तोऽस्मि तथा करोमि'[1] इत्याद्यागमात् सिद्धम्[2]

ईश्वरस्य सर्वकर्मसु प्रेरकत्वमुक्त्वा, तत्प्रेरकस्य पूर्वोक्तकर्मकारणानि सङ्क्षिप्याह - **करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः** कारणानां पञ्चानां सङ्ग्रहः सङ्क्षेपः। कर्मशब्देन तत्कारणानि लक्ष्यन्ते। क्रियतेऽनेनेति करणसाधनप्रधानो वा कर्मशब्दः।

यद्वा, दैवशब्दोतितेश्वरस्यैव मुख्यकर्तृत्वात् स्वतन्त्रास्वतन्त्रकर्त्रोरीशजीवयोः कर्तृशब्देनोक्तेः कारणानां त्रविध्यमित्यर्थः[3]

केचित्तु,[4] "अधिष्ठानादिपञ्चकस्य क्रियाहेतुत्वमुक्त्वा तस्यैव ज्ञानज्ञेयादिरचनया त्रैगुण्यभेदं व्याख्यातुमुपक्रमते - **ज्ञानमिति॥ ज्ञानं** विषयप्रकाशक्रिया। **ज्ञेयं** तस्य कर्म। **परिज्ञाता** तस्याश्रयः कर्ता। एतत्त्रयं सर्वकर्मणां प्रवर्तकम्। तदेतदाह - **त्रिविधा कर्मचोदना**। चोदनेति प्रवर्तकमुक्तम्। चोदनेति क्रियायाः प्रवर्तकं वचनमाहुरिति शाबरे। 'चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः' इति भाट्टे वचने क्रियाप्रवर्तकवचनत्वं यद्यपि चोदनापदशक्यतया प्रतीयते। तथाऽपि वचनत्वं विहाय प्रवर्तकत्वमात्रमिह लक्ष्यते। ज्ञानादिषु वचनत्वाभावात्। तथा **करणं** साधकतमं बाह्यं श्रोत्रादि, अन्तःस्थं बुद्ध्यादि। **कर्म** कर्तुरीप्सिततमं क्रियया व्याप्यमानम् उत्पाद्यमानं विकार्यं संस्कार्यं च। **कर्ता** इतरकारकाप्रयोज्यत्वे सति सकलकारकाणां प्रयोक्ता। **त्रिविधः** त्रिप्रकारः। कर्म सङ्गृह्यतेऽस्मिन्निति **कर्मसङ्ग्रहः** कर्माश्रयः[5] प्रेरणीय इत्येवं **त्रिविधा कर्मचोदना** कर्म क्रियापुरुषव्यापाररूपार्थभावना तद्विषया चोदना प्रेरणा विधिरूपा शाब्दी

---

[1] 'यथा नियुक्तोष्मि तथा चरामि' इति तु **महाभारतम्** १४.२६.१, १२.१६१.४५, 'तथा वहामि' इति तु **महाभारतम्** २.५७.८, १२.२१९.८, १२.२१९.९ [2] तदिदं समग्रं जीवस्य पराधीनकर्तृत्वमुपपादयत्प्रकरणं श्रीजयमुनिप्रणीतप्रमेयदीपिकागतम्॥ [3] दैवशब्दोदितेश्वरस्यैव मुख्यकर्तृत्वात् स्वतन्त्रास्वतन्त्रकर्त्रोः कर्तृशब्देनैवोक्तेः त्रैविध्यम्।**इति गीतातात्पर्ये** ।
[4] मधुसूदनसरस्वत्यस्त्वित्यर्थः। [5] "चकारार्थादितिशब्दात् सम्प्रदानमपादानमधिकरणं च राशित्रयान्तर्भूतम्। एवं कारकषट्कमेव त्रिविधं क्रियाया आश्रयो नतु कूटस्थ आत्मेत्यर्थः। कर्मप्रेरकस्य कर्माश्रयस्य च कारकरूपत्वात् त्रैगुण्यात्मकत्वाद्याकारकस्वभावो गूणातीतश्चात्मा सर्वकर्मसंस्पर्शीत्यभिप्रायः। अथवा ज्ञानं प्रेरणारूपं लिङादिशब्दजन्यम्, ज्ञेयं तस्य ज्ञानस्य विषयत्वेन लिङादिशब्दस्वरूपं प्रेरकम्, परिज्ञाता तस्य ज्ञानस्याश्रयः" इत्यधिकं मधुसूदनीये।

भावनेत्यर्थः। तथा **करणं** सेतिकर्तव्यताकं साधनं धात्वर्थः। **कर्म** भाव्यं स्वर्गादिफलम्। **कर्ता** फलकामनावान् पुरुषः क्रियाया निवर्तक इत्येवं **त्रिविधः** कर्मणः = पुंव्यापाररूपार्थस्य भावनायाः सङ्ग्रहः = सङ्क्षेपः" इत्याहुः॥ १८॥

इदानीं ज्ञानज्ञेयज्ञातृरूपस्य करणकर्तृकर्मरूपस्य च त्रिकद्वयस्य त्रिगुणात्मकत्वं वक्तव्यमिति तदुभयं सङ्क्षिप्य त्रिगुणात्मकत्वं प्रतिजानीते - **ज्ञानमिति**॥

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि॥ १९॥

ज्ञानं प्राग्व्याख्यातम्। **कर्म** क्रिया 'त्रिविधः कर्मसङ्ग्रहः'[1] इत्यत्रोक्तः। **कर्ता** क्रियाया निवर्तकः। गुणाः सत्त्वरजस्तमांसि सम्यक् ख्यायन्तेऽस्मिन्निति कपिलोक्तं सेश्वरं साङ्ख्यं गुणसङ्ख्यानम्। ज्ञानं क्रिया च कर्ता च **गुणभेदतः** सत्त्वरजस्तमोगुणभेदेन **त्रिधैव प्रोच्यते। यथावत्** यथाशास्त्रं। **श्रुणु तानि** ज्ञानादीनि। अपिशब्दात् तद्भेदजातानि च गुणभेदकृतानि।

चतुर्दशे 'तत्र सत्त्वं निर्मलत्वात्'[2] इत्यादिना गुणानां बन्धनप्रकारो निरूपितः। गुणातीतस्य जीवन्मुक्तत्वनिरूपणाय सप्तदशे 'यजन्ते सात्त्विका देवान्'[3] इत्यादिना गुणकृतत्रिविधस्वभावनिरूपणेनासुरं रजस्तमः स्वभावं परित्यज्य सात्त्विकाहारादिसेवया दैवः सात्त्विकस्वभावः सम्पाद्य इत्युक्तम्। इह तु स्वभावतो गुणातीतस्यात्मनस्त्रिगुणकार्यक्रियादिसम्बन्धो नास्तीति दर्शयितुं तेषां सर्वेषां त्रिगुणात्मकमेव न रूपान्तरमस्ति येनात्मसम्बन्धिता स्यादित्युच्यत इति न पुनरुक्तिः॥ १९॥

ज्ञानत्रैविध्यमाह - **सर्वभूतेष्विति**॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥ २०॥

[1] भगवद्गीता १८.१८ [2] भगवद्गीता १४.६ [3] भगवद्गीता १७.४

भवन्ति विद्यन्त इति भूतानि जीवाः। भवन्त्युत्पद्यन्त इति भूतानि जडानि। तेषु **विभक्तेषु** जडेश्वराभ्यां जीवेश्वराभ्यां परस्परं च यथायोग्यं पञ्चभेदवत्सु तथा तारतम्यलक्षणविभागवत्सु चिदचिद्रूपसर्ववस्तुषु स्थितम्। **अविभक्तं** स्वस्यावतारगुणकर्मादिषु भेदतारतम्यादिरूपविभागरहितम्। **अव्ययं** दुःखोत्पत्तिनाशादिविकारशून्यम्। **एकं** समाभ्यधिकरहितं सर्वोत्तमं **भावं** सदा सन्तं श्रीहरिं **येन** ज्ञानेन **ईक्षते** विषयीकरोति **तज्ज्ञानं सात्त्विकं विद्धि। येन** साधनेन जानाति **तत्** ज्ञानसाधनं **सात्त्विकम्** इति वा।

जीवजडाभ्यां भिन्नं विलक्षणं च सर्वनियामकं सर्वव्यापकं सदनन्तगुणपूर्णं भगवन्तं यज्ज्ञानेन विषयीकरोति तज्ज्ञानं सात्त्विकमिति भावः॥ २०॥

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥ २१॥

सर्वभूतेषु स्थितमीश्वरं **पृथक्त्वेन** भूतेभ्यो भिन्नत्वेन **तु वेत्ति यज्ज्ञानम्**। तुशब्दः सर्वोत्तमत्वज्ञानं व्यावर्तयति। भूतेभ्यो भिन्नत्वेन, नतु सर्वोत्तमत्वेनेत्यर्थः। तथा नानावस्तुनो भिन्नान् जीवान् प्रत्येकं **पृथग्विधान् वेत्ति** विषयीकरोति। **यज्ज्ञानं तद्राजसं** स्मृतम्।

यदा कर्म करोति जीवस्तदा स्वभावतः कर्तैव, यदा स्वर्गनरकादौ सुखादिकं भुङ्क्ते तदा स्वभावतस्तत्सुखादिभोक्तैवेति येन ज्ञानेन विषयीकरोति, नतु सर्वासु सुखदुःखभोक्तृत्वकर्मकर्तृत्वाद्यवस्थास्वनुगतं चिदानन्दघनं कर्मरूपाविद्यया कर्तृत्वभोक्तृत्वादियुक्तमपि स्वभावतस्तद्रहितं जीवस्वरूपं विषयीकरोति तज्ज्ञानं स्वर्गनरकसंसृतिहेतुत्वाद्राजसमिति भावः॥ २१॥

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पं च तत् तामसमुदाहृतम्॥ २२॥

बहुषु भूतकार्येषु **एकस्मिन् कार्ये** भूतविकारे देहे **अहैतुकं** हेतुर्युक्तिः, तद्रहितम्। 'अन्येषां भूतकार्याणामात्मत्वाभावे कथमेकस्य तादृशस्यात्मत्वम् ?'

इत्याद्यनुसन्धानशून्यम्। **कृत्स्नवत्** परिपूर्णवत्। **सक्तं** एतावानेवात्मा, नातः परमस्तीत्यभिनिवेशनलग्नम्। यथा दिगम्बराणां सावयवो देहपरिमाण आत्मेति। यथा चार्वाकाणां देह एवात्मेति। अहैतुकत्वादेव **अतत्त्वार्थवत्** न तत्त्वार्थालम्बनम्। **अल्पं च** नित्यत्वाग्रहात्[1]॥ २२॥

कर्मत्रैविध्यमाह - **नियतमिति त्रिभिः॥**

नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत् तत् सात्त्विकमुच्यते॥ २३॥

नियतं यावदङ्गोपसंहारासमर्थानामपि फलावश्यम्भावव्याप्तम्। नित्यमिति यावत्। असङ्गम्, सङ्गः = 'मदीयमिदं कर्म तेनेदमाप्नुयाम्' इत्यभिमानः, तद्रहितम्। रागः = 'अनेन कर्मणा राजसम्मानादि प्राप्स्यामि' इतीच्छा। द्वेषः = 'शत्रुमनेन नाशयिष्यामि' इत्यभिप्रायः। ताभ्यां न कृतं तत् तथा। **अफलेप्सुना** फलेच्छारहितेन पुंसा **यत्** कृतं **कर्म तत् सात्त्विकमुच्यते** ॥ २३॥

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्॥ २४॥

कामेप्सुना फलकामेन **साहङ्कारेण** 'अहमेव सम्यक् कर्मकर्ता' इति गर्वयुक्तेन। वाशब्दः समुच्चये। **पुनरिति॥** अनियतम्, यावत्कामं कामस्यावृतेः। **बहुलायासं** सर्वाङ्गोपसंहारेण क्लेशावहं **यत्** काम्यं कर्म **क्रियते तद्राजसमुदाहृतम्।**

अनुबन्धं क्षयं हिंसामनपेक्ष्य[2] च पौरुषम्।
मोहादारभ्यते कर्म यत् तत् तामसमुच्यते॥ २५॥

अनुबन्धं पश्चाद्भावि शुभम्। **क्षयं** देहसामर्थ्यस्य धनादेश्च नाशम्। **हिंसां** प्राणिपीडाम्। **पौरुषम्** आत्मसामर्थ्यम्। **अनपेक्ष्य** अनालोच्य। **मोहात्** केवलाविवेकादेव **आरभ्यते यत् कर्म तत् तामसमुच्यते** ॥ २५॥

[1] अल्पं च नित्यत्वविभुत्वाग्रहात्। **इति मधुसूदनसरस्वतीये**

[2] हिंसामनवेक्ष्य - पा.

कर्तुस्त्रैविध्यमाह - **मुक्तेति त्रिभिः॥**

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥ २६॥

मुक्तसङ्गः फलेच्छाशून्यः। **अनहंवादी** 'कर्ताऽहम्' इति वदनशीलो न भवति। धृतिः = विप्लवाद्युपस्थितावपि प्रारब्धापरित्यागहेतुश्चित्तवृत्तिः। धैर्यम् = उत्साहः, 'इदं करिष्यामि' इति निश्चयात्मिका बुद्धिः। ताभ्यां समन्वितः। क्रियमाणकर्मफलस्य सिद्धावसिद्धौ च हर्षशोकाभ्यां हेतुभ्यां विकारः = वदनविकासम्लानत्वादिः, तेन रहितः **सिद्ध्यसिद्ध्योर्निर्विकारः**। एतादृशः **कर्ता सात्त्विक उच्यते** ॥ २६॥

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥ २७॥

रागी कामाद्याकुलचित्तः। अत एव **कर्मफलप्रेप्सुः। लुब्धः** परद्रव्याभिलाषी धर्मार्थं स्वद्रव्यत्यागासमर्थश्च। परवृत्तिच्छेदनं हिंसा, तदात्मकः। **अशुचिः** शास्त्रोक्तशौचहीनः। सिद्ध्यसिद्ध्योः कर्मफलस्य **हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः** ॥ २७॥

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥ २८॥

अयुक्तः कर्तव्येष्वनवहितः। **प्राकृतः** शास्त्रासंस्कृतचित्तः। **स्तब्धः** पूज्येष्वनम्रः। **शठः** परवञ्चनार्थम् अन्यथाजानन्नप्यन्यथावादी। **नैष्कृतिकः** स्वस्मिन्नुपकारित्वबुद्धिमुत्पाद्य परवृत्तिच्छेदनेन स्वार्थपरः। वञ्चक इति यावत्। **अलसः** अवश्यकर्तव्येष्वप्रवृत्तिशीलः। **विषादी** सततमसन्तुष्टस्वभावत्वेनानुशोचनशीलः। **दीर्घसूत्री** निरन्तरं शङ्कासहस्रकलितान्तःकरणत्वेनातिमन्थरप्रकृतिः[1]

[1] अतिमन्दप्रकृतिः इति स्यात्।

'यदद्य कर्तव्यं तन्मासेनापि करोति न वा' इत्येवंशीलः **कर्ता तामस उच्यते** ॥ २८॥

बुद्धिधृत्योस्त्रैविध्यं प्रतिजानीते - **बुद्धेरिति॥**

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय॥ २९॥

बुद्धेः अध्यवसायादिवृत्तिमत्या **धृतेश्च** तद्वृत्तेः। सत्त्वादिगुणतः **त्रिविधं** भेदं मया परमाप्तेनोच्यमानम् **अशेषेण** निरवशेषं **पृथक्त्वेन** हेयोपादेयविवेकेन **श्रुणु** ॥ २९॥

तत्र बुद्धेस्त्रैविध्यमाह - **प्रवृत्तिमिति त्रिभिः॥**

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥ ३०॥

प्रवृत्तिं कर्ममार्गं **निवृत्तिं** सन्न्यासमार्गम्। कार्यम् = प्रवृत्तिमार्गे कर्मणां करणम्। अकार्यम् = निवृत्तिमार्गे कर्मणामकरणम्। भये = प्रवृतिमार्गे गर्भवासादिदुःखम्। अभयम् = निवृत्तिमार्गे तदभावम्। **बन्धं मोक्षं च वेत्ति** करणे कर्तृत्वोपचारात् यया वेत्ति कर्ता, **बुद्धिः सा** प्रमाणजनितनिश्चयवती हे **पार्थ सात्त्विकी।**

बन्धमोक्षयोरेव कीर्तनात् तद्विषयमेव प्रवृत्त्यादि व्याख्यातम्॥ ३०॥

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी॥ ३१॥

धर्मं शास्त्रविहितम्। **अधर्मं** शास्त्रप्रतिषिद्धम्। अदृष्टार्थमुभयम्। **कार्यं चाकार्यं च** दृष्टार्थमुभयम्। **अयथावत्** एव जानाति यथावन्न जानाति किं त्विदमित्थं न वेति चानवध्यवसायं वा[1] भजते **यया** बुद्ध्या **सा राजसी बुद्धिः** ॥ ३१॥

[1] चानध्यवसायं संशयं वा इति स्यात्। तथैव मधुसूदनीये।

अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ ३२॥

तमसा विशेषदर्शनविरोधिना दोषेण **आवृता या** बुद्धिः **अधर्मं धर्ममिति मन्यते** , अदृष्टार्थे सर्वत्र विपर्यस्यति **सर्वार्थान्** सर्वानदृष्टप्रयोजनानपि ज्ञेयपदार्थान् **विपरीतान्** एव मन्यते **सा** विपर्ययवती **बुद्धिस्तामसी** ॥ ३२॥

धृतेस्त्रैविध्यमाह - **धृत्येति॥**

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥ ३३॥

योगेन समाधिना **अव्यभिचारिण्या** अविनाभूतया समाधिव्याप्ततया **यया धृत्या** प्रयत्नेन मनसः प्राणस्येन्द्रियाणां च क्रियाः = चेष्टाः, **धारयते यया** अवधारयते यया च धार्यमाणा मनआदिक्रियाः शास्त्रमतिक्रम्य नार्थान्तरमवगाहन्ते **धृतिः सा पार्थ सात्विकी** ॥ ३३॥

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥ ३४॥

प्रसङ्गेन कर्तृत्वाद्यभिनिवेशेन **फलाकाङ्क्षी** स तु **यया** धृत्या धर्मं काममर्थं **धारयते** नित्यकर्तव्यतयाऽवधारयति, नतु मोक्षं कदाचिदपि **धृतिः सा पार्थ राजसी** ॥ ३४॥

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी॥ ३५॥

स्वप्नं निद्रां **भयं शोकम्** इष्टवियोगनिमित्तं तापं **विषादम्** इन्द्रियावसादं **मदम्** अशास्त्रीयविषयसेवोन्मुखत्वं **च** यया **न विमुञ्चति** एव, किन्तु सदैव कर्तव्यतया मन्यते **दुर्मेधाः** विवेकासमर्थः **धृतिः सा तामसी** ॥ ३६॥

सुखस्य त्रैविध्यं प्रतिजानीते सार्धेन -

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति॥ ३६॥

यत्र यस्मिन् सुखे चिरकालम् **अभ्यासात्** क्रमेण **रमते** निरतिशयां रतिं प्राप्नोति, यतश्च दुःखस्यान्तं = नाशं नितरां गच्छति॥ ३६॥

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥ ३७॥

यदग्रे ज्ञानवैराग्यध्यानसमाध्योरग्रेऽन्त्यन्तायासनिर्वाह्यत्वात् **विषमिव** द्वेषविषावहं भवति **परिणामे** ज्ञानवैराग्यादिपरिपाके तु **अमृतोपमं** प्रीत्यतिशयास्पदं भवति। आत्मनः = विष्णोः प्रसादात्। बुद्धेः प्रसादो निद्रालस्यादिराहित्येन स्वच्छतयाऽवस्थानम्[1] ततो जातम् **आत्मबुद्धिप्रसादजम्**। नतु राजसमिव विषयेन्द्रियसंयोगजम्। न वा तामसमिव निद्रालस्यादिजम्॥ ३७॥

विषयेन्द्रियसंयोगाद् यत्तदग्रेऽमृतोपमम्।
परिणामे विषमिव तत् सुखं राजसं स्मृतम्॥ ३८॥

विषयाणामिन्द्रियाणां च संयोगाज्ज्ञातं नत्वात्मबुद्धिप्रसादात् **यत् तत्** यदतिप्रसिद्धं स्रक्चन्दनवनितासङ्गादिसुखम् **अग्रे** प्रथमारम्भे मनःसंयमादिक्लेशाभावात् **अमृतोपमं, परिणामे** त्वैहिकपारत्रिकदुःखावहत्वात् **विषमिव तत् सुखं राजसं स्मृतम्** ॥ ३८॥

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्॥ ३९॥

[1] आत्मविषया बुद्धिरात्मबुद्धिः, तस्याः प्रसादो निद्रालस्यादिराहित्येन स्वच्छतयाऽवस्थानम्।**इति मधुसूदनसरस्वतीये** ।

अग्रे प्रथमारम्भे **चानुबन्धे** परिणामे च **यत् सुखमात्मनः** मोहकरम्। निद्रालस्ये प्रसिद्धे। प्रमादः = कर्तव्यार्थावधानं विना मनोराज्यमात्रम्। तेभ्य एवोत्तिष्ठति नतु सात्विकमिव बुद्धिप्रसादजं न वा राजसमिव विषयेन्द्रियसंयोगजं **निद्रालस्यप्रमादोत्थं तामसं सुखमुदाहृतम्** ॥ ३९॥

इदानीमुक्तमपि सङ्गृह्णन् प्रकरणमुपसंहरति - **नेति**॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः॥ ४०॥

सत्वादीनां साम्यावस्था प्रकृतिः। ततो जातैः = वैषम्यावस्थां प्राप्तैः **प्रकृतिजैः**। नतु साक्षाद्गुणानां प्रकृतिजत्वमस्ति। तद्रूपत्वात्। तस्माद् वैषम्यावस्थैव तदुत्पत्तिरुपचारात्[1] **पृथिव्यां** मनुष्यादिषु **दिवि** देवेषु **वा नास्ति** क्वापि गुणत्रयरहितमात्मवस्तु नास्तीत्यर्थः॥ ४०॥

स्वस्ववर्णाद्युचितकर्मणा साधितपरमेश्वरप्रसादेनानादिकालप्रवृत्तसंसारस्योच्छेदो भवतीत्ययमेव सर्वगीतासारार्थ इत्यभिप्रायेण वर्णधर्मान् वक्तुं प्रतिजानीते - **ब्राह्मणेति**॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥ ४१॥

त्रयाणां समासकरणं द्विजत्वेन वेदाध्ययनादितुल्यधर्मत्वकथनार्थम्। **शूद्राणाम्** इति पृथक्करणमेकजातित्वेन वेदानधिकारित्वज्ञापनार्थम्।

'ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥'[2]

---

[1] *अथवा प्रकृतिर्माया तत्प्रभवैस्तत्कल्पितैः प्रकृतिजैरेभिस्त्रिभिर्गुणैर्बन्धनहेतुभिः सत्त्वादिभिर्मुक्तं हीनं सत्त्वं प्राणिजातमप्राणि वा यत् स्यात् तत्पुनः - इत्यधिकं मधुसूदनीये॥* [2] **इति ऋक्संहिता** १०.९०.१२

इति स्थानविशेषोत्पन्नत्वाच्चातुर्विध्यं 'गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रम्' इत्यसंस्कारो विज्ञायत इति शूद्रस्य वेदराहित्यमुक्तम्। 'शूद्रश्चतुर्थो वर्ण एकजातिः' इति स्मृतिः[1] हे **परन्तप** चतुर्णामपि वर्णानां **कर्माणि** प्रकर्षेण विभक्तानि। कैः? **स्वभावप्रभवैर्गुणैः** ब्राह्मणादिस्वभावस्य प्रभवैः = हेतुभूतैः सत्वादिभिः। ब्राह्मणस्य सत्वगुण एव प्रभवः प्रशान्तत्वात्। क्षत्रियस्वभावस्य सत्वोपसर्जनं रजः, ईश्वरस्वभावत्वात्। वैश्यस्वभावस्य तम उपसर्जनं रजः। ईहास्वभावत्वात्। शूद्रस्वभावस्य रज उपसर्जनं तमः। मूढसभावत्वात्।

आह च गौतमः 'द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः। पूर्वेषु नियमस्तु। राज्ञोऽधिकं रक्षणं सर्वभूतानां न्यायदण्डत्वं वैश्यस्याधिकं कृषिवणिक्पशुपाल्यं कुसीदं च शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पादप्रक्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्येतरेषाम्' इति। अत्र साधारणा असाधारणाश्च धर्मा उक्ताः। पूर्वेषु = अध्ययनेज्यादानेषु नियमः = अवश्यकर्तव्यत्वम्, नतु प्रवचनयाजनप्रतिग्रहेषु प्रवृत्त्यर्थत्वादित्यर्थः। वणिक् = वाणिज्यम्। कुसीदं = वृद्धौ धनप्रयोगः। इतरेषां = श्रेष्ठानां द्विजातीनामित्यर्थः।

मनुरपि -

'अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्॥

प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समादिशत्॥

पशूनां रक्षणं दानमिज्याऽध्ययनमेव च।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च॥

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया॥' इति[2]

[1] गौतमस्मृतिः॥ [2] **मनुस्मृतिः** १.८८-९१।

एवं चतुर्वर्णानां गुणभेदेन कर्माणि प्रविभक्तानि॥ ४१॥

तत्र ब्राह्मणस्य स्वाभाविकगुणकृतकर्माण्याह - **शम इति**॥

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥ ४२॥

शमः अन्तःकरणोपरमः। **दमः** बाह्येन्द्रियोपरमः। **तपः** प्रागुक्तं शारीरादिकम्। **शौचम्** अपि प्रागुक्तम्। **क्षान्तिः** क्षमा। **आर्जवम्** अकौटिल्यम्। **ज्ञानं** साङ्गवेदतदर्थविषयकम्। **विज्ञानं** कर्मकाण्डे यज्ञादिकर्मकौशलम्, ब्रह्मकाण्डे सदनन्तगुणपूर्णब्रह्मणि जीवस्य जडस्य च विविक्ततया ज्ञानम्। **आस्तिक्यं** शास्त्रे विश्वासः[1] एतच्छमादिनवकं **स्वभावजं** सत्वगुणस्वभावकृतम्। **ब्रह्मकर्म** ब्राह्मणजातेः कर्म।

यद्यपि चतुर्वर्णानां सात्विकावस्थायामेते धर्माः सम्भवन्ति। तथाऽपि बाहुल्येन ब्राह्मणे भवन्ति, सत्वस्वभावत्वात् तस्य। सत्वोद्रेकवशेन त्वन्यत्रापि कदाचिद्भवन्ति। 'तीर्थानुसरणं दया' इति ग्रन्थान्तरे साधारणधर्मतयोक्ताः। तथा च विष्णुः -

'क्षमा सत्यं दमा शौचं दानमिन्द्रियसंयमः।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं[2] दया॥'

'आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनम्।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते॥' इति॥ ४२॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥ ४३॥

[1] विज्ञानं कर्मकाण्डे यज्ञादिकर्मकौशल्यं ब्रह्मकाण्डे ब्रह्मात्मैक्यानुभवः। आस्तिक्यं सात्त्विकी श्रद्धा प्रागुक्ता।**इति मधुसूदनसरस्वतीये** । [2] तीर्थानुमरणम् इति कोशे।

शौर्यं पराक्रमः, बलवत्तरानपि प्रहर्तुं प्रवृत्तिः। **तेजः** प्रागल्भ्यम्। **धृतिः** महापद्यपि देहेन्द्रियानवसादः **दाक्ष्यं** सहसा प्रत्युत्पन्नेषु कार्येष्वप्यव्यामोहेन प्रवृत्तिः। **युद्धे चाप्यपलायनम्** अपराङ्मुखीभवः। **दानं** वित्तस्य स्वत्वत्यागपूर्वकपरत्वापादनम्। **ईश्वरभावः** प्रजापालने प्रभुशक्तिप्रकटीकरणम्। **क्षात्रं कर्म** क्षत्रियजातिविहितं **स्वभावजं** कर्म॥ ४३॥

कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥ ४४॥

अन्नोत्पत्त्यर्थं क्षेत्रकर्षणं कृषिः। गोरक्षं पशुरक्षणम्। वाणिज्यं = क्रयविक्रयादिकं वणिजः। कर्म वैश्यजातेः **स्वभावजं** कर्म। द्विजातेः **परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्** ॥ ४४॥

फलेच्छाशून्यतयाऽनुष्ठितेन ब्राह्मणादिकर्मणा भगवदपरोक्षद्वारा मोक्षप्राप्तिर्भवतीत्याह - **स्व इति॥**

स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥ ४५॥

स्वेस्वे तत्तद्वर्णाश्रमविहिते नतु स्वेच्छामात्रकृते **कर्मणि** श्रुत्याद्युदिते **अभिरतः** सम्यगनुष्ठानपरः **संसिद्धिं** चित्ताशुद्धिक्षयेण[1] सम्यज्ज्ञानोत्पत्तियोग्यतां **लभते नरः** मनुष्याधिकारकत्वाच्छास्त्रस्य। वर्णाश्रमानपेक्षे तूपासनादौ देवानामप्यधिकारोऽस्तीति साधितं देवताधिरणे।

ननु बन्धहेतूनां कर्मणां कथं मोक्षहेतुत्वम्? उपायविशेषत्वादित्याह - **स्वकर्मनिरतः सिद्धिं यथा** येन प्रकारेण **विन्दति तच्छ्रुणु** ॥ ४५॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥ ४६॥

---
[1] संसिद्धिं देहेन्द्रियसङ्घातस्याशुद्धिक्षयेण।**इति मधुसूदनसरस्वतीये**

यतः सदनन्तगुणालयात् सर्वज्ञादन्तर्यामिणः **भूतानां** स्थावरजङ्गमानां[1] **प्रवृत्तिः** उत्पत्तिः, चेष्टा च भवति, **येन** सर्वनियामकेन **इदं** सर्वजगत् **ततं** व्याप्तं **स्वकर्मणा** वर्णाश्रमोदितेन निष्कामेन भगवत्यर्पितेन **तमभ्यर्च्य** सन्तः, **सिद्धिं** भगवदपरोक्षज्ञानरूपां मुक्तिरूपां च **मानवो विन्दति** लभते॥ ४६॥

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ ४७॥

परधर्मात् सम्यगनुष्ठितादपि **श्रेयान्** प्रशस्ततरः **स्वधर्मो विगुणः** सम्यगननुष्ठितोऽपि। अतस्त्वया स्वधर्मो युद्धादिरेवानुष्ठेयः, न परधर्मः = भिक्षादिरिति भावः।

ननु बन्धुवधरूपः स्वधर्मो युद्धादिः कथं कार्यः? तत्राह - **स्वभावनियतं** शौर्यं तेज इति प्रागुक्तस्वभावजं युद्धादि **कुर्वन् किल्बिषं** पापं बन्धुवधादिनिमित्तं **नाप्नोति** ॥ ४७॥

यदि स्वधर्मे हिंसादिकं दोषं पश्यन् परधर्मं निर्दुष्टं मन्यसे, तर्हि यस्य कस्यचिद्दोषस्य कर्ममात्रे सम्भवात् सोऽपि न निर्दुष्ट इत्याह - **सहजमिति**॥

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥ ४८॥

सहजं स्वभावजं धर्मं **सदोषमपि** विहितहिंसादियुक्तमपि युद्धादि **न त्यजेत्।** चित्तशुद्धेः[2] प्राग् भवानन्यो वा समाधिस्थः क्षणमपि कर्माण्यकृत्वा स्थातुं न शक्नोति। न वा परधर्माननुतिष्ठन्नपि दोषान्मुच्यते। **सर्वारम्भाः** स्वधर्माः परधर्माश्च **हि** यतः **दोषेण** त्रिगुणात्मकत्वेन रागद्वेषादिदोषेण **आवृताः** व्याप्ताः। अतो मुमुक्षुः कर्माधिकारी सहजं कर्म युद्धादि त्रिगुणात्मकत्वेन सामान्येन हिंसादिविशेषेण सदोषमपि न त्यजेत्। सर्वकर्मत्यागासमर्थत्वात्॥ ४८॥

[1] स्थिरणगमानामिति कोशे। [2] कसि(?)चित्तशुद्धेः इति कोशे।

शुद्धचित्तः सम्यग्विदितभगवत्तत्वो मनसा क्षणमपि भगवच्चरणारविन्दं त्यक्तुमशक्तः सर्वकर्माणि विद्वेषकराणि मन्वानः शमदमादिसम्पन्नः विद्यया भवतीत्याशयेनाह - **असक्तेति**॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥ ४९॥

पुत्रदारादिषु **असक्तबुद्धिः** 'अहमेषामिमे मदीयाः' इत्यभिष्वङ्गरहिता बुद्धिर्यस्य सः **जितात्मा** विषयेभ्यः प्रत्याहृतचित्तः। विषयरागे सति कथं प्रत्याहारः? तत्राह - **विगतस्पृहः** देहजीवितभोगेष्वपि वाञ्छारहितः प्राकृतविषयेषु दोषदर्शनेन परमानन्दावाप्तिरूपमोक्षे गुणदर्शनेन[1] च सर्वतो विरक्त इत्यर्थः। एतादृशो **नैष्कर्म्यसिद्धिं** निष्कर्म ब्रह्म तद्विषयकापरोक्षज्ञानरूपां **नैष्कर्म्यसिद्धिं** सम्यगनुष्ठितस्वधर्मफलभूतां **परमां सन्न्यासेनाधिगच्छति** प्राप्नोति॥ ४९॥

उक्तसाधनसम्पन्नस्य सन्न्यासिनो भगवज्ज्ञानोत्पत्तौ साधनक्रममाह - **सिद्धिमिति**॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥ ५०॥

स्वकर्मणेश्वरमाराध्य तत्प्रसादजां सर्वकर्मत्यागपर्यन्तां ज्ञानोत्पत्तियोग्यतारूपां **सिद्धिं प्राप्तो यथा** येन प्रकारेण **ब्रह्माप्नोति** परं ब्रह्म साक्षात्करोति **समासेन तथा मे वचनान्निबोध। या ज्ञानस्य परा निष्ठा** पर्याप्तिः, तदुत्कृष्टमन्यज्ज्ञानं नास्तीत्यर्थः।

यद्वा, **सिद्धिं** भगवदपरोक्षं **प्राप्तो यथा ब्रह्माप्नोति** प्राकृतदेहादि विहाय ध्वस्तलिङ्गदेहः सन् लोकविशेषस्थं विग्रहविशेषयुतं परमेश्वरमाप्नोति **तथा निबोध** इत्यर्थः। **या ज्ञानस्य परा निष्ठा** परा काष्ठा तदधिको ज्ञानस्य विषयो नास्ति ज्ञेयावधिरित्यर्थः॥ ५०॥

ज्ञाननिष्ठाप्रकारोऽथोच्यते - **बुद्ध्येति**॥

[1] नित्यबोधपरमानन्दरूपमोक्षगुणदर्शनेन **इति मधुसूदनसरस्वतीये**

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥ ५१॥

विशुद्धया संशयविपर्ययशून्यया सात्त्विक्या[1] **धृत्या** सात्त्विक्या **आत्मानं** देहेन्द्रियसङ्घातं **नियम्य** उन्मार्गप्रवृत्तिं निवार्य, ईश्वरप्रवणतां च कृत्वा **शब्दादीन् विषयांस्त्यक्त्वा** भोगेन बन्धहेतून् ज्ञाननिष्ठार्थदेहस्थितिमात्रप्रयोजनानुपयुक्तान-निषिद्धानपि त्यक्त्वा देहस्थितिमात्रे च **रागद्वेषौ व्युदस्य** परित्यज्य, चकारादन्यदपि विक्षेपकं परित्यज्य 'विविक्तसेवी' इत्यत्राध्याहृतेन 'ब्रह्मभूयाय कल्पते' इत्यनेनान्वयः॥ ५१॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ ५२॥

विविक्तं जनसम्मर्दरहितं पवित्रं च, तत् सेवितुं शीलमस्य सः। **लघ्वाशी** लघु हितं परिमितं मेध्यं चाशितुं शीलमस्य सः। यतानि संयतानि वाक्कायमानसानि येन सः। **ध्यानयोगपरो**[2] **नित्यं** भगवदाकारसजातीयप्रत्ययप्रवाहः, तदभ्यासपरः। **वैराग्यं** दृष्टादृष्टविषयेषु स्पृहाविरोधिचित्तवृत्तिं **समुपाश्रितः** 'ब्रह्मभूयाय कल्पते' इत्युत्तरेणान्वयः॥ ५२॥

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥ ५३॥

अहङ्कारं महाकुलीनोऽहं विद्यादिना मत्तुल्यो नास्तीत्यभिमानं बलमदाग्रहं नतु शारीरं स्वाभाविकत्वेन त्यक्तुमशक्यत्वात्। **दर्पं** हर्षजन्यं मदं धर्मातिक्रमहेतुम्। **कामं** विषयाभिलाषम्। 'वैराग्यम्' इत्यत्रोक्तस्यापि कामत्यागस्य पुनरुक्तिर्यत्नाधिक्यार्था। **क्रोधं** द्वेषम्। **परिग्रहं** देहधारणार्थमस्पृहत्वेऽपि परोपनीतं बाह्योपकरणम्। **विमुच्य** त्यक्त्वा **शान्तः** चित्तविक्षेपरहितः पुमान् क्रमेण **ब्रह्मभूयाय** साक्षात्काराय तत्प्राप्तये वा **कल्पते** योग्यो भवति॥ ५३॥

[1] विशुद्धया सर्वसंशयविपर्ययशून्यया बुद्ध्याऽहं ब्रह्मास्मीति वेदान्तवाक्यजन्यया बुद्धिवृत्त्या **इति मधुसूदनसरस्वतीये** [2] ध्यानपरो इति कोशे।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥ ५४॥

अपरोक्षीकृते ब्रह्मणि = परमात्मनि भूतः = स्थितः[1] प्रसन्नः आत्मा = परमात्मा, चित्तं वा यस्य सः। नष्टं **न शोचति**। अप्राप्तं **न काङ्क्षति**। **सर्वेषु भूतेषु समः** सर्वत्रान्तर्यामिणो हरेर्दर्शनाद् रागद्वेषशून्यः। एतादृशो **मद्भक्तिं** सर्वोत्तमत्वापरोक्षपूर्वकाविच्छिन्नस्नेहसन्ततिं **पराम्** अनुयायिना[2] **लभते** ॥ ५४॥

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ ५५॥

तया **भक्त्या** सदनन्तगुणमाकाशवदसङ्गोदासीनमपि विश्वोदयादिकर्तारं सर्वभूतसममपि स्वाश्रितवत्सलं दुष्टनिग्रहतत्परं **मां** मत्प्रसादलब्धज्ञानेन **तत्त्वतः** जानाति **यावान्** अघटघटनापटीयोऽनन्तशक्तिमान् **यश्च** चिदानन्दघनस्वरूपः, तं मां तत्त्वतो जानाति, नत्वैन्द्रजालिकमिवाविद्यमानप्रदर्शकप्रतारकं मायाविनं दैत्य इव जानाति। यथा दैत्या अघटघटनापटीयस्सामर्थ्यं मिथ्या, अयं प्रतारक इति जानन्ति, मृषाज्ञानित्वात्। अयः न तथा जानाति। किन्तु, यादृशमबाधितं मदचिन्त्यसामर्थ्यं तादृशं स्वयोग्यतानुसारात् सम्यग् जानातीत्यर्थः। **ततः** भक्तिपूर्वकापरोक्षोत्तरं **मां तत्त्वतः**[3] **ज्ञात्वा मां विशते** मत्साम्यरूपं सायुज्यं प्राप्नोति **तदनन्तरं** मत्प्रसादयुक्तापरोक्षज्ञानाव्यवहितोत्तरक्षणमेव। नतु किञ्चिद्विलम्बेनेत्यर्थः।

यद्वा, **ततः** भक्तिपूर्वकमदपरोक्षज्ञानानन्तरं **तत्त्वतः** प्रारब्धकर्मक्षयपूर्वकं **ज्ञात्वा तदनन्तरं** प्रारब्धकर्मक्षयसहितभगवदपरोक्षाव्यवहितोत्तरक्षणं **विशते** इत्यर्थः॥ ५५॥

ननु शुद्धान्तकरणेन क्षत्रियादिना किं कर्माण्यनुष्ठेयानि? किं वा सर्वकर्मसन्न्यासः कर्तव्यः? नाद्यः। शुद्धान्तःकरणस्य कर्मानधिकारात्। 'योगारूढस्य तस्यैव शमः कारणमुच्यते'[4] इत्यादिना योगारूढस्य कर्मनिषेधाच्च। न

---

[1] ब्रह्मभूतः अहं ब्रह्मास्मीति दृढनिश्चयवान् **इति मधुसूदनसरस्वतीये** । [2] अव्यवधानेनेति मधुसूदनीये। अनन्याम् इति वा स्यात्। [3] तत्त्वतः प्रसन्न(?) इति कोशे। [4] **भगवद्गीता** ६.३

द्वितीयः। 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः'[1] इत्यादिना ब्राह्मणधर्मस्य सर्वकर्मसन्न्यासस्य क्षत्रियादिकं प्रति निषेधात्। नच कर्मानुष्ठानकर्मत्यागयोरन्यतरमन्तरेण तृतीयः प्रकारोऽस्ति। तस्मादुभयोरपि प्रतिषिद्धत्वे गत्यन्तराभावेन चावश्यकर्तव्ये प्रतिषेधातिक्रमे कर्मत्याग एव श्रेयान्। बन्धहेतुपरित्यागेन मोक्षसाधनपौष्कल्यात्। नतु कर्माण्यनुष्ठेयानि चित्तविक्षेपहेतुत्वेन मोक्षसाधनज्ञानप्रतिबन्धकत्वादित्यभिप्रायमर्जुनस्य लक्ष्याह - **सर्वेति॥**

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥ ५६॥

यः पूर्वोक्तः कर्मशुद्धान्तःकरणः[2] सोऽवश्यम्भगवदेकशरणः भगवदेकशरणतापर्यन्तत्वादन्तःकरणशुद्धेः। एतादृशश्चेद् ब्राह्मणः सन्न्यासप्रतिबन्धरहितः सर्वकर्माणि सन्न्यस्यतु नाम। संसारविमोक्षस्तु तस्य भगवदेकशरणस्य भगवत्प्रसादादेव। एतादृशश्चेद् क्षत्रियादिः सन्न्यासानधिकारी स करोतु नाम कर्माणि। किन्तु, **मद्व्यपाश्रयः** अहं = वासुदेवः सर्वेश्वरो व्यपाश्रयः = शरणं यस्य सः। मदेकशरणो मय्यर्पितसर्वात्मभावः सन्न्यासानधिकारात्, सर्वाण्याश्रमधर्मरूपाणि लौकिकानि च **सदा कुर्वाणः, मत्प्रसादात्** मम = सर्वेश्वरस्य, अनुग्रहात् **अवाप्नोति शाश्वतं** नित्यं वैष्णवम् **अव्ययम्** अपरिणामि। मदेकशरणो निषिद्धकर्माणि न करोत्येव। यदि कुर्यात्, तथाऽपि मत्प्रसादात् प्रत्यवायानुत्पत्त्या मद्विज्ञानेन मोक्षभागेव, नतु प्रत्यवैतीति भावः॥ ५६॥

यतो मदेकशरणतामात्रं मोक्षहेतुः, न कर्मानुष्ठानं कर्मसन्न्यासो वा, तस्मात् त्वमपि मदेकशरणो भवेत्याशयेनाह - **चेतसेति॥**

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥ ५७॥

चेतसा विवेकधिया सर्वाणि = दृष्टादृष्टार्थानि **सर्वकर्माणि मयि** ईश्वरे **सन्न्यस्य** 'यत्करोषि'[3] इत्युक्तरीत्या समर्प्य, **मत्परः** अहं = वासेदेवः परमप्रियः

[1] **भगवद्गीता** ३.३५ [2] कर्मणा शुद्धान्तकरणः इत्यर्थः। [3] **भगवद्गीता** ९.२७

सर्वोत्तमः प्राप्यो यस्य सः। मयि सर्वोत्तमत्वबुद्धियोगं प्रागुक्तलाभालाभसमत्वरूपबुद्धियोगं च **उपाश्रित्य** अनन्यशरणतया स्वीकृत्य, **मच्चित्तः सततं भव** इत्यर्थः॥ ५७॥

भगवदेकनिष्ठचित्तस्य फलमाह - **मदिति॥**

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि।
अथ चेत् त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि॥ ५८॥

मच्चित्तः अननुष्ठितसम्यग्धर्मोऽपि त्वं **सर्वदुर्गाणि** दुस्तराणि कामक्रोधादीनि संसारदुःखसाधनानि केवलं मत्प्रसादात् स्वव्यापारं विनैव **तरिष्यसि** अनायासेनैवातिक्रमिष्यसि। त्वद्व्यापारस्य स्वधर्मानुष्ठानादेर्मत्प्रसाद एवोपक्षीणत्वं संसारदुःखमोचकस्तु मत्प्रसाद एवेति भावः। **अथ चेत्** यदि **त्वं** मद्भक्ते विश्वासमकृत्वा 'पण्डितोऽहम्' इति गर्वात् **न श्रोष्यसि** मद्वचनार्थं न करिष्यसि ततः **विनङ्क्ष्यसि** पुरुषार्थाद् भ्रष्टो भविष्यसि। साक्षात् संसारदुःखमोचकमत्प्रसादार्थं स्वोचितकर्मानुष्ठानं कुर्विति भावः॥ ५८॥

सत्यधिकारे कर्म दुस्त्यजमित्याह - **यदिति॥**

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥ ५९॥

अहङ्कारं 'धार्मिकोऽहं युद्धाख्यं कर्म न करिष्यामि' इति मिथ्याज्ञानम् **आश्रित्य न योत्स्ये** युद्धं न करिष्यामि **इति मन्यसे। मिथ्या** वृथा निष्फलत्वादस्थिरत्वाच्च। **व्यवसायः** निश्चयः **ते** तव। यतः **प्रकृतिः** क्षत्रजात्यारम्भको रजोगुणस्वभावः **त्वां नियोक्ष्यति** प्रेरयिष्यति युद्धे॥ ६०॥

यद्वा, **प्रकृतिः** भगवदिच्छा। 'प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यते' इति वचनात्[1] अन्यस्यास्वतन्त्रत्वेन स्वतन्त्रतया प्रेरकत्वासम्भवात्॥ ५९॥

स्वभावं विवृणोति - **स्वेति॥**

---

[1] प्रकृतिरीश्वरेच्छा। 'प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते' इत्यादिवचनात्।**इति गीतातात्पर्ये** ।

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत्॥ ६०॥

स्वभावजेन पूर्वोक्तक्षत्रियस्वभावजेन शौर्यादिना **स्वेन** अनागन्तुकेन **कर्मणा निबद्धः** वशीकृतः **तत् यत्** बन्धुवधादिनिमित्तं युद्धं **मोहात्** 'स्वतन्त्रोऽहं यथेच्छामि तथा सम्पादयिष्यामि' इति भ्रमात् **कर्तुं नेच्छसि** , अनिच्छन्नपि स्वाभाविककर्मपरतन्त्रः परमेश्वरपरतन्त्रश्च **करिष्यसि** एव।

यद्वा, ईश्वरेच्छाया अपि भावनियमने[1] स्वभावादिकं निमित्तं दर्शयन्नुक्तं विवृणोति - **स्वेति॥** स्वभावः = संस्कारः, तज्जन्येन कर्मणेत्यर्थः॥ ६०॥

स्वभावाधीनत्वमुक्त्वा, परेशाधीनत्वं दर्शयति - **ईश्वर इति॥**

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥ ६१॥

ईश्वरः ईशनशीलो नारायणः सर्वान्तर्यामी 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं य पृथिवीमन्तरो यमयति'[2] 'य आत्मनि तिष्ठन्नात्मन अन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः'[3] इति श्रुतिसिद्धः। **सर्वभूतानां** सर्वप्राणिनां **हृद्देशे** अन्तःकरणे **तिष्ठति** सर्वव्यापकोऽपि स्वरूपविशेषेण तत्र नियामकतयाऽभिव्यज्यते। सप्तद्वीपाधिपतिरिव राम उत्तरकोशलायाम्[4] किं कुर्वन् ? **भ्रामयन्** इतस्ततश्चालयन् **सर्वभूतानि** प्राणिनः यन्त्राणि = शरीराणि तदारूढानि **मायया** स्वरूपभूतेच्छया[5][6] यथा दारुयन्त्रारूढानि कृत्रिमाणि भूतानि सूत्रधारो भ्रामयति तद्वदित्यर्थः॥

'अहमात्मा गुडाकेशः सर्वभूताशयस्थितः' [7] 'सर्वस्य चाहं हृदि सन्निविष्टः'[8] 'मत्तः परतरं नान्यत्'[9] इत्यादिना स्वस्य सर्वभूतान्तःस्थत्वस्य

---

[1] जीवनियमने **इति राघवेन्द्रतीर्थीये गीतार्थसङ्ग्रहे** [2] **बृहदारण्यकोपनिषत्** ५.७.३ [3] **शतपथब्राह्मणम्** ५४.५.३० [4] उत्तरकोसलेषु **इति मधुसूदनसरस्वतीये** । [5] मायया छद्मना यन्त्रारूढानीव सूत्रसञ्चारादियन्त्रमारूढानि दारुनिर्मितपुरुषादीन्यत्यन्तपरतन्त्राणि यथा मायावी भ्रामयति तद्वदित्यर्थशेषः **इति मधुसूदनसरस्वतीये** । [6] मायया स्वरूपभूतेच्छया **इति राघवेन्द्रतीर्थीये गीतार्थसङ्ग्रहे** [7] **भगवद्गीता** १०.२० [8] **भगवद्गीता** १५.१५ [9] **भगवद्गीता** ७.७

सर्वभूतनियामकत्वस्य सर्वोत्तमत्वस्य चासकृदुक्तत्वादर्जुनेन विदितत्वाच्चात्रोदासीनतयोक्तमिति भावः॥ ६१॥

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥ ६२॥

तमेव ईश्वरं सर्वनियामकं **शरणं** आश्रयं भवसमुद्रोत्तरणार्थं **गच्छ सर्वभावेन** मनसा वाचा कर्मणा साधनान्तरमनादृत्येश्वरमेवाश्रयेत्यर्थः। **तत्प्रसादात्** तस्यैवेश्वरस्यानुग्रहात् **परां शान्तिं** बुद्धेस्तदेकनिष्ठताम्, अविद्यानिवृत्तिं च। ततः **शाश्वतं** उत्पत्तिनाशादिशून्यं **स्थानं** वैकुण्ठाख्यं लोकं निर्मुक्ताविद्य आविर्भूतपूर्णानन्दस्वस्वरूपः **प्राप्स्यसि**[1]॥ ६२॥

सर्वगीतार्थमुपसंहरन्नाह - **इतीति**॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३॥

इति अनेन प्रकारेण **ते** तुभ्यमतिप्रियाय **ज्ञानं** भगवदेकस्वातन्त्र्यादिविषयकं मोक्षसाधनं[2] **गुह्याद्गुह्यतरं** परमरहस्यादपि सन्न्यासान्तात् कर्मयोगात् रहस्यतरं भगवदेकस्वातन्त्र्यज्ञानस्य सन्न्यासादिफलत्वात्। **आख्यातं** सम्यक् कथितं **मया** सर्वज्ञेन परमाप्तेन। अतः **विमृश्य** पर्यालोच्य **एतत्** मयोपदिष्टं गीताशास्त्रम् **अशेषेण** सामस्त्येन सर्वमेकवाक्यतया ज्ञात्वा स्वाधिकारानुरूपेण **यथेच्छसि तथा कुरु** , नत्वेदविमृश्यैव कामकारेणेत्यर्थः।

अत्रैतदुक्तम्। अशुद्धान्तःकरणस्य मुमुक्षोः भगवदर्पणबुद्ध्या निष्कामकर्मानुष्ठानम्, ततः शुद्धचित्तस्य विविदिषोत्पत्तौ गुरुमुपसृत्य ज्ञानसाधनवेदान्तवाक्यविचाराय ब्राह्मणस्य कर्मसन्न्यासः, ततो भगवदेकशरणतया विविक्तसेवादिज्ञानसाधनाभ्यासाच्छ्रवणमनननिदिध्यासनैर्भगवदपरोक्षम्, ततस्तत्प्रसादो

[1] परां शान्तिं सकार्याविद्यानिवृत्तिं स्थानम् अद्वितीयस्वप्रकाशपरमानन्दरूपेणावस्थानं शाश्वतं नित्यं प्राप्स्यसि। **इति मधुसूदनसरस्वतीये** [2] आत्ममात्रविषयमोक्षसाधनम् **इति मधुसूदनसरस्वतीये**

मोक्षः[1] क्षत्रियादेस्तु, सन्न्यासानधिकारिणो मुमुक्षोरन्तःकरणशुद्ध्यनन्तरमपि भगवदाज्ञापालनाय लोकसङ्ग्रहाय च यथाकथञ्चित् कर्माणि कुर्वतोऽपि भगवदेकशरणतया पूर्वजन्मकृतसन्न्यासादिपरिपाकाद्वा भगवदनुग्रहमात्रेणैव वा[2] भगवदपरोक्षोत्पत्त्याऽग्रिमजन्मनि ब्राह्मणजन्मलाभेन सन्न्यासादिपूर्वकज्ञानोत्पत्त्या वा मोक्षः। भगवदेकशरणागतिस्तु सर्वेषामपेक्ष्यते। तां विना च न मुक्तिरिति विचारिते च नास्ति मोहावकाश इति॥ ६३॥

अतिगम्भीरस्य गीताशास्त्रस्याशेषतः पर्यालोचनक्लेशनिवृत्तये कृपया स्वयमेव तस्य सारं सङ्क्षिप्य कथयितुं प्रतिजानीते - **सर्वेति**॥

सर्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति[3] ततो वक्ष्यामि ते हितम्॥ ६४॥

पूर्वं हि गुह्यात् कर्मयोगादितो गुह्यतमम् अतिरहस्यं यस्मै कस्मैचिद्वक्तुमनर्हं **परमं** सर्वतः प्रकृष्टं **मे** मम **वचः** वाक्यं **भूयः** तत्रतत्रोक्तमपि त्वदनुग्रहार्थं पुनर्वक्ष्यमाणं **शृणु**। न लाभपूजाख्यात्याद्यर्थं त्वां ब्रवीमि, किन्तु **इष्टः** प्रियः **असि** मम **दृढम्** अतिशयेन **इति** यतः तेनैवेष्टत्वेन **वक्ष्यामि** अपृष्टोऽपि सन्नहं **ते** तव **हितं** परमं श्रेयः। **दृढमतिः** इति पाठे यतस्त्वं दृढमतिरतो वक्ष्यामीत्यर्थः॥ ६४॥

तदेवाह - **मदिति**॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ ६५॥

मयि सदनन्तगुणे निरन्तराविच्छिन्नं मनो यस्य सः **मन्मनाः**। रागिणां विषयेष्विवातिप्रीत्या स्वाभाविकमनोवृत्तीर्मय्येव कुर्वित्यर्थः। ननु कंसादिरपि

[1] श्रवणमनननिदिध्यासनैरात्मसाक्षात्कारोत्पत्त्या मोक्षः **इति मधुसूदनसरस्वतीये** । [2] पूर्वजन्मकृतसन्न्यासादिपरिपाकाद्वा हिरण्यगर्भन्यायेन तदनपेक्षणाद्वा भगवदनुग्रहमात्रेणैव **इति मधुसूदनसरस्वतीये** [3] दृढमतिः - केशवकाश्मीरिभट्टाचार्यादिभिर्गृहीतः पाठः।

तथा। तत्राह - **मद्भक्तः** प्राणादिसहस्रेष्विवातिप्रेम्णा मय्यनुरक्तः मद्विषयेणानुरागेण सदा **मां नमस्कुरु** इति विधीयते। त्वद्विषयोऽनुराग एव केन स्यात्? इत्यत आह - **मद्याजी** मां यष्टुं पूजयितुं शीलं यस्य सः। सदा मत्पूजापरो भव। पूजोपकरणाभावे तु **मां नमस्कुरु** कायेन वाचा मनसा च प्रह्वीभव। इदं चार्चावन्दनं चान्येषामपि भागवतधर्मोणामुपलक्षणम्। उक्तं श्रीभागवते -

'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्[1]॥'[2] इति।

एवं सदा भागवतधर्मानुष्ठानेन मय्यनुरागोत्पत्त्या मन्मनाः सन् मत्प्रसादान्निवृत्ताशेषाविद्यादिदोष आविर्भूतपूर्णानन्दस्वरूपः सन् **माम्** अनन्तगुणं वैकुण्ठनाथं वासुदेवम् **एव** प्राप्स्यसि। त्वमत्र संशयं मा कृथाः **सत्यं ते** तुभ्यं **प्रतिजाने** सत्यामेव प्रतिज्ञां करोम्यस्मिन्नर्थे। यतः **प्रियोऽसि मे** प्रियस्य प्रतारणमनुचितमिति भावः।

अनेन यत् पूर्वमुक्तं

'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥'[3]

इति, तद्व्याख्यातम्। मच्छब्देनेश्वरत्वप्रकटनात्॥ ६५॥

अधुना 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति, तमेव सर्वभावेन शरणं गच्छ' इति यदुक्तं तद्विवृणोति - **सर्वधर्मानिति॥**

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ ६६॥

---

[1] सख्यमात्मनिबन्धनमिति कोशे। [2] **भागवतम्** ७.५०.२३ [3] **भगवद्गीता** १८.४६

वर्णधर्मा आश्रमधर्माः सामान्यधर्माश्च ये वर्णाद्युद्देशेन श्रेयोऽर्थिनां विहिताः, तान् सर्वान् **परित्यज्य** विद्यमानानविद्यमानान् वाऽनादृत्य, **माम्** ईश्वरं सर्वधर्माणामधिष्ठातारं सर्वफलदातारं च **शरणं व्रज**। धर्माः सन्तु, न सन्तु वा। किं तैरन्यसापेक्षैरस्वतन्त्रैः? भगवदनुग्रहादेवान्यनिरपेक्षादहं कृतार्थो भविष्यामीति निश्चयेन परमानन्दघनमूर्तिमनन्तगुणं सर्वनियामकं वासुदेवं मामनुक्षमं[1] भजस्व। इदमेव परतत्त्वम्, नातोऽधिकमस्तीति विश्वासपूर्वकेण प्रेमप्रकर्षेणानन्यविषयतया मनोवृत्त्या तैलधारावदविच्छिन्नतया सततं चिन्तयेत्यर्थः।

अत्र **मामेकं शरणं व्रज** इत्यनेनैव शरणातिरिक्तधर्मपरित्यागे लब्धे **सर्वधर्मान् परित्यज्य** इति निषेधानुवादस्तु तत्कार्यकारितालाभाय। यज्ञायज्ञीये साम्नि एरं कृत्वोद्गेयम्' इत्यत्र 'न गिरा गिरेति ब्रूयात्' इतिवत्। तथा च ममैव सर्वधर्मकार्यकारित्वात् मदेकशरणस्य नास्ति धर्मापेक्षेत्यर्थः।

नच सर्वधर्माधर्मत्यागो विधीयते। सन्न्यासशास्त्रेण निषेधशास्त्रेण च लब्धत्वात्। न चेदमपि सन्न्यासशास्त्रम्। भगवदेकशरणत्वस्य विधित्सितत्वात्। तस्मात् **सर्वधर्मान् परित्यज्य** इत्यनुवाद एव। सर्वशास्त्राणां परमं रहस्यमीश्वरशरणतैवेति। तत्रैव शास्त्रपरिसमाप्तिर्भगवता कृता। तां विना सन्न्यासस्य फलापर्यवसायित्वात्। अतः सन्न्यासादिधर्मेष्वप्यनादरेण भगवदेकशरणतामात्रे तात्पर्यं भगवतः।

ननु मोक्षहेतुषु सन्न्यासादिधर्मेष्वनादरेणानादिप्रवृत्तप्रवाहानादिसंसरणहेत्वविद्याया निवृत्तिरानन्दाविर्भावरूपमोक्षश्च कथं स्यात्? नहि स्वधर्मानुष्ठानं विना चित्तशुद्धिः। तां विना भगवदपरोक्षम्। तद्विना च मोक्षः सम्भवति। तत्राह - **अहमिति**॥ अहं मदेकशरणलक्षणपरमधर्मेण प्रसादितः **त्वां** मदेकशरणायनं पापेभ्यः सवासनेभ्यः **मोक्षयिष्यामि** रक्षयिष्यामि। अत्र पापपदेन संसृतिहेतुः कर्ममात्रमुच्यते। 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्'[2] इति सूत्रे 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते'[3] 'तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रद्रूयन्ते'[4] इति श्रुतौ कर्म च पापपदेनोक्तम्। तथा च मदेकशरणस्य पूर्वकृतस्य

---

[1] मामनुक्षणमिति स्यात्। [2] **ब्रह्मसूत्रम्** ४.१.१३ [3] **छान्दोग्योपनिषत्** ४.१४.३ [4] **छान्दोग्योपनिषत्** ५.२४.३

प्रारब्धभिन्नस्य कर्मणो मत्प्रसादान्नाशः क्रियमाणकरिष्यमाणयोः कर्मणोरश्लेषो निर्लेपः। **मा शुचः** 'अनादिकालप्रवृत्तप्रवाहानादिकर्मरूपाविद्यातोऽहं कथं मुक्तो भविष्यामि?' इति शोकं मा कृथाः।

यावद्भगवति स्वाभाविकोऽनुरागो नास्ति तावद्वर्णाश्रमधर्मा अत्यादरेणानुष्ठेयाः। जाते त्वनुरागे धर्माननादृत्य मदेकशरणेन तैलधारावदविच्छिन्नात्यादरेण मनोवृत्तिर्मय्येव सम्पाद्या। तव तु स्वधर्मानुष्ठानफलस्य मय्यनुरागस्योत्पन्नत्वात् त्वया त्वादृशेनान्येन वा धर्माननादृत्य मदेकशरण एव यतितव्यमिति भावः।

यत्तु 'तस्यैवाहम्' 'ममैवासौ' 'स एवाहम्' इति त्रिविधं भगवच्छरणत्वमिति[1] तत्राद्ययोः शरणत्वसम्भवेऽपि तृतीये शरणपदमदृष्टम्। 'राजाऽहमेव' इति वदन् भृत्यादिर्हि राज्ञा दण्ड्य एव नतु रक्षणीयः॥ ६६॥

समाप्तः शास्त्रार्थोपदेशः। शास्त्रसम्प्रदायमिदानीं कथयति - **इदमिति॥**

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥ ६७॥

इदं गीताख्यं सर्वशास्त्रार्थरहस्यं **ते** तव संसारोच्छित्तये **मयोक्तं नातपस्काय** असंयतेन्द्रियाय न **वाच्यं कदाचन** कस्यामप्यवस्थायामिति पर्यायेऽपि सम्बध्यते। तपस्विनेऽपि **अभक्ताय** गुरौ देवे च भक्तिरहिताय न देयं कदाचन। तपस्विने भक्तायापि **अशुश्रूषवे** परिचर्यामकुर्वते न देयं कदाचन। **न च मां योऽभ्यसूयति** आत्मप्रशंसादिदोषाध्यारोपणेनेश्वरत्वमसहमानो द्वेष्टि च। तस्मै श्रीकृष्णोत्कर्षासहिष्णवे तपस्विने भक्ताय शुश्रूषवेऽपि न वाच्यं कदाचनेत्यनुकर्षार्थश्चकारः।

[1] 'भाष्यकारैर्निरस्तानि दुर्मतानीह विस्तरात्। ग्रन्थव्याख्यानमात्रार्थी न तदर्थमहं यते॥ तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा। भवच्छरणत्वं स्यात् साधनाभ्यासपाकतः॥' तत्राद्यं मृदु यथा - 'सत्यपि भेदापगमे नाथ तवाहं न मामिकीनस्त्वम्। सामुद्रो हि तरङ्गः न क्वचन समुद्रो न तारङ्गः॥' द्वितीयं मध्यं यथा - 'हस्तमुत्क्षिप्य यातोऽसि बलात् कृष्ण किमद्भुतम्। हृदयाद्यदि निर्यासि पौरुषं गणयामि ते॥' तृतीयमवधिमात्रं यथा - 'सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः। इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात्॥' इति दूतं प्रति यमवचनम्। अम्बरीशप्रह्लादगोपीप्रभृतयश्चास्यां भूमिकायामुदाहर्तव्याः।**इति मधुसूदनसरस्वतीये** ।

तपस्विने भक्ताय शुश्रूषवे श्रीकृष्णानुरक्ताय च वाच्यमित्यर्थः। एकैकविशेषणाभावेऽप्ययोग्यताप्रतिपादनाय चत्वारो नकाराः। 'मेधाविने तपस्विने वा' इत्यत्र विकल्पदर्शनात् शुश्रूषागुरुभक्तिभगवदनुरक्तियुक्ताय तपस्विने तद्युक्ताय मेधाविने वा वाच्यम्॥ ६७॥

एवं सम्प्रदायविधिमुक्त्वा, तदनुष्ठातुः फलमाह - **य इति॥**

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥ ६८॥

य इदं आवयोः संवादरूपं ग्रन्थं **परमं** निरतिशयपुरुषार्थसाधनं **गुह्यं** रहस्यार्थत्वात्। सर्वत्र प्रकाशयितुमनर्हम्। **मद्भक्तेषु** मां भगवन्तं वासुदेवं प्रत्यनुरक्तेषु **अभिधास्यति** अभितः = ग्रन्थतोऽर्थतश्च धास्यति अभितो स्थापयिष्यति। भक्तेः पुनर्ग्रहणात् पूर्वोक्तविशेषणत्रयरहितस्य भगवद्भक्तिमात्रेण पात्रता सूचिता भवति। कथमभिधास्यति? तत्राह - **भक्तिं मयि पराम् कृत्वा** 'हरेः परमगुरोः शुश्रूषैवेयं मया क्रियते' इत्येवं कृत्वा निश्चित्य **योऽभिधास्यति स मां** सर्वेश्वरं वासुदेवम् **एवैष्यति**। मामेष्यत्येवेति वा योज्यम्॥ ६८॥

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च मे तस्मादन्यः प्रियतरो भुवि॥ ६९॥

तस्मात् मद्भक्तेषु शास्त्रसम्प्रदायकृतः सकाशादन्यो **मनुष्येषु** मध्ये **कश्चित्** अपि **मे** मम **प्रियकृत्तमः** अतिशयेन प्रियकृत् मद्विषयप्रीत्यतिशयवान् **न** अस्ति वर्तमानकाले, नापि प्रागासीत् तादृक् कश्चित्, **नच** अग्रे **भविता** कश्चित् भविष्यति। ममापि **तस्मादन्यः प्रियतरः** प्रीत्यतिशयविषयः कश्चिदप्यासीत् **न**। अधुना च **भुवि** लोके नास्ति। 'नचाग्रे भविता' इत्यावृत्त्या योज्यम्॥ ६९॥

अध्यापकस्य फलमुक्त्वाऽध्येतुः फलमाह -

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ ७०॥

आवयोः संवादमिमं ग्रन्थं **धर्म्यं** धर्मादनेपतं **अध्येष्यते** जपरूपेण पठिष्यति **ज्ञानयज्ञेन** चतुर्थाध्यायोक्तेन द्रव्ययज्ञादिषूत्कृष्टेन **अहं** सर्वेश्वरः **तेन** अध्येत्रा **इष्टः** पूजितः **स्यामिति मे मतिः** निश्चयः।

यद्यप्यसौ गीतार्थमवबुद्ध्यमान एव जपति, तथाऽपि तच्छ्रुण्वतो मम मामेवासौ प्रकाशयतीति मतिर्भवति। अतो जपमात्रादपि ज्ञानयज्ञफलं मोक्षं लभते सत्त्वशुद्धिज्ञानमत्प्रसादद्वारा[1] अर्थानुसन्धानपूर्वकं पठतस्तु साक्षादेव मोक्ष इति किमु वाच्यम्॥ ७०॥

इदानीं श्रोतुः फलमाह - **श्रद्धेति॥**

श्रद्धावाननसूयश्च शृणुयादपि यो नरः।
सोऽपि मुक्तः शुभांल्लोकान् प्राप्नुयात् पुण्यकर्मणाम्॥ ७१॥

यो नरः अन्यस्योच्चैः पठतः सकाशात् **श्रद्धावान्** किमर्थमयमुच्चैर्जपत्यशुद्धं च जपतीति दोषदृष्ट्याऽसूयारहितो **अनसूयश्च** केवलं **श्रुणुयादपि**। अपिशब्दात् किमुतार्थज्ञानवान्। **सोऽपि** केवलाक्षरमात्रश्रोताऽपि **मुक्तः** पापैः **शुभान्** प्रशस्तान् **लोकान् पुण्यकर्मणाम्** अश्वमेधादिकृतां **प्राप्नुयात्** ॥ ७१॥

शिष्यस्य ज्ञानोत्पत्तिपर्यन्तं गुरुणा प्रयासः कार्य इति गुरोर्धर्मान् शिक्षयितुं सर्वज्ञोऽपि पुनरुपदेशापेक्षा नास्तीति विज्ञापनाय पृच्छति - **कच्चिदिति॥**

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा।
कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय॥ ७२॥

कच्चित् इति प्रश्ने। **एतत्** मयोक्तं गीताशास्त्रम् **एकाग्रेण** व्यासङ्गरहितेन **चेतसा** हे **पार्थ त्वया** किं **श्रुतम्** अर्थतोऽवधारितम्? **कच्चित्** किम् अज्ञानं कर्मरूपाविद्याप्रहानाद्या(?) तत्सम्मोहो विपर्ययस्तद्धेतुको वा[2] **प्रनष्टः** पुनरुत्पत्तिविरोधित्वेन प्रनष्टः[3] स्यान्नो चेत् पुनरुपदेशं करिष्यामीति भावः॥ ७२॥

---

[1] सत्त्वशुद्धिज्ञानोत्पत्तिद्वारा **इति मधुसूदनसरस्वतीये** । [2] अज्ञानसम्मोहो अज्ञाननिमित्तः सम्मोहो विपर्ययः **इति मधुसूदनसरस्वतीये** [3] प्रनष्ट इत्येव पठ्यते कोशे, मधुसूदनीये च। नतु प्रणष्ट इति॥

अर्जुन उवाच
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥ ७३॥

मोहः विपर्ययः **नष्टः**। तन्नाशकस्मृतिः **लब्धा मया**। यस्मात् **त्वत्प्रसादात्** आत्मज्ञानं लब्धम्, अतस्तज्ज्ञानेन मोहो नष्ट इत्यर्थः। भगवत्प्रसादादेव तत्त्वज्ञानावाप्तिरूपदेशश्रवणस्य तु सञ्जयादीनामपि सत्वात् तादृशप्रसादाभावान्न तादृशज्ञानमिति भावः। **गतसन्देहः** निवृत्तसर्वसंशयः। **स्थितोऽस्मि** युद्धादिकर्तव्यतारूपे त्वच्छासने। यावज्जीवं **करिष्ये वचनं तव** भगवतः परमगुरोराज्ञां पालयिष्यामि॥ ७३॥

सञ्जय उवाच
इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।
संवादमिममश्रौषमद्भुतं लोमहर्षणम् [1] **॥ ७४॥**

अद्भुतं चेतसो विस्मयकरं लोकेष्वसम्भाव्यमानत्वात्। **लोमहर्षणं** शरीरे रोमाञ्चाख्यविकारम्॥ ७४॥

व्यवधानेऽपि तच्छ्रवणे स्वस्य योग्यतामाह - **व्यासेति॥**

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम्।
योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्॥ ७५॥

श्रीव्यासदत्तदिव्यचक्षुःश्रोत्रादिरूपात् **व्यासप्रसादात् एतत् परं गुह्यं योगं** योगाव्यभिचारिहेतुं **संवादं योगेश्वरात् कृष्णात् स्वयं** स्वेन पारमेश्वरेण रूपेण **कथयतः**। नतु मन्वादिद्वारा। साक्षादेवाहं **श्रुतवान्** अस्मि, न परम्परयेति स्वभाग्यमभिनन्दति॥ ७५॥

[1] रोमहर्षणं - पा.

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः॥ ७६॥

पुण्यं श्रुतमात्रपापहरं **केशवार्जुनयोरिमं संवादमद्भुतं** न केवलं श्रुतवानस्मि, किन्तु **संस्मृत्य संस्मृत्य** सम्भ्रमे द्विरुक्तिः। **मुहुर्मुहुः** वारंवारं **हृष्यामि** हर्षं प्राप्नोमि। प्रतिक्षणं रोमाञ्चितो भवामीति वा॥ ७६॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः।
विस्मयो मे महान् राजन् हृष्यामि च पुनःपुनः॥ ७७॥

तत् विश्वरूपं। हे **राजन् मे** मम **महान् विस्मयः**। अत एव च हृष्यामि। स्पष्टमन्यत्॥ ७७॥

एवं च सति स्वपुत्रे विजयसम्भावनां त्यजेत्याह - **यत्रेति**॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ ७८॥

यत्र युधिष्ठिरपक्षे **योगेश्वरः** सर्वयोगसिद्धीनामीश्वरः सर्वज्ञः सर्वशक्तिर्भगवान् श्रीकृष्णो भक्तदुःखकर्षणो नारायणो विश्वोदयादिकर्ता तिष्ठति **यत्र पार्थो धनुर्धरः** गाण्डीवधन्वाऽर्जुनस्तिष्ठति, नरनारायणौ तिष्ठतो यत्र **तत्र** एव युधिष्ठिरपक्षे **श्रीः** राज्यलक्ष्मीः **विजयः** शत्रुपराजयनिमित्तक उत्कर्षः **भूतिः** उत्तरोत्तरं राज्यलक्ष्म्यादिवृद्धिः **ध्रुवा** अवश्यम्भाविनी **नीतिः** नयः, एवं **मम** निश्चयः।

तस्माद्वृथा पुत्रविषयाशां त्यक्त्वा भगवदनुगृहीतैर्लक्ष्मीविजयभाग्भिः पाण्डवैः सह सन्धिरेव क्रियतामित्यभिप्रायः॥ ७८॥

वन्दे श्रीहयकन्धरं श्रुतिशिखाभिर्गीतकीर्तिं हरिं
योगीन्द्रैः परिभावितं मनसि नित्यानन्ददेहं समम्।

हेषाभिः परिकम्पयन्तमसुरांश्चानन्दयन्तं सुरान्
स्वाङ्गी चिन्तयते गिरोऽमलतरा विश्राणयन्ते(?) मुदा॥

विजयरथमरक्षद्यो रथाङ्गं दधानः
परिभवति हि भीष्मे पार्थसेनां स्वनाथाम्।
विगलितकटिवासा धूनयत्यादयानै-
र्भुवमतिधृतयाद्यो नोऽवतादर्जुनेन॥

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोभनम्॥

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मया यः।
द्रौपद्या शाकलेशात् त्रिभुवनसहितस्तृप्तिमापोत्तमां स
ग्रन्थादस्मात् प्रसन्नो व्रजपतितनयः कारितात् स्वेन मे वै॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे मुनिभरद्वाजान्वया ये द्विजाः।
श्रीसन्नाहमुचो वसन्ति वनमाली तत्कुलेऽभूद्बुधः
श्रीगीताशयचन्द्रिका परिसमाप्ताऽविघ्नतस्तत्कृता॥

॥ ॐतत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः॥ १८॥

परिशिष्टम् A

उदाहृतग्रन्थसूची

- ऋक्संहिता
- शतपथब्राह्मणम्
- तैत्तिरीयारण्यकम्
- कठोपनिषत्
- केनोपनिषत्
- छान्दोग्योपनिषत्
- बृहदारण्यकोपनिषत्
- ऐतरेयोपनिषत्
- माण्डूक्योपनिषत्
- मुण्डकोपनिषत्
- तैत्तिरीयोपनिषत्
- षट्प्रश्नोपनिषत्
- श्वेताश्वतरोपनिषत्
- महोपनिषत्
- महानारायणोपनिषत्
- नृसिंहपूर्वतापनीयोपनिषत्
- कौषीतक्युपनिषत्
- महानारायणोपनिषत्
- मैत्रायण्युपनिषत्
- मुद्गलोपनिषत्
- ब्रह्मसूत्रम्
- महाभारतम्
- भगवद्गीता
- भागवतम्
- गरुडपुराणम्
- विष्णुपुराणम्

- ब्रह्माण्डपुराणम्
- मत्स्यपुराणम्
- ब्रह्मपुराणम्
- मार्कण्डेयपुराणम्
- पद्मपुराणम्
- कूर्मपुराणम्
- लिङ्गपुराणम्
- मध्वाचार्यकृतं गीताभाष्यम्
- मध्वाचार्यकृतं गीतातात्पर्यम्
- जयतीर्थकृता प्रमेयदीपिका
- शङ्कराचार्यकृतं गीताभाष्यम्
- रामानुजाचार्यकृतं गीताभाष्यम्
- मधुसूदनसरस्वतीकृता गीतागूढार्थदीपिका
- पातञ्जलयोगसूत्रम्
- मनुस्मृतिः
- गौतमस्मृतिः
- पाणिनीया अष्टाध्यायी

परिशिष्टम् B

Works of Vanamāli Miśra - Extracts

We have procured the copies of most of these works. However, due to inaccessibility of some works, the extracts provided in different descriptive catalogues of manuscripts are reproduced here for a few works. Thus some wrong readings are inevitable. It is hoped that this section serves as a manual to verify other works of Vanamāli Miśra without ambiguity.

श्रुतिसिद्धान्तदीपिकाकारिका

आदिः

श्रीहयकन्धरं वन्दे जगद्योनिं रमापतिम्।
ममुक्षूणां सदा ज्ञेयं मुक्तानां परमां गतिम्॥ १॥

शमदमादिसम्पन्नो माधवे भक्तिमान् नरः।
इहामुत्र विरक्तश्चेहाधिकारी गुरुप्रियः॥ २॥

सदनन्तगुणैः पूर्णो विषयः स्यात् प्रयोजनम्।
मोक्षो वाचकवाच्यत्वं सम्बन्धः कथ्यते बुधैः॥ ३॥

श्रुतिसिद्धान्तदीपिका

आदिः

वन्दे श्रीहयकन्धरं श्रुतिशिखाभिर्गीतकीर्तिं समं
नित्यानन्तगुणालयं विगतहेयं मुक्तवृन्दैर्नुतम्।
हेषाभिः परिकम्पयन्तमसुरांश्चानन्दयन्तं सुरान्
श्रीव्यासं श्रुतिसागरं मरुतमाचार्यं तथाऽन्यान् सतः॥ १॥

प्राचीनोक्तीर्विभाव्येयं श्रुतिसिद्धान्तदीपिका।
प्रबोधाय मुमुक्षूणां तन्यते वनमालिना॥ २॥

स्वकृतकारिकाभिर्येऽर्थाः सङ्क्षेपतयोदिताः।
वैशद्यं क्रियते तेषां बालबोधाय कौतुकात्॥ ३॥

अन्त्यम्

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोधनम्॥ १॥

श्रुत्यर्थदीपिकाव्याघ्री[1] कृता श्रीवनमालिना।
मायावादिगजप्रोद्यत्कुम्भस्थलविदारिका॥ २॥

[1] श्रुतिभावार्थभाव्याघ्री - पा..

श्रुतिसिद्धान्तप्रकाशः

प्रथमपरिच्छेदः

आदिः

सकलनिगमवाच्यो दुर्नयास्पृष्टधामा
विधिशिवसुरराजैः सेव्यमानो मुकुन्दः।
सदमितगुणसिन्धुः सच्चिदानन्दमूर्तिः
स्फुरतु मम हयास्यो मानसे श्रीनिकेतः॥ १॥

श्रीव्यासं मरुदंशं च तान्त्रिकाणां गुरुं जयम्।
कुमतागभिदे वज्रं व्यासतीर्थं नमाम्यहम्॥ २॥

मायावादनिरासाय सुबोधाय सतां श्रुतेः।
सिद्धान्तानां प्रकाशोऽयं तन्यते वनमालिना॥ ३॥

शमदमादिसम्पन्नो माधवे भक्तिमान् नरः।
इहामुत्र विरक्तश्चेहाधिकारी गुरुप्रियः॥ ४॥

द्वितीयपरिच्छेदः

आदिः

विमतयः कटाक्षेन शक्नुवन्ति न वीक्षितुम्।
यत्पदं तमहं वन्दे श्रीहयकन्धरं हरिम्॥

अन्त्यम्

उपाधिबाधप्रतिपक्षयुक्तो विपक्षबाधोज्झितसाध्यहीनः।
दृश्यत्वहेतुर्जगतोऽतथ्यतां न साधयेद्वै जडता तथाऽन्यत्॥ १॥

श्रीविष्णोरुदयान्नाशात् तेनैवं पालनात् तथा।
कार्यकारणरूपं हि विश्वं सत्यमिति स्थितम्॥ २॥

न दृश्यन्ते न पाल्यन्ते नोत्पाद्यन्ते हि मायिकाः।
मायासम्मोहहीनेन नाश्यन्ते न कदाचन॥ ३॥

श्रुतिशिखरसिद्धस्य सर्वज्ञस्याज्ञतां वदेत्।
तत्पालितस्य मिथ्यात्वं कोऽन्यो बौद्धं विनाऽधमः॥ ४॥

श्रीविष्णोः सदनन्तभूतिनिचयं वेदान्तगीर्भिर्नुतं
योऽकाण्डे प्रलयत्यतथ्यमिति यच्छिष्यो जिनस्याधमः[1]।
वैरं सन्दधदासुरोऽखिलसमे वक्तुं च तस्योत्तरं
को विद्वाननुरौति किं मृगपतिः फेरो रूतं क्वापि वा॥ ५।

वन्दे श्रीहयकन्धरं श्रुतिशिखागीतप्रभुत्वं हरिं
योगीन्द्रैः परिभाषितं मनसि नित्यानन्ददेहं समम्।
हेषाभिः परिकम्पयन्तमसुरांश्चानन्दयन्तं सुरान्
स्वाङ्घ्री चिन्तयते गिरोऽमलतरा विश्राणयन्तं मुदा॥ ६॥

सिद्धेः सहस्रधा ध्वंसो ध्वान्ताद्वैतस्य सर्वथा।
सिद्धान्तानां प्रकाशेन तर्कोपबृंहितश्रुतेः।
जाता तस्य द्वितीयस्य परिच्छेदस्य पूर्णता॥ ७॥

तृतीयपरिच्छेदः

आदिः

श्रीमुकुन्दप्रसादाद्धि विघ्नवृन्दनिवारकात्।
कुयोगिनोऽप्यनायासाद्यत्प्रसादात् तरन्ति हि।
दुस्तरं भवपाथोधिं तं वन्दे श्रीहयाननम्॥ १॥

समन्वायाविरोधाभ्यां सिद्धोऽनन्तगुणान्वयः।
हरिस्तत्प्राप्तये चात्र कथ्यन्ते साधनान्यथ॥ २॥

[1] यद्बुद्धस्य शिष्योऽधमः - पा..।

चतुर्थपरिच्छेदः

आदिः

मुक्तसङ्गा हि नन्दन्ति च्छायां यत्पादयोः श्रिताः।
तं वन्दे श्रीहयग्रीवं श्रीसेवितपदाम्बुजम्॥ १॥

उक्तसाधनसम्पन्नैर्हरिप्रसादभागिभिः।
प्राप्यते यत्फलं श्रेष्ठं तदिह वर्ण्यते स्फुटम्॥ २॥

कर्मक्षयः समुत्क्रान्तिरर्चिरादिगतिस्तथा।
पूर्णानन्दानुभूतिश्चेति मुक्तिः स्याच्चतुर्विधा॥ ३॥

हरिप्रसादयुक्तस्य स्यादेकस्य क्रमादियम्।
तारतम्येन सा हि स्यात् स्वरूपाणां तथात्वतः॥ ४॥

अन्त्यम्

अल्पज्ञाज्जीवतो भिन्नो वस्तुतः सर्वविद्धरिः।
विश्वोदयादिकर्ता हि स्वतन्त्रः सर्वनियामकः॥ १॥

वाच्यं सर्वश्रुतीनां हि सत्यानन्तगुणालयः।
गुणानन्त्येन हि ज्ञातो मुक्तिदो नान्यथा क्वचित्॥ २॥

सत्यमशेषविश्वं स्यादक्षानुमानशब्दतः।
अक्षक्रियादिकं न स्यात् ततोऽन्यथा भृशं क्वचित्॥ ३॥

नेश्वरः सर्ववित् सिद्ध्येदपरोक्षो भवेद्विभुः।
अनादिवास्तवं बन्धं स भिनत्ति प्रसादतः॥ ४॥

हरिप्रसादतो ध्वंसोऽविद्यालिङ्गशरीरयोः।
आविर्भावो निजस्य स्यात् पूर्णानन्दस्य सर्वथा[1]॥ ५॥

[1] पूर्णानन्दस्वरूपतः इति मुद्रितपाठः काल्पनिकः।

तारतम्यतया स स्यात् स्वरूपाणां तथात्वतः।
स्वयोग्यत्वेन पूर्णत्वादीर्ष्यादिकं न युज्यते॥ ६॥

सेशान् स्वं भजतः श्रिया सुरगणान् मुक्तावृतः स्वेच्छया
यो मुक्तिं स्मृतमात्र एव ददते धर्मार्थकामांस्तथा।
वेदान्तैर्विहितैर्गुणैः सह मितैर्नित्यैः स्वतन्त्रो युतः
स श्रीमद्धयकन्धरोऽवतु सदा भक्तप्रियो नो हरिः॥ ७॥

वेदान्तैः प्रतिपादितं मुनिवरैर्ध्येयं हरेर्वैभवं
योऽकाण्डे प्रलपत्यतथ्यमिति यद्बौद्धाधमो माधवे।
वैरं सन्दधदासुरोऽखिलसमे वक्तुं च तस्योत्तरं
विद्वान् को हि तिरौति किं मृगपतिर्गोमायुशब्दानुगः॥ ८॥

भुक्त्वा श्यामाकमुष्टिं वियदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मया यः।
द्रौपद्यै शाकलेशात् त्रिभुवनमयुषद्यत्वनां दुष्प्रसाद्यः
सिद्धान्तानां प्रकाशाद्धि मम यदुवरः कारितात् प्रीयतां सः॥ ९॥

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोधनम्॥ १०॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे मुनिभरद्वाजान्वया ये द्विजाः।
श्रीसन्नाहमुचो वसन्ति वनमाली तत्कुलेऽबूद्बुधः
ग्रन्थे हि श्रुतिसङ्ग्रहे ननु परिच्छेदोऽन्तिमस्तत्कृते॥ ११॥

सिद्धेः सहस्रधा ध्वंसो ध्वान्ताद्वैतस्य सर्वथा।
सिद्धान्तानां प्रकाशेन सदा वयं तु सूरयः॥ १२॥

ब्रह्मसूत्रसिद्धान्तमुक्तावली

ग्रन्थादौ

वाच्यो यः सर्वशब्दानामहेयगुणसंश्रयः।
वाजिग्रीवः कृपासिन्धुः सोऽव्यान्नः सुखविग्रहः॥ १॥

श्रीमद्द्वैपायनं वन्दे मरुदंशमरिन्दमम्।
कुमताब्धेरगस्त्यं च जयतीर्थं मुनीश्वरम्॥ २॥

श्रीमद्भाष्यकृतां वाचष्टीकाकृतां च केवलम्।
सङ्गृह्यन्ते हि बोधायालसानां वनमालिना॥ ३॥

श्रीब्रह्मसूत्रसिद्धान्तमुक्तावल्यर्पिता हरेः।
कण्ठे मोदं सतां चित्ते क्रियात् सुरद्रुहां व्यथाम्॥ ४॥

जिज्ञासाधिकरणस्यादौ

जिज्ञास्यं ब्रह्मशब्देन गुणपूर्त्यभिधायिना।
अपूर्णत्वेनानुभूताज्जीवाद्भिन्नं प्रतीयते॥

जन्माधिकरणस्यादौ

जिज्ञासाकारणगुणपूर्तिप्रसिद्धये।
जीवादिभेदकं विष्णोर्विश्वकर्तृत्वमुच्यते॥

द्वितीयाध्यायस्यादौ

महाभूतानि यद्योगाद्विरोधं सर्गकर्मणि।
जहति स्वं हयास्यं तं वन्देऽनन्तं गुणालयम्॥ १॥

सिद्धं समन्वयो यासां श्रुतीनां हयकन्धरे।
अविरोधोऽधुना तासां सद्गुणार्णव उच्यते॥ २॥

तृतीयाध्यायस्यादौ

उपास्यो यो मोक्तुं मनसि भवपाशं मुनिवरैः
रमाद्यैरप्यन्यैर्जनिमतिगतैर्मुक्तनिकरैः।
सकामैर्भोगार्थं सुरतरुरिवार्थ्यो ह्यखिलदः
स वाजिग्रीवो मे स्फुरतु हृदये संसृतिहरः॥ १॥

सिद्धः समन्वयो यत्राविरोधेन रमाधवे।
श्रुतीनां प्राप्तये तस्य कथ्यन्ते साधनान्यथ॥ २॥

चतुर्थाध्यायास्यादौ

उक्तसाधनसम्पत्तेः प्राप्यं यत्फलमुत्तमम्।
प्राधान्यतोऽथो तद्ब्रूते भगवान् बादरायणः॥

ग्रन्थान्ते

कृतनिगमविभागं योगिभिः सेविताङ्घ्रिं
धृतमुनिवरवेषं वासुदेवांशमीड्यम्।
यतिगुरुमरुदंशं श्रीमदानन्दतीर्थं
मतिनिधिजयतीर्थं व्यासतीर्थं च वन्दे॥ १॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे सुभुवि ये विप्रा भरद्वाजजाः।
श्रीसन्नाहमुचो वसन्ति सुकुले तेषां सुजातेन वै
वर्णिश्रीवनमालिना श्रुतिनये वृत्तिः समा प्राकृता॥ २॥

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मया यः।
द्रौपद्या शाकलेशात् त्रिभुवनमपुषद्यज्वनां दुःप्रसाध्यः
स्थित्वाऽन्तःकारिताया भवतु यदुवरो मे प्रसन्नः स वृत्तेः॥ ३॥

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्भूतिमस्माकं संविदां प्रमुदां सदा॥ ४॥

मध्वमुखालङ्कारः (मारुतमण्डनम्)

आदिः

सदमितगुणसिन्धुः सर्ववेदाभिधेयो
विगतविमतिधामा हेयशून्यो रमेशः।
विधिशिवसुरराजैः सेव्यमानाङ्घ्रिकञ्जः
स्फुरतु मनसि मे स श्रीहयास्यो मुकुन्दः॥ १॥

श्रीमन्मारुतमाचार्यं मायिमर्दनतत्परम्।
मुनीन्द्रोपास्यपादाब्जं ज्ञानसिन्धुं नमाम्यहम्॥ २॥

तान्त्रिकाणां गुरुं वन्दे जयतीर्थं मुनीश्वरम्।
कुमतध्वान्तचण्डांशुं व्यासतीर्थं धियां निधिम्॥ ३॥

निरस्ता दूषणाभासाः सन्न्यायैर्महता पुरा।
तानेव श्रावयेऽथापि स्वश्रुतस्य शुशुत्सया॥ ४॥

श्रीमन्मध्वमुखस्यायं श्राव्यते वनमालिना।
अलङ्कारोऽसतां यस्माद्व्यथा स्यान्मोदनं सताम्॥ ५॥

अन्त्यम्

जिज्ञासान्यायवर्णनम्

इत्थं जीवब्रह्मभेदे सुसिद्धे शास्त्रारम्भः सार्थको नः सुसिद्धः।
जीवब्रह्माभेदवादे समोघो ज्ञानाभावात् स्यादपार्थो विचारः॥ १॥

मण्डने मध्वतन्त्रस्य खण्डने च सुरद्रुहाम्।
वनमालिकृतं भाति जिज्ञासान्यायवर्णनम्॥ २॥

जन्मादिन्यायवर्णनम्

मण्डने मध्वतन्त्रस्य खण्डने च सुरद्रुहाम्।
वनमालिकृतं भाति जन्मादिन्यायवर्णनम्॥

शास्त्रयोनिन्यायवर्णनम्

मण्डने मध्वतन्त्रस्य खण्डने च सुरद्रुहाम्।
वनमालिकृतं भाति शास्त्रयोनिनिरूपणम्॥

समन्वयन्यायवर्णनम्

मण्डने मध्वतन्त्रस्य खण्डने च सुरद्रुहाम्।
वनमालिकृतं भाति समन्वयनिरूपणम्॥

ईक्षतिन्यायवर्णनम्

मण्डने मध्वतन्त्रस्य खण्डने च सुरद्रुहाम्।
वनमालिकृतं भाति हीक्षतिन्यायवर्णनम्॥

शेषब्रह्ममीमांसातात्पर्यवर्णनम्

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मया यः।
द्रौपद्या शाकलेशात् त्रिभुवनमपुषद्यज्वनां दुःप्रसाध्यः
स्थित्वाऽन्तःकारितत्वाद्वै मम यदुवरो ग्रन्थतः प्रीयतां सः॥ १॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे द्विजवरा वंशे भरद्वाजतः।
श्रीसन्नाहमुचो वसन्ति विबुधो वर्णी कुलेऽभूत् ततः
ग्रन्थो मारुतमण्डनोऽस्ति परितः पूर्णः कृतोऽविघ्नतः॥ २॥

विश्वोदयादिकर्तारं भर्तारं हि श्रियः सताम्।
भवसन्तापहर्तारं वन्दे श्रीहयकन्धरम्॥ ३॥

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोधनम्॥ ४॥

श्रुतिसिद्धान्तसङ्ग्रहः

आदिः

गोप्या बद्ध उलूखले निजवशो ध्यायन्न नीतिं निजा-
मिच्छन् रक्षकमात्मनश्चपदृक् बन्धं विमोक्तुं द्रुमौ।
योऽभाङ्क्षीदृषिभातितं प्रविददद्ब्रह्मादिभिः केवलं
चित्तेनैव विशोधितेन विदितोऽव्यान्नन्दसूनुः स नः॥ १॥

श्रीमद्भाष्यकृतो वन्दे टीकाकृतस्तथा सतः।
तदुच्छिष्टं हि सङ्गृह्णन् गच्छेयं पूज्यतां सताम्॥ २॥

सङ्ग्रहेणोदिता येऽर्थाः कारिकाभिः सतां मुदे।
वैशद्यं क्रियते तेषां सुबोधाय हि कौतुकात्॥ ३॥

नत्वा श्रीगुरुपादाब्जं क्रियते वनमालिना।
सन्तोषाय मुकुन्दस्य श्रुतिसिद्धान्तसङ्ग्रहः॥ ४॥

अन्त्यम्

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोधनम्॥ १॥

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मया यः।
द्रौपद्या शाकलेशात् त्रिभुवनमपुषद्यज्वनां दुःप्रसाद्यो
वाक्यानां सङ्ग्रहान्मे भवतु मुररिपुः कारितात् स्वेन तुष्टः॥ २॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशान्तात् त्रियुगे पुरे मुनिभरद्वाजीयवंशोद्भवः।
श्रीसन्नाहमुचो वसन्ति विबुधो वर्णी ह्यभूत् तत्कुले
सम्पूर्णः श्रुतिसङ्ग्रहो विरचितोऽयं तेन कृष्णेच्छया॥ ३॥

श्रुतिसिद्धान्तसङ्ग्रहकारिका

आदिः

श्रीरचलोरसि भाति यदीये गीर्वदने प्रचकास्त्यनवद्या।
ब्रह्मशिवेन्द्रमनोभिरगम्यो वाजिमुखोऽवतु नः स हि विष्णुः॥

अन्त्यम्

साकल्येन त्वदृश्यत्वमक्षरस्योपपद्यते।
अन्यथा परिपश्यन्तीति व्याहतं भवेत् स्फुटम्॥

न्यायामृतसौगन्ध्यम्

आदिः

सकलनिगमवाच्यो हेयशून्यो गुणाब्धि-
भवजलधितितीर्षुज्ञ्यमूर्तिर्मुकुन्दः।
भवमतिगतपुम्भिः प्राप्यधामाऽखिलेशः
स्फुरतु स हृदये मे सुप्रसन्नो हयास्यः॥ १॥

ज...त्व्अयादीन् दोषशून्यो विधत्ते
भ्रमति निखिलविश्वं यस्य शक्त्यैकदेशे।
अणुकमिव गवाक्षेणन्तपारस्य विष्णोः
स कृपयतु सदा नो गोपसूनुर्मुकुन्दः॥ २॥

कृतनिगमविभागं केशवांशं मुनीन्द्रं
यतिगुरुमरुदंशं देशिकाचार्यवर्यम्।
कुमतवनकृशानू श्रीजयव्यासतीर्थौ
प्रणमति वनमाली तत्प्रसादैककामः॥ ३॥

श्रीमध्वशास्त्रदुग्दाब्धेर्न्यायामृतं यदुत्थितम्।
श्राव्यते तस्य सौगन्ध्यं स्वश्रुतस्य शुशुत्सया॥ ४॥

चण्डमारुतः

आदिः

भवति भवमहर्द्धिर्गोष्पदं वै मुमुक्षो-
रभिभवति कवीशान् यत्प्रसादाद्धि मूकः।
विदधति विधयो वै विश्वमूर्ज्जं स चित्ते
स्फुरतु मम हयास्यः सुप्रसन्नो मुकुन्दः॥ १॥

कृतनिगमविभागं योगिभिः सेविताङ्घ्रिं
धृतमुनिवरवेषं वासुदेवांशमीड्यम्।
यतिगुरुमरुदंशं श्रीमदानन्दतीर्थं
मतिनिधिजयतीर्थं व्यासतीर्थं च वन्दे॥ २॥

मायावादाङ्घ्रिपच्छेदी ध्वान्तनुच्चण्डमारुतः।
श्रीमद्गुरुप्रसादाद्वै तन्यते वनमालिना॥ ३॥

प्राप्यप्रापकभावेन त्याज्यत्वेन मुमुक्षुणा।
ब्रह्म जीवः प्रधानं च विवेच्या हि त्रयः सदा॥ ४॥

विश्वोदयादिकर्ता हि सदनन्तगुणालयः।
मुख्यतया निरूप्योऽत्र प्रसङ्गाद्ध्वान्तभञ्जनम्॥ ५॥

शमदमादिसम्पन्नो माधवे भक्तिमान् नरः।
इहामुत्र विरक्तश्चेदिहाधिकारी गुरुप्रियः॥ ६॥

सदनन्तगुणैः पूर्णो विषयः स्यात् प्रयोजनम्।
मोक्षो वाचकवाच्यत्वं सम्बन्धः कल्प्यते बुधैः॥ ७॥

युक्तितरङ्गिणीसौरभः

आदिः

वन्दे विष्णुं हयास्यं दितितनयबलं पीडकं वेदराशे-
र्हेषाभिः कम्पयन्तं सुरनिकरभयं नाशयन्तं रमेशम्।
पूर्णप्रज्ञं कृपालुं जयमुनिमवधिं तान्त्रिकाणां मुनीशं
दुस्तर्काब्धेरगस्त्यं कुमतनगभिदे कौशिकं व्यासतीर्थम्॥ १॥

व्यासावतंसगदितैर्निहताः परेषां तर्काः
पुरा किमपि नास्ति निरस्यमत्र।
श्रद्धाधनो गुणनिकां कुरुते श्रुतस्य
शुद्धौ सतां खलु पुरो वनमालिमिश्रः॥ २॥

नत्वा श्रीमद्गुरुं विष्णुं देशिकानां[1] शिरोमणिम्।
कुर्वे युक्तितरङ्गिण्यां सौरभं युक्तिसौरभम्॥ ३॥

परवचनमबुद्ध्वा योऽत्र वक्ति प्रमादा-
द्रहसि खलु निजानां मोहनायैव मन्दः।
प्रतिवचननिमित्तं नास्ति किञ्चित् तथाऽपि
प्रतिवचनमिषेण श्रावये तस्य मान्द्यम्॥ ४॥

प्रमाणसङ्ग्रहः

आदिः

यस्याज्ञां शिरसा वहन्ति चकिता ब्रह्मेशशक्रादयाः
श्रीः पादाम्बुजसौरभं कुचयुगे दाये दधाना सदा।
राराजीति सुरार्चितां द्विकमला वृन्दावने क्रीडयन्
गोपालार्भकपुङ्गवान् स विजितः स्कन्धे वहन्नोऽवतात्॥ १॥

आनम्य श्रीहयग्रीवं कृत्वा श्रीगुरुवन्दनम्।
सङ्ग्रहोऽयं प्रमाणानां क्रियते वनमालिना॥ २॥

वेदान्तरत्नावली

आदिः

निखिलनिगमवाच्यं श्रीहयास्यं प्रपद्ये-
ऽगणितगुणनिकेतं हेयशून्यं मुकुन्दम्।
विधिशिवसुरराजैः सेव्यमानाङ्घ्रिपद्मं
रमयन्तमुदधेः कन्यां चिदानन्ददेहम्॥ १॥

[1] दैशिकानां - पा.

कृतनिगमविभागं योगिभिः सेविताङ्घ्रिं
धृतमुनिवरवेषं वासुदेवांशमीड्यम्।
यतिगुरुमरुदंशं श्रीमदानन्दतीर्थं
मतिनिधिजयतीर्थं व्यासतीर्थं च वन्दे॥ २॥

सङ्क्षेपाद्ब्रह्मवाक्यानां निबन्धं मिनतुव्ङ्प(?)।
श्रीमद्भाष्यानुगं कुर्वे हि बालमतिवृद्धये॥ ३॥

वेदान्तसिद्धान्तरत्नावली

आदिः

निखिलनिगमवाच्यं श्रीहयास्यं प्रपद्ये-
ऽगणितगुणनिकेतं हेयशून्यं मुकुन्दम्।
विधिशिवसुरराजैः सेव्यमानाङ्घ्रिपद्मं
रमयितुमिदमाद्यं सच्चिदानन्ददेहम्॥ १॥

कृतनिगमविभागं योगिभिः सेविताङ्घ्रिं
धृतमुनिवरवेषं वासुदेवांशमीड्यम्।
यतिगुरुमरुदंशं श्रीमदानन्दतीर्थं
मतिनिधिजयतीर्थं व्यासतीर्थं च वन्दे॥ २॥

सङ्ग्रहो ब्रह्मवाक्यानां सत्तर्काः परिधीकृताः।
यत्राभिधीयते दुर्गं प्रागुक्तिर्वनमालिना॥ ३॥

प्राचीनोक्तिगुणान्विता श्रुतिशिखासिद्धान्तरत्नावली
वाजिग्रीवभुजान्तरेऽब्धितनयाक्रीडास्पदे चार्पिता।
नित्यानन्तगुणालयस्य दनुजा भूतीर्न मर्षन्ति ये
तेषां चेतसि सा दधातु दहनं चित्ते सतां मोदनम्॥ ४॥

अन्त्यम्

श्रीविष्णोः सदनन्तभूतिनिचयं वेदान्तगीर्भिर्नुतं
योऽकाण्डे प्रलयत्यतथ्यमिति शिष्यः सौगतस्याधमः।
वैरं सन्दधदासुरोऽखिलसमे वक्तुं च तस्योत्तरं
को विद्वाननुरौति किं मृगपतिः फेरो रूतं क्वापि वा॥ १।

वन्दे श्रीहयकन्धरं श्रुतिशिखाभिर्गीतकीर्तिं हरिं
योगीन्द्रैः परिभाषितं मनसि नित्यानन्ददेहं समम्।
हेषाभिः परिकम्पयन्तमसुरांश्चानन्दयन्तं सुरान्
स्वाङ्घ्री चिन्तयते गिरोऽमलतरा विश्राणयन्तं मुदा॥ २॥

श्रीव्यासं मरुदंशं चाक्षोभ्यजयमुखान् मुनीन्।
व्यासतीर्थांश्च विष्णूंस्तु विद्यागुरून् नतोऽस्मि तान्॥ ३॥

श्रीभगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोधनम्॥ ४॥

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मजायः।
द्रौपद्याः शाकलेशात् त्रिभुवनमपुषद्यज्वनां दुष्प्रसाध्यः
स्थित्वाऽन्तःकारितत्वाद्वै मम (तु) यदुवरो सङ्ग्रहात् प्रीयतां सः॥ ५॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे मुनिभरद्वाजान्वया ये द्विजाः।
श्रीसन्नाहमुचो वसन्ति वनमाली तत्कुलेऽभूत् बुधः
सम्पूर्णः श्रुतिसङ्ग्रहे ननु परिच्छेदोऽन्तिमस्तत्कृतेः॥ ६॥

गीतानिगूढार्थचन्द्रिका

आदिः

सृजति विधिसहस्रं ह्यण्डकोशानजस्रं
परिभवति खगेशं यत्प्रसादाच्च पङ्गुः।
अभिभवति च मूको भारतीशानयत्नात्
सकलनिगमवाच्यः श्रीहयास्यः स नोऽव्यात्॥ १॥

स्वजनवधशुगब्धेः पार्थमुद्धर्तुकामो
भवजलनिधिमग्नांश्चान्यजीवान् मुकुन्दः।
समततसुवहित्रं यो हि गीताभिधानं
सकलनिगमसारं सोऽवतान्नोऽसुरारिः॥ २॥

व्यधाद्वेदविभागं यो भारतं च मुनीश्वरः।
कृष्णः सत्यवतीसूनुः सोऽव्यान्नः श्रुतिसागरः॥ ३॥

आचार्यान् श्रीमरुन्मुख्यान् वन्दे ब्रह्मविदां वरान्।
तदुच्छिष्टं च सङ्गृह्णन् यास्यामि पूज्यतां सताम्॥ ४॥

श्रीगुरुपादरेणूंश्च शिरसि वनमालिना।
निधाय क्रियते गीतानिगूढार्थस्य चन्द्रिका॥ ५॥

शमदमादिसम्पन्नो माधवे भक्तिमान् नरः।
इहामुत्र विरक्तश्चेदिहाधिकारी गुरुप्रियः॥ ६॥

सदनन्तगुणैः पूर्णो विषयः स्यात् प्रयोजनम्।
मोक्षो वाचकवाच्यत्वं सम्बन्धः कल्प्यते बुधैः॥ ७॥

जीवो निरूप्यते चाद्ये साधनानि च विस्तरात्।
द्वितीये कथ्यते चेशः तद्भक्तिरपि विस्तरात्॥ ८॥

उक्तार्थ एव सङ्क्षेपात् तृतीये हरिणोच्यते।
प्रायः कथेयमिति हि षट्कत्रये प्रवर्तते॥ ९॥

द्वितीयोऽध्यायः

आत्मयाथात्म्यरूपं हि साधनानि च तद्धियः।
स्थितधीलक्षणं ब्रूते द्वितीयाध्याय ईश्वरः॥

तृतीयोऽध्यायः

जीवेशतत्त्वधीहेतुः यत् कर्मोक्तं समासतः।
तदेव विस्तरादीशो ब्रूतेऽध्याये तृतीयके॥ १॥
ज्ञानकर्माधिकारं चैकस्यैव भूमिभेदेन।
कामदुर्जयतां जित्यै तस्योपायांश्च माधवः॥ २॥

चतुर्थोऽध्यायः

याथात्म्यं स्वावताराणां सम्प्रदायं च कर्मणाम्।
कर्मभेधान् धियः श्रैष्ठ्यं तुर्येऽध्याये ब्रवीत्यजः॥

पङ्चमोऽध्यायः

ज्ञानकर्माधिकारं हि सम्यङ्निर्णीय माधवः।
सन्न्यासं कर्मणां ब्रूते पञ्चमे करुणानिधिः॥
हरेराराधकैर्ज्ञेयो हरिर्नान्यैः कदाचन।
तज्ज्ञानादेव मुक्तिः स्यान्नान्यथेत्युक्तवान् हरिः॥

षष्टोऽध्यायः

पञ्चमान्तेऽवदद्योगं सङ्क्षेपेण रमापतिः।
तस्य व्याख्यानरूपोऽयं षष्ठाध्यायः प्रतन्यते॥

सप्तमोऽध्यायः

ज्ञानं कर्म च सन्न्यासं योगभक्ती रमापतिः।
स्वप्राप्तयेऽवदच्छड्भिः भक्तेश्च मुख्यता ततः॥ १॥

प्राप्तेर्जीवस्य रूपं चाविर्भूतं स्वप्रसादतः।
स्वप्रसादादविद्याया जीवस्थाया निवर्तनम्॥ २॥

भक्तेर्विवृद्धयेऽथेशः षड्भिः सदनन्तगुणालयम्।
योगिनां ध्यानगम्यं यत् तद्ब्रवीतीह माधवः॥ ३॥

सप्तमे स्वस्वरूपस्य याथात्म्यं क्वचिदाकृतिः।
स्वप्रसादान्निवृत्तिश्च जीवस्येति निरूप्यते॥ ४॥

अष्टमोऽध्यायः

मुमुक्षूणां सदा ज्ञेयं मुक्तप्राप्यमैश्वरम्।
स्वस्वरूपं ब्रवीतीह मुक्तामुक्तपथौ हरिः॥

नवमोऽध्यायः

रहस्यं भक्तियोगं च स्वभक्तायातिगोपितम्।
नवमेऽद्भुतमैश्वर्यं ब्रवीति भक्तिवृद्धये॥

दशमोऽध्यायः

भक्तिविवृद्धयेऽथेशो दशमे करुणानिधिः।
सदनन्तविभूतीनां भेदान् ब्रवीति कांश्चन॥

एकादशोऽध्यायः

यदवदद्धरी रूपमैश्वरं भक्तवत्सलः।
कृपया दर्शयामासेह पार्थायेति वर्ण्यते॥

द्वादशोऽध्यायः

द्वादशे कथ्यते भक्तिर्भवार्णवं तितीर्षताम्।
दृढा नौः श्रीरमेशेन तारतम्यं च योगिनाम्॥ १॥

विश्वोदयादिकर्तारमानन्दघनविग्रहम्।
मुक्तास्वाद्यपदाम्भोजं वन्दे श्रीहयकन्धरम्॥ २॥

श्रीसच्चिदानन्दघनमनन्ताद्भुतवैभवम्।
क्रीडन्तं राधया सार्धं वन्दे श्रीनन्दनन्दनम्॥ ३॥

त्रयोदशोऽध्यायः

आद्ये षट्के यदुक्तं हि द्वितीये च यदीरितम्।
जीवेश्वरजडाद्यं तद्विव्रियते तृतीयके॥ १॥

जीवेश्वरप्रधानानां प्राग्विक्षेपाद्विवर्णनम्।
एकज्ञानसमारूढौ तत्सङ्क्षेपस्त्रयोदशे॥ २॥

चतुर्दशोऽध्यायः

गुणत्रयकृतोऽनर्थो जीवस्य न स्वतः क्वचित्।
तन्नाशो हरिभक्त्यैवेति चतुर्दश उच्यते॥

पञ्चदशोऽध्यायः

संसारपादपोऽनादिर्दुर्ज्ञेयश्चाकृतात्मनाम्।
तच्छेदनं स्वमाहात्म्यं च पञ्चदश उच्यते॥

षोदशोऽध्यायः

माहात्म्यं नन्दपुत्रस्य प्रमाणैः प्रतिपादितम्।
शक्नुवन्ति न ये सोढुं तेऽक्षयं नरकं गताः॥

देवासुरस्वभावौ द्वौ निमित्ते बन्धमोक्षयोः।
अपृष्टः कृपया बृते षोडशे तु रमापतिः॥

सप्तदशोऽध्यायः

सत्त्वादिगुणभेदादिश्रद्धादीनां तदात्मनाम्।
त्रैविध्यं माधवो ब्रूते कृपया भक्तवत्सलः॥

अष्टादशोऽध्यायः

पूर्वाध्यायैः प्रकीर्णानि ज्ञानादीन्यब्रवीद्धरिः।
कृपयाऽष्टादशे तानि सङ्ग्रहादिह मुक्तये॥

अन्त्यम्

वन्दे श्रीहयकन्धरं श्रुतिशिखाभिर्गीतकीर्तिं हरिं
योगीन्द्रैः परिभावितं मनसि नित्यानन्ददेहं समम्।

हेषाभिः परिकम्पयन्तमसुरांश्चानन्दयन्तं सुरान्
स्वाङ्घ्रीः चिन्तयते गिरोऽमलतरा विश्राणायन्ते मुदा॥

विजयरथमरक्षद्यो रथाङ्गं दधानः
परिभवति हि भीष्मे पार्थसेनां स्वनाथाम्।
विगलितकटिवासा धूनयत्यादयानै-
र्भुवमतिधृतयाद्यो नोऽवतादर्जुनेन॥

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश शोभनम्॥

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मया यः।
द्रौपद्या शाकलेशात् त्रिभुवनसहितस्तृप्तिमापोत्तमां स
ग्रन्थादस्मात् प्रसन्नो व्रजपतितनयः कारितात् स्वेन मे वै॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे मुनिभरद्वाजान्वया ये द्विजाः।
श्रीसन्नाहमुचो वसन्ति वनमाली तत्कुलेऽबूद्बुधः
श्रीगीताशयचन्द्रिका परिसमाप्ताऽविघ्नतस्तत्कृता॥

विष्णुतत्त्वप्रकाशः

प्रथमपरिच्छेदः

आदिः

श्रीर्वक्षोजयुगे यदङ्घ्रिकमलं सन्धातुकामा सदा
यस्याज्ञां शिरसा वहन्ति विबुधा ब्रह्मेशशक्रादयः।
योगीशा मनसाऽर्चयन्ति यमजं संशोधितेनानिशं
गोप्या बद्ध उलूखले निजवशोऽव्यान्नो मुकुन्दो हि सः॥ १॥

श्रीव्यासं मारुतं वन्दे मायिमर्दनदीक्षितम्।
जयाख्यं तान्त्रिकाचार्यं तथाऽन्यान् सात्वतां वरान्॥ २॥

पादाब्जं श्रीगुरोर्नत्वा श्राव्यते वनमालिना।
विष्णुतत्त्वप्रकाशोऽयं प्रीतये कमलापतेः॥ ३॥

अन्त्यम्

प्रथमपरिच्छेदः

प्रकृतिपुरुषयोगं यो विधायाखिलेशो
रवयति महदादिक्ष्मान्तविश्वं स लोकान्।
विधिभवमुखदेवान् शिक्षकश्चाखिलानां
स्फुरतु स हृदये गोगोपिकालालितो मे॥

द्वितीयपरिच्छेदः

प्रकाशे विष्णुतत्त्वस्य रचिते वनमालिना।
परिच्छेदो द्वितीयोऽयं समाप्तः कृपया हरेः॥ १॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे द्विजवरा उच्चैर्भरद्वाजजाः।
श्रीसन्नाहमुचो वसन्ति सुकुले तेषां प्रसूतेन वै
पूर्णः श्रीवनमालिना विरचितो विष्णुप्रकाशो मुदा॥ २॥

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजाते-
र्दत्वा भूतीः परा स्वा धृतकर इति मा देहि मां पद्मया यः।
द्रौपद्या शाकलेशात् त्रिभुवनसहितस्तृप्तिमापोत्तमां स
ग्रन्थादस्मात् प्रसन्नो व्रजपतितनयः कारितात् स्वेन मे वै॥ ३॥

हृदयमसुरचम्वा हेषया कम्पयन्तं
सुरवलमुच्चैर्बद्धयन्तं तथैव।

निगमशिखरवृन्दं चोद्गिरन्तं मुखाब्जा-
द्धयमुखमहमीडे सच्चिदानन्दमूर्तिम्॥ ४॥

भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोधनम्॥ ५॥

विष्णुतत्त्वप्रसिद्धिः

आदिः

जयति श्रीहयग्रीवस्त्रिवेदी जीवितेश्वरः।
रमासेवितपादाब्जो भक्तानुग्रहतत्परः॥ १॥

नत्वा श्रीगुरुपादाब्जं श्राव्यते वनमालिना।
प्रसिद्धिर्विष्णुतत्त्वस्य प्रीतये कमलापतेः॥ २॥

भागवतचन्द्रिका

दशमस्कन्धव्याख्याया आदिः

सृजति विधिसहस्रं लीलया विश्वमृद्धं
विदधति कवितां येऽप्येडमूकाः प्रसादात्।
उदयगिरिविलङ्घी स्यात् क्षणाद्यस्य पङ्गुः
सकलनिगमवाच्यः श्रीहयास्यः स नोऽव्यात्॥ १॥

विधिभवसुरराजैः सेविता श्रीर्यदीयं
ललितचरणकञ्जं स्वीयवक्षोजयुग्मे।
परिकलयितुमीष्टे शङ्कमाना कमेरे(?)
जयति स विपने गाश्चारयन् नन्दसूनुः॥ २॥

नत्वा श्रीगुरुपादाब्जं तथाऽन्यान् महतः सतः।
व्याख्येयं दशमस्कन्धे तन्यते वनमालिना॥ ३॥

लक्ष्यो यो विश्वसर्गाद्यैर्नवभिर्दशमो हरिः।
हन्ता दैत्यावनीशानां दशमे स निरूप्यते॥ ४॥

निरोधो दुष्टभूपानां धर्मसंस्थापनाय हि।
यशो वर्णयितुं विष्णोर्महापातकपावनम्॥ ५॥

नित्यो नैमित्तिकः प्रोक्तः प्राकृतोऽत्यन्ततस्तथा।
चतुर्धा प्रलयं तत्र त्रितयं प्रायशोऽवदत्॥ ६॥

अध्याया नवतिः प्रोक्ताः दशमे हरिकीर्तये।
सप्रसङ्गं हरेर्जन्म चतुर्भिर्वर्ण्यते ततः॥ ७॥

गोकुले मथुरायां च द्वारकायां क्रमात् ततः।
लीलाश्चकार योगेशोऽनन्ता अलौकिकी हरिः॥ ८॥

पञ्चभिस्त्रिंशताध्यायैर्महद्वृन्दावनादिषु।
स्वीयानक्रीडयद्विष्णुर्विहारैस्तत्तदीप्सितैः॥ ९॥

अक्रूरेण कृतं स्तोत्रमेकेनाप्सु यमस्वसुः।
मथुरायां कृता लीलाः प्रोक्ता एकादशैर्हिताः।
द्वारकायां कृता लीला वर्ण्यन्ते ग्रन्थशेषतः॥ १०॥

स्वमृत्युं देवकीपुत्राच्छ्रुत्वा भीतः सुतानहन्।
कंसस्तस्यानृशंसो हीत्याद्येन प्रतिपाद्यते॥ ११॥

लक्ष्मीरामार्यपौत्रेण वसिष्ठकुलजेन हि।
श्रीमद्विद्येशतीर्थानां शिष्येणेयं यथामति।
शोधिता श्रीहरिप्रीत्यै गुर्वनुग्रहकाङ्क्षिणा॥

ತೆರೆಯ ಹಿಂದೆ

ಮೂರು ವರ್ಷದ ಹಿಂದಿನ ಮಾತು. ಭಾರತದ ಗ್ರಾಮೀಣ ಶಸ್ತ್ರಚಿಕಿತ್ಸಕರ ಸಂಘದ ರಾಷ್ಟ್ರೀಯ ಕಾರ್ಯಾಗಾರದಲ್ಲಿ ಪಾಲ್ಗೊಳ್ಳಲು ಪುಣೆಗೆ ತೆರಳಿದ್ದೆ. ಆಗ್ಗೆ ಒಂದೆರಡು ವರ್ಷದಿಂದ ಹಸ್ತಪ್ರತಿಗಳ ಗಮನವಿತ್ತು. ಅನೇಕ ಪ್ರತಿಗಳು ಹರಿದು ಹೋಗುವ ಸ್ಥಿತಿಯಲ್ಲಿಯೂ ಮೂಲೆಗುಂಪಾಗಿದ್ದವು. ದೇಶದೆಲ್ಲೆಡೆಯಲ್ಲಿನ ಗ್ರಂಥಗಳ ಹುಡುಕಾಟ ಆರಂಭವಾಗಿತ್ತು. ಗ್ರಂಥಸೂಚಿಗಳಲ್ಲಿ ; ಅಂತರ್ಜಾಲದಲ್ಲಿ ; ಗ್ರಂಥಾಲಯಗಳಲ್ಲಿ. ಪುಣೆಯ ಭಂಡಾರ್ಕರ್ ಸಂಸ್ಥೆಯ ಗ್ರಂಥಗಳದ್ದೂ ಸೂಚಿಯೊಂದನ್ನು ಅಂತರ್ಜಾಲದ ಮಾಹಿತಿಯಿಂದ ಸಿದ್ಧಗೊಳಿಸಿದ್ದೆ. ಕಾರ್ಯಾಗಾರದ ಬಿಡುವಿನ ವೇಳೆಯಲ್ಲಿ ಗ್ರಂಥಾಲಯಕ್ಕೆ ಹೋಗುವ ಆಸೆಯಿಂದ. ಊರು ಹೊಸತು. ಕ್ಷೇತ್ರವೂ ಹೊಸತು. ನವಲಿ ರಾಘವೇಂದ್ರರ ಸಹಾಯದಿಂದ ಆಸೆ ಚಿಗುರಿತ್ತು.

ಪುಣೆಯ ವರದೇಂದ್ರರ ಸನ್ನಿಧಿಯಲ್ಲಿ ಒಬ್ಬ ಅಪರಿಚಿತರ ಪರಿಚಯವಾಯ್ತು. ಡಾ. ನಾರಾಯಣ ರಾಘವೇಂದ್ರ ದೇಸಾಯಿ. ಪರಿಸರ ತಜ್ಞ. ಅವರು ನನ್ನ ಆಸಕ್ತಿಯನ್ನು ಮೆಚ್ಚಿ ಹುರುಪನ್ನು ಇಮ್ಮಡಿಗೊಳಿಸಿದರು. ಅವರ ಜೊತೆಗೇ ಗ್ರಂಥಾಲಯಕ್ಕೆ ಹೊರಟೆ. ಅಲ್ಲಿನ ಅಧಿಕಾರಿಗಳು ಪುಸ್ತಕಗಳನ್ನು ನೋಡಲು ತೆರೆದ ಮನಸ್ಸಿನಿಂದ ಅವಕಾಶ ಕೊಟ್ಟರು. ಕೆಲವು ಅಪ್ರಕಟಿತ ಗ್ರಂಥಗಳ ಪ್ರತಿಗಳನ್ನು ಬೇಡಿ ಹಿಂದಿರುಗಿದೆ.

ಇನ್ನೇನು ಊರಿಂದ ಹೊರಡಬೇಕು ಆಗ ಬೆಂಗಳೂರಿನಿಂದ ಅಣ್ಣ ಶ್ರೀನಿವಾಸ ಕರೆ ಮಾಡಿ ಡಾ. ಶರ್ಮರ ಪುಸ್ತಕದಿಂದ ವನಮಾಲಿಗಳ ಗೀತಾವ್ಯಾಖ್ಯಾನದ ಸಂಖ್ಯೆ ತಿಳಿಸಿದ. ಅಂತರ್ಜಾಲದಲ್ಲಿ ಅದಿರಲಿಲ್ಲ. ಅಲ್ಲಿನ ಮಾಹಿತಿ ಮೈಕ್ರೋಫಿಲ್ಮ್ ಆದ ಪ್ರತಿಗಳ ಬಗ್ಗೆ ಮಾತ್ರ. ಈ ಪ್ರತಿ ತುಂಬಾ ಜೀರ್ಣವಾಗಿದ್ದರಿಂದ ಮೈಕ್ರೋಫಿಲ್ಮ್ ಆಗಿರಲಿಲ್ಲ. ಹಾಗಾಗಿ ಗ್ರಂಥಾಲಯದ ಮೂಲ ಸೂಚಿಗಳನ್ನು ಆಧರಿಸಿದ ಶರ್ಮರ ಪುಸ್ತಕದಲ್ಲಿ ಮಾತ್ರ ನಮಗೆ ಈ ಮಾಹಿತಿ ದೊರೆತದ್ದು. ಅದನ್ನು ಛಾಪಿಸಲು ಕೋರಿದೆ. ಆದರೆ ಆದಕ್ಕೆ ಕೆಲ ದಿನಗಳು

ಬೇಕೆಂದರು ಅಲ್ಲಿನ ಅಧಿಕಾರಿ ಶ್ರೀನಂದ್ ಬಾಪಟ್. ದೇಸಾಯಿಗಳು ನನಗೆ ಅಂಚೆಯ ಮೂಲಕ ತಲುಪಿಸುವ ಭರವಸೆ ನೀಡಿದರು.

ಎರಡು ತಿಂಗಳು ಕಳೆಯಿತು. ದೇಸಾಯಿಗಳು ಅಂಚೆಯಲ್ಲಿ ಕಳಿಸಿದ ಪ್ರತಿ ಗೀತಾ ಜಯಂತಿಯ ದಿನ ನನ್ನ ಕೈಸೇರಿತು. ಆದಷ್ಟು ಬೇಗ ಹೊತ್ತಿಗೆ ಹೊರತರಲೆಂದು ಕೆಲಸ ಆರಂಭಿಸಿಯೂ ಆಯ್ತು. ಆದರೆ ಈ ಪ್ರತಿಯಲ್ಲಿ ಅರ್ಧಕ್ಕರ್ಧ ಕಳೆದುಹೋಗಿತ್ತು. ಸರಾಸರಿ ಪ್ರತಿ ಎರಡು ಮೂರು ಪತ್ರಕ್ಕೂ ಮುಂದಿನ ಎರಡು ಮೂರು ಪತ್ರ ನಾಪತ್ತೆ. ಬೇರಾವ ಪ್ರತಿ ಇದೆ ? ಎಲ್ಲಿದೆ ? ಏನೂ ಗೊತ್ತಿಲ್ಲ. ಇದ್ದಷ್ಟು ಮಾಡುವ ಆಸೆಯಿಂದ ಮುಂದುವರೆಸಿದೆ.

ಒಂದು ಹಂತ ತಲುಪಿತು. ಹಸ್ತಪ್ರತಿಗಳಿಗಾಗಿ ಗ್ರಂಥಸೂಚಿ (catalougue) ಗಳನ್ನು ಹುಡುಕುವುದು, ಅಂತರ್ಜಾಲದಲ್ಲಿ ಸರ್ಚ್ ಮಾಡುವುದು ಹಾಗೂ ಹಸ್ತಪ್ರತಿ ಗ್ರಂಥಾಲಯಗಳಿಗೆ ಭೇಟಿ ಕೊಡುವುದು ಮುಂದುವರೆದಿತ್ತು. ಇದೇ ಜಾಡಿನಲ್ಲಿ ಒಂದು ದಿನ ಅಂತರ್ಜಾಲವನ್ನು ಜಾಲಾಡುತ್ತಿದ್ದಾಗ ಆಕಸ್ಮಿಕವಾಗಿ www.ignca.nic.in ನಲ್ಲಿ ಜಮ್ಮುವಿನ ರಣಬೀರ್ ಗ್ರಂಥಾಲಯದಲ್ಲಿ ಇದರ ಎರಡು ಹಸ್ತಪ್ರತಿಗಳಿರುವುದಾಗಿ ಬರೆದದ್ದು ಕಾಣಿಸಿತು. ಸಂತಸವೇನೋ ಆಯ್ತು. ಆದರೆ ಆ ಪ್ರತಿ ನಿಜಕ್ಕೂ ಅಲ್ಲಿದೆಯೋ ? ಅದೂ ಸಮಗ್ರವೋ ಅಸಮಗ್ರವೋ ? ಲಿಪಿ ಯಾವುದು ? ಅದನ್ನು ತರುವುದು ಹೇಗೆ ?

ಅದುವರೆಗಿನ ಓಡಾಟಗಳಿಂದ ಒಂದು ಮಾತು ತಿಳಿದಿತ್ತು. ಗ್ರಂಥಾಲಯಗಳಿಂದ ಹಸ್ತಪ್ರತಿಗಳನ್ನು ತರುವುದು ಸುಲಭದ ಮಾತಲ್ಲ. ಇರಲಿ ಪ್ರಯತ್ನಿಸಿ ನೋಡೋಣ ಅಂತ ಜಮ್ಮುವಿಗೆ ಇಂಗ್ಲಿಷ್ ಭಾಷೆಯಲ್ಲಿ ಒಂದು ಪತ್ರವನ್ನೂ ಬರೆದದ್ದಾಯ್ತು. ಬೇರೆ ಕೆಲಸಗಳಲ್ಲಿ ಬೆರೆತು ಹೋದೆ. ಮರೆತು ಹೋದೆ. ಐದಾರು ತಿಂಗಳುಗಳ ನಂತರ ಒಂದು ಪತ್ರ ಬಂತು. ಜಮ್ಮುವಿನಿಂದ. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆದದ್ದು : "ಸಂಸ್ಕೃತದ ಹಸ್ತಲಿಖಿತ ಪುಸ್ತಕವನ್ನು ಸಂಶೋಧಿಸುವ ಆಸೆ. ಆದರೆ ಇಂಗ್ಲಿಷ್ ನಲ್ಲಿ ಪತ್ರ ಬರೆದಿದ್ದೀರಿ ! ಇರಲಿ. ಹಸ್ತಪ್ರತಿಗಳು ಸುರಕ್ಷಿತವಾಗಿ ನಮ್ಮಲ್ಲಿವೆ. ಅವನ್ನು ಛಾಪಿಸಲು ನಿಮಗೆ ಅಂಚೆಯಲ್ಲಿ ಕಳಿಸಲು ಒಂದು ಸಾವಿರದ ಏಳು ನೂರು ರೂಪಾಯಿಗಳಾಷ್ಟಾದೀತು. ನಮ್ಮ ಟ್ರಸ್ಟಿಗೆ ಹಣ ಕಳಿಸಿ. ಪುಸ್ತಕ ಕಳಿಸುತ್ತೇವೆ. " ಸದ್ಯ. ಬಯ್ದು ಬರೆದಿದ್ದರೂ ಪುಸ್ತಕ ಸಿಗುವ ಸಾಧ್ಯತೆಯಿದೆ. ಯಾರ ಹೆಸರಲ್ಲಿ ಹಣ ಕಳಿಸಬೇಕು ? ವಿಳಾಸ ಏನು ? ಅಂತ ಮತ್ತೊಂದು ಪತ್ರ ಬರೆದೆ. ಬಹಳ ದಿನಗಳ ಕಾಲ ಉತ್ತರ ಬರಲಿಲ್ಲ.

ಆಗ ನೆನಪಾಯಿತು. ಡಾ. ಲಲಿತ್ ಕುಮಾರ್ ತ್ರಿಪಾಠಿಗಳದು. ಅಲಹಾಬಾದಿನ ಗಂಗಾನಾಥ್ ಝಾ (ರಾಷ್ಟ್ರೀಯ ಸಂಸ್ಕೃತ ಸಂಸ್ಥಾನ) ಸಂಸ್ಥೆದಲ್ಲಿ ವೈಯ್ಯಾಕರಣಿಕರು. ನಾನು, ಅಣ್ಣ ಶ್ರೀನಿವಾಸ ಹಾಗೂ ಸ್ನೇಹಿತರಾದ ಶ್ರೀಧರ ೨೦೦೭ ರ ಏಪ್ರಿಲ್ ತಿಂಗಳಲ್ಲಿ

ವ್ಯಾಕರಣವನ್ನು ಅಭ್ಯಸಿಸಲು ಅವರ ಬಳಿ ತೆರಳಿದ್ದೆವು. ಅವರು ಜಮ್ಮುವಿನಲ್ಲಿ ಹಿಂದೊಮ್ಮೆ ಇದ್ದುದಾಗಿ ಹೇಳಿದ್ದು ನೆನಪಾಯಿತು. ಶ್ರೀಧರರಿಗೆ ಪಿ ಎಚ್ ಡಿ ನೆಪದಿಂದ ಅವರು ಹೆಚ್ಚು ಪರಿಚಿತರು. ಇವರ ಮೂಲಕ ಅವರನ್ನು ಸಂಪರ್ಕಿಸಿ ಪುಸ್ತಕಕ್ಕಾಗಿ ಪ್ರಯತ್ನಿಸಿದೆವು. ಕೆಲವೇ ದಿನಗಳಲ್ಲಿ ತ್ರಿಪಾಠಿಗಳಿಂದ ಕರೆ ಬಂತು. "ಪುಸ್ತಕಗಳ ಪ್ರತಿಗಳು ನನ್ನ ಕೈ ಸೇರಿವೆ. ಸಮಗ್ರವಾದದ್ದೊಂದಿದೆ. ನಾನು ಇಷ್ಟರಲ್ಲೇ ಬೆಂಗಳೂರಿಗೆ ಬರುವವನಿದ್ದೇನೆ. ತಂದು ಕೊಡುತ್ತೇನೆ. "

ಇನ್ನೇನೂ ಅಡೆಯಿಲ್ಲವೆಂದು ಹುರುಪಿನಿಂದ ಕೆಲಸ ಪುನರಾರಂಭಿಸಿದೆ. ಈ ಪ್ರತಿ ಸಮಗ್ರವಾಗಿತ್ತು. ಕೆಲವು ಅಕ್ಷರಗಳನ್ನು ಓದಲಾಗುತ್ತಿರಲಿಲ್ಲ. ಪಾಠವೂ ಅಪದ್ಧ. ಹಿಂದಿನ ಹಸ್ತಪ್ರತಿಯೊಂದಿಗೆ ಜೋಡಿಸಿ ನೋಡಿದಾಗ ಕೆಲ ಅಕ್ಷರಗಳು ತಿಳಿದವು. ಆಮೇಲೆ ಗೊತ್ತಾಯ್ತು ಕೆಲವು ಅಕ್ಷರಗಳದ್ದು ಕಾಶ್ಮೀರಿ ಲಿಪಿ ! ಆದರೂ ದೇವನಾಗರಿಗೆ ಹೋಲುವ ಲಿಪಿ. ಹಿಂದಿನ ಪ್ರತಿಯಂತೂ ಇದ್ದೇ ಇದೆ. ಅಂಚೆಯಲ್ಲಿ ಇನ್ನೊಂದು ಪ್ರತಿಯನ್ನೂ ಕಳಿಸಿದರು ತ್ರಿಪಾಠಿಗಳು. ಆ ಪ್ರತಿಯಿದ್ದದ್ದು ನಾಲ್ಕನೆ ಅಧ್ಯಾಯಕ್ಕೆ ಮಾತ್ರ. ದೇವನಾಗರಿಯಲ್ಲೇ ಇದೆ. ವಿಶೇಷತೆಯೆಂದರೆ ಪ್ರತಿ ಶ್ಲೋಕಕ್ಕೂ ಇಪ್ಪತ್ತು ವ್ಯಾಖ್ಯಾನಗಳಿವೆ. ವನಮಾಲಿಗಳದ್ದೂ ಒಂದು.

ಹಸ್ತಪ್ರತಿಯಿಂದ ಸಾಧ್ಯವಾದ ಕಾರ್ಯ ಮುಗೀತು. ಉಳಿದ ವ್ಯಾಖ್ಯಾನಗಳೊಂದಿಗೆ ಜೋಡಿಸಿ ತುಲನಾತ್ಮಕವಾಗಿ ನೋಡಲು ಹೊರಟೆ. ಮತ್ತೊಂದಾಶ್ಚಾರ್ಯ. ಈ ವ್ಯಾಖ್ಯಾನದ ಅರ್ಧಕ್ಕೂ ಹೆಚ್ಚು ವಾಕ್ಯಗಳು ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ಗೂಢಾರ್ಥದೀಪಿಕೆಯಲ್ಲಿವೆ. ಸಂತೋಷವೂ ಆಯ್ತು. ಪಾಠವನ್ನು ಇನ್ನೂ ಶುದ್ಧಗೊಳಿಸಬಹುದು. ತುಲನೆಗಳನ್ನು ಮುಗಿಸಿ, ಅಡಿಟಿಪ್ಪಣಿಗಳನ್ನು ಸೇರಿಸಿದೆ. ಒಟ್ಟಾರೆ ವಿಶೇಷಗಳ ಕರಡನ್ನು ಬರೆದೆ.

ಅವರ ಗ್ರಂಥಗಳ ಕುರಿತಾದ ಶೋಧನೆಯ ಬಗ್ಗೆ ಎರಡು ಮಾತು ಹೇಳಬೇಕು. ೨೦೦೭ ರ ಏಪ್ರಿಲ್ ನಲ್ಲಿ ಉತ್ತರ ಪ್ರದೇಶ ಹಾಗೂ ಉತ್ತರ ಖಂಡದ ಗ್ರಂಥಾಲಯಗಳಿಗೆ ನಾನು ಹಾಗೂ ಅಣ್ಣ ಶ್ರೀನಿವಾಸ ಭೇಟಿ ನೀಡಿದ್ದೆವು. ಇತ್ತೀಚಿಗೆ ೨೦೦೮ ರ ನವೆಂಬರ್ ನಲ್ಲಿ ಗುಜರಾತ್ ಹಾಗೂ ರಾಜಸ್ಥಾನ ದ ಗ್ರಂಥಾಲಯಗಳಿಗೆ ಹೋಗಿ ದ್ವೈತ ವೇದಾಂತದ ಗ್ರಂಥಗಳನ್ನು ಹುಡುಕಲು ಪ್ರಯತ್ನಿಸಿದ್ದೆವು. ಡಾ. ವೀರನಾರಾಯಣಾಚಾರ್ಯರ ಸಹಾಯ, ಅಕ್ಕರೆಯ ಪ್ರೋತ್ಸಾಹ ಹಾಗೂ ಹರಕೆಯಿಲ್ಲದಿದ್ದಲ್ಲಿ ಇದು ಸಾಧ್ಯವಾಗುತ್ತಿತ್ತೋ ಇಲ್ಲವೋ ! ವಿಶೇಷವಾಗಿ ರಾಜಸ್ಥಾನದ ಅದರಲ್ಲೂ ಬಿಕಾನೇರ್ ಮತ್ತು ಜೋಧಪುರದ ಭೇಟಿ ವನಮಾಲಿಗಳ ಗ್ರಂಥಗಳ ಬಗ್ಗೆ ಅನೇಕ ಹೊಸ ಅಂಶಗಳನ್ನು ಬೆಳಕಿಗೆ ತಂದಿತು.

ಹೀಗೆ ದೊರೆತ ಅವರ ಗ್ರಂಥಗಳ ಬಗೆಗಿನ ಮಾಹಿತಿಯನ್ನು ಸಂಗ್ರಹಿಸಿ ಬರೆದೆ. ವನಮಾಲಿಗಳ ಬಗ್ಗೆ ಹೆಚ್ಚಿನ ಅಧಿಕೃತ ಮಾಹಿತಿ ದೊರೆತಿಲ್ಲ. ಅವರ ಶೈಲಿ, ನಡೆ, ಆಗಿನ

ಕಾಲದ ಹಿನ್ನೆಲೆಯನ್ನು ಊಹಿಸಿ ತತ್ತ್ವವಾದದ ತಿರುಳನ್ನು ಬರೆಯಲು ಪ್ರಯತ್ನಿಸಿದೆ. ಇಂದಿಗೂ ಪ್ರಸ್ತುತವಾದಂತೆ. ಆದ್ದರಿಂದಲೇ ಸಮಾಜಮುಖಿಯಾಗಿ. ಇವು ಚೈತನ್ಯದಿಂದ ಬರೆದ ಮನಸ್ಸಿನ ಮಾತುಗಳು. ಇಲ್ಲಿ ಗಣಿತದ ಸ್ಪಷ್ಟತೆಯಿಲ್ಲ. ಅವೆಲ್ಲದರ ಕರಡನ್ನು ಹಾಗೂ ಗ್ರಂಥದ ಕೊನೆಯ ಹಂತದ ಪ್ರತಿಯನ್ನು ಕರಡು ತಿದ್ದಲು ಶ್ರೀನಿವಾಸ ಹಾಗೂ ಶ್ರೀಧರರಿಗೆ ಕೊಟ್ಟೆ. ತುಂಬ ಮುತುವರ್ಜಿಯಿಂದ ಸಹಕರಿಸಿದ್ದಾರೆ. ಕೊನೆಯ ಪ್ರತಿಯ ಹಲವು ಭಾಗಗಳನ್ನು ವಿಜಯಾನಂದನವರು ತಿದ್ದಿ ಸಹಕರಿಸಿದ್ದಾರೆ.

ವಿದ್ಯಾಗುರುಗಳಾದ ಭಂಡಾರಕೇರಿ ಮಠಾಧೀಶರಾದ ಶ್ರೀ ವಿದ್ಯೇಶ ತೀರ್ಥ ಶ್ರೀಚರಣರು ಗ್ರಂಥವನ್ನು ಅವಲೋಕಿಸಿ, ತಿದ್ದುಪಡಿಗಳನ್ನು ಸೂಚಿಸಿ ಆಶೀರ್ವದಿಸಿದ್ದಾರೆ. ಶ್ರೀಗಳಿಗೆ ನನ್ನ ಅನಂತ ಸಾಷ್ಟಾಂಗ ನಮನಗಳು. ಹಾಗೆಯೇ ಗ್ರಂಥವನ್ನು ಅವಲೋಕಿಸಿ ತಿದ್ದುಪಡಿಗಳನ್ನು ಸೂಚಿಸಿ ವಿಮರ್ಶಾತ್ಮಕ ಲೇಖನಗಳನ್ನು ಬರೆದುಕೊಟ್ಟ ಶ್ರೀ ಸತ್ಯನಾರಾಯಣಾಚಾರ್ಯರಿಗೂ ಹಾಗೂ ಶ್ರೀ ವೀರನಾರಾಣಾಚಾರ್ಯರಿಗೂ, ನನ್ನ ಅನಂತ ನಮನಗಳು.

ಭರತಭೂಮಿಯ ದಲಿತದನಿಯನ್ನು ಹತ್ತಿರದಿಂದ ಕಂಡಿದ್ದೆ. ತುಳಿತಕ್ಕೊಳಗಾದವರ ದೈನ್ಯ, ಕನಸುಗಳನ್ನೂ ಕಳಕೊಂಡ ಕಡು ಬಡತನ, ಗುಡಿಸಲ ಹುಲ್ಲನ್ನೂ ಬಯಸುವ ಸಿರಿವಂತರ ಅಟ್ಟಹಾಸ ಮೊದಲಾದ್ದು. ಈ ಭೂಮಿಯ ಸನಾತನ ಸಜ್ಜನಿಕೆಯನ್ನು ಹೊರತರಲು ತುಳಿಯಲ್ಪಟ್ಟವರು ಮೇಲೇಳಬೇಕಾಗಿದೆ. ನಾವೆಲ್ಲ ಚೆಲುವ ನಾಡನ್ನು ಕಟ್ಟಬೇಕಿದೆ. ಜಗತ್ತಿನ ನಕ್ಷೆಯಲ್ಲಿ ನಮ್ಮ ದೇಶ ಕಾಣಬೇಕಿದೆ. ಇಂದು ಮಾತಾಡುವ ಅಭಿವೃದ್ಧಿಯ ಹೆಸರಿನಿಂದಲ್ಲ. ನಮ್ಮ ದೇಶದ ಮೌಲ್ಯಗಳಿಂದ. ನೋವಿಗಾಸರೆಯಾಗುವ ವಾತ್ಸಲ್ಯದಿಂದ. ತೋರಿಕೆಯ ಅಧ್ಯಾತ್ಮಿಕತೆಗಿಂತ ತೆರೆದ ಮನಸ್ಸಿನ ಮನುಷ್ಯತ್ವದಿಂದ. ನಮ್ಮಲ್ಲಿ ಯಾವ ಸಂಪತ್ತೂ ಮುಚ್ಚಿಟ್ಟುಕೊಳ್ಳದ ನಿರ್ಮಲ ಬುದ್ಧಿಯಿಂದ. ಗಣಿತಕ್ಕಿಂತ ಮಿಗಿಲಾದ ವಾಸ್ತವದ ದೃಷ್ಟಿಯಿಂದ. ಮತ್ತೊಬ್ಬರದನ್ನು ಕದಿಯುವ ಕಾಮಕ್ಕಿಂತ ತಮ್ಮದನ್ನು ಕೊಡುವ ಔದಾರ್ಯದಿಂದ. ಒಟ್ಟಿನಲ್ಲಿ ನಮ್ಮ ದೇಶದ ಸೊಬಗಿಗಾಗಿ ನಮ್ಮವರನ್ನು ಎಬ್ಬಿಸಲು ಹಯಗ್ರೀವನ ಅಡಿಯಲ್ಲಿ ಈ ಗ್ರಂಥವನ್ನು ಸಮರ್ಪಿಸುತ್ತಿದ್ದೇನೆ. ಸ್ವತಂತ್ರ ಭಾರತದ ಪ್ರಜಾಪ್ರಭುತ್ವದಲ್ಲೂ ಇನ್ನೂ ಬೇರು ಕಿತ್ತಿಲ್ಲದ ವಸಾಹತುಶಾಹಿ ಆಳ್ವಿಕೆಯನ್ನು ಬೇರು ಸಹಿತ ಕಿತ್ತಲು.

ಇನ್ನು ಅನೇಕ ಬೇವು ಬೆಲ್ಲದ ಅನುಭವಗಳನ್ನು , ವೈದ್ಯ ಪದವಿಯ ನಂತರ ಹಸ್ತಪ್ರತಿಗಳ ಹುಡುಕಾಟದ ಮುಳ್ಳುಹಾದಿಯ ಆನಂದವನ್ನು ಮುಂದಿನ ಕಂತುಗಳಲ್ಲಿ ಹಂಚಿಕೊಳ್ಳುತ್ತೇನೆ.

ಈ ಗ್ರಂಥಗಳ ಶೋಧನೆ ನನ್ನ ಅರ್ಹತೆಯಲ್ಲ. ಏನಾದರೂ ಮಾಡಲಿಕ್ಕಾಗಿರುವುದು ಗುರು ಹಿರಿಯರ ಆಸರೆ ಹಾಗೂ ಹರಕೆಗಳಿಂದ. ತಿಳಿದೂ ಬಹಳ ತಪ್ಪುಗಳಿವೆ. ತಿಳಿಯದೆ ಇರುವುದಂತೂ ತಿಳಿದೇ ಇಲ್ಲ. ಹೆಚ್ಚಾಗಿ ಇದು ಲಿಪಿಕಾರನ ಕೆಲಸ. ಸಂಶೋಧಕರದ್ದಲ್ಲ.

ಅಂತಹ ಭ್ರಮೆಗೂ ಸಾಧರ್ಮ್ಯವಿಲ್ಲ.

प्रमाणसिद्धान्तविरुद्धमत्र यत्किञ्चिदुक्तं मतिमान्द्यदोषात् ।
मात्सर्यमुत्सार्य तदार्यचित्ताः प्रसादमाधाय विशोधयन्तु ।।

ಬುದ್ಧಿಯ ಬಡತನದಿಂದ ಆಡಿದ್ದು. ಕೆಲವೆಡೆ ದಾರಿ ತಪ್ಪಿದೆ, ಹಿಡಿತ ಮರೆತಿದೆ. ಆದಾಗ್ಯೂ ಹಿರಿಯ ಮನಸ್ಸುಗಳು ಕಣ್ಣು ಕೆಂಪಾಗಿಸದೆ ಸಂತಸದಿಂದ ಗುಡಿಸಿ ಶೋಧಿಸಲಿ.

ಎಲ್ಲರಿಗೂ ನಾನು ಋಣಿ. ಭಾರ ಹೊತ್ತವರಿಗೆ. ಇಳಿಸಿದವರಿಗೆ. ತಾವು ತಿದ್ದಿ ತೀಡಬೇಕು. ಕೈಹಿಡಿದು ನಡೆಸಬೇಕು.

ಶ್ರೀನಿಧಿ ವಾಸಿಷ್ಠ
ಬೆಂಗಳೂರು

ಹಿನ್ನುಡಿ

ಅದೊಂದು ಭಾಗ್ಯೋದಯ. ಹರಟೆಯ ಹಟ್ಟಿಯಲ್ಲಿ ಪರತತ್ತ್ವವನ್ನು ಕಾಣುವ ಭಾಗ್ಯ. ವನಮಾಲಿ ಮಿಶ್ರರದೂ ಅಂತಹ ಭಾಗ್ಯ.

ನಿಜ. ಅದು ನಿಜಕ್ಕೂ ಹರಟೆಯ ಹಟ್ಟಿ. ಅನೇಕರು ಮಾತಾಡುವ ಸ್ಥಳ. ತಿಳಿದವರೂ ತಿಳಿವಿಲ್ಲದವರೂ. ಕೆಲವೊಮ್ಮೆ ಒಟ್ಟಿಗೆ ; ಕೆಲವೊಮ್ಮೆ ಒಬ್ಬರಾದ ಮೇಲೆ ಮತ್ತೊಬ್ಬರು. ಒಬ್ಬ ಹೇಳಿದ್ದನ್ನು ಮತ್ತೊಬ್ಬ ಕೇಳಬಹುದು, ಕೇಳದಿರಬಹುದು. ಹಿಂದಿನ ಮಾತಿನ ಪ್ರಭಾವ ಈಗ ಇರಬಹುದು ; ಇಲ್ಲದೆಯೂ ಇರಬಹುದು. ಮಾತಾಡುತ್ತಿರುವುದು ಮಾತ್ರ ಅವರವರ ನೇರಕ್ಕೆ. ಅಂದರೆ ಅವರವರಿಗೆ ತೋಚಿದ್ದು. ಕೆಲವೊಮ್ಮೆ ಕಂಡಿದ್ದು. ಕೆಲವೊಮ್ಮೆ ಕಾಣದಿದ್ದದ್ದು ಅಥವಾ ಕಾಣದ್ದು. ಕಂಡದ್ದರ ಬಗ್ಗೆ ಎಲ್ಲರದೂ ಹೆಚ್ಚು ಕಡಿಮೆ ಒಂದೇ ಮಾತು. ಕಾಣದ್ದರ ಬಗೆಗೆ ಅನೇಕ ವಿರೋಧಗಳು. ಕಂಡಿಲ್ಲದಿದ್ದರಿಂದಲೇ ಇದು ತೋಚಿದ್ದು, ತಲೆಗೆ ತೋಚಿದ್ದು, ತಲೆಗೆ ಮಾತ್ರ ತೋಚಿದ್ದು. ಕಾಣದಿದ್ದುದು ಹೇಗೇಗೋ ತೋಚತೊಡಗಿತು. ಹಾಗಾಗಿ ಕಂಡಿದ್ದೂ ತೋಚದಂತಾಯಿತು. ಎಲ್ಲವೂ ಮಿಥ್ಯೆಯಾಯಿತು. ಅಲ್ಲೊಬ್ಬ ಯಾರೋ ಒಬ್ಬ ಕಾಣದ್ದನ್ನು ಕಂಡವ. ಆತನರಸಿ ಬಂದವರು ವನಮಾಲಿ ಮಿಶ್ರರು.

ದಾರ್ಶನಿಕ ಪ್ರಪಂಚ ಒಂದು ಹರಟೆಯ ಹಟ್ಟಿ. ಯಾರದು ಸತ್ಯ ಯಾರದು ಮಿಥ್ಯೆ ಎ0ದು ತಿಳಿಯುವುದು ನಿಜಕ್ಕೂ ಕಷ್ಟ. ಅದಕ್ಕಾಗಿಯೇ ಭಾಗ್ಯೋದಯವಾಗಬೇಕು. ಆಗಲೇ ಎಲ್ಲವೂ ಪ್ರಾರಂಭ. ವನಮಾಲಿ ಮಿಶ್ರರ ಗೀತಾನಿಗೂಢಾರ್ಥಚಂದ್ರಿಕೆಯೂ "ಕೇನಚಿತ್ ಭಾಗ್ಯೋದಯೇನ.... "

ಭಾರದ್ವಾಜ ಕುಲದ ವನಮಾಲಿಗಳದು ಶ್ರೀಕೃಷ್ಣನ ತಾಣ. ಇಂದಿನ ಉತ್ತರ ಪ್ರದೇಶದ ವೃಂದಾವನದ ಬಳಿ ಕೂಗಳತೆ ದೂರದಲ್ಲಿ ವಾಸವಾಗಿದ್ದವರು. ಮಧ್ವ ಸಿದ್ಧಾಂತದ ಹೆಚ್ಚು ಪರಿಚಯವಿಲ್ಲದ ಸ್ಥಳ. ಹರಟೆಯ ಹಟ್ಟಿ. ಅಲ್ಲೂ ಅನೇಕ ಸಿದ್ಧಾಂತಗಳನ್ನು ತಿಳಿದು,

ಕೊನೆಗೆ ಕಂಡವನ ಮಾತು ನಂಬಬೇಕೆಂಬ ಛಲದಿಂದ ಮಹಾಂತರನ್ನು ಹುಡುಕಾಡುತ್ತ ತತ್ತ್ವವಾದವನ್ನು ಅರಸಿ ಅಪ್ಪಿಕೊಂಡರು. ಮಾರುತನನ್ನು ಮಂಡಿಸುತ್ತಾ ಅಲಂಕರಿಸಿದರು. ಮರುದಂಶರಾದ ಮಧ್ವರನ್ನು, ಮತಿನಿಧಿಗಳಾದ ಜಯತೀರ್ಥರನ್ನು, ಯತಿಗುರುಗಳಾದ ವ್ಯಾಸರಾಜರನ್ನು ನಂಬಿದರು. ಮಧ್ವರನ್ನು ಒಪ್ಪಿದರು. ಮಾರುತಿಯ ಪಕ್ಷದ ಮೇಲಿನ ಪ್ರಶ್ನೆಗಳನ್ನು ಉತ್ತರಿಸ ಹೊರಟರು. ಅದನ್ನೇ ಜೀವನದ ಗುರಿಯಾಗಿಸಿ ಬದುಕಿದರು. ಅವರ ಗ್ರಂಥಗಳು ಮುಖ್ಯವಾಗಿ ಆ ದೃಷ್ಟಿಯಿಂದಲೇ ಹೊರಟವು.

ವನಮಾಲಿಗಳ ಕಾಲ , ತಂದೆ -ತಾಯಿ, ಮನೆತನ ಯಾವೂ ಸರಿಯಾಗಿ ತಿಳಿದಿಲ್ಲ. [1] ಅವರು ಎಲ್ಲೆಡೆ ತಿಳಿಸುವುದಿಷ್ಟು : "ನಾನು ವನಮಾಲಿ. ಶ್ರೀಕೃಷ್ಣ ಓಡಾಡಿದ ಬೃಂದಾವನದಿಂದ ಪೂರ್ವದಲ್ಲಿ ಹತ್ತಿರದ ಊರು ನಮ್ಮದು. ಹೆಸರು ತ್ರಿಯುಗಪುರ. ಭಾರದ್ವಾಜ ವಂಶದ ಪಂಡಿತರಿದ್ದಾರೆ. ಅವರ ಬಣ್ಣದವ ನಾನು. " ಇಷ್ಟೇ. ಎಲ್ಲ ಗ್ರಂಥಗಳ ಕೊನೆಗೂ ಅವರು ಬಿಡದೇ ತಿಳಿಸುವ ವಿಚಾರ ನಾನು ಭಾರದ್ವಾಜ ಕುಲದವ. ಇದು ಋಷಿಋಣ ಬಲ್ಲ ನಡೆ. ನಮಗೆಲ್ಲ ಮರೆತ ವಿಚಾರ. ಆ ಋಷಿಗಳೇ ನಮ್ಮ ಸಂತತಿಯ ಮೂಲ. ಜ್ಞಾನಸಂತತಿಗೂ. ಅವರ ಹೆಸರಿನಿಂದ ಕುಲ ಉಳಿದೀತು. ನಮ್ಮ ಹೆಸರನ್ನೇ ಕುಲಕ್ಕಿಡುವುದಲ್ಲ. ಮೂಲವನ್ನು ಅರಸುವವರ ಈ ನಡೆ ಇಂದು ವಿರಳ. ಅರ್ವಾಚೀನ ವಲಸೆಗಳ ಸಂಘರ್ಷದಲ್ಲಿ ತಂತಿ ಕಳಕೊಂಡವರಿಗೆ ಇದು ದಾರಿದೀವಿಗೆ.

ಉತ್ತರಭಾರತದಲ್ಲಿ ದ್ವೈತ ಸಿದ್ಧಾಂತದ ಮುಂಚೂಣಿಯ ಹೆಸರು ವನಮಾಲಿ ಮಿಶ್ರರದು. ವಾರಾಣಸಿ, ಹೋಷಿಯಾರ್ಪುರ್, ಜೋಧ್ಪುರ್, ವಡೋದರಾ, ಜಮ್ಮು ಮೊದಲಾದೆಡೆ ಹಸ್ತಪ್ರತಿ ಗ್ರಂಥಾಲಯಗಳಲ್ಲಿನ ಇವರ ಅನೇಕ ಗ್ರಂಥಗಳು ಇದಕ್ಕೆ ಸಾಕ್ಷಿ. ಗ್ರಂಥಗಳ ಮೂಲಕ ಗೋದಾವರಿಯ ಉತ್ತರದಲ್ಲಿ ದ್ವೈತ ಸಿದ್ಧಾಂತವನ್ನು ಬೆಳೆಸಿದವರಲ್ಲಿ ಪ್ರಾಯಶಃ ಇವರೇ ಮೊದಲಿಗರು. ಈ ಮಟ್ಟಕ್ಕೆ ಇಂದಿನ ತನಕವೂ ಅವರೇ ಕೊನೆ.

ವನಮಾಲಿಗಳ ಗ್ರಂಥಗಳಿಗೆ ಮಾಧ್ವ ಪರಂಪರೆಯಲ್ಲಿ ವಿಶೇಷ ಸ್ಥಾನವಿದೆ. ಬಹಳ ಮಟ್ಟಿಗೆ ಅವರು ಹುಟ್ಟುಮಾಧ್ವರಲ್ಲ. ಹುಟ್ಟಿನ ಮಾಧ್ವರಿಗಲ್ಲ ಮಧ್ವರು ಬಂದದ್ದು. ಮಾಧ್ವರಾಗಿ ಬದುಕಬೇಕೆಂದವರಿಗೆ. ಬದುಕು ಬೇಕೆಂದವರಿಗೆ. ಹುಟ್ಟು ಸಜ್ಜನರಿಗೆ. ಹುಟ್ಟನ್ನು ಮೀರಿ ಸತ್ಯಾಸತ್ಯತೆಗಳನ್ನು ವಿಮರ್ಶಿಸುವ ವಿವೇಕಿಗಳಿಗೆ. ಅಪ್ಪ ಹಾಕಿದ ಆಲದ ಮರಕ್ಕೆ

[1] ಸುಮಾರು ಕ್ರಿ. ಶ. ೧೬೫೦ ರಿಂದ ೧೭೨೦ ರ ಅವಧಿಯಲ್ಲಿದ್ದರು ಎನ್ನುತ್ತಾರೆ ಡಾ. ಬಿ. ಎನ್. ಕೆ. ಶರ್ಮಾ. ವನಮಾಲಿಗಳ ಮಾರುತಮಂಡನದ ಪ್ರತಿಯೊಂದು ಕ್ರಿ. ಶ. ೧೬೮೫ ರಲ್ಲಿ ಬರೆದದ್ದು ದೊರೆತಿದೆ. ಆದ್ದರಿಂದ ಅದಕ್ಕೂ ಮುಂಚಿನವರಿರಬೇಕು. ಪ್ರಾಯಃ ಈ ಕಾಲ ಎಂಬುದು ಶರ್ಮಾರ ವಾದ. ಬೇರಾವುದೇ ಗಟ್ಟಿಯಾದ ಪುರಾವೆಯಿಲ್ಲ. ಯುಕ್ತಿತರಂಗಿಣೀಸೌರಭ ಹಾಗೂ ವೇದಾಂತಸಿದ್ಧಾಂತರತ್ನಾವಲಿಯ ಆದಿಶ್ಲೋಕಗಳಿಂದ ತಿಳಿಯುವಂತೆ ಅವರ ಗುರುಗಳ ಹೆಸರು ವಿಷ್ಣು ಎಂಬುದಂತೂ ಖಚಿತ.

ಜೋತು ಬೀಳದವರಿಗೆ. ವನಮಾಲಿ ಮಿಶ್ರರಂಥವರಿಗೆ. ಅವರು ಉಳಿದ ಮತಗಳನ್ನು ವಿಮರ್ಶಿಸಿ ತತ್ತ್ವವಾದದ ಮಹಾಂತರನ್ನು ಮಹತ್ತ್ವವನ್ನು ಕಂಡು ಅನುಭವಿಸಿ ಅನುಭಾವಿಗಳಾಗಿ ಬೆಳೆದವರು. ಸತ್ತ್ವ ಶುದ್ಧಿಗೆ ಒತ್ತು ಕೊಟ್ಟು ಯೋಗವನ್ನು ಅಭ್ಯಾಸ ಮಾಡಿ ಬ್ರಹ್ಮಚರ್ಯದಿಂದ[1] ಬದುಕಿದವರು. ಆಚಾರ್ಯರ ಸಿದ್ಧಾಂತದ ಸೊಬಗನ್ನು ಹೊರಗಿಂದ ಮೆಚ್ಚಿ ಒಳಗೆ ಸವಿದವರು. ಒಳಗೆ ಸರಿದವರು. ಮಧ್ವಸಿದ್ಧಾಂತದ ಒಳಗೆ. ಮನದೊಳಗೆ. ಆತ್ಮನೊಳಗೆ. ಅಂತರ್ಮುಖಿ ಸಾಧನೆಗಾಗಿ. ಅಂತರ್ಯಾಮಿಯನ್ನು ಕಾಣಲಿಕ್ಕಾಗಿ.

ಕಾಣುವುದಕ್ಕೇ ಒತ್ತು ಕೊಟ್ಟ ಸಿದ್ಧಾಂತಕ್ಕೆ ಮಾರುಹೋದರು. ಕಾಣದ್ದರ ಹೆಸರಿನಲ್ಲಿ ಅನೇಕ ಅವಾಂತರಗಳನ್ನು ಕಂಡಿರಬೇಕು. ಕಾಣದ ಒಂದು ಸತ್ಯ, ಕಂಡದ್ದೆಲ್ಲಾ ಮಿಥ್ಯೆ ಅಂದರು ಕೆಲವರು. ಕೆಲವರಿಗೆ ದೇವರ ಹೆಸರಿನಲ್ಲಿ ಜಗತ್ತು ಮರೆಯಾಯಿತು. ಜ್ಞಾನದ ಹೆಸರಿನಲ್ಲಿ ಕರ್ಮ. ಉಪವಾಸದ ಹೆಸರಿನಲ್ಲಿ ಸಜ್ಜನಿಕೆ. ವೇದಾಂತದ ಹೆಸರಿನಲ್ಲಿ ಯೋಗ. ವೃತ್ತಿಯ ಹೆಸರಿನಲ್ಲಿ ಪ್ರವೃತ್ತಿ. ಒಂದರ ಹೆಸರಿನಲ್ಲಿ ಮತ್ತೊಂದು ಕಳೆದುಹೋಯ್ತು. ಒಂದಿದ್ದಕ್ಕಾಗಿಯೇ ಎಂಬ ಭ್ರಮೆಯಲ್ಲೇ ತರ್ಕ ಹುಟ್ಟಿತು. ಎಲ್ಲೆಡೆ ಎರಡನ್ನು ಒಪ್ಪಿಕೊಂಡು ಕಂಡುಕೊಂಡವ ಬೇಕಿತ್ತು. ಬರಿ ಒಪ್ಪಿದವನಲ್ಲ. ಮಧ್ವರನ್ನು ಒಪ್ಪಿದವರೆಲ್ಲಾ ಮಾಧ್ವರಲ್ಲ. ಶಂಕರರನ್ನು ಒಪ್ಪಿದವರೆಲ್ಲಾ ಸ್ಮಾರ್ತರಲ್ಲ. ರಾಮಾನುಜರನ್ನು ಒಪ್ಪಿದವರೆಲ್ಲಾ ಶ್ರೀವೈಷ್ಣವರಲ್ಲ. ಅವುಗಳ ಸತ್ತ್ವವನ್ನು ಸತ್ಯತ್ವವನ್ನು ಕಂಡವರು ಬೇಕು. ಆಮೇಲೆ ತಾವೂ ಹಾಗೇ ನಡೆಯಲು. ಸುಮ್ಮನೆ ಬದುಕಬಯಸದೇ ಬದುಕು ಬಯಸುವವನ ಬಯಕೆಯದು. ಅವರು ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ಬಗ್ಗೆ ತಳೆದ ನಿಲುವೇ ಇದಕ್ಕೆ ಗಮಕ. ತೀವ್ರ ವಿರೋಧದ ಜೊತೆಜೊತೆಗೇ ಉಳಿದದ್ದನ್ನು ಒಪ್ಪುವುದು. ಒಪ್ಪಿಯೂ ವಿರೋಧಿಸುವುದು. ಇದು ವ್ಯಾಹತಿಯಲ್ಲ. ಸತ್ಯನಿಷ್ಠುರತೆ.

ಅವರ ಮಾಧ್ವಗ್ರಂಥಗಳು ತಮ್ಮತನವನ್ನು ಮೆಚ್ಚಿ ಬರೆದ ಹೊಗಳಿಕೆಯ ಗ್ರಂಥಗಳಲ್ಲ. ತನ್ನತನವನ್ನು ತೋರುವ ಗುರುಗಳನ್ನು ನಂಬಿ ಬರೆದ ಗ್ರಂಥಗಳು. ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತರಂತೆ. ಶೋಭನ ಭಟ್ಟರಂತೆ. ಹುಟ್ಟಿನಿಂದ ದೊರೆತ ಮಾತ್ರಕ್ಕೆ ಹೊಟ್ಟು ಹಿಟ್ಟಾಗುವುದಿಲ್ಲ.

ವನಮಾಲಿ ಮಿಶ್ರರ ಗ್ರಂಥಗಳು

ವನಮಾಲಿ ಮಿಶ್ರರ ಗ್ರಂಥಗಳು ಹೆಚ್ಚಾಗಿ ಚಾಲ್ತಿಯಲ್ಲಿಲ್ಲ. ಅದರಲ್ಲೂ ದಕ್ಷಿಣ ಭಾರತದಲ್ಲಿ. ಅವರ ಪ್ರಕಾಶಿತ ಗ್ರಂಥಗಳಿಗಿಂತ ಅಪ್ರಕಾಶಿತ ಗ್ರಂಥಗಳೇ ಹೆಚ್ಚು. ವನಮಾಲಿ ಮಿಶ್ರರ

[1] ಗೀತಾಗೂಢಾರ್ಥಚಂದ್ರಿಕೆಯ ಒಂದು ಹಸ್ತಪ್ರತಿಯ ಹತ್ತನೇ ಅಧ್ಯಾಯದ ಕೊನೆಯಲ್ಲಿ ಹೀಗೆ ಬರೆದಿದೆ. ವೈಷ್ಣವಾಗಮಪಾರಂಗಮವನಮಾಲಿಬ್ರಹ್ಮಚಾರಿವಿರಚಿತಟೀಕಾಯಾಂ ದಶಮಃ

ಗ್ರಂಥಗಳ ಬಗ್ಗೆ ದೊರಕಿದ ಮಾಹಿತಿಗಳನ್ನು [2][6][3] ಇಲ್ಲಿ ಸಂಗ್ರಹಿಸಿ ಕೊಡಲು ಪ್ರಯತ್ನಿಸಲಾಗಿದೆ.[1] ಇವರ ಗ್ರಂಥಗಳ ಹಸ್ತಪ್ರತಿಗಳ ಹೆಚ್ಚಿನ ವಿವರಗಳನ್ನು ಇಂಗ್ಲಿಷ್ ಮುನ್ನುಡಿಯಲ್ಲಿ ನೋಡಬಹುದು. ಕೃತಿಗಳ ಆದ್ಯಂತ ಶ್ಲೋಕಗಳನ್ನು ಪರಿಶಿಷ್ಟದಲ್ಲೂ, ಪ್ರಕಟಣೆಯ ವಿವರಗಳನ್ನು Bibliography ಯಲ್ಲೂ ಕೊಡಲಾಗಿದೆ.

ಶ್ರುತಿಸಿದ್ಧಾಂತದೀಪಿಕಾ ಪ್ರಕಟವಾಗಿದೆ.

ಶ್ರುತಿಸಿದ್ಧಾಂತಪ್ರಕಾಶ ಪ್ರಕಟವಾಗಿದೆ. ನ್ಯಾಯಾಮೃತದ ವಿಷಯಗಳನ್ನು ಸರಳವಾಗಿ ಸಂಗ್ರಹಿಸುವ ಕೃತಿ.

ಬ್ರಹ್ಮಸೂತ್ರಸಿದ್ಧಾಂತಮುಕ್ತಾವಲಿ ಪ್ರಕಟವಾಗಿದೆ. ಮಧ್ವಸಿದ್ಧಾಂತದ ಪ್ರಕಾರ ಬ್ರಹ್ಮಸೂತ್ರಗಳ ಅಧಿಕರಣ ಸಂಗ್ರಹ, ಸೂತ್ರಾರ್ಥ ಮೊದಲಾದವುಗಳನ್ನು ವಿಸ್ತಾರವಾಗಿ ಸಂಗ್ರಹಿಸುವ ಕೃತಿ.

ಮಧ್ವಮುಖಾಲಂಕಾರ(ಮಾರುತಮಂಡನ) ಪ್ರಕಟವಾಗಿದೆ. ಅಪ್ಪಯ್ಯದೀಕ್ಷಿತರು ಬರೆದ ಮಧ್ವಮತವಿಧ್ವಂಸನ ಹಾಗೂ ಮಧ್ವಮತಮುಖಮರ್ದನ ಗಳಿಗೆ ಉತ್ತರರೂಪವಾಗಿ ಬಂದ ನಾಲ್ಕು ವೈಷ್ಣವ ಕೃತಿಗಳಲ್ಲಿ ಒಂದು.[2]

ಶ್ರುತಿಸಿದ್ಧಾಂತಸಂಗ್ರಹ ಪ್ರಕಟವಾಗಿದೆ. ಇದಕ್ಕೇ ಇನ್ನೊಂದು ಹೆಸರು ವೇದಾಂತಸಿದ್ಧಾಂತ ಸಂಗ್ರಹ .

ನ್ಯಾಯಾಮೃತಸೌಗಂಧ್ಯ ಮೊದಲ ಸ್ವಲ್ಪ ಭಾಗ ಪ್ರಕಟವಾಗಿದೆ. ನ್ಯಾಯಾಮೃತವ್ಯಾಖ್ಯಾನದ ನೆಪದಲ್ಲಿ ಅದ್ವೈತಸಿದ್ಧಿ ಹಾಗೂ ಅದರ ವ್ಯಾಖ್ಯಾನಗಳನ್ನು ಖಂಡಿಸುವ ಉದ್ಗ್ರಂಥ.

ಚಂಡಮಾರುತ ಅದ್ವೈತ ಮತದ ವಿಮರ್ಶೆಗಾಗಿ ಹೊರಟ ಗ್ರಂಥ. ಮಾಯಾವಾದವೆಂಬ ಮರವನ್ನು ಬೀಳಿಸಲು ಬೀಸಿದ ಚಂಡಮಾರುತ.
"ಮಾಯಾವಾದಾಂಘ್ರಿಪಚ್ಛೇದೀ ಧ್ವಾಂತನುತ್ ಚಂಡಮಾರುತಃ "

ಯುಕ್ತಿತರಂಗಿಣೀಸೌರಭ ನ್ಯಾಯಾಮೃತದ ಪರಂಪರೆಯಲ್ಲಿನ ಮತ್ತೊಂದು ಗ್ರಂಥ.

ಪ್ರಮಾಣಸಂಗ್ರಹ ಮಾರುತ ಮತದ ಪ್ರಮಾಣಗಳ ಪರಿಕಲ್ಪನೆಯ ಸಂಗ್ರಹ ಕೃತಿ.

---

[1] ಇಲ್ಲಿನ ಲೋಪದೋಷಗಳನ್ನು ಹಿರಿಯರು ತಿಳಿಸಿ, ವಾಙ್ಮಯವನ್ನು ದಾಖಲಿಸಿಡುವಲ್ಲಿ ಸಹಕರಿಸಬೇಕು ಎಂದು ಸವಿನಯವಾಗಿ ವಿನಂತಿಸಿಕೊಳ್ಳುತ್ತೇನೆ. [2] ವಿಜಯೀಂದ್ರ ತೀರ್ಥರ ವಿಷ್ಣುತತ್ತ್ವವೈಭವ, ಸತ್ಯನಾಥತೀರ್ಥರ ಅಭಿನವಗದಾ ಹಾಗೂ ವೈಶ್ವನಾಥಿ ನಾರಾಯಣಪಂಡಿತಾಚಾರ್ಯರ ಅದ್ವೈತಕಾಲಾನಲ ಉಳಿದ ಮೂರು ಕೃತಿಗಳು.

ವೇದಾಂತರತ್ನಾವಲಿ ಹೆಚ್ಚಿನ ಮಾಹಿತಿಗಳು ತಿಳಿದಿಲ್ಲ.

ವೇದಾಂತಸಿದ್ಧಾಂತರತ್ನಾವಲಿ ಹೆಚ್ಚಿನ ಮಾಹಿತಿಗಳು ತಿಳಿದಿಲ್ಲ.

ಗೀತಾನಿಗೂಢಾರ್ಥಚಂದ್ರಿಕಾ ಪ್ರಸ್ತುತ ಕೃತಿ. ವಿವರಗಳನ್ನು ಮುಂದೆ ಕೊಡಲಾಗುವುದು.

ವಿಷ್ಣುತತ್ತ್ವಪ್ರಕಾಶ ಶಿವನ ಸರ್ವೋತ್ತಮತ್ವವನ್ನು ವಿಮರ್ಶಿಸಿ ವಿಷ್ಣು ಸರ್ವೋತ್ತಮತ್ವವನ್ನು ಬಗೆ ಬಗೆಯಿಂದ ಸಾಧಿಸುವ ಅಪೂರ್ವ ಕೃತಿ. ಸಾಧಾರಣ ಅಸಾಧಾರಣ ಪ್ರಸ್ತಾವಗಳ ವಿವೇಚನೆ ತುಂಬಾ ವಿಸ್ತಾರವಾಗಿ ಕಂಡುಬರುತ್ತದೆ.

ವಿಷ್ಣುತತ್ತ್ವಪ್ರಸಿದ್ಧಿ ವಿಷ್ಣುತತ್ತ್ವಪ್ರಕಾಶದ ವಿಷಯಗಳದ್ದೇ ಸಂಗ್ರಹರೂಪ. ಹಸ್ತಪ್ರತಿ ಮೈಸೂರಿನ ಪ್ರಾಚ್ಯ ವಿದ್ಯಾಸಂಸ್ಥೆಯಲ್ಲಿದೆ. ಅಪೂರ್ಣವಾಗಿದೆ. ಈ ಗ್ರಂಥವನ್ನು ವಿಷ್ಣುತತ್ತ್ವಪ್ರಕಾಶ ಎಂದು ತಪ್ಪಾಗಿ ಗುರುತಿಸಲಾಗಿದೆ.

ವೇದಾಂತಸಿದ್ಧಾಂತಮುಕ್ತಾವಲಿ ಹೆಚ್ಚಿನ ಮಾಹಿತಿ ತಿಳಿದಿಲ್ಲ.

ಭಾಗವತವ್ಯಾಖ್ಯಾ ಅಸಮಗ್ರ .

ಹೀಗೆ ಮಾಧ್ವ ವೇದಾಂತದ ಹಲವು ಮುಖಗಳಲ್ಲಿ ಗ್ರಂಥರಚನೆಗೈದಿದ್ದಾರೆ ವನಮಾಲಿ ಮಿಶ್ರರು. ವೇದಾಂತ ಪರಂಪರೆಗೆ ಇವರು ನೀಡಿರುವ ಕೊಡುಗೆ ಅಮೂಲ್ಯ.

ಗೀತಾನಿಗೂಢಾರ್ಥಚಂದ್ರಿಕಾ

ಭಗವದ್ಗೀತೆಗೆ ಇವರು ಬರೆದಿರುವ ಟೀಕಾ ಇದುವರೆಗೂ ಪ್ರಕಟವಾಗಿರಲಿಲ್ಲ ; ಡಾ. ಬಿ.ಎನ್.ಕೆ. ಶರ್ಮಾರವರು ಪೂನಾದಲ್ಲಿರುವ ಇದರ ಹಸ್ತಪ್ರತಿಯನ್ನು ತಮ್ಮ ಗ್ರಂಥದಲ್ಲಿ ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ[1]. ಪ್ರಸ್ತುತ ಸಂಪಾದನೆಯಲ್ಲಿ ಬಳಸಲಾಗಿರುವುದು ಮೂರು ಹಸ್ತಪ್ರತಿಗಳ ನಕಲು ಪ್ರತಿಗಳು. ಆ ಪ್ರತಿಗಳು ಮತ್ತು ಶೋಧನೆಯ ಬಗ್ಗೆ ಮುಂದೆ ನೋಡೋಣ.

[1] ಇತ್ತೀಚಿಗೆ ಮದ್ರಾಸಿನಿಂದ ಪ್ರಕಟವಾದ New catalogus Catalogorum ನ ಇತ್ತೀಚಿನ ಸಂಪುಟದಲ್ಲಿ ಪುಣೆ ಹಾಗೂ ಜಮ್ಮುವಿನ ಗ್ರಂಥಾಲಯದಲ್ಲಿನ ಈ ಕೃತಿಯ ಪ್ರತಿಗಳನ್ನು ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ.

ಗ್ರಂಥರಚನೆಯ ಹಿನ್ನೆಲೆ

ಭಗವದ್ಗೀತೆಗೆ ನೂರಾರು ಸಂಸ್ಕೃತ ವ್ಯಾಖ್ಯಾನಗಳಿವೆ. ಮಧ್ವರಿಗೆ ಮುಂಚೆಯೂ. ಅವರ ನಂತರವೂ. ಶಂಕರರಿಗೆ ಮುಂಚೆಯೂ. ಅವರ ನಂತರವೂ. ಶಂಕರರ ಹಿಂದಿನ ವ್ಯಾಖ್ಯಾನಗಳ ಬಗ್ಗೆ ಹೆಚ್ಚಿನ ಮಾಹಿತಿ ಇಲ್ಲ.[1]. ಈಗಲೂ ವಿಶೇಷವಾಗಿ ಪ್ರಸಿದ್ಧ ಭಾಷ್ಯಗಳು ಶಂಕರರದ್ದು, ರಾಮಾನುಜರದ್ದು ಮತ್ತು ಮಧ್ವರದ್ದು. ಅವುಗಳ ಮೂಲದಿಂದ ದೊಡ್ಡ ವ್ಯಾಖ್ಯಾನ ಪರಂಪರೆಗಳು ಬೆಳೆದವು. ಅವರವರ ಸಿದ್ಧಾಂತದ ನೇರಕ್ಕೆ. ಉಳಿದವರ ವಿಮರ್ಶೆಯ ಜೊತೆಗೆ. ವಲ್ಲಭರ ಶುದ್ಧಾದ್ವೈತ, ನಿಂಬಾರ್ಕ ಮತದ ಕೇಶವ ಕಾಶ್ಮೀರಿಗಳ ವ್ಯಾಖ್ಯಾನಗಳನ್ನು ಹೊರತುಪಡಿಸಿದರೆ ಪ್ರಾಯಶಃ ಎಲ್ಲ ವ್ಯಾಖ್ಯಾನಗಳೂ ಹಿಂದಿನ ಮೂವರ ನೆರಳಲ್ಲೇ ಬಂದದ್ದು. ಈ ಮಿಶ್ರ ಪರಂಪರೆ ಬೆಳೆಯುತ್ತಾ ಸುಮಾರು ಮೂರ್ನಾಲ್ಕು ಶತಕಗಳು ಕಳೆದ ಮೇಲೆ ......

ವಿಜಯನಗರದಲ್ಲೊಬ್ಬರು ಅಸಾಧಾರಣ ವಿಮರ್ಶಕರು. ಹೆಸರು ವ್ಯಾಸತೀರ್ಥ. ವಿಜಯನಗರದ ರಾಜಗುರುಗಳು. ಅದ್ವೈತ ಮತ್ತು ವಿಶಿಷ್ಟಾದ್ವೈತ ಚಿಂತನೆಗಳನ್ನು ಬುಡ ಮೇಲು ಮಾಡುವ ಗ್ರಂಥಗಳನ್ನು ಬರೆದರು. ಕರ್ಣಾಟಕದ ವ್ಯಾಸತೀರ್ಥರ ನ್ಯಾಯಾಮೃತಕ್ಕೆ ಬಂಗಾಳದಿಂದ ಉತ್ತರ ಬಂತು. ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ಅದ್ವೈತಸಿದ್ಧಿ. ದ್ವೈತ ಮತಕ್ಕೆ ಸೆಟೆದು ನಿಂತು ಉತ್ತರ ಕೊಟ್ಟೆನೆಂದು ನಂಬಿ ಬರೆದರು. ಆಮೇಲೆ ಗೀತೆಗೊಂದು ವ್ಯಾಖ್ಯಾನ ಬರೆದರು 'ಗೂಢಾರ್ಥದೀಪಿಕಾ '. ಅವರು ಅದ್ವೈತಸಿದ್ಧಿಯಲ್ಲಿ ನಡೆದಂತೆ ಇಲ್ಲೂ ಸಾಂಪ್ರದಾಯಿಕ ಅದ್ವೈತ ಪರಂಪರೆಗೆ ಸ್ವಲ್ಪ ದೂರ ನಡೆದರು. ಆದರೆ ಮುಖ್ಯವಾಗಿ ದ್ವೈತ ಪರಂಪರೆಯಿಂದ ವಿರುದ್ಧವಾಗಿ ನಡೆದರು.

ಅದ್ವೈತ ಸಿದ್ಧಿಗೆ ಅನೇಕರ ಉತ್ತರಗಳು. ಅವಕ್ಕೆ ಮತ್ತೆ ಪ್ರತ್ಯುತ್ತರಗಳು. ಅದಕ್ಕೊಂದು ಮತ್ತೊಂದು. ಈ ಪ್ರಯತ್ನ ಒಂದು ಹೊಸ ಆಯಾಮವನ್ನೇ ತೆರೆಯಿತು.ದ್ವೈತ ಮತ್ತು ಅದ್ವೈತ ಪರಂಪರೆಗಳಿಗೆ ನೇರ ಕಾಳಗ ಆರಂಭವಾಯಿತು. ಬುದ್ಧಿಮತ್ತೆಯ ಹೋರಾಟ. ನಂಬಿಕೆಗಳ ವಿಮರ್ಶೆ. ಶ್ರುತ್ಯರ್ಥಗಳ ವಿಚಾರ. ಬಾಧ್ಯ ಬಾಧಕಗಳ ವಾದ. ದ್ವೈತ ಪರಂಪರೆಯನ್ನು ಪ್ರತಿನಿಧಿಸಿ ಈ ರಂಗದಲ್ಲಿ ಹೋರಾಡಿದವರಲ್ಲಿ ವನಮಾಲಿ ಮಿಶ್ರರೂ ಒಬ್ಬರು. ನ್ಯಾಯಾಮೃತ ಸೌಗಂಧ್ಯ ಹಾಗೂ ಯುಕ್ತಿತರಂಗಿಣೀಸೌರಭಗಳನ್ನು ರಚಿಸಿದರು. [2] ಹಾಗೆಯೇ ಮಧುಸೂದನ

[1] 'ಅಶೋಚ್ಯಾನನ್ವಶೋಚಸ್ತ್ವಂ ' ಶ್ಲೋಕದ ಶಾಂಕರಭಾಷ್ಯದಲ್ಲಿ, 'ಅನಾದಿಮತ್ ಪರಂ ಬ್ರಹ್ಮ ' ಶ್ಲೋಕದ ಭಾಷ್ಯದಲ್ಲಿ ಹಿಂದಿನ ವ್ಯಾಖ್ಯಾನದ ಉಲ್ಲೇಖವಿದೆ. ವೃತ್ತಿಕಾರರದ್ದು ಎನ್ನುತ್ತಾರೆ ಆನಂದಗಿರಿಗಳು. ವಾಮನನ ವಾರ್ತಿಕಗಳನ್ನೂ ಕೆಲವರು ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ. ಜಯಾದಿತ್ಯದ ಸಂಗಡದ ವಾಮನನೋ ? [2] ಇದೇ ತೆರನಾದ ರಂಗದಲ್ಲಿ ಅಪ್ಪಯ್ಯದೀಕ್ಷಿತರನ್ನು ಎದುರಿಸಿ ಮಧ್ವಮುಖಾಲಂಕಾರ, ವಿಷ್ಣುತತ್ತ್ವಪ್ರಕಾಶ, ವಿಷ್ಣುತತ್ತ್ವಪ್ರಸಿದ್ಧಿ ಮೊದಲಾದ ಅಪೂರ್ವ ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿದರು.

ಸರಸ್ವತಿಗಳ ಗೂಢಾರ್ಥದೀಪಿಕೆಯನ್ನೂ ಗಮನಿಸಿರಬೇಕು. ಅದನ್ನು ವಿಮರ್ಶಿಸಲು ಗೀತೆಗೊಂದು ವ್ಯಾಖ್ಯಾನ ಕೈಗೆತ್ತಿಕೊಂಡರು. ಅದೇ ಈಗ ನಿಮ್ಮ ಕೈಯಲ್ಲಿರುವ [1] 'ಗೂಢಾರ್ಥಚಂದ್ರಿಕಾ'

ಮುಂದೆ ಹೋಗುವುದಕ್ಕೂ ಮುಂಚೆ ಒಂದು ಮಾತು. ಇದು ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ಖಂಡನೆಯಲ್ಲ. ವಿಮರ್ಶೆ. ವಿಮರ್ಶೆ ಬೇರೆ ; ನಿಂದನೆ ಬೇರೆ; ಜಗಳ ಬೇರೆ; ಖಂಡನೆ ಬೇರೆ. ಖಂಡನೆಗಾಗಿಯೇ ಸೊಂಟ ಕಟ್ಟಿ ನಿಂತವರಾದರೂ ವಿಮರ್ಶೆಯ ದಾರಿ ತಪ್ಪಿಲ್ಲ. ಹಳಿ ಬಿಟ್ಟು ಮಾತಾಡಿಲ್ಲ. ವಿಮರ್ಶೆಯ ಹೆಸರಲ್ಲಿ ಕೆಸರೆರಚುವ ವಿಮರ್ಶಕರಿಗೆ ಇವರದೊಂದು ಒಳಪೆಟ್ಟು. ಪೆಟ್ಟಾಗಿದ್ದೂ ತಿಳಿಯದವರದ್ದು ಸೈಕೋಸಿಸ್.

ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ವಿಮರ್ಶೆ

ಇದೊಂದು ಬಲು ಅಪರೂಪದ ಶೈಲಿ. ಹೆಚ್ಚಾಗಿ ಕಂಡಿಲ್ಲ. ವನಮಾಲಿಗಳು ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳನ್ನು ವಿಮರ್ಶಿಸುವ ಶೈಲಿ ಅನುಕರಣೀಯ. ಅವರ ಒಟ್ಟು ನಡೆ ಹೀಗೆ : ಎಲ್ಲೂ ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ಹೆಸರು ಉಲ್ಲೇಖಿಸಿಲ್ಲ. ಈ ಕೃತಿಯನ್ನು ಅವರ ವಿಮರ್ಶೆಗಾಗಿಯೆಂದು ಹೇಳಿಯೂ ಇಲ್ಲ. ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ವ್ಯಾಖ್ಯಾನವನ್ನೇ ಅಕ್ಷರಶಃ ತಮ್ಮ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಅಳವಡಿಸಿಕೊಂಡಿದ್ದಾರೆ. ಹೆಚ್ಚು ವಿಸ್ತಾರವಾದ ಭಾಗಗಳನ್ನು ಕೈಬಿಟ್ಟಿದ್ದಾರೆ. ಅಲ್ಲಲ್ಲಿ ಚೊಕ್ಕವಾಗಿ ತಾವೇ ತಿದ್ದುತ್ತಾರೆ. ಚಿಕ್ಕದಾಗಿಯೂ. ಅಂದರೆ ಮಧುಸೂದನರ ವ್ಯಾಖ್ಯಾನದ ದ್ವೈತೀಕರಣ. ತಿದ್ದಲೂ ಕಷ್ಟವಾದಾಗ ತಾವೇ ಹೊಸತಾಗಿ ಬರೆಯುತ್ತಾರೆ. ಕೆಲವೊಮ್ಮೆ ಮಧುಸೂದನರ ವ್ಯಾಖ್ಯಾನವನ್ನು ಉಲ್ಲೇಖಿಸಿ ಅದನ್ನು ಖಂಡಿಸಿದ್ದಾರೆ. ಒಟ್ಟಾರೆ ಸುಮಾರು ಅರ್ಧಕ್ಕೂ ಮೇಲ್ಪಟ್ಟು ಮಧುಸೂದನರ ವ್ಯಾಖ್ಯೆಯನ್ನು ಸಮ್ಮತಿಯಿಂದ ಸ್ವೀಕರಿಸಿದ್ದಾರೆ[2]. ಕೆಲವೆಡೆ ತಿದ್ದಿದ್ದಾರೆ. ಕೆಲವೆಡೆ ಖಂಡಿಸಿದ್ದಾರೆ. ಕೆಲವೆಡೆ ಹೊಸತಾಗಿ ಬರೆದಿದ್ದಾರೆ. ಹಾಗಾಗಿ ಇದೊಂದು ನೀರಿನಿಂದ ಹಾಲನ್ನು ಬೇರ್ಪಡಿಸುವ ಹಂಸದ ಜಾಣ್ಮೆ.

ಅನೇಕ ವ್ಯಾಖ್ಯಾನಗಳಿಗೆ ಹಿಂದಿನ ವ್ಯಾಖ್ಯಾನಗಳ ಹಿನ್ನೆಲೆಯನ್ನು ಗುರುತಿಸಬಹುದು. ಆದರೆ ಈ ಮಟ್ಟದ್ದು ಅಪರೂಪ. ಅವರ ಅಭಿಪ್ರಾಯವನ್ನೇ ತಾವೂ ಹೇಳುವುದಲ್ಲ. ಅದೇ ಶಬ್ದಗಳಿಂದ ಅನುಕರಿಸುವುದು. ಅದೂ ಬಹುವಾಗಿ ಒಬ್ಬರನ್ನೇ. ಅದರಲ್ಲೂ ತಮ್ಮ

[1] ಗೀತಾಗೂಢಾರ್ಥಚಂದ್ರಿಕಾ ಹಾಗೂ ಗೀತಾನಿಗೂಢಾರ್ಥಚಂದ್ರಿಕಾ ಎನ್ನುವ ಎರಡು ಹೆಸರುಗಳು ಹಸ್ತಪ್ರತಿಗಳಲ್ಲಿವೆ.

[2] ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ವ್ಯಾಖ್ಯಾನದ ಮುದ್ರಿತ ಪಾಠದಲ್ಲೂ ಕೆಲವೆಡೆ ಇನ್ನೂ ಶುದ್ಧ ಪಾಠ ವನಮಾಲಿಗಳ ವ್ಯಾಖ್ಯಾನದಿಂದ ದೊರೆಯುತ್ತದೆ . ೧೧.೩೩ರಲ್ಲಿ ಅಥ ತತಶ್ಚ ಎಂಬುದು ಅಯತ್ನತಶ್ಚ ಅಂದಾಗಬೇಕು. ಹಾಗೇ ೧೬.೧೮ ರಲ್ಲಿ ನೃಪಾದ್ಯಾ ಜ್ಞಾನ(ಲಂಘನ)ವರಣಮೇವ ಹಿ ಎಂಬುದು ನೃಪಾಜ್ಞಾಲಂಘನ ಮೇವ ಹಿ ಎಂದಾಗಬೇಕು.

ಪಕ್ಷದ ಎದುರು ನಿಂತವರನ್ನು. ನಿಜವನ್ನು ಹುಡುಕುತ್ತಾ ಹೊರಟವಗೆ ಎದುರಾಳಿಯ ನಿಜವೂ ನಿಜವೇ. ತನ್ನ ಹುಟ್ಟಿನ ಸುಳ್ಳೂ ಸುಳ್ಳೇ.

ಮಧುಸೂದನರ ವ್ಯಾಖ್ಯಾನದಿಂದ ಪ್ರಭಾವಿತವಾದ ಶ್ಲೋಕಗಳ ಸಂಖ್ಯೆ ಐನೂರರ ಆಸುಪಾಸಿನದ್ದು. ಹಾಗಾಲ್ಲದ್ದು ಕೆಲವೇ . ಇವುಗಳು ಪ್ರಾಯಶಃ ಮಧ್ವರ ಹಾಗೂ ಮಾಧ್ವರ ವ್ಯಾಖ್ಯಾನಗಳಿಂದ ಪ್ರಭಾವಿತವಾದವು. ಕೆಲವು ವಿಶೇಷಗಳ ಜೊತೆಗೆ.

ವ್ಯಾಖ್ಯಾನದ ವಿಶೇಷಾಂಶಗಳು

ಮೊದಲಿಗರ ಅಭಿಪ್ರಾಯ

ಮೊದಲೊಂದು ವ್ಯಾಖ್ಯಾನವನ್ನು ನೀಡಿ ನಂತರ ಹಿರಿಯರು ಹೀಗೆ ವ್ಯಾಖ್ಯಾನಿಸುತ್ತಾರೆ "ಮಹಾಂತಸ್ತು ಏವಂ ವ್ಯಾಚಕ್ಷತೇ " ಎಂಬುದಾಗಿ ಮಧ್ವಾಚಾರ್ಯರ ವ್ಯಾಖ್ಯಾನವನ್ನು ಉಲ್ಲೇಖಿಸುತ್ತಾರೆ ೧೨.೧, ೧೪.೨೭, ೧೫.೧೧

ಕೆಲವೆಡೆ ಜಯತೀರ್ಥರ ಗ್ರಂಥಗಳನ್ನು ಅಕ್ಷರಶಃ ಅನುಸರಿಸಿರುವುದೂ ಕಾಣಸಿಗುತ್ತದೆ. ಉದಾಹರಣೆಗೆ ೧೮.೧೮ ನೋಡಿ.

ರಾಮಾನುಜ ಭಾಷ್ಯದ ಪ್ರಭಾವ ಸ್ಪಷ್ಟವಾಗಿ [1] ಅಲ್ಲಲ್ಲಿ ಕಾಣುತ್ತದೆ. ೨.೧೪, ೨.೧೬, ೮.೩, ೧೦.೧೩, ೧೫.೧ , ೧೫.೧೬

ಎಂಟನೇ ಅಧ್ಯಾಯದ ಮೂರನೇ ಶ್ಲೋಕದಲ್ಲಿ ಒಂದು ವಿಶೇಷವಿದೆ. ಅಲ್ಲಿ ಮೂರು ಅರ್ಥಗಳನ್ನು ವನಮಾಲಿಗಳು ತಿಳಿಸಿದ್ದಾರೆ. ಮೊದಲನೆಯದು ಮಧ್ವಭಾಷ್ಯದ್ದು. ಎರಡನೆಯದು ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳದ್ದು. ಮೂರನೆಯದು ರಾಮಾನುಜಭಾಷ್ಯದ್ದು.

ಕೆಲವೆಡೆ ಆಚಾರ್ಯರ ಅರ್ಥದ ಜೊತೆಗೆ ಪೂರ್ತಿ ಹೊಸತನ್ನೂ ಸೇರಿಸಿದ್ದಾರೆ - ೧೧. ೫೦ ರ ಸ್ವಕಂ ಎಂಬಲ್ಲಿ ನೋಡಿ.

---

[1] ೮.೨೧ ರಲ್ಲಿ ವಲ್ಲಭ ಭಾಷ್ಯದ ಪ್ರಭಾವ , ಹಾಗೂ ೧೮.೧೦ ರಲ್ಲಿ ನಿಂಬಾರ್ಕ ಮತದ ಕೇಶವ ಕಾಶ್ಮೀರಿ ಭಟ್ಟಾಚಾರ್ಯರ ಪ್ರಭಾವದಂತೆ ತೋರುತ್ತದೆ. ಆದರೆ ತೀರ್ಮಾನಿಸುವುದು ಕಷ್ಟ .

ವಿಚಾರಣೀಯ

ಕೆಲವೆಡೆ ಶ್ರೀಮದಾಚಾರ್ಯರು ನಿರಾಕರಿಸಿರುವ ಅರ್ಥವನ್ನೂ ಉಳಿಸಿಕೊಂಡಿದ್ದಾರೆ. ೮.೧೮ ರಲ್ಲಿ ವಿವಕ್ಷಿತವಾದದ್ದು ದ್ವಿಪರಾರ್ಧಪ್ರಳಯವೇ ಹೊರತು ಮತ್ತೊಂದಲ್ಲ ಎಂಬುದು ಆಚಾರ್ಯರ ಮತ. ದಿನಪ್ರಳಯ ಎಂದು ಮಧುಸೂದನರದ್ದು. ವನಮಾಲಿಗಳು ಎರಡನ್ನೂ ತಮ್ಮ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ.

ಕೆಲವೆಡೆ ನಿರಾಕರಿಸಿರುವ ಅರ್ಥವನ್ನೇ ಉಳಿಸಿಕೊಂಡಿದ್ದಾರೆ. ೯.೩೨ ಮತ್ತು ೩೩ ರಲ್ಲಿ ಸ್ವಾಭಾವಿಕ ಪಾಪಯೋನಿತ್ವವನ್ನು ಆಚಾರ್ಯರು ಸ್ತ್ರೀ ಶೂದ್ರರಲ್ಲಿ ಒಪ್ಪುವುದಿಲ್ಲ. ಆದರೆ ವನಮಾಲಿಗಳು ಒಪ್ಪಿದ್ದಾರೆ, ಇತರರಂತೆ. ೩.೩೭ ರಲ್ಲಿ ಕ್ರೋಧವು ಕಾಮದ ಪರಿಣಾಮ ಎಂದು ಆಚಾರ್ಯರು ಒಪ್ಪದ್ದನ್ನು ವನಮಾಲಿಗಳು ಒಪ್ಪಿದ್ದಾರೆ.

೧೦.೬ ರಲ್ಲಿ ಸಪ್ತ ಮಹರ್ಷಿಗಳೆಂದರೆ ಭೃಗ್ವಾದಿಗಳಲ್ಲ ಮರೀಚ್ಯಾದಿಗಳು ಎಂಬುದು ಆಚಾರ್ಯರ ಮತ. ಹಾಗೆಯೇ ನಾಲ್ವರು ಮನುಗಳು ಸಾವರ್ಣರಲ್ಲ ಸ್ವಾಯಂಭುವಾದಿಗಳು. ಆದರೆ ವನಮಾಲಿಗಳು ಭೃಗ್ವಾದಿಗಳನ್ನು ಮತ್ತು ಸಾವರ್ಣರನ್ನೇ ಗ್ರಹಿಸಿದ್ದಾರೆ.

೧೮.೩, ೪, ೫ ರಲ್ಲಿ ಎರಡೂ ಪಕ್ಷಗಳು ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಅಭಿಮತ ಎಂದು ಆಚಾರ್ಯರ ಮತ. ಆದರೆ ವನಮಾಲಿಗಳು ಅವುಗಳಲ್ಲಿ ಒಂದನ್ನು ಪೂರ್ವಪಕ್ಷವಾಗಿ ಮತ್ತೊಂದನ್ನು ಸಿದ್ಧಾಂತವನ್ನಾಗಿ ಮಧುಸೂದನರ ವ್ಯಾಖ್ಯಾನವನ್ನೇ ಅನುಕರಿಸಿದ್ದಾರೆ.

೧೮.೧೪ ರಲ್ಲಿ ಚೇಷ್ಟಾಪದದಿಂದ ಪ್ರಾಣಾಪಾನಾದಿಗಳಲ್ಲ, ಹಸ್ತಾದಿಕ್ರಿಯೆಗಳು ಎನ್ನುತ್ತಾರೆ ಮಧ್ವರು. ವನಮಾಲಿಗಳು ಶಂಕರ-ಮಧುಸೂದನರನ್ನು ಅನುಸರಿಸಿ ಪ್ರಾಣಾಪಾನಾದಿಗಳನ್ನೇ ಗ್ರಹಿಸಿದ್ದಾರೆ.

ಹೀಗಾಗಿ ವನಮಾಲಿಗಳು ಮಧ್ವರಿಂದ ದೂರದಲ್ಲಿ ವ್ಯಾಖ್ಯಾನಿಸಿದ್ದಾರೆಯೇ ? ಸರ್ವಜ್ಞರಾದ ವಾಯುವಿನ ಅವತಾರ ಎಂದು ಮಧ್ವಮುಖಾಲಂಕಾರದಲ್ಲಿ ಪ್ರತಿಪಾದಿಸಿದ ವನಮಾಲಿಗಳು ಗೀತೆಯ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಮುಕ್ತಮನಸ್ಸಿನಿಂದ ಆಚಾರ್ಯರನ್ನೂ ಮಹಾಂತರು ಎಂದಿದ್ದಾರಷ್ಟೆ ಎನ್ನಬಹುದೇ ? ಇದು ಹಿಂದು ಮುಂದು ಕೂಡುವುದಿಲ್ಲ. ಇನ್ನು ನಮ್ಮ ಆಧುನಿಕರಂತೆ ಒಂದು ಚಿಕ್ಕ ವಯಸ್ಸಿನ ರಚನೆ ಮತ್ತೊಂದು ವಯಸ್ಸಾದ ಮೇಲೆ ಎಂದು ಕಲ್ಪಿಸಬಹುದೇ ? ಹಾಗೂ ಕಷ್ಟ. ನಾಲ್ಕನೆ ಅಧ್ಯಾಯದ ಗೀತೆಯ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಅದ್ವೈತ ಸಿದ್ಧಿಯ ಖಂಡನೆಯಿದೆ. ಎರಡನೇ ಅಧ್ಯಾಯದಲ್ಲಿ ನ್ಯಾಯಾಮೃತ ಸಂಗ್ರಹರೂಪವಾದ ಶ್ರುತಿಸಿದ್ಧಾಂತಪ್ರಕಾಶದ ವಾಕ್ಯಗಳಿವೆ. ಮಧ್ವಮುಖಾಲಂಕಾರ, ವಿಷ್ಣುತತ್ತ್ವಪ್ರಕಾಶ ಮೊದಲಾದೆಡೆ ಉಲ್ಲೇಖಿಸಿದ

ಮೂಲಗ್ರಂಥದ ವಾಕ್ಯಗಳೇ ಹೇರಳವಾಗಿ ಇಲ್ಲೂ ಇವೆ. ಎಲ್ಲಾ ಗ್ರಂಥಗಳ ಆರಂಭದಲ್ಲೂ ಮಾರುತನೇ ಆದ ಮಧ್ವರನ್ನೇ ಗುರುಗಳೆಂದು ನಮಿಸಿದ್ದಾರೆ. ಆದ್ದರಿಂದ ಆ ರೀತಿಯ ಬೆಳವಣಿಗೆ ಗ್ರಂಥಗಳಲ್ಲಂತೂ ಕಾಣುವುದಿಲ್ಲ. ಇನ್ನು ಪ್ರತಿಗೈಯ್ಯುವಾಗ ಕೆಲವು ಲಿಪಿಕಾರರು ಸೇರಿಸಿದ್ದೋ ? ಇರಬಹುದು. ಅಥವಾ ಬುದ್ಧಿಯ ಒಳ ಹೋರಾಟಗಳಿಂದ ಗುರುಗಳನ್ನು ಒಪ್ಪಿದವರಾದ್ದರಿಂದ ಆ ಹುಡುಕಾಟ ಶಿಷ್ಯರಲ್ಲೂ ಬರಲಿ ಎಂಬ ಕಾಳಜಿಯೇ ? ಹಿರಿಯರು ತಿಳಿಸಬೇಕು.

ಗೀತೆಯಿಂದ ಸಿದ್ಧಾಂತ

ಅಪ್ರಸಿದ್ಧ ಪ್ರಮಾಣಗಳನ್ನು ಪ್ರಾಯಶಃ ಉಲ್ಲೇಖಿಸುವುದಿಲ್ಲ. ಎಲ್ಲೋ ಅಪರೂಪಕ್ಕೆ ಬಿಟ್ಟರೆ (೯.೧, ೧೧.೪೬, ೧೮.೧೪). ಸಾಮಾನ್ಯವಾಗಿ ಗೀತೆಯ ವಾಕ್ಯಗಳಿಂದಲೇ ಅಥವಾ ಪ್ರಸಿದ್ಧ ಶ್ರುತಿ ಸ್ಮೃತಿಗಳನ್ನೇ ಉಲ್ಲೇಖಿಸಲಾಗಿದೆ. ಗೀತೆಯಿಂದಲೇ ಸಿದ್ಧಾಂತವನ್ನು ಸಮರ್ಥಿಸುವ ಉದಾಹರಣೆಗಳು :

೨.೫೧ ರಲ್ಲಿ 'ಗಚ್ಛಂತೀತಿ ಬಹುವಚನೇನ ಮುಕ್ತೌ ಭೇದಃ, ಗಚ್ಛತಿನಾ ಲೋಕವಿಶೇಷಂ ಪ್ರತಿ ಗಮನಂ ಚೇತಿ ಸಿದ್ಧಮ್ '
೫.೧೬ ರಲ್ಲಿ 'ತೇಷಾಮಿತ್ಯನೇನ ಜೀವಾನಾಂ ಮೋಕ್ಷೇ ಬಹುತ್ವಂ ಸಿದ್ಧಮ್ '
೫.೧೭ ರಲ್ಲಿ 'ಗಚ್ಛಂತೀತ್ಯನೇನ ಜೀವಾನಾಂ ಮುಕ್ತಾವಣುತ್ವಂ ಸಿದ್ಧಮ್ '
೫.೨೫ ರಲ್ಲಿ 'ಲಭಂತೇ ಇತ್ಯನೇನ ಮುಕ್ತಾನಾಂ ಬಹುತ್ವಂ ಸ್ಪಷ್ಟಮುಕ್ತಮ್ '
೫.೨೯ ರಲ್ಲಿ 'ಮಹೇಶ್ವರಮಿತ್ಯನೇನ .... '
೮.೧೧ರಲ್ಲಿ ವದಂತೀತ್ಯನೇನ ಬ್ರಹ್ಮಣಃ ಸರ್ವಶಬ್ದಾವಾಚ್ಯತ್ವಂವದಂತೋ ನಿರಸ್ತಾಃ

ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ನಿರಾಕರಣೆ

ಕೆಲವರ ವಾದವಿದೆ : ವಾದ ಮಾಡುವುದನ್ನು ಬಿಟ್ಟು ಕೂತು ಅನುಭವಿಸು. ಸತ್ಯದ ಅನ್ವೇಷಣೆಗೆ ವಾದದ ಉಪಯೋಗವಿಲ್ಲ. ಒಳಗಿನದನ್ನು ಅರಿಯಲು ಹೊರಗಿನ ಸಾಧನ ಸಮರ್ಥವಲ್ಲ ಅಂತ.

ಕಾಣುವ ಸತ್ಯ ಒಳಗಿನದಾದರೂ ಹೊರಗಿನದು ಬೇಕು. ಇದ್ದದ್ದೇ ಕಾಣಲು ಸಮರ್ಥ ಎಂದಾದರೆ ಇದುವರೆಗೂ ಕಂಡಿಲ್ಲವೇಕೆ ? ವಾದ ಮಾಡುವುದನ್ನು ಬಿಟ್ಟು ಕೂಡುವುದಲ್ಲ.

ವಾದ ಮಾಡುವುದನ್ನೇ ಕೂಡುವುದರ ಬಗೆ ಎಂದರು ಬಲ್ಲವರು.

ಅದಕ್ಕಾಗಿ ಈ ವಿಮರ್ಶೆ, ಖಂಡನೆ ಮೊದಲಾದ್ದು. ಇದು ವನಮಾಲಿಗಳಿಗೂ ತಿಳಿದಿತ್ತು. ಮಧುಸೂದನರಿಗೂ ತಿಳಿದಿತ್ತು. ಹಗಲು ರಾತ್ರಿಗಳನ್ನು ಸಮನ್ವಯ ಮಾಡುವ ಶಾಂತಿಪ್ರಿಯರಿಗೆ ತಿಳಿದಿಲ್ಲ. ಈ ಭೂಮಿಯ ನೆತ್ತರನ್ನು ಕಳಕೊಂಡ, ವಾದ ಮಾಡಿ ತತ್ತ್ವಬೋಧೆಯಾಗದೆಂಬ ಬೌದ್ಧಿಕ ಆಲಸಿಗಳಿಗೆ ಇದರ ಬಗ್ಗೆ ಅಸಡ್ಡೆ. ಅದಕ್ಕಾಗೊಂದು ತರ್ಕ.

ಇನ್ನೂ ಕೆಲವರ ನಂಬಿಕೆಯಿದೆ. ತಮ್ಮ ನಂಬಿಕೆಯನ್ನು ಮಾತ್ರ ಸಾಧಿಸಲು ಬಳಸುವ ವಾದ. ಉಳಿದಂತೆ ವಾದವನ್ನೂ ಮಾಡಬಾರದೆಂಬ ನಂಬಿಕೆ. ವಾದ ಬೇಕಿಲ್ಲ ಎಂಬುವವರ ವಾದವಲ್ಲ ಇದು. ವಾದ ಸಲ್ಲ ಎಂಬುವವರ ನಂಬಿಕೆ. ಹಿರಿಯರ ಮಾತಿಗೆ ವಾದಿಸಬಾರದು. ಹಿರಿಯರಿಲ್ಲದಿದ್ದರೆ ಅರಾಜಕತೆ ಉಂಟಾದೀತು.

ಇದೂ ಸಹ ಹಿರಿತನ ಉಳ್ಳ ಹಿರಿಯರನ್ನು ಕಾಣದ್ದರ ಫಲ. ವಾದಿಸಬೇಕು. ಎದುರು ವಾದಿಸಬಾರದು. ಆದರೆ ಎದುರಿನಲ್ಲೇ ವಾದಿಸಬೇಕು. ಹಿಂದಲ್ಲ. ಮುಂದೆ. ಚೆನ್ನಾಗಿಯೇ ವಿಮರ್ಶಿಸಬೇಕು. ಸರಿ ತಪ್ಪು ಮನವರಿಕೆಯಾಗುವತನಕ. ಮರ ತುಂಡಾಗುವ ತನಕ. ಬುಡ ಮೇಲಾದ ಮರ ತುಂಡಾಗಬೇಕು. ಬುಡ ನೆಟ್ಟಗಿದ್ದುದಲ್ಲ.

ವನಮಾಲಿಗಳು ಮಧುಸೂದನರ ವ್ಯಾಖ್ಯಾನವನ್ನು ಪ್ರಾಯಶಃ ಒಪ್ಪಿಯೇ ನಡೆದಿದ್ದಾರೆ. ಅಪರೂಪಕ್ಕೊಮ್ಮೆ ಸುಮ್ಮನೆ ನಿಂತಿದ್ದಿದೆ[1]. ಅಲ್ಲಲ್ಲಿ ಹೀಗಳೆದಿದ್ದೂ ಇದೆ. ಉದಾಹರಣೆಗೆ :

- ವಿಶ್ವಮಿಥ್ಯಾತ್ವನಿರಾಕರಣ (೨.೧೬),
- ಪಂಚಕೋಶವಿಚಾರ (೨.೧೮),
- ಸಪ್ತಭೂಮಿಕಾವಿಚಾರ (೩.೧೮),
- ಚಿತ್ತವೃತ್ತಿವಿಚಾರ (೬.೨೦),
- ತತ್ತ್ವಜ್ಞಾನಿಯು ದುರ್ಲಭ (೭.೩),
- ಕ್ಷೇತ್ರಜ್ಞವಿಚಾರ (೧೩.೨),
- ತಟಸ್ಥಲಕ್ಷಣವಿಚಾರ (೧೩.೪),
- ವಾಸುದೇವ ನಿರ್ವಿಕಲ್ಪಕನಲ್ಲ(೧೪.೨೭) ಇತ್ಯಾದಿ.

[1] ೧೮.೧೮ ರಲ್ಲಿ ಮಧುಸೂದನರ ಅಭಿಪ್ರಾಯವನ್ನು 'ಕೇಚಿತ್ತು ' ಎಂದು ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ. ನಿರಾಕರಿಸಿಲ್ಲ.

ಪ್ರಮೇಯ ಸಂಗ್ರಹ

ತತ್ತ್ವಶಾಸ್ತ್ರದಲ್ಲಿ ನಿಜ ತಿಳಿವ ಅಪೇಕ್ಷೆಯವರಿಗೆ ಸಮಸ್ಯೆಗಳು ಅನೇಕ. ಅಂತಹ ಕೆಲ ವಿಚಾರಗಳನ್ನು ವನಮಾಲಿಗಳು ಸಮಗ್ರವಾಗಿ ಆದರೂ ಚಿಕ್ಕದಾಗಿ ಚರ್ಚಿಸಿದ್ದಾರೆ:

ಭೇದಸತ್ಯತ್ವ ಸಮರ್ಥನೆ, ತತ್ತ್ವಮಸಿಶ್ರುತ್ಯರ್ಥ (೨.೧೩)
ಜೀವನಿಗೆ ದುಃಖಸಂಬಂಧ (೨.೧೫)
ಪಂಚಕೋಶವಿಚಾರ (೨.೧೮)
ನಿಷ್ಕಾಮಕರ್ಮ ಮತ್ತು ಕಾಮ್ಯಕರ್ಮ (೨.೪೦ ಮಧುಸೂದನರಲ್ಲೂ ಇದೆ)
ಜೀವನ ವಾಸ್ತವಿಕಾಭಿಮಾನಿಕಕ ರ್ತೃತ್ವ (೨.೧೯)
ಸಪ್ತಭೂಮಿಕೆಗಳು (೩.೧೮)
ಭಗವಂತನ ಸಚ್ಚಿದಾನಂದ ವಿಗ್ರಹ (೪.೬)
ಅರ್ಜುನನಿಗೆ ಉಪದೇಕ್ಷ್ಯಂತಿ ಹೇಗೆ ಸರಿ ? (೪.೩೪)
ಜೀವಾಣುತ್ವದ ಸ್ಥಾಪನೆ (೫.೧೭)
ನಿರ್ವಿಕಲ್ಪಕಜ್ಞಾನವು ಮೋಕ್ಷಹೇತುವಲ್ಲ (೫.೨೯) ಸಮಾಧಿಗೂ ಸುಷುಪ್ತಿಗೂ ವ್ಯತ್ಯಾಸ (೬.೨೧)

ನಾಲ್ಕು ತೆರನಾದ ಮುಕ್ತಿ (೮.೧೧)
ಅಸತ್ಕಾರ್ಯವಾದನಿರಾಕರಣೆ (೮.೧೯, ಮಧುಸೂದನಸರಸ್ವತಿಗಳೂ ಒಪ್ಪುವ ವಿಷಯವಿದು)
ಜಯವಿಜಯರೂ ಪ್ರಕೃತಿಭಾಗದ ಹರಿಲೋಕದಲ್ಲಿದ್ದಾರೆ. (೮.೨೧)
ದೇವರಿಗೆ ಪಕ್ಷಪಾತವಿಲ್ಲ (೯.೯)
ಮೈಮರೆತ ವಿಶೇಷಣಗಳು (೯.೩೪ , ೧೨.೬ , ೧೨.೨೦)
ಭಗವಂತನ ಪರವಾಗಿ ಶಬ್ದಗಳ ನಿರ್ವಚನ (೧೦.೧೨)
ಭಗವಂತನ ಐಶ್ವರ್ಯಯ ಎಲ್ಲೆ (೧೧.೨೦)
ಜೀವನಿಗೆ ದುಃಖಸಂಬಂಧ (೧೩.೨೦)
ಜೀವಕರ್ತೃತ್ವ (೧೩.೨೯, ೧೪.೧೯)
ಮತಗಳ ಆಸುರತ್ವ ವಿವೇಚನೆ (೧೬.೨೦)
ಯಾಗೀಯಹಿಂಸೆ ಅನರ್ಥಕ್ಕೆ ಕಾರಣವಲ್ಲ (೧೮.೭)
ಜೀವನ ಕರ್ತೃತ್ವಾಭಿಮಾನ (೧೮.೧೬) ಇತ್ಯಾದಿ

ಅಪೂರ್ವಾರ್ಥಗಳು

ಕೆಲವು ಪದಗಳಿಗೆ ಸ್ವರಸವಾದ ಅರ್ಥವಿವರಣೆ ಹಾಗೂ ಸ್ಪಷ್ಟೀಕರಣದ ನೆಪದಲ್ಲಿ ಹೊಸ ಅರ್ಥಗಳನ್ನು ತಿಳಿಸುವುದು ಅಲ್ಲಲ್ಲಿ ಕಾಣಸಿಗುತ್ತದೆ.:

- ಸಮ ಎಂಬ ಶಬ್ದಕ್ಕೆ ಲಕ್ಷ್ಮೀಸಹಿತನಾದ ಶ್ರೀಹರಿ ಎಂದು ಅರ್ಥ (೨.೩೮)
- ಯಜ್ಞದಲ್ಲಿ ಉಳಿದದ್ದನ್ನು ಉಣ್ಣಬೇಕು ಅಂದರೆ ನೈವೇದ್ಯಮಾಡಿ ಉಳಿದದ್ದು ಎಂದರ್ಥ(೩.೧೩)
- ಮಾಸಗಳಲ್ಲಿ ಮಾರ್ಗಶೀರ್ಷಕ್ಕೆ ಏನು ಮಹತ್ವ ? (೧೦.೩೫)
- ಎಂಜಲು ಅಂದರೇನು ? ಒಬ್ಬನು ತಿಂದು ಉಳಿದಿದ್ದು ಎಂದಷ್ಟೇ ಅಲ್ಲ. ಅದು ಶಾಸ್ತ್ರಗಳಿಂದ ವಿಹಿತವಲ್ಲದ್ದೂ ಆಗಿರಬೇಕು (೧೭.೧೦)
- ದೇವರ ನಾಮವನ್ನು ಹೇಳುವುದು, ಸ್ಮೃತಿಗಳಲ್ಲಿ ಹೇಳಿದ ಕರ್ಮಗಳನ್ನು ಮಾಡುವುದು ಮೊದಲಾದ್ದು ಶೂದ್ರರಿಗೂ ಆವಶ್ಯಕ(೧೭.೨೩)

ಗೀತೆಗೆ ಹೊಸ ಆಯಾಮದ ಅರ್ಥಗಳು

ಅಲ್ಲಲ್ಲಿ ಗೀತೆಯ ಶ್ಲೋಕಗಳಿಗೆ ಯಾವ ಪೂರ್ವಾಚಾರ್ಯರೂ ನೀಡದ ಅರ್ಥಗಳನ್ನು ಕೊಟ್ಟು ಕೃಷ್ಣಗೀತೆಯ ಅರ್ಥವಿಸ್ತಾರವನ್ನೂ ಆಕರ್ಷಣೆಯನ್ನೂ ಹೆಚ್ಚಿಸಿದ್ದಾರೆ. ಅದರಲ್ಲಿ ಪ್ರಮುಖವಾದದ್ದು ಕೆಲವು.

ಹನ್ನೆರಡನೇ ಅಧ್ಯಾಯದಲ್ಲಿ ಯಾರಿಬ್ಬರ ಮಧ್ಯದ ತುಲನೆ ? ನಿರ್ಗುಣ ಬ್ರಹ್ಮ ಮತ್ತು ಸಗುಣ ಬ್ರಹ್ಮನ ಉಪಾಸಕರ ಮಧ್ಯೆ ಅಂತ ಎಲ್ಲ ಅದ್ವೈತ ವ್ಯಾಖ್ಯಾನಗಳು. ಮಧುಸೂದನರದ್ದೂ ಹಾಗೇ. ಮಧ್ವಾಚಾರ್ಯರ ವ್ಯಾಖ್ಯಾನ ಭಗವಂತನ ಮತ್ತು ಲಕ್ಷ್ಮಿಯ ಉಪಾಸಕರ ಮಧ್ಯೆ ಅಂತ. ವನಮಾಲಿಗಳು ಇದನ್ನು 'ಮಹಾಂತಸ್ತು ' ಎಂದು ಉಲ್ಲೇಖಿಸುತ್ತಾರೆ. ದೇವರು ಮತ್ತು ಜೀವನ ಉಪಾಸಕರ ಮಧ್ಯೆಯ ತುಲನೆ ಎಂಬ ಬೇರೊಂದು ವ್ಯಾಖ್ಯೆಯನ್ನೂ ಅವರು ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ. ಯಾರದೋ ತಿಳಿದಿಲ್ಲ. ರಾಮಾನುಜರದ್ದೂ ಈ ಅಭಿಪ್ರಾಯ ಸ್ಫುಟವಾಗಿಲ್ಲ. ಭಕ್ತಿಯೋಗದ ಮತ್ತು ಅಷ್ಟಾಂಗಯೋಗದ ಸಾಧಕರ ಮಧ್ಯೆ ಅಂತ ವನಮಾಲಿಗಳ ವ್ಯಾಖ್ಯೆ. ಅಷ್ಟಾಂಗ ಯೋಗದ ಸಾಧಕರ ಬಗೆಗೆ ಮಾತಾಡಿದ್ದು ಬಲು ಸೊಗಸಾದ ಹೊಸತನ.

ಹದಿನೈದನೇ ಅಧ್ಯಾಯದಲ್ಲಿ ಭಗವಂತ ತಾನು ಕ್ಷರ ಮತ್ತು ಅಕ್ಷರರನ್ನು ಮೀರಿದವನು ಎನ್ನುತ್ತಾನೆ. ಇಲ್ಲಿ ಅಕ್ಷರ ಎಂದರೆ ಯಾರು ? ಲಕ್ಷ್ಮೀದೇವಿ ಅಂಬೋದು ಮಹಾಂತರ ಅಂಬೋಣ. ಹರಟೆಯ ಹಟ್ಟಿಯಲ್ಲಿ ಮಾತಾಡುವರಿಗೇನೋ ಕಮ್ಮಿಯಿಲ್ಲ. ಮತ್ತೆ ಕೆಲವರದು

ಮತ್ತೆ ಹಲವು ರೀತಿ. ಬಹುಶಾಖೆ. ಅನಂತ ತೆರನಾದ್ದು. ಲಕ್ಷ್ಮಿಯನ್ನು ಜೊತೆಸೇರಿಸಿ ಮುಕ್ತರನ್ನೂ ಹಿಡಿದು ವ್ಯಾಖ್ಯಾನಿಸಿದ್ದಾರೆ ವನಮಾಲಿಗಳು.

ಹಾಗೇ ನಾಲ್ಕನೇ ಅಧ್ಯಾಯದಲ್ಲಿ ೨೫ ಮತ್ತು ೨೬ನೇ ಶ್ಲೋಕಗಳನ್ನು ನಾಲ್ಕು ಆಶ್ರಮಗಳ ಪರವಾಗಿ ವ್ಯಾಖ್ಯಾನಿಸಿರುವುದು , ಎಂಟನೇ ಅಧ್ಯಾಯದ ಆರಂಭದ ಪ್ರಶ್ನೆಗಳಿಗೆ ಸಾರ್ಥಕ್ಯ ವಿವರಿಸುವುದು . ಹೀಗೇ ಹೊಸತನ ಬಯಸುವವರಿಗಂತೂ ಬಹಳಷ್ಟು ವಿಷಯಗಳು ಇಲ್ಲಿವೆ.

ಪುಸ್ತಕ ಶೋಧನೆಯ ಬಗ್ಗೆ

ಈ ಶೋಧಕ್ಕಾಗಿ ಬಳಸಿರುವುದು ಮೂರು ಹಸ್ತಪ್ರತಿಗಳ ನಕಲು.

1. ಜಮ್ಮುವಿನ ರಣಬೀರ್ ಗ್ರಂಥಾಲಯದಲ್ಲಿನ ಹಸ್ತಪ್ರತಿ. ದೇವನಾಗರಿ ಲಿಪಿಯ ಪ್ರತಿ. ಆದರೆ ಅಕ್ಷರಗಳು ಅಸ್ಪಷ್ಟ. ಕೆಲವೆಡೆ ಶಾರದಾ ಲಿಪಿಯಂತಿದೆ. ಸಮಗ್ರವಾಗಿದೆ. ಆದರೆ ಲೇಖಕ ದೋಷಗಳು ಬಹಳ.

2. ಪೂನಾದ ಭಂಡಾರ್ಕರ್ ಗ್ರಂಥಾಲಯದಲ್ಲಿನ ದೇವನಾಗರಿ ಹಸ್ತಪ್ರತಿ. ಅಸಮಗ್ರ. ಅತಿ ಶುದ್ಧವಾದ ಪಾಠ. ಸುಂದರ ಬರವಣಿಗೆ. ಮೊದಲ ಪತ್ರದಿಂದ ಕೊನೆಯ ಪತ್ರದವರೆಗೂ ಇದೆ. ಆದರೆ ಮಧ್ಯೆ ಮಧ್ಯೆ ಪತ್ರಗಳು ಕಳೆದಿವೆ. ಅರ್ಧಕ್ಕೂ ಹೆಚ್ಚು ಹಾಗೆ ಲುಪ್ತವಾಗಿದೆ.

3. ರಣಬೀರ್ ಗ್ರಂಥಾಲಯದ್ದೇ ಮತ್ತೊಂದು. ದೇವನಾಗರೀ ಲಿಪಿಯದ್ದು. ನಾಲ್ಕನೆ ಅಧ್ಯಾಯಕ್ಕೆ ಮಾತ್ರ. ವಿಶೇಷವೆಂದರೆ ಪ್ರತಿ ಶ್ಲೋಕಕ್ಕೂ ೨೦ ವ್ಯಾಖ್ಯಾನಗಳನ್ನು ಈ ಪ್ರತಿ ಹೊಂದಿದೆ.

ನಾನು ಸಂಸ್ಕೃತ ಪಂಡಿತನಲ್ಲ. ಹಸ್ತಪ್ರತಿಗಳ ಮೇಲಿನ ಒಲವಿನಿಂದ ಮಾಡಿದ್ದು. ಸ್ವಲ್ಪ ವೇದಾಂತ ಗ್ರಂಥಗಳ ಪರಿಚಯವಿದೆ. ಹಿರಿಯರ ಬಳಿ ಅಧ್ಯಯನ ನಡೆಸುತ್ತಿದ್ದೇನೆ. ಆದರೆ ಪೂರ್ವಮೀಮಾಂಸೆ ಮೊದಲಾದ್ದರ ಗಂಧವೂ ಇಲ್ಲ. ಈ ಪುಸ್ತಕದಲ್ಲೂ ಅದು ಎದ್ದು ಕಾಣುತ್ತದೆ. ಭಗವದ್ಗೀತೆಯ ಮೇಲಿನ ಮಾಧ್ವ ಗ್ರಂಥಗಳನ್ನು ಸ್ವಲ್ಪ ಅಭ್ಯಸಿಸಿದ್ದೆ. ಕೆಲವದರ ಶೋಧನೆಯಲ್ಲೂ ಪ್ರಯತ್ನಿಸಿದ್ದೆ. ಹಾಗಾಗಿ ಇಲ್ಲಿ ಅನೇಕ ಲೇಖಕ ದೋಷಗಳನ್ನು

ಸರಿ ಪಡಿಸಲು ಪ್ರಾಮಾಣಿಕ ಪ್ರಯತ್ನ ಮಾಡಲಾಗಿದೆ. ಪೂರ್ವಮೀಮಾಂಸೆಯ ಕೆಲವು ವಾಕ್ಯಗಳು ಹಾಗೂ ಕಣ್ಮುಚ್ಚಿದಾಗಲೂ ಕಾಣದ ಕೆಲವು ಶಬ್ದಗಳು ಹಾಗೇ ತಪ್ಪಿನಲ್ಲೇ ಉಳಿದಿವೆ. ಅರ್ಥವಾಗದೇ ಪ್ರಶ್ನಾರ್ಥಕ ಚಿಹ್ನೆಯಲ್ಲೇ ಉಳಿಸಲಾಗಿದೆ. ವಿದ್ವಾಂಸರ, ವಿದ್ಯಾರ್ಥಿಗಳ ಹಾಗೂ ಸಂಶೋಧಕರ ಸಲಹೆಗಳಿಂದ ಮುಂದಿನ ಆವೃತ್ತಿಗಳಲ್ಲಿ ಸರಿಪಡಿಸುವ ನಿರೀಕ್ಷೆಯಿದೆ.

ಇದುವರೆಗೂ ಪ್ರಕಟಗೊಳ್ಳದೇ ಉಳಿದಿದ್ದ ಈ ಕೃತಿಯನ್ನು ಕೈಲಾದ ಮಟ್ಟಿಗೆ ಶುದ್ಧಿಗೊಳಿಸಿ ಹೊರತಂದ ಸಮಾಧಾನವಿದೆ. ಸುಮಾರು ಮುನ್ನೂರಕ್ಕೂ ಹೆಚ್ಚು ವಾಕ್ಯಗಳು ಓದಲಿಕ್ಕಾಗದೇ ಕಗ್ಗಂಟಾಗಿದ್ದವು. ಈಗ ಇನ್ನೂ ಇಪ್ಪತ್ತು ಮೂವತ್ತು ಬಿಡಿಸಲಾಗಿಲ್ಲ. ಹೊಸ ಶಬ್ದಗಳಿಂದಲೇ ತಿದ್ದುವ ಸಾಹಸಕ್ಕೆ ಕೈ ಹಾಕಿಲ್ಲ. ನಾನು ಮಾಡಿರುವುದು ಲಿಪಿಕಾರರ ಕೆಲಸ. ಸ್ವಲ್ಪ ಮಟ್ಟಿನ ಶೋಧನೆ.

ವಿಸ್ತಾರವಾದ ಅಡಿ ಟಿಪ್ಪಣಿಗಳನ್ನು ಕೊಡಲಾಗಿದೆ. ಹಸ್ತಪ್ರತಿಯಲ್ಲಿನ ಪಾಠದೋಷಗಳ ಬಗ್ಗೆ, ಕೆಲವು ಅರ್ಥಗಳ ಬಗ್ಗೆ, ಪಾಠಾಂತರಗಳ ಬಗ್ಗೆ, ಸಂಭವನೀಯ ಪಾಠದ ಹಾಗೂ ಆಕರಗ್ರಂಥಗಳ[1] ಬಗ್ಗೆ ತಿಳಿಸಲಾಗಿದೆ. ಅಲ್ಲದೆ ಮಾಧ್ವ ವ್ಯಾಖ್ಯಾನಗಳ ಹಾಗೂ ಮಧುಸೂದನ ಸರಸ್ವತಿಗಳ ವ್ಯಾಖ್ಯಾನದ [2] ಸೂಕ್ತ ವಾಕ್ಯಗಳ ಸಂಗ್ರಹಗಳೂ ಅಡಿಟಿಪ್ಪಣಿಯಲ್ಲಿವೆ. ಇವು ವನಮಾಲಿಗಳ ಈ ಗ್ರಂಥದ ಮುಖ್ಯ ಉದ್ದೇಶವನ್ನು ಸೂಚಿಸುವ ವಾಕ್ಯಗಳು. ಜೊತೆಗೆ ಶಂಕರ -ರಾಮಾನುಜ ಮೊದಲಾದವರ ವ್ಯಾಖ್ಯಾನಗಳ ಕೆಲವು ವಾಕ್ಯಗಳೂ ಇಲ್ಲಿವೆ.

ವನಮಾಲಿಗಳು ಉದಾಹರಿಸಿರುವ ಗ್ರಂಥಗಳನ್ನು ಪರಿಶಿಷ್ಟ ೧ ರಲ್ಲಿ ಪಟ್ಟಿ ಮಾಡಲಾಗಿದೆ. ಪರಿಶಿಷ್ಟ ೨ ರಲ್ಲಿ ಅವರ ಗ್ರಂಥಗಳ ಆದ್ಯಂತ ಶ್ಲೋಕಗಳನ್ನು ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಭಗವದ್ಗೀತೆಯ ಶ್ಲೋಕಾರ್ಧಾನುಕ್ರಮಣಿಕೆಗಳು ಈಗಾಗಲೇ ಅನೇಕ ಪುಸ್ತಕಗಳಲ್ಲಿ ಮುದ್ರಿತಗೊಂಡಿರುವುದರಿಂದ ಮತ್ತೆ ಇಲ್ಲಿ ಮುದ್ರಿಸಲಾಗಿಲ್ಲ. ಈ ಗ್ರಂಥದ ಇ ಪ್ರತಿ ಯುನಿಕೋಡ್ ನಲ್ಲಿ ದೊರೆಯುವುದರಿಂದ ನೇರವಾಗಿಯೇ ಗ್ರಂಥದೊಳಗೆ ಹುಡುಕಲು ಅನುವಾಗಿಸಲಾಗಿದೆ.

ನಾನು ಓದಿರುವುದು ಆಧುನಿಕ ಪಾಶ್ಚಾತ್ಯ ವೈದ್ಯಕೀಯ ವಿಜ್ಞಾನವನ್ನು. ಅದರ ಪ್ರಮುಖ ಅಂಗಗಳಾದ ಸಾಮಾಜಿಕ ಆರೋಗ್ಯ, ಮನಶ್ಶಾಸ್ತ್ರ, ಹಾಗೂ ಆಹಾರ ವಿಜ್ಞಾನದ ಬಗ್ಗೆ ಭಗವದ್ಗೀತೆಯ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಪರಿಶಿಷ್ಟವೊಂದನ್ನು ಸೇರಿಸುವ ಅಪೇಕ್ಷೆಯಿತ್ತು.

[1] ಆಕರ ಗ್ರಂಥಗಳನ್ನು ಗುರುತಿಸುವಾಗ ಬೇರೆ ಬೇರೆ ಆವೃತ್ತಿಗಳನ್ನು ಬಳಸಿರುವುದರಿಂದ ಇಲ್ಲಿ ಸೂಚಿಸಿರುವ ಅಧ್ಯಾಯ ಸಂಖ್ಯೆ ಶ್ಲೋಕ ಸಂಖ್ಯೆಗಳು ಬೇರೊಂದು ಆವೃತ್ತಿಯ ಅಧ್ಯಾಯ ಶ್ಲೋಕ ಸಂಖ್ಯೆಗಳಿಗಿಂತ ಸ್ವಲ್ಪ ಭಿನ್ನವಾಗಿರುತ್ತವೆ. ಇದನ್ನು ಗಮನಿಸಿ ಪೂರ್ಣ ಹೊಂದಾಣಿಕೆ ಇಲ್ಲವೆಂಬುದನ್ನು ಉಪೇಕ್ಷಿಸಬೇಕು ಎಂದು ವಿನಂತಿಸುತ್ತೇನೆ. ಇನ್ನೂ ಕೆಲವು ಸಿಕ್ಕಿಲ್ಲ. [2] ಕೆಲವೆಡೆ ವ್ಯಾಕರಣದ ದೃಷ್ಟಿಯಲ್ಲಿ ಅಥವಾ ಪಾಠಶುದ್ಧಿಯಲ್ಲಿ ವ್ಯತ್ಯಾಸಗಳು ಕಂಡುಬಂದಲ್ಲಿ ಮಧುಸೂದನರ ಟಿಪ್ಪಣಿಯನ್ನು ಮೊದಲ ಸ್ತರದಅಡಿ ಟಿಪ್ಪಣಿಯಲ್ಲಿ ಕೊಡಲಾಗಿದೆ . ಉದಾಹರಣೆಗೆ ೧೮.೬೧.

ಸಮಯ ಹಿಡಿಯುವ ಕೆಲಸ. ಆದರೆ ಈಗಾಗಲೇ ದಿನ ತುಂಬಿದೆ. ಅದಕ್ಕಾಗಿ ಇದರ ಮುದ್ರಣವನ್ನು ಮುಂದೆ ಹಾಕಬಾರದೆಂಬ ಕಾರಣಕ್ಕೆ ಆಸೆ ಪೂರ್ತಿಯಾಗಿಲ್ಲ. ಹಾಗೇ ದೀರ್ಘ ವಿಷಯಾನುಕ್ರಮಣಿಕೆಯೊಂದನ್ನು ಮಾಡುವ ಅಪೇಕ್ಷೆಯಿತ್ತು. ಸದ್ಯಕ್ಕೆ ಮಾಡಲಾಗಿಲ್ಲ. ಪ್ರಮುಖ ವಿಚಾರಗಳ ಬಗ್ಗೆ ಸಂಕ್ಷಿಪ್ತವಾದದ್ದನ್ನು 'ಪ್ರಮೇಯ ಸಂಗ್ರಹ' ದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ. ಮುಂದಿನ ಬಾರಿ ಪ್ರಯತ್ನಿಸುವ ಹುರುಪಿದೆ.

ಕೊನೆಯಲ್ಲೊಂದು ಮಾತು. ಗಣಕಯಂತ್ರದಲ್ಲಿ ಲಿಪಿ ಮಾಡಲು ಆರಂಭಿಸಿದಾಗ ಬಂದ ಮುಖ್ಯ ತೊಡಕು ಯಾವ ತಂತ್ರಾಂಶ (software) ಬಳಸುವುದು ? ಅಂತ. ಅದನ್ನು ಕುರಿತಾದ ಅಧ್ಯಯನದಿಂದ ನಮಗೆ ತಿಳಿಯಿತು - LATEX (ಲಾಟೆಕ್), XƎLATEX (ಎಕ್ಸ್ ಇ ಲಾಟೆಕ್) ಮೊದಲಾದ ವೈಜ್ಞಾನಿಕ ಮತ್ತು ಉಚಿತ ತಂತ್ರಾಂಶಗಳೇ ಬಹೂಪಯೋಗಿ ಹಾಗು ಬಹುಕಾಲ ಬಾಳಿಕೆ ಬರುವ ತಂತ್ರಾಂಶಗಳು -ಅಂತ. ಆದರೆ ಭಾರತೀಯ ಭಾಷಾಕ್ಷೇತ್ರದಲ್ಲಿ ಅದರಲ್ಲೂ ಹಸ್ತಪ್ರತಿಗಳ ಗಣಕೀಕರಣದಲ್ಲಿ ಪ್ರಾಯಶಃ ಇವುಗಳನ್ನು ಬಳಸುತ್ತಿಲ್ಲ. ಆದ್ದರಿಂದಲೇ ಭಾರತೀಯ ಲಿಪಿಗಳಿಗೆ ಸುಂದರ ಅಕ್ಷರಗಳು ಈ ತಂತ್ರಾಂಶದಲ್ಲಿ ಉಪಲಬ್ಧವಿಲ್ಲ. ಅಲ್ಲದೇ ಈ ತಂತ್ರಾಂಶಗಳ ಬಳಕೆ ಕಷ್ಟಸಾಧ್ಯವೂ ಹೌದು. ಆದಾಗ್ಯೂ ವೈಜ್ಞಾನಿಕತೆ, ಉತ್ತಮ ಗುಣಮಟ್ಟ, ಭದ್ರ ಬುನಾದಿಯ ತಂತ್ರಜ್ಞಾನ ಮೊದಲಾದವು ಇದರ ಹಿರಿಮೆ. ಆದ್ದರಿಂದ ನಮ್ಮ ಲಿಪಿಗಳನ್ನು ಅದರಲ್ಲೇ ತಯಾರಿಸುತ್ತಿದ್ದೇವೆ.

ನಮ್ಮ ಹಿಂದಿನ ಪ್ರಕಟಣೆಗಳಾದ "ನ್ಯಾಯರತ್ನಾವಲೀ" ಹಾಗೂ "ಶಿವಸ್ತುತಿ" ಪುಸ್ತಕಗಳಲ್ಲಿ ಈ ತಂತ್ರಾಂಶವನ್ನೇ ಬಳಸಲಾಗಿದೆ. ಇತ್ತೀಚಿಗೆ ಹೈದರಾಬಾದಿನ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯಿಂದ ಪ್ರಕಟವಾದ ಗದಾಧರ ಭಟ್ಟಾಚಾರ್ಯರ "ಶಕ್ತಿವಾದ" ಹಾಗೂ ಬೆಂಗಳೂರಿನ ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದಿಂದ ಪ್ರಕಟವಾದ ವೇಂಕಟಪತ್ಯಾಚಾರ್ಯರ "ತಂತ್ರಸಾರಸಂಗ್ರಹವ್ಯಾಖ್ಯಾನ" ಗಳೂ ಈ ತಂತ್ರಾಂಶವನ್ನೇ ಬಳಸಿವೆ ಎಂಬುದು ಪ್ರೋತ್ಸಾಹಕರ ಸಂಗತಿ. ಫಾಂಟ್ ಹಾಗೂ ಪುಟ ವಿನ್ಯಾಸದ ದೃಷ್ಟಿಯಿಂದ ಏನೇ ನ್ಯೂನತೆ ಇದೆ ಎನಿಸಿದರೂ ಅದನ್ನು ಓದುಗರು ಮನ್ನಿಸಬೇಕು. ನಿಮ್ಮ ಕ್ಷಮೆ ತಂತ್ರಜ್ಞಾನದ ಬೆಳವಣಿಗೆಗೆ ಪೂರಕವಾಗುತ್ತದೆ.

ಒಪ್ಪು ತಪ್ಪುಗಳನ್ನು ತಲೆ ಬಾಗಿ ಸ್ವೀಕರಿಸುತ್ತೇನೆ.

ಇತಿ,
ಶ್ರೀನಿಧಿ ವಾಸಿಷ್ಠ
ಬೆಂಗಳೂರು

Bibliography

[1] Dr. Surendranath Dasgupta, A History of Indian Philosophy, Motilal Banarsidas, 1991

[2] Dr.B.N.K. Sharma, History of Dvaita School Of Vedānta and its Literature, Motilal Banarsidas Publishers Private Limited, Delhi, Third revised edition, 2000

[3] डा. ए. वि. नागसम्पिगे, वनमालिमिश्रविरचितः श्रुतिसिद्धान्तसङ्ग्रहः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु, २००२

[4] Balacharya Khuperkar and Prof. R.P. Nipanikar, Vanamalimisra's Sruti-siddhanta-dipika and Sruti-siddhanta-prakasa, Shivaji University, Kolhapur, 1968

[5] खुपेरकरबालाचार्यः, वनमालिमिश्रविरचिता ब्रह्मसूत्रसिद्धान्तमुक्तावलिः, आनन्दाश्रममुद्रणालयम्, पुणे, १९४२

[6] नरसिंहाचार्यवरखेडकर्, वनमालिमिश्रकृतः मध्वमुखालङ्कारः वाराणसी, १९३६,

[7] देविप्रसादशर्मा, वनमालिमिश्रकृतः वेदान्तसिद्धान्तसङ्ग्रहः, चौखम्बा मुद्रणालयम्, वाराणसी, १९१३,

[8] बन्नञ्जे गोविन्दाचार्यः, श्रीमदानन्दतीर्थकृतसर्वमूलग्रन्थाः, अखिलभारतमाध्वमहामण्डलम्, १९६८ - ८०,

[9] बाळगारु रुचिराचार्यः, गीताभाष्य-प्रमेयदीपिका, श्रीआचार्यविद्याधिष्ठानम्, बेङ्गलूरु, २००२,

[10] डि. प्रह्लादाचार्यः तथा पर्कळ वेङ्कटेश बायरि, गीताभाष्य-प्रमेयदीपिका-भावदीपिका-भावरत्नकोशः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु, १९९८-२००६,

[11] कृ. त. पाण्डुरङ्गिः तथा कृष्णाचार्यउपाध्यायः, श्रीमदानन्दतीर्थकृतगीतातात्पर्यनिर्णयः, द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम्, बेङ्गलूरु, २००७,

[12] दिनकर विष्णु गोखले, श्रीमद्भगवद्गीता तत्त्वप्रकाशिकाद्यष्टटीकोपेता, परिमल पब्लिकेशन्स, दिल्ली, २००१

[13] साधले इत्युपाह्वशम्भुजनुर्गजाननशर्मा , श्रीमद्भगवद्गीता शाङ्करभाष्याद्येकादशटीकोपेता, परिमल पब्लिकेशन्स, दिल्ली, २०००

[14] डा. व्यासनकेरे प्रभञ्जनाचार्यः, श्रीमदानन्दतीर्थकृतसर्वमूलग्रन्थाः, व्यासमध्वसेवाप्रतिष्ठानम्, बेङ्गलूरु, १९९९,

[15] डा. व्यासनकेरे प्रभञ्जनाचार्यः, व्याख्याद्वयसंवलिता श्रीमद्भगवद्गीता, व्यासमध्वसंशोधनप्रतिष्ठानम्, बेङ्गलूरु, २००६,

[16] डा. व्यासनकेरे प्रभञ्जनाचार्यः, श्रीपद्मनाभतीर्थभट्टारकविरचिता श्रीमद्भगवद्गीताभाष्यभावप्रदीपिका, व्यासमध्वसंशोधनप्रतिष्ठानम्, बेङ्गलूरु, २००८,

[17] डा. व्यासनकेरे प्रभञ्जनाचार्यः, श्रीनरहरितीर्थभट्टारकविरचिता गीताभाष्यभावप्रकाशिका, व्यासमध्वसंशोधनप्रतिष्ठानम्, बेङ्गलूरु, २००९,

[18] दिगम्बरशर्मा, गौतममुनिप्रणीतन्यायसूत्राणि, आनन्दाश्रममुद्रणालयम्, पुणे, १९८५,

[19] The New Catalogus Catalogorum, University of Madras, Volume 1 to 19. 1967-2007

[20] Descriptive Catalogue of Sanskrit Manuscripts, volume XIV, Dr.H.P.Malledevaru, ORI, University of Mysore, Mysore 1988

[21] PPS Shastri, A Descriptive Catalogue of Sanskrit Manuscripts in TMSSML, Tanjore, Volume XIV, 1932

[22] A Descriptive Catalogue of Sanskrit Manuscripts in TMSSML, Tanjore, Volume XXII, 1993

[23] Raghavan Nambiar, An Alphabetical List of Manuscripts in The Oriental Institute, Vadodara, Volume I, 1999

[24] Descrptive Catalougue of Manusripts in The Government Manuscripts Library, BORI, Pune, Volume IX - part 1 to 3, 1949-1963

[25] A Handwritten List of Manuscripts in Avadhani Collection, BORI, Pune

[26] Dr. Aryendra Sharma et. al., A Catalougue of The Sanskrit Manuscripts in The Osmania University Library, The Sanskrit Academy, Osmania University, Hyderabad, 1964

[27] http://ignca.nic.in/

[28] http://www.sub.uni-goettingen.de/ebene_1/fiindolo/gretil.htm

[29] http://faculty.washington.edu/kpotter/ckeyt/txt4.htm

[30] ಗೋಪಾಲಕೃಷ್ಣಾಚಾರ್ಯ ಗೌಡಗೆರೆ, ಗ್ರಂಥಮಾಲಿಕಾಪ್ರಸರ, ೧೯೯೮

[31] खरेकुलोत्पन्नः हरिसूनुः गणेशः, भारतइतिहाससंशोधकमण्डलस्थहस्तलिखितग्रन्थानुक्रमणिका, पूना १९६०

[32] P.K.Gode, "Maruta-mandana of Vanamalin and its date–between A.D.1575 and 1600", IHQ 22, 1946, 163-168. Reprinted SILH 2, 224-229

[33] P.K.Gode, "The so-called ms. of the Advaitasiddhikhandana mentioned by Aufrecht and its identification with the Nyayamrtasaugandhya of Vanamalin–between A.D.1575 and 1650", Maharaval Silver Jubilee Commemoration Volume (Dungarpur 1950), 288-293. Reprinted in SILH 2, 230-236

[34] P.K.Gode, "Vanamali Misra: a pupil of Bhattoji Diksita and his works–between A.D.1600 and 1660", ALB 10.4, 1947, 231-235. Reprinted in SILH 3, 13-16

[35] रा. स्वा. पञ्चमुखी, ब्रह्मसूत्रभाष्यम्-तत्त्वप्रकाशिका-भावदीपः, गुरुसार्वभौमश्रीराघवेन्द्रतीर्थप्रतिष्ठानम्, धारवाड, २००३

[36] पद्मपुराणम्, चौखम्बा मुद्रणालयम्, वाराणसी, २००७

[37] Lingapuranam, Venkateshvara Steam Press Edition, Bombay, 1906

Our Works

1. Nyayaratnavali - An ancient Sanskrit commentary on Vishnutattvavinirnaya, an epistemological treatise of Sri Madhwacharya, by his direct disciple Sri Padmanabha Tirtha.
The book also includes 6 other prakaranas of Sri Madhwacharya with the commentary of Sri Padmanabha Tirtha.

2. Shivastuti of Likuca Narayana Pandita,
With a commentary on it by Vaishvanathi Narayana Pandita.

3. Vivaha Ondu Kaipidi - By Dr H Satyanarayanacharya
A Kannada essay on the principles and practice of marriage as per Vaishnava tradition.

4. Drug-drushya sambandha vichara - By Prof. A Haridas Bhat
A summary in Sanskrit and Kannada of a philosophical scholarly debate that took place between the traditional stalwarts of Dvaita and Advaita traditions.



Coming Up

1. Padartha Viveka - By Sri Raghunatha Tirtha.
An independent Sanskrit thesis on the ontological classification of Dvaita School of Vedanta, with critical review of the ontology of Nyaya System.

2. Gitavivaranam by Sri Vishweshwara Tirtha
An ancient Sanskrit commentary on Bhagavadgita.

क्लैब्यं मा स्म गमः पार्थ नैतत् त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥



Bhagavad-gita is the message of dutifulness by Lord Krishna to the warriors on the battle ground - to those who are struggling, to those who are struggling to struggle, to those who are oppressed by evil forces, to those who are subjected to atrocities, to those who are confused of their fundamental duties. It is the inspiration; it is the path of hope; it is the destiny. It is a message to shrug the baggage of evil, and to surrender with complete devotion.

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥